184624

UNIVERSAL
LIBRARY
OU_184622
UNIVERSAL
LIBRARY

OSMANIA UNIVERSITY LIBRARY
Call No. 349.546 Accession No. 81181
Author शास्त्री, पी. पी. एस्. (संपा.).
Title श्रीमन्महाभारतम्, Vol. XI 1935
This book should be returned on or before the date last marked below.

THE

MAHĀBHĀRATA

(Southern Recension)

For the first time critically edited by

VIDYASAGARA VIDYAVACHASPATI

P. P. S. SASTRI, B. A. (OXON), M.A.,

Professor of Sanskrit and Comparative Philology
Presidency College, Madras, and Editor
Descriptive Catalogues of Sanskrit
and Telugu Mss. in the Tanjore
Palace Library.


Vol. XI—KARNA PARVAN.

PUBLISHED BY

V. RAMASWAMY SASTRULU & SONS

292, ESPLANADE, MADRAS.

All Rights Reserved.



PRINTED BY V. VENKATESWARA SASTRULU
OF V. RAMASWAMY SASTRULU & SONS
AT THE 'VAVILLA' PRESS, MADRAS.—1935

॥ श्रीरस्तु ॥

॥ श्रीमन्महाभारतम् ॥

तत्र

कर्णपर्व

मद्रपुरराजकीयकलाशालासंस्कृताचार्यैः
बि. ए. (आक्सन्), एम्. ए. (मद्रास्)
इत्यादिबिरुदाङ्कितैः
विद्यासागर विद्यावाचस्पति. पि. पि. सुब्रह्मण्यशास्त्रिभिः
दाक्षिणात्यशाखानुसारेण सविमर्शं संशोधितं

यत्र कृष्णार्जुनौ वीरौ
तत्र धर्मश्च सत्यं च



यत्र राजा युधिष्ठिरः ।
यतो धर्मस्ततो जयः ॥

कर्ण-३९—४०.

चेन्नपुर्यां
वाविळ्ळ रामस्वामिशास्त्रुलु अण्ड् सन्स्
इत्येतैः सम्भूय प्रकाशितम्

चेन्नपुरी
वाविल्ल मुद्रणालये
मुद्रितम्
१९३५.

INTRODUCTION.

I

In the preparation of the Karna Parvan for the Press, the following manuscripts fully representative of the Southern Recension, were utilised.

ಪ—represents the Principal Text printed. The Manuscript belongs to Mr. Krishnaswami Sastrigal, Sub-Registrar, Tanjore District. Its description is as follows:—Substance—palm-leaf, Size—$19\frac{1}{2} \times 2\frac{1}{4}$ inches; Leaves—116; Lines—10 to a page; Script-Telugu; Karna Parvan complete; Date of Transcription—1607 A. D.

ಕ—is used for additional readings, etc. The Manuscript belongs to Brahmasri Krishna Sastrigal, Palace Pauranikar, Trivandrum. Its description is as follows:—Substance—

palm-leaf; Size—$17\frac{1}{2} \times 2\frac{1}{4}$ inches; Leaves—139; Lines—10 to a page; Script-Grantha; Karna Parvan Complete.

—is used for additional reading etc. The Manuscript belongs to His Highness the Maharaja of Travancore and was made available to us through the kindness of Sir C.P. Ramaswami Aiyer, K. C. I. E., Legal and Constitutional Adviser to the State. Its description is as follows:—Substance—palm-leaf; Size—$14\frac{3}{8} \times 2\frac{1}{8}$ inches; Leaves:—152; Lines 10 to a Page; Script-Malayalam: Karna Parvan Complete : Date of Transcription–1765 A. D.

—is used for additional readings etc. The Manuscript was procured for us by Mr. K. K. Lakshminarayana Iyer of Kadayam village in the Tinnevelly District from Mr. Natesa Iyer. Its description is as follows:—Substance—palm-leaf; Size—$16\frac{1}{2} \times 1\frac{1}{4}$ Inches Leaves, 374 Lines, 7 to a page; Script Grantha; Karna Parvan complete.

ಕ—is used for additional readings, etc. The Manuscript belongs to Sri Suddhasattvam Doddayacharya Swamigal of Sriperumbudur in the Chingleput District. Its description is as follows:—Substance—palm-leaf ; Size—18¼ 1⅛ inches ; Leaves—228 ; Lines 6 to 7 to a page ; Script—Grantha ; Karna Parvan Complete.

II

From the Anukramaṇikādhyāya of the Ādi Parvan, it will be observed that, according to both the Southern and the Northern Recensions, the Karna Parvan should consist of 69 chapters. We find, however, that all the manuscripts utilised by us for the preparation of the Southern Recension of the Karna Parvan divide the Karna Parvan into 110 Chapters. From the last two columns of the table printed in page viii of the Introduction to Vol. I of our Edition of the Mahābhārata, it will be observed that the total number of chapters in all the Parvans of the Mahābhārata according to

the Southern Recensions comes to 1959. But in stanza 15 of Chapter 51 of the Ādi Parvan we are told that the Mahābhārata consists of one-hundred thousand stanzas divided into two-thousand chapters, distributed over one-hundred minor Parvans and eighteen major Parvans. In our edition of the Southern Recension of the Text, we have been editing the Text in eighteen major parvans, indicating all the 100 minor parvans. In the matter of adhyāyas also, we have been closely following the scheme given by the manuscripts represantative of the Southern Recension. We have therefore divided the Karna Parvan into 110 chapters in consonance with the evidence supplied by the Manuscripts though we have been told in the Anukramaṇikādhyāya of the Ādi Parvan that the Karna Parvan need consist only of 69 chapters. And the addition of 41 chapters under Karna Parvan helps us to arrive at the two thousand chapters for the whole Mahabharata according to the Southern Recension. The annexed table gives the scheme of chapters in each of the Parvans of

Mahābhārata according to both the Northern and the Southern Recensions.

From the Anukramanikādhyāya to the Ādi Parvan, it will be observed that the Karna Parvan should consist of 4,964 stanzas according to the Northern Recension and 4,900 stanzas only according to the Southern Recension. According to our Principal Text, the Karna Parvan consists of 5001½ stanzas.

III

SCHEME OF ADHYAYAS.

No.	Name of Parva.	As stated in the Anukramanikadhyaya to the Northern Recension Manuscripts and Editions.	As actually divided in the Northern Recension Printed Edition; Poona with Bhavadipa 1929—1933.	As actually divided in the Kumbakonam Edition 1906—1910 Mixed version of bothRecensions.	As stated in the Anukramanikadhyaya to Southern Recension Manuscripts.	As actually divided in the Southern Recension printed in Madras by the Vavilla Press 1931—1935.
I	Adi	227	234	260	218	218
II	Sabha	78	81	103	72	72
III	Aranya	269	315	315	269	269
IV	Virata	67	72	78	67	67
V	Udyoga	186	196	196	186	186
VI	Bhishma	117	122	122	118	118
VII	Drona	170	202	203	170	170

VIII	Karna	69	96	101	69	110
IX	Salya	59	65	66	59	59
X	Sauptika	18	18	18	18	18
XI	Stri	27	27	27	27	27
XII	Santi	329	365	375	339	339
XIII	Anusasana	146	168	272	156	156
XIV	Asvamedhika	103	92	118	133	133
XV	Asramavasika	42	39	41	42	42
XVI	Mausala	8	8	9	8	8
XVII	Mahaprasthanika	3	3	3	3	3
XVIII	Svargarohana	5	5	5	5	5
		1923	2108	2312	1959	2000

IV

CONCORDANCE.

KARNA PARVAN

(1931) Poona Edition with Bhavadipa Chapter.	(1907) Kumbakonam Edition Chapter.	Manuscripts of the Southern Recension Chapter.	(1935) Southern Recension Chapter.
1	1	1	1
2	omitted	omitted	omitted
3	omitted	omitted	omitted
4	omitted	omitted	omitted
5	2	2	2
6	3	3	3
7	4	4	4
8	5	5	5
9	6	6	6
10	7	7	7
11	8	8	8
12	9	9	9
13	10	10	10
14	11	11	11
15	12	12	12
22	13	13	13
23	14	14	14
24	15	15	15
25	16	16	16
26	17	17	17
27	18	18	18
28	19	19	19
29	20	20	20
30	21	21	21
31	22	22	22
32	23	23	23
33	24	24	24
34 (1–15)	25	25	25
,, (16–61)	26	26	26
,, (62–125)	27	27	27
,, (126–162)	28	28	28
35 (1–2)	29 (1–2)	29 (1–2)	29 (1–2)

Poona Edition with Bhavadipa Chapter.	Kumbakonam Edition Chapter.	Manuscripts of the Southern Recension Chapter.	Southern Recension Chapter.
35 (3–39)	29 (3–39)	omitted	omitted
,, (40–48)	,, (40–48)	,, (3–11)	,, (3–11)
36 (1–16½)	30 (1–17)	,, (12–27½)	30 (1–17½)
,, (17½–33)	,, (18–34)	30 (1–17½)	,, (18½–64)
37	31 (1–46)	,, (18½–64)	31 (1–28½)
38	32	31 (1–28½)	,, (29½–40½)
39 (1–12)	33 (1–13)	,, (29½–40½)	32
,, (13–35)	,, (14–38)	32	33
40	34	33	34
41	35	34	35
42 (1–35)	36 (1–39)	35*	36
,, (36–50)	,, (40–63)	36	37 (1–10)
43	37 (1–10)	37 (1–10)	,, (11–40½)
44 (1–30)	,, (11–40)	,, (11–40½)	38 (1–15)
,, (31–47)	,, (41–56)	38 (1–15)	,, (16–48)
45 (1–33)	38 (1–33)	,, (16–48)	39 (1–13½)
,, (34–48)	,, (34–46)	39 (1–13½)	,, (14½–50)
46 (44–57) (74–87)	39	,, (14½–50)	40
57	40	40	41
46 (5–37)	41	41	42
47	42	42	43
48	43	43	44
49 (1–38)	44 (1–41)	44	45
,, (39–58)	,, (42–77)	45	46
,, (59–92)	,, (78–110	46	47
50	45	47	48
51 (1–58)	46 (1–59)	48	49
,, (59–80)	,, (60–81)	49	50
52	47	50	51
53	48	51	52
54	49	52	53
55	50	53	54
56 (1–36)	51 (1–38)	54	55
,, (37–81)	51 (39–82)	55	56
,, (82–119)	,, (83–124)	56	

*अ—कोशे नाक्षाध्यायसमाप्तिः

Poona Edition with Bhavadipa Chapter.	Kumbakonam Edition Chapter.	Manuscripts of the Southern Recension Chapter.	Southern Recension Chapter.
16(1-36) 56(123-138) 16(37-51)	52	57	57
17	53	58	58
18	54	59	59
19	55	60	60
20	56	61	61
21 (1-3½)	57 (1-3)	62 (1-3½)	62 (1-3½)
58 (44-52)	,, (4-13)	,, (4½-13½)	,, (4½-13½)
59 (1-30)	,, (14-46)	,, (14½-46½)	,, (14-46½)
,, (31-67)	58	63	63
21 (10-40)	59	64	64
22	60	65	65
60 (1-22)	61	66	66
,, (23-92)	62	67	67
61 (1-33)	63	68	68
,, (34-60)	64 (1-28)	69	69
,, (61-74)	,, (29-43)	omitted	omitted
62 (1-6)	65 (1-7)	omitted	omitted
,, (7-84)	,, (8-38)	70	70
63	66	71	71
64	67	72	72
65	68	73	73
66	69	74	74
67	70	75	75
68	71	76	76
69	72	77	77
70 (1-41)	73	78*	78
,, (42-60)	74	79	79
71	75	80	80
72	76	81	81
73 (1-69)	77 (1-71)	82	82
,, (70-125)	77 (72-129)	83*	83
74	78	84	84

*अ—कोशे नाम्नाध्यायसमाप्तिः

*ख—कोशे नाम्नाध्यायसमाप्तिः

Poona Edition with Bhavadipa Chapter.	Kumbakonam Edition Chapter.	Manuscripts of the Southern Recension Chapter.	Southern Recension Chapter.
75	79	85	85
76	80	86	86
77 (1–37)	81 (1–37)	87	87
,, (38–79)	,, (38–77)	88	88
78	82	89	89
79 (1–48)	83 (1–48)	90	90
,, (49–79)	,, (49–82)	91	91
,, (80–95)	,, (83–98)	92	92
80	84	93	93
81	85	,, **	
82	86	94	94
83 (1–35)	87	95*	95
,, (36–52)	88 (1–26)	96*	96
	,, (27–54)	97	97
85 (5–23)	89	98	98
	90	99	99
86		omitted	omitted
87	91	100	100
	92	101	101
	93	102	102
88	94	103	103
	95	104	104
	96	105	105
90	97	106	106
91	98	107	107
92	99	108	108
94 (33–68)	100	109	109
95 }	101	110	110
96 }			

**अ—कोशे नाम्नाध्यायसमाप्तिः

*अ—कोशे नाम्नाध्यायसमाप्तिः

With regard to the Karṇa Parvan it is possible to mark a Text clearly as Southern or Northern according as it has or omits particular chapters and incidents, characterestic of each Recension. A few of the more important distinctive features of the Southern Recension of the Karṇa Parvan are noticed below :—

i. The Southern Recension omits chapters 2, 3 and 4 of the Northern Recension.

ii. The Southern Recension omits the incidents narrated in stanzas 3-39 of Chapter 35 of the Northern Recension (Duryodhana's persuasion of Salya to accept Karna as his charioteer).

iii. The Southern Recension omits the incidents narrated in stanzas 61-74 of Chapter 61 and stanzas 1—6 of Chapter 62 of the Northern Recension.

The Presidency College,
Madras.
30—7—1935.

P. P. S. SASTRI,
Editor.

॥ श्रीरस्तु ॥

महाभारतस्य कर्णपर्व

तत्र

॥ विषयानुक्रमणिका ॥

कर्णपर्व

अध्यायः			पुटम्
१	सञ्जयेन धृतराष्ट्रं प्रति कर्णवधकथनम्	...	१
	धृतराष्ट्रेण कर्णवधश्रवणेन मूर्च्छोपगमः	...	४
	सञ्जयेन दुःखितानां धृतराष्ट्रादीनां समाश्वासनम्	...	,,
	धृतराष्ट्रेणोक्ताशस्य पुनः प्रश्नः	...	५
	सञ्जयेन दुश्शासनादीनां वधस्य कथनम्	...	,,
२	धृतराष्ट्रेण शत्रुहतानां हतशिष्टानां च नामकथनचोदनम्	...	७
	सञ्जयेन शत्रुहतानां नामकथनम्	...	,,
३	सञ्जयेन युद्धे हतानां परेषां नामकथनम्	...	१४
४	सञ्जयेन हतशिष्टानां नामकथनम्	...	१९
	धृतराष्ट्रेण दुस्सहदुःखाधिगमः	...	२४
५	धृतराष्ट्रेण कर्णगुणानुवर्णनपूर्वकं शोचनम्	...	२५
६	सञ्जयेन धृतराष्ट्रसमाश्वासनम्	...	२८
	धृतराष्ट्रेण स्वचिन्तानुवर्णनम्	...	२९
	धृतराष्ट्रेण स्वपुत्रान् प्रति गर्हणम्	...	३१
	धृतराष्ट्रेण कर्णवधानन्तरीयककथाप्रश्नः	...	३२
७	सञ्जयेन द्रोणवधानन्तरमनुनकृत्यकथनम्	...	३८
	दुर्योधनेन युद्धाय कुरून् प्रत्याज्ञापनम्	....	४०
	अश्वत्थाम्ना कर्णस्य सैनापत्यकरणचोदनम्	...	४१
	दुर्योधनेन कर्णं प्रति सैनापत्याभिषेचनप्रार्थनम्	...	४२

अध्यायः		पुटम्
७ यथाविधि कर्णस्य सैनापत्याभिषेचनम्	...	४४
ब्राह्मणादिभिः कर्णं प्रति मङ्गलाशंसनम्	...	४५
कर्णेनार्जुनवधप्रतिज्ञानपूर्वं योगाज्ञापनम्	...	४६
८ कर्णेन सेनाहर्षणपूर्वं युद्धाय निर्याणम्	...	४७
कर्णेन मकरव्यूहनिर्माणम्	...	४९
युधिष्ठिरचोदितेनार्जुनेनार्धचन्द्रव्यूहनिर्माणम्	...	५०
९ सङ्कुलयुद्धम्	...	५२
भीमेन क्षेमधूर्तिवधः	...	५६
१० द्वन्द्वयुद्धम्	...	५८
सात्यकिना विन्दानुविन्दाभ्यां युद्धविधानम्	...	६०
११ प्रतिविन्ध्यश्रुतकर्मभ्यां चित्रचित्रसेनयोस्संहारः	...	६२
१२ भीमाश्वत्थाम्नोर्युद्धम्	...	६७
१३ शल्येन श्रुतकीर्तिजयः	...	७२
१४ सहदेवेन दुश्शासनपराजयः	...	७५
१५ कर्णनकुलयोर्युद्धे संवादः	...	७८
कर्णेन नकुलस्य पराभवाधिक्षेपौ	...	७९
१६ युयुत्सूलूकयोर्युद्धम्	...	८७
शकुनिश्रुतसोमयोर्युद्धम्	...	८९
१७ कृपेण धृष्टद्युम्नपराजयः	...	९२
धृष्टद्युम्नेन स्वसारथिं प्रति स्वरक्षणोपायकथनम्	...	९४
कृतवर्मणा शिखण्डिनः पराजयः	...	९५
१८ श्वेताश्वादीनां युद्धवर्णनम्	...	९७
अर्जुनेन सत्यदेवादीनां शिरश्छेदनम्	...	९९
युद्धभूमौ मृतानां शरीरराशिवर्णनम्	...	१०१
१९ सङ्कुलयुद्धम्	...	१०२
२० युधिष्ठिरदुर्योधनयोर्युद्धम्	...	१०८
युधिष्ठिरशक्तिहतेन दुर्योधनेन भूमौ पतनम्	...	१११
२१ सङ्कुलयुद्धम्	...	११२

अध्यायः पृष्ठम्

२१ षोडशदिवसयुद्धोपसंहारे परस्पराशीर्वचनपूर्वकं कुरुपाण्डवैस्स्वावासगतैस्सुखेन निवसनम् ... ११८
२२ अर्जुनप्रभावकीर्तनम् ... ११९
कर्णेन कौरवैस्सह मन्त्रालोचनम् ... १२०
कर्णेनार्जुनवधप्रतिज्ञानम् ... १२३
कर्णेन विजयनाम्नो धनुषः प्राप्तितत्प्रभावयोश्च वर्णनम् ... १२४
कर्णेन रथतुरगादीनामप्रतिमानां युद्धोपकरणत्ववर्णनम्... १२५
२३ दुर्योधनेन शल्यं प्रति सारथ्येन कर्मणा कर्णसहायताचोदनम् १२८
शल्येन कर्णविषये सारथ्यकर्मणो गर्ह्यत्वनिरूपणम् ... १३१
शल्येन स्वस्य कर्णाद्वरीयस्त्ववर्णनम् ... १३३
शल्येन कर्णसारथ्यमननुमन्यमानेनामर्षात् सभातो निर्गमनम् ... १३४
दुर्योधनेन शल्यकोपशमनाय शल्यपदनिर्वचनपूर्वकं-तत्प्रभाववर्णनपूर्वकं च सारथ्ये नियोजनम् ... १३५
श्रीभगवदपेक्षयाऽधिकतया स्तुतमहिम्ना शल्येन सारथ्य-करणाङ्गीकरणम् ... ,,
२४ दुर्योधनेन शल्यं प्रति त्रिपुरासुरकथाकथनम् ... १३६
त्रिपुरासुरपीडितैः देवैः परमेश्वरप्रसादनम् ... १३८
त्रिपुरनिर्माणादिप्रकारकथनम् ... १३९
ब्रह्मणा देवान् प्रति परमेश्वरद्वारा त्रिपुरसंहारकथनम् ... १४२
देवैः कृता परमेश्वरस्तुतिः ... १४४
२५ ब्रह्मादिभिः देवैः स्वस्वतेजसोऽर्धदानपूर्वकं त्रिपुरसंहार-याचनम् ... १४५
परमेश्वरेण सर्वेष्वपि लोकेषु पशुभावपरिकल्पनचोदनम् १४८
परमेश्वरेण पशुभावकल्पनाकारणकथनम् ... ,,
परमेश्वरेण देवेभ्यः तेजसोऽर्धांशग्रहणपूर्वकं पशुपति, भवादिशब्दनिरुक्तिकथनपूर्वकं च त्रिपुरसंहारा-थाभिषेकोपगमः ... १४९

अध्यायः		पृष्ठम्
२६	विश्वकर्मणा परमेश्वरमुद्दिश्य भूमेः रथत्वापादनपूर्वकं तन्महिमानुवर्णनम् ...	१५०
	देवैः ब्रह्माणं प्रति रुद्रसारथ्यकरणप्रार्थनम् ...	१५५
२७	ब्रह्मणा रुद्रसारथ्यकरणम् ...	१५७
	दुर्योधनेन दृष्टान्तकथनपूर्वकं शल्यं प्रति कर्णसारथ्यकरणप्रार्थनं त्रिपुरसंहारकथनं च ...	१५८
२८	परशुरामचरितकथनम् ...	१६१
	दुर्योधनेन कर्णप्रभावकथनम् ...	१६५
२९	शल्येन कर्णसारथ्यस्वीकरणम् ...	१६६
३०	दुर्योधनेन कर्णं प्रति शत्रुजयप्रार्थनम् ...	१७०
	शल्येन कर्णं प्रति पाण्डवप्रशंसनम् ...	१७१
	कर्णस्य रणप्रस्थानसमये दुर्निमित्तसम्भवः ...	१७२
	कर्णेनात्मश्लाघनपूर्वकमर्जुनवधप्रतिज्ञा ...	१७३
	शल्येन कर्णविगर्हणम् ...	१७८
३१	कर्णेन स्वसा अर्जुनप्रदर्शकाय पारितोषिकदानप्रतिज्ञानम्	१८१
	शल्येन पुनः कर्णविगर्हणम् ...	१८५
३२	शल्येन पुनः कर्णविगर्हणम् ...	१८६
३३	कर्णेन शल्यविगर्हणम् ...	१९०
३४	हंसकाकीयोपाख्यानम् ...	१९७
३५	कर्णेन परशुरामात् कुतश्चिद्ब्राह्मणाच्च शापप्राप्तिः ...	२०८
	कर्णेन शत्रुविनाशनप्रतिज्ञानम् ...	२१०
३६	कर्णेन ब्राह्मणाच्छापप्राप्तिकथनम् ...	२१७
	कर्ण ब्राह्मणसंवादः ...	२१८
३७	कर्णेन शल्यविगर्हणम् ...	२२०
	कर्णेन धृतराष्ट्रसमीपे ब्राह्मणोक्तवृत्तान्तकथनम् ...	२२२
३८	कर्णेन बाह्लीकादिदेशविगर्हणम् ...	२२५
	कर्णेन ब्राह्मणोक्त्यनुवादः ...	२२७
	स्त्रिया दस्यून् प्रति शापदानम् ...	२२८
	कर्णेन शल्यदेशविगर्हणम् ...	”

अध्यायः		पृष्ठम्
३८ प्रागादिदिक्पालकथनम्	...	२३१
३९ शल्यकर्णयोः कलहः	...	२३२
दुर्योधनेन शल्यकर्णयोः सान्त्वनम्	...	२३३
शल्येन कर्णं प्रति तिरस्कारवचनपूर्वं दुर्निमित्तकथनम्	...	२३४
शल्यकर्णसंवादः	...	२३६
४० दुर्योधनेन शल्यादिप्रोत्साहनम्	...	२३८
अश्वत्थामप्रतिज्ञावचनम्	...	२३९
दुर्योधनसेनया युद्धोपक्रमः	...	२४०
भीमदुर्योधनयोर्युद्धम्	...	२४१
४१ कर्णेन परव्यूहं प्रति प्रवेशः	...	२४३
युद्धे सैनिकोक्तिकथनम्	...	,,
सेनाद्वये व्यूहवर्णनम्	...	२४६
युधिष्ठिरेणार्जुनं प्रति परव्यूहभेदिव्यूहनिर्माणचोदनम्	...	२४८
युधिष्ठिरेण युद्धे योद्धृक्रमप्रदर्शनम्	...	२४९
४२ सङ्कुलयुद्धम्	...	२५०
४३ सङ्कुलयुद्धम्	...	२५५
४४ कर्णयुधिष्ठिरयुद्धम्	...	२६४
सङ्कुलयुद्धम्	...	२६६
४५ कर्णपराक्रमवर्णनम्	...	२६९
कर्णेन युधिष्ठिरपराजयः	...	२७०
कर्णेन युधिष्ठिरपराभवोक्तिः	...	२७२
४६ सङ्कुलयुद्धम्	...	२७३
४७ शल्येन कर्णं प्रति भीमकोपवर्णनम्	...	२७८
कर्णेन भीमकोपस्य स्वानुकूलत्वकथनम्	...	२८०
शल्यचोदितेन कर्णेन भीमं प्रति युद्धायाभिगमनम्	...	२८१
भीमकर्णयोर्युद्धम्	...	२८२
भीमेन कर्णपराजयः	...	२८३
शल्येन भीमस्य सहेतुकं कर्णजिघांसानिषेधनम्	...	,,
भीमेन कर्णजिह्वाच्छेदनकारणप्रतिपादनम्	...	२८४

अध्यायः		पृष्ठम्
४७ शल्येन विसंज्ञस्य कर्णस्याम्यतोऽपनयनम्	...	२८५
४८ दुर्योधनेन कर्णरक्षणाय सहोदराणां प्रेषणम्	...	२८६
भीमेन दुर्योधनानुज्ञानां हननम्	...	२८७
भीमकर्णयोर्युद्धम्	...	२८८
४९ सङ्कुलयुद्धम्	...	२९३
५० सङ्कुलयुद्धम्	...	,,
५१ अर्जुनस्य संशप्तकैस्सह युद्धम्	...	३०१
अर्जुनेन भगवन्तं प्रति स्वस्य रथबन्धान्मोचनेनाभ्य-सदृशत्वकथनम्	...	३०४
अर्जुनेन सकुतूहलं नानास्त्रप्रयोगेण शत्रुनिबर्हणम्	...	३०५
अर्जुनेन प्रतियोद्धृभावेन तस्य दुर्वारवीर्यकथनम्	...	३०७
५२ सङ्कुलयुद्धम्	...	३०८
कृपादियुद्धवर्णनम्	...	३०९
५३ अश्वत्थाम्ना युधिष्ठिरं प्रति रणाय प्रस्थानम्	...	३१४
सङ्कुलयुद्धम्	...	३१५
अश्वत्थाम्ना युधिष्ठिरपराजयः	...	३१७
युधिष्ठिरेणाश्वत्थामानं प्रति गर्हणम्	...	३१८
अश्वत्थाम्ना युधिष्ठिरगर्होक्तेः नोत्तरप्रतिपादनम्	...	३१९
५४ सङ्कुलयुद्धम्	...	३२०
धृष्टद्युम्नेन दुर्योधनपराजयः	...	३२३
५५ कर्णधृष्टद्युम्नयोर्युद्धवर्णनम्	...	३२४
भीमेनैकेन कौरवादिभिर्युद्धवर्णनम्	...	३२८
५६ अर्जुनेन भगवन्तं प्रति कर्णसमीपयानचोदनम्	...	३३०
श्रीभगवदर्जुनयोः कोपवर्णनम्	...	३३१
अर्जुनपराक्रमवर्णनम्	...	३३२
५७ अर्जुनेन संशप्तकैर्युद्धवर्णनम्	...	३३५
श्रीभगवदर्जुनयोर्मूर्धनि पुष्पपतनम्	...	३३७
अशरीरिण्याः वाचो निरूपणम्	...	,,
अश्वत्थाम्ना अर्जुनसमाह्वानम्	...	,,

अध्यायः		पृष्ठम्
५७	अर्जुनवहनपूर्वकं तच्चोदनया श्रीभगवता अश्वत्थामानं प्रति युद्धाय सन्नाहचोदनम् ...	३३८
	श्रीभगवदर्जुनाश्वत्थाम्नां युद्धनिरूपणम् ...	३३९
	अश्वत्थाम्नाऽर्जुनपराक्रमस्य परिहासः ...	३४०
	श्रीभगवच्चोदनयाऽर्जुनेन गुरुपुत्रस्याश्वत्थाम्नो वध-प्रतिज्ञानम् ...	३४१
	अश्वत्थाम्न्यर्जुनपराक्रमवर्णनम् ...	३४२
५८	अर्जुनाश्वत्थाम्नोर्युद्धम् ...	३४४
	अर्जुनपराक्रमवर्णनम् ...	३४५
	अर्जुनेनाश्वत्थामपराजयः ...	३४८
५९	अर्जुनेन दण्डदण्डधारयोर्वधः ...	३४९
६०	अर्जुनेन संशप्तकानां युद्धम् ...	३५५
	श्रीभगवताऽर्जुनं प्रति कर्णवधचोदनम् ...	३५७
	श्रीभगवता भारतसैन्यादिक्षयवर्णनम् ...	३५८
६१	पाण्ड्यवीर्यवर्णनम् ...	३६४
	अश्वत्थाम्ना पाण्ड्याद्धानपूर्वकं युद्धविधानम् ...	३६५
	अश्वत्थाम्ना पाण्ड्यवधः ...	३६९
६२	धृतराष्ट्रेणार्जुनपराक्रमवीक्षया भयाधिगमः ...	३७०
	श्रीभगवताऽर्जुनं प्रत्यश्वत्थामादिचेष्टावर्णनम् ...	,,
	सङ्कुलयुद्धम् ...	३७१
	अश्वत्थामधृष्टद्युम्नयोर्युद्धम् ...	३७४
६३	अश्वत्थामधृष्टद्युम्नयोर्युद्धम् ...	३७६
	श्रीभगवताऽर्जुनं प्रत्यश्वत्थाम्नो धृष्टद्युम्नरक्षणचोदनम् ...	३७८
	अर्जुनेनाश्वत्थामपराजयः ...	३७९
	अर्जुनेन संशप्तकान् प्रति गमनम् ...	३८०
६४	सङ्कुलयुद्धम् ...	३८१
६५	गजयुद्धम् ...	३८५
	सङ्कुलयुद्धम् ...	३८६

अध्यायः		पृष्ठम्
६६ श्रीभगवताऽर्जुनं प्रति युधिष्ठिरग्रहणे कुरूणां प्रयत्नकथनम्	...	३८९
श्रीभगवता दुर्योधनादीनां बलवीर्यादिप्रशंसनम्	...	३९०
६७ श्रीभगवताऽर्जुनं प्रति कर्णेन पाण्डवसैनिकविध्वंसन-कथनम्	...	३९२
श्रीभगवता कर्णयुद्धप्रदर्शनम्	...	३९४
भीमयुद्धकथनम्	...	३९८
अर्जुनेन भीमहतशिष्टसंशप्तकहननम्	...	४००
६८ धृतराष्ट्रेण स्वदुर्दैशाकथनम्	...	४०१
राजभिः द्वन्द्वीभूय युद्धविधानम्	...	४०३
कर्णेन शिखण्डिपराजयः	...	४०४
धृष्टद्युम्नदुश्शासनयोर्युद्धम्	...	४०५
६९ सङ्कुलयुद्धम्	...	४०६
७० सङ्कुलयुद्धम्	...	४१०
७१ कर्णेन युधिष्ठिरव्यथनम्	...	४१४
शल्येन कर्णं प्रति युधिष्ठरहननचोदनम्	...	४१६
कर्णपीडितेन युधिष्ठिरेण स्वशिबिरप्रवेशः	...	४१७
युधिष्ठिरेण भीमसंरक्षणाय नकुलसहदेवचोदनम्	...	४१८
७२ श्रीभगवदर्जुनाभ्यामश्वत्थाख्यो युद्धम्	...	४१९
अर्जुनेनाश्वत्थाख्यो भुवि पातनम्	...	४२०
पाण्डवैः कौरवसेनायाः विद्रावणम्	...	४२१
दुर्योधनेन पराभवकथनपूर्वकं कर्णंचोदनम्	...	४२२
कर्णेन स्वबलप्रशंसनम्	...	,,
कर्णयुद्धवर्णनम्	...	४२३
अर्जुनेन श्रीभगवन्तं प्रति कर्णप्रयुक्तभार्गवास्त्रमहिमानु-वर्णनम्	...	४२४
७३ श्रीभगवता शत्रुनिग्रहाय भीमावस्थापनम्	...	४२५
अर्जुनेन कर्णपीडितयुधिष्ठिरसन्दर्शनाय श्रीभगवन्तं प्रति चोदनम्	...	४२६

अध्यायः		पुटम्
७३	श्रीभगवदर्जुनाभ्यां युधिष्ठिरदर्शनाय शिबिरं प्रति गमनम्	४२९
	श्रीभगवदर्जुनाभ्यां युधिष्ठिरं प्रत्यभिवादनपूर्वकं परस्परमभिनन्दनम् ...	४३०
७४	युधिष्ठिरेण श्रीभगवदर्जुनौ प्रति स्वागतप्रश्नः ...	४३१
	युधिष्ठिरेण कर्णकृतयुद्धप्रकारकथनम् ...	४३२
	युधिष्ठिरेणार्जुनं प्रति सकारणकथनं कर्णवधप्रश्नः ...	४३४
७५	अर्जुनेन स्वयुद्धकथनम् ...	४४१
	अर्जुनेन कर्णहननप्रतिज्ञानम् ...	४४४
७६	युधिष्ठिरेण कर्णस्यामारणज्ञानादर्जुनं प्रति गर्हणम् ...	४४६
	युधिष्ठिरेणार्जुनं प्रति श्रीभगवति गाण्डीवदानचोदनम् ...	४५३
७७	श्रीभगवताऽर्जुनं प्रति युधिष्ठिरवधोद्यमकारणप्रश्नः ...	४५४
	अर्जुनेन युधिष्ठिरवधोद्यमकारणनिवेदनम् ...	४५५
	श्रीभगवताऽर्जुनगर्हणम् ...	४५६
	श्रीभगवता वध्यावध्यप्राणिनिरूपणम् ...	४५७
	बलाकोपाख्यानकथनम् ...	४५८
	श्रीभगवताऽर्जुनं प्रति युधिष्ठिराधिक्षेपस्य वधप्रतिनिधित्वकथनम् ...	४६४
	श्रीभगवताऽर्जुनं प्रति युधिष्ठिरस्य त्वं पदवाच्यत्वेनाधिक्षेपकरणोपदेशः ...	,,
	श्रीभगवताऽर्जुनं प्रति युधिष्ठिरेऽपराधक्षापणपूर्वकं कर्णवधानुशासनम् ...	४६५
७८	अर्जुनेन युधिष्ठिरगर्हणम् ...	४६६
	अर्जुनेन भीमपराक्रमप्रशंसनम् ...	,,
	अर्जुनेन नकुलादीनां प्रशंसनम् ...	४७०
	अर्जुनेन युधिष्ठिराधिक्षेपेण स्वात्महननोद्यमः ...	४७४
	श्रीभगवताऽर्जुनं प्रति स्ववधतुल्यत्वेन स्वात्मप्रशंसननियमनम्	४७५
	अर्जुनेन स्वप्रशंसनम् ...	४७६
	अर्जुनेन युधिष्ठिरं प्रति पादाभिवन्दनपूर्वकं तत्प्रसादप्रार्थनम् ...	४७७

अध्यायः		पृष्ठम्
७९	अर्जुनवचनमसहमानेन युधिष्ठिरेण स्ववधनियमनपूर्वकं वनप्रस्थानोद्यमः	४७९
	श्रीभगवता युधिष्ठिरसान्त्वनम्	४८०
	युधिष्ठिरेण भगवद्वाक्यानुल्लङ्घनम्	४८१
८०	श्रीभगवताऽर्जुनं प्रति युधिष्ठिरप्रसादननियमनम्	४८२
	युधिष्ठिरार्जुनाभ्यां परस्परमाश्लेषपूर्वकं रोदनम्	४८३
	युधिष्ठिरेण कर्णवधाभावे स्वप्राणत्यागप्रतिज्ञानम्	४८४
	अर्जुनेन कर्णवधप्रतिज्ञानपूर्वकं भगवदनुज्ञाप्रार्थनम्	,,
	श्रीभगवताऽर्जुनसाहाय्यककरणाय दारुकनियमनम्	४८५
	श्रीभगवद्वचनाद्युधिष्ठिरेणार्जुनं प्रति जयाशीर्वचनम्	४८६
	अर्जुनेन कर्णवधकरणे युधिष्ठिरपादयोः शपथविधानम्	४८७
८१	अर्जुनस्य कर्णवधप्रस्थानकाले शुभनिमित्तप्रादुर्भावः	४८८
	श्रीभगवताऽर्जुनप्रोत्साहनम्	४८९
८२	श्रीभगवता भीष्मादीनां पराक्रमवर्णनम्	४९३
	भीष्मादीनां वधेऽर्जुनस्यैव कारणत्वकथनम्	४९४
	श्रीभगवता दुर्योधनापनयस्य कर्णमूलत्वेन कर्णस्यैव हन्तव्यत्वकथनम्	५००
८३	श्रीभगवता कर्णस्य दुर्नीतिस्मारणम्	५०१
	श्रीभगवताऽर्जुनं प्रति कर्णवधचोदनम्	५०५
८४	अर्जुनेन कर्णवधानन्तरं भाविसन्दर्भवर्णनम्	५१०
	अर्जुनेन कर्णवधप्रतिज्ञानम्	५१२
	अर्जुनेन कर्णवधानन्तरं स्वस्य सर्वजनप्रीतिपात्रत्ववर्णनम्	५१४
८५	द्वन्द्वयुद्धम्	५१७
८६	भीमसेनविशोकयोः संवादः	५२२
८७	अर्जुनस्य कलिङ्गवङ्गाद्यधिपैस्सह युद्धकरणम्	५३४
	भीमपराक्रमः	५३८
८८	भीमपराक्रमवर्णनम्	५४१
	दुर्योधनेन शकुनिं प्रति भीमवधचोदनम्	५४२

अध्यायः		पृष्ठम्
८८ भीमेन शकुनिपराजयः	...	५४५
८९ कर्णपराक्रमवर्णनम्	...	५४८
९० अर्जुनेन युद्धे रक्तनद्युत्पादनम्	...	५५५
अर्जुनेन श्रीभगवतः कर्णसमीपप्रापणचोदनम्	...	५५६
शल्येन कर्णं प्रत्यर्जुनवधचोदनम्	...	५५७
९१ कर्णेनार्जुनवधप्रतिज्ञानम्	...	५६२
कर्णेनार्जुनप्रशंसनम्	...	५६३
कर्णेन श्रीभगवदर्जुनवधप्रतिज्ञानम्	...	५६७
कर्णार्जुनादियुद्धवर्णनम्	...	५६८
९२ सङ्कुलयुद्धम्	...	५७०
९३ सङ्कुलयुद्धम्	...	५७४
९४ सङ्कुलयुद्धम्	...	५८६
भीमदुश्शासनयोस्समागमः	...	५९२
भीमदुश्शासनविवादः	...	५९४
भीमदुश्शासनयोर्युद्धम्	...	५९५
९५ दुश्शासनपराक्रमवर्णनम्	...	५९७
भीमेन दुश्शासनसन्ताडनम्	...	६००
भीमेन बहुधा दुश्शासनपीडनम्	...	६०१
भीमेन विचेतनीकृतत्य दुश्शासनस्य रक्तपाने चिन्ताधिगमः	...	६०३
भीमेन विसंज्ञस्य दुश्शासनस्य वक्त्रेण संज्ञोत्पादन-पूर्वकमुभयोर्विवादः	...	,,
भीमेन दुश्शासनस्य पिष्टवत्पेषणम्	...	६०४
भीमेन विदारितस्य दुश्शासनस्य वक्षसः रक्तपानम्	...	,,
भीमेन दुश्शासनरक्तस्य सर्वैरसोत्तरत्वेन पानम्	...	६०५
भीमेन सर्ववीरसमक्षं दुश्शासनरक्तपानसमये तं प्रति वक्तव्यवचनोपदेशः	...	६०६
९६ भीमेन दुश्शासनस्यैव सर्वदुःखहेतुत्वकथनम्	...	६०७
भीमस्य दुश्शासनहननेनाचिन्त्यवीर्यत्वकथनम्	...	६०८

अध्यायः		पुटम्
९६	भीमेन दुर्योधनशिरोमर्दनप्रतिज्ञानम् ...	६०९
	भीमेन दुश्शासनानुजानां वधः ...	६१०
	भीमपराक्रमदर्शनेन कर्णस्य भयोत्पत्तिः ...	६११
९७	शल्येन कर्णस्य प्रोत्साहनम् ...	,,
	सङ्कुलयुद्धम् ...	६१२
९८	सङ्कुलयुद्धम् ...	६१८
९९	अर्जुनेन वृषसेनवधः ...	६२३
१००	कर्णार्जुनयोः युद्धाय सङ्गमस्य देवगन्धर्वादिभिस्सन्दर्शनम्	६२६
	देवैरर्जुनसंरक्षणम् ...	६२९
	असुरैः कर्णसंरक्षणम् ...	,,
१०१	प्रजापतिना ब्रह्माणं प्रति कर्णार्जुनयोः विजयप्रश्नः ...	६३५
	प्रजापतिना कर्णार्जुनयोः जयसाम्यप्रार्थना ...	६३६
	इन्द्रेणार्जुनस्यैव जयप्रार्थना ...	,,
	ब्रह्मेशानाभ्यामर्जुनस्यैव जयाशंसनं देवैः पुष्पवर्षणं च ...	६३८
१०२	कर्णार्जुनध्वजवर्णनम् ...	६४०
	शल्यकर्णयोस्सम्भाषणम् ...	६४१
	अर्जुनेन स्वपराक्रमकथनपूर्वकं कर्णशल्ययोस्तुच्छत्व-कथनम् ...	६४२
	अर्जुनेन श्रीभगवन्तं प्रति कुन्तीयुधिष्ठिरयोस्सान्त्वन-चोदनम् ...	६४३
१०३	कर्णार्जुनयोर्युद्धवर्णनम् ...	६४४
	अश्वत्थाम्ना दुर्योधनं प्रति पाण्डवैश्शमविधानचोदनम् ...	६४८
	दुर्योधनेनाश्वत्थामवचनानादरणपूर्वकं युद्धाय सेना-प्रचोदनम् ...	६५१
१०४	कर्णार्जुनयोर्वर्णनम् ...	६५३
	कर्णार्जुनयोर्युद्धम् ...	६५७
	भीमेन कर्णहननायार्जुनप्रोत्साहनम् ...	६६२
१०५	श्रीभगवताऽर्जुनं प्रति कर्णहननप्रोत्साहनम् ...	६६३
	अर्जुनेन कर्णे स्वसामर्थ्यसन्दर्शनम् ...	६६५

अध्यायः		पृष्ठम्
१०५	अर्जुनप्रहारमसहमानैः कुरुभिः कर्णं प्रत्यर्जुनहननप्रार्थनम्	६६८
	कर्णयुद्धम् ...	६६९
	अर्जुनपराक्रमः ...	६७४
	दुर्योधनेन स्वसैन्यनिवर्तनम् ...	६७५
१०६	कर्णार्जुनयोर्युद्धम् ...	६७६
	कर्णार्जुनयोरन्यतरस्य वीर्याधिक्यकथनम् ...	६७८
	कर्णेनार्जुनशिरोजिहीर्षया नागास्त्रप्रयोगः ...	६७९
	कर्णेन द्विरावृत्या स्वस्य शरसन्धातृत्वाभावकथनम् ...	६८०
	श्रीभगवता संश्रितापत्सखेनार्जुनशिरसि कर्णप्रयुक्त-नागास्त्रासंस्पर्शाय रथस्य भूमौ पञ्चाङ्गुलमज्जनम् ...	,,
	कर्णनागास्त्रेणार्जुनकिरीटमालापहरणम् ...	६८१
	नागेन कर्णं प्रति स्वकृतकार्यनिवेदनपूर्वकं यथागतगमन-प्रार्थनम् ...	६८४
	कर्णेन नागं प्रति सरोषं स्वपराक्रमकथनम् ...	,,
	नागेन कर्णवाक्यमसहमानेन पुनरप्यर्जुनवधाय यानम्	६८५
	अर्जुनेन श्रीभगवन्तं प्रति नागविषयकप्रश्नः ...	,,
	श्रीभगवताऽर्जुनं प्रति नागस्य पूर्ववृत्तकथनपूर्वकं तद्ध-ननचोदनयाऽर्जुनेन तद्धननम् ...	,,
	कर्णार्जुनयोर्युद्धम् ...	६८६
	कर्णेनार्जुनं प्रति मुहूर्तकालं सहेत्युपादनं स्वस्मिन् ...	,,
	बाणमोक्षनिवारणप्रार्थनम् ...	६९५
१०७	श्रीभगवता कर्णं प्रति तत्कृतदुष्कृतस्मारणम् ...	६९६
	कर्णार्जुनाभ्यामस्त्रयुद्धविधानम् ...	६९९
	अर्जुनेन शपथपूर्वकं मुक्तेन बाणेन कर्णशिरोहरणम् ...	७०१
	कर्णशिरसः भूमौ पतनम् ...	७०४
	कर्णशिरसः भूमौ पतनेनार्जुनं प्रति सोमकादिभिः प्रशंसनादिकरणम् ...	७०५
	कर्णशिरसः भूपतनसन्दर्भवर्णनम् ...	७०६
१०८	कुरुभिः कर्णमरणदर्शनेन पलायनम् ...	७०८

अध्यायः		पृष्ठम्
१०८	कर्णमरणेन शल्यपराभवः ...	७०९
	शल्येन कर्णमरणाद्दुःखितस्य दुर्योधनस्य समाश्वासनम् ...	७१०
	शल्येन युद्धस्थलवर्णनम् ...	७१२
१०९	कर्णप्रशंसनपूर्वकं तन्मरणानन्तरकालिकसन्दर्भवर्णनम् ...	७२०
	कर्णवधानन्तरं श्रीभगवदर्जुनतेजोवर्णनम् ...	७२३
	श्रीभगवदर्जुनाभ्यां कर्णवधहर्षेण सकुतूहलं युधिष्ठिर-समीपगमनम् ...	७२४
११०	कर्णवधानन्तरं कुर्वादिभिस्ससैन्यं स्वावासं प्रति गमनम्	७२७
	अर्जुनेन कर्णवधशंसनपूर्वकं युधिष्ठिरपादाभिवन्दनम् ...	७२९
	भीमादिभिरर्जुनपरिष्वङ्गः ...	७३०
	श्रीभगवता कर्णवधस्य युधिष्ठिरकोपमूलत्वकथनम् ...	,,
	युधिष्ठिरेण स्वीयजयस्य श्रीभगवदनुग्रहमूलत्वकथनम् ...	७३१
	श्रीभगवता पाण्डवेषु स्वानुग्रहसद्भावकथनम् ...	,,
	श्रीभगवद्युधिष्ठिराभ्यां कर्णवधस्थलदर्शनपूर्वकं युधिष्ठिरेण-श्रीभगवदर्जुनप्रशंसनम् ...	७३२
	विदुरेण धृतराष्ट्रादिसमाश्वासनम् ...	७३४
	सञ्जयेन वृत्तचरितकथनानन्तरं हास्तिनपुरं प्रति गमनम्	,,
	वैशम्पायनेन कर्णपर्वणः पठनादिफलकथनम् ...	७३५

॥ श्रीः ॥

॥ महाभारतम् ॥

॥ ८ ॥ कर्णपर्व ॥ ८ ॥

॥ श्रीः ॥

॥ महाभारतम् ॥

॥ कर्णपर्व ॥

॥ प्रथमोऽध्यायः ॥

शिबिराद्धास्तिनपुरमुपगतवता सञ्जयेन धृतराष्ट्रं प्रति कर्णादिनिधन-कथनम् ॥ १ ॥ तच्छ्रवणेन मूर्च्छामुपगतवतो धृतराष्ट्रस्य सञ्जयादिभिराश्वासनम् ॥ २ ॥

वैशम्पायनः—

शिबिराद्धास्तिनपुरं प्राप्य भारत सञ्जयः ।
प्रविवेश महाप्राज्ञो धृतराष्ट्रनिवेशनम् ॥ १

शोकेनोपहतस्सूतो विलपन् भृशदुःखितः ।
दृष्ट्वा तु निधनं घोरं सूतपुत्रस्य पाण्डवैः ॥ २

अन्तःपुरं प्रविश्यैव सञ्जयो राजसत्तम ।
अश्रुकण्ठो भृशं त्रस्तो राजानमुपजग्मिवान् ॥ ३

उपस्थाय च राजानं विनिश्वस्य च सूतजः ।

नातिहृष्टमना राजन्निदं वचनमब्रवीत् ॥ ४

सञ्जयः—

सञ्जयोऽहं महाराज नमस्ते भरतर्षभ ।
हतो वैकर्तनः कर्णः कृत्वा कर्म सुदुष्करम् ॥ ५

चेदिकाशिकरूशानां मत्स्यानां सोमकैस्सह ।
कृत्वाऽसौ कदनं शेते वातनुन्न इव द्रुमः ॥ ६

गोष्ठमध्ये ऋषभ इव गोव्रजैः परिवारितः ।
व्यालेन निहतो यद्वत् तथाऽसौ निहतः परैः ॥ ७

निराशान् पाण्डवान् कृत्वा जये राजन् ससात्यकान् ।
पाञ्चालानां रथांश्चैव विनिहत्य सहस्रशः ॥ ८

जित्वा शूरान् महेष्वासान् विद्राव्य च दिशो दश ।
हतो वैकर्तनः कर्णः पाण्डवेन किरीटिना ॥ ९

वैरस्य गत आनृण्यं दुर्गमस्य दुरात्मभिः ।
हत्वा कर्णं महाराज विशल्यः पाण्डवोऽभवत् ॥ १०

शोषणं सागराणां वा पतनं वा विवस्वतः ।
[1]विशीर्णता यथा मेरोस् तथा कर्णस्य पातनम् ॥ ११

योधाश्च बहवो राजन् हतास्तत्र जयैषिणः ।
राजानो राजपुत्राश्च शूराः परिघबाहवः ॥ १२

1. ब—पृथिव्या दारणं यादृक् तादृक्कर्णस्य पातनम् । [पाठान्तरम्]

रथौघाश्च नरौघाश्च हता राजन् सहस्रशः ।
वारणा निहतास्तत्र वाजिनश्च महाहवे ॥ १३

क्षत्रियाश्च महाराज सेनयोरुभयोर्हताः ।
परस्परमवेक्ष्यात्र परस्परकृतागसः ॥ १४

किञ्चिच्छेषान् परान् कृत्वा तीर्त्वा पाण्डववाहिनीम् ।
पार्थवेलां समासाद्य हतो वैकर्तनो वृषा ॥ १५

जयाशा धार्तराष्ट्राणां वैरस्य च मुखं नृप ।
तीर्णे तत् पाण्डवै राजन् यत् पुरा नावबुध्यसे ॥ १६

प्रोच्यमानं महाराज बन्धुभिर्हितबुद्धिभिः ।
तदिदं समनुप्राप्तं व्यसनं त्वां महाभयम् ॥ १७

पुत्राणां राज्यकामेन त्वया राजन् हितैषिणा ।
चरितान्यहितान्येव तेषां ते फलमागतम् ॥ १८

हतो दुश्शासनो राजन् यथोक्तं पाण्डवेन तु ।
प्रतिज्ञा भीमसेनेन निस्तीर्णा सा चमूमुखे ॥ १९

पीतं च क्षतजं तस्य धार्तराष्ट्रस्य संयुगे ।
पाण्डवेन महाराज कर्म कृत्वा सुदुष्करम् ॥ २०

वैशम्पायनः—

एतच्छ्रुत्वा महाराज धृतराष्ट्रोऽम्बिकासुतः ।

विह्वलः पतितो भूमौ [1]नष्टचेता इव द्विपः ॥ २१

[2]पृथिव्या दारणं यद्वत् तद्वत् कर्णस्य पातनम् ।
योधाश्च बहवो राजन् हतास्तत्र जयैषिणः ॥ २२

[3]तस्मिन् निपतिते भूमौ विह्वले राजसत्तमे ।
आर्तनादो महानासीत् स्त्रीणां भरतसत्तम ॥ २३

स शब्दः पृथिवीं सर्वां पूरयामास सर्वतः ॥ २३॥

शोकार्णवे महाघोरे तथा पुप्लुविरे स्त्रियः ।
नेत्राणि वारिणाऽऽपूर्य सरितस्सागरं यथा ॥ २४॥

राजानं च समासाद्य गान्धारी भरतर्षभम् ।
निस्संज्ञा न्यपतद्भूमौ सर्वाण्यन्तःपुराणि च ॥ २५॥

ततस्तु सञ्जयो राजन्नाश्वासयत योषितः ।
मुञ्चमानास्सुबहुशो मुञ्चन्तीर्वारि नेत्रजम् ॥ २६॥

आश्वासितास्स्त्रियस्तास्तु वेपमानाः प्रदृश्य ताः ।
कदलीरिव वातेन धूयमानास्समन्ततः ॥ २७॥

राजानं विदुरश्चापि प्रज्ञाचक्षुर्नराधिपम् ।
आश्वासयत् सुशीतेन सिञ्चंस्तोयेन कौरवम् ॥ २८॥

---

1. ख—तोत्तनुन्न इव द्विपः 2. क-ख-ङ—नास्त्यर्धं श्लोकः
3. अ—सप्तार्धानि न सन्ति

स लब्ध्वा शनकैस्संज्ञां ताश्च दृष्ट्वा स्त्रियो नृपः ।
उन्मत्त इव राजा वै तूष्णीमासीद्दिशां पते ॥ २९॥

सम्प्रध्याय चिरं राजा विनिश्वस्य पुनः पुनः ।
दैवं च गर्हयामास बहु मेने च पाण्डवान् ॥ ३०॥

निनिन्द चात्मनो बुद्धिं शकुनेस्सौबलस्य च ।
ध्यात्वा च सुचिरं कालं वेपमानो मुहुर्मुहुः ॥ ३१॥

संस्तभ्य च मनो भूयो राजा धैर्यसमन्वितः ।
पुनर्गावल्गणिं सूतं पर्यपृच्छत् स सञ्जयम् ॥ ३२॥

धृतराष्ट्रः—

न त्वया कथितं वाक्यं श्रुतं सञ्जय तन्मया ॥ ३३

कच्चिद्दुर्योधनस्सूत न गतो वै यमक्षयम् ।
ब्रूयास्सञ्जय तत्त्वेन पुनरुक्तां कथामिमाम् ॥ ३४

वैशम्पायनः—

एवमुक्तोऽब्रवीत् सूतो राजानं जनमेजय ॥ ३४॥

सञ्जयः—

हतो वैकर्तनो राजन् सह पुत्रैर्महारथैः ।
सोदर्यैश्च महेष्वासैस् सूतपुत्रैस्तनुत्यजैः ॥ ३५॥

दुश्शासनश्च निहतः पाण्डवेन महात्मना ।
पीतं च रुधिरं कोपाद् भीमसेनेन संयुगे ॥ ३६॥

वैशम्पायनः—

एतच्छ्रुत्वा महाराज धृतराष्ट्रोऽम्बिकासुतः ।
दह्यमानोऽब्रवीत् सूतं मुहूर्तं तिष्ठ सञ्जय ॥ ३७॥
व्याकुलं मे मनस्तात मा तावत् किञ्चिदुच्यताम् ॥ ३८
राजाऽपि नाब्रवीत् किञ्चित् सञ्जयो विदुरस्तथा ।
तूष्णीम्भूतस्तदा सोऽथ बभूव जगतीपतिः ॥ ३९

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि प्रथमोऽध्यायः ॥ १ ॥
॥ ७३ ॥ कर्णपर्वणि प्रथमोऽध्यायः ॥ १ ॥
[अस्मिन्नध्याये ३९ श्लोकाः]

॥ द्वितीयोऽध्यायः ॥

धृतराष्ट्रेण निजसेनायां निहतानां नामनिवेदनं चोदितेन सञ्जयेन तत्कथनम् ॥

जनमेजयः—

तच्छ्रुत्वा कर्णहननं पुत्रांश्चैव पलायितान् ।
धृतराष्ट्रो नृपश्रेष्ठो द्विजश्रेष्ठ किमब्रवीत् ॥ १
प्राप्तवान् व्यसनं घोरं पुत्रव्यसनजं महत् ।
काले यदुक्तवांस्तस्मिंस् तन्ममाचक्ष्व तत्त्वतः ॥ २

वैशम्पायनः—

एतच्छ्रुत्वा महाराज धृतराष्ट्रोऽम्बिकासुतः ।
अब्रवीत् सञ्जयं सूतं शोकेनाकुलचेतनः ॥ ३

धृतराष्ट्रः—

दुष्प्रणीतेन मे तात सुतस्यादीर्घदर्शिनः ।
हतं वैकर्तनं श्रुत्वा शोको मर्माणि कृन्तति ॥ ४

तस्य मे संशयं छिन्धि शोकपारं तितीर्षतः ।
कुरूणां सृञ्जयानां च के नु जीवन्ति के हताः ॥ ५

सञ्जयः—

[1]हतश्शान्तनवो राजन् दुराधर्षः प्रतापवान् ।
हत्वा पाण्डवयोधानाम् अर्बुदं दशभिर्दिनैः ॥ ६

तथा द्रोणो महेष्वासः पाञ्चालानां रथव्रजान् ।
निहत्य युधि दुर्धर्षः पश्चाद्दुष्करथो हतः ॥ ७

[2]हतशिष्टस्य भीष्मेण द्रोणेन च महात्मना ।
अर्धं निहत्य सैन्यस्य कर्णो वैकर्तनो हतः ॥ ८

विविंशतिर्महाराज राजपुत्रो महारथः ।
आनर्तयोधाञ् शतशो निहत्य निहतो युधि ॥ ९

तथा पुत्रो विकर्णस्ते क्षत्रधर्ममनुस्मरन् ।
क्षीणबाणो हतश्शूरस् स्थितो ह्यभिमुखः परैः ॥ १०

---

1. ख—अर्धचतुष्टयं नास्ति 2. ङ—नास्त्यर्धद्वयम्

घोररूपानतिक्लेशान् दुर्योधनकृतान् बहून् ।
प्रतिज्ञां स्मरता तेन भीमसेनेन पातितः ॥ ११
[1]दुश्शासनो महाराज घोरे तस्मिन् महाहवे ॥ ११॥
विन्दानुविन्दावावन्त्यौ राजपुत्रौ महाबलौ ।
कृत्वा सुदुष्करं कर्म गतौ वैवस्वतक्षयम् ॥ १२॥
सिन्धुराष्ट्रमुखानीह दश राष्ट्राणि भारत ।
यस्य तिष्ठन्ति वचने यस्थितस्तव शासने ॥ १३॥
अक्षौहिणीर्दशैकां च विनिर्जित्य शितैश्शरैः ।
सोऽर्जुनेन हतो राजन् महावीर्यो जयद्रथः ॥ १४॥
तथा दुर्योधनसुतस् तरस्वी युद्धदुर्मदः ।
वर्तमानः पितुश्शास्त्रे सौभद्रेण निपातितः ॥ १५॥
तथा दौश्शासनिर्वीरो बाहुशाली रणोत्कटः ।
द्रौपदेयेन विक्रम्य गमितो यमसादनम् ॥ १६॥
[2]किरातानामधिपतिस् सागरानूपवासिनाम् ।
देवराजस्य धर्मात्मा प्रियो बहुमतस्सखा ॥ १७॥
भगदत्तो महीपालः क्षत्रधर्मरतस्सदा ।

---

1. क—ङ—नासीदमर्षम् 2. क—अर्धचतुष्टयं नास्ति

धनञ्जयेन विक्रम्य गमितो यमसादनम् ॥ १८॥

तथा कौरवदायादस् सौमदत्तिर्महायशाः ।
हतो भूरिश्रवा राजञ् शूरस्सात्यकिना युधि ॥ १९॥

श्रुतायुरपि चाम्बष्ठः क्षत्रियाणां धुरंधरः ।
चरन्नभीतवत् सङ्ख्ये निहतस्सव्यसाचिना ॥ २०॥

तव पुत्रस्सदाऽमर्षी कृतास्त्रो युद्धदुर्मदः ।
दुश्शासनो महाराज भीमसेनेन पातितः ॥ २१॥

यस्य राजन् गजानीकं बहुसाहस्रमुत्तमम् ।
सुदक्षिणस्स सङ्ग्रामे निहतस्सव्यसाचिना ॥ २२॥

कोसलानामधिपतिर् हत्वा बहुशतान् परान् ।
सौभद्रेणेह विक्रम्य गमितो यमसादनम् ॥ २३॥

बहुशो योधयित्वा तु भीमसेनं महारथः ।
चित्रसेनस्तव सुतो भीमसेनेन पातितः ॥ २४॥

मद्रराजात्मजश्शूरः परेषां भयवर्धनः ।
असिचर्मधरश्श्रीमान् सौभद्रेण निपातितः ॥ २५॥

समः कर्णेन समरे स कर्णस्यैव पश्यतः ।
वृषसेनो महातेजाश् शीघ्रास्त्रो कृतनिश्रमः ॥ २६॥

अभिमन्योर्वधं स्मृत्वा प्रतिज्ञामपि चात्मनः ।
धनञ्जयेन विक्रम्य गमितो यमसादनम् ॥ २७॥

नित्यप्रयुक्तवैरो यः पाण्डवैः पृथिवीपतिः ।
विश्राव्य वैरं पार्थेन श्रुतायुस्स निपातितः ॥ २८॥

शल्यपुत्रस्तु विक्रान्तस् सहदेवेन मारिष ।
हतो रुक्मरथो राजन् स्यालो मातुलजो युधि ॥ २९॥

राजा भागीरथो वृद्धो बृहत्क्षत्रश्च केकयः ।
पराक्रान्तौ च मित्रार्थे निहतौ वीर्यवत्तरौ ॥ ३०॥

भगदत्तसुतो राजन् कृतप्रज्ञो महाबलः ।
श्येनवच्चरता सङ्ख्ये नकुलेन निपातितः ॥ ३१॥

पितामहस्तव तथा बाह्लीकस्सह बाह्लिकैः ।
निहतो भीमसेनेन महाबलपराक्रमः ॥ ३२॥

जयत्सेनस्तथा राजञ् जारासंधिर्महाबलः ।
मागधो निहतस्सङ्ख्ये सौभद्रेण महात्मना ॥ ३३॥

पुत्रस्ते दुर्मुखो राजन् दुष्पहश्च महारथः ।
[1]गदया भीमसेनेन निहतौ शूरमानिनौ ॥ ३४॥

दुर्मर्षणो दुर्विषहो दुर्मनाश्च महारथः ।
कृत्वा सुदुष्करं कर्म गता वैवस्वतक्षयम् ॥ ३५॥

1. अ—नासीदमर्धद्वयम्

असिचर्मधरश्शूरः परेषां भयवर्धनः ।
अग्निचक्रवदाघूर्णन् सोमदत्तो विपातितः ॥ ३६॥

उभौ कलिङ्गवृषभौ भ्रातरौ युद्धदुर्मदौ ।
कृत्वा सुदुष्करं कर्म गतौ वैवस्वतक्षयम् ॥ ३७॥

सचिवो वृषपर्वा ते तथा परमवीर्यवान् ।
भीमसेनेन विक्रम्य गमितो यमसादनम् ॥ ३८॥

तथैव पौरवो राजा नागायुतबलो महान् ।
सगणः पाण्डुपुत्रेण निहतस्सव्यसाचिना ॥ ३९॥

वसातयो महाराज द्विसाहस्राः प्रहारिणः ।
शूरसेनाश्च विक्रान्तास् सर्वे युधि निपातिताः ॥ ४०॥

अभीषाहाः कवचिनः प्रहरन्तो रणोत्कटाः ।
शिबयश्च रथोदाराः कालिङ्गसहिता हताः ॥ ४१॥

गोकुले नित्यसंवृद्धा युद्धे परमकोविदाः ।
गोपालाः कृतवीर्याश्च निहतास्सव्यसाचिना ॥ ४२॥

श्रेणयो बहुसाहस्रास् संशप्तकगणाश्च ये ।
ते सर्वे पार्थमासाद्य गता वैवस्वतक्षयम् ॥ ४३॥

स्यालौ तव महाराज राजानौ वृषकाचलौ ।
त्वदर्थं तौ पराक्रान्तौ निहतौ सव्यसाचिना ॥ ४४॥

उग्रकर्मा महेष्वासो नामतः कर्मतस्तथा ।
साल्वराजो महाराज भीमसेनेन पातितः ॥ ४५॥

अंशुमांश्च महाराज बृहन्तसहितो रणे ।
पराक्रमी च मित्रार्थे गतो वैवस्वतक्षयम् ॥ ४६॥

तथैव रथिनां श्रेष्ठः क्षेमधूर्तिर्विशां पते ।
निहतो गदया राजन् भीमसेनेन संयुगे ॥ ४७॥

तथा राजन् महेष्वासो जलसन्धो महाबलः ।
सुमहत् कदनं कृत्वा हतस्सात्यकिना युधि ॥ ४८॥

अलायुधो राक्षसेन्द्रो बकबन्धुश्च यानवान् ।
घटोत्कचेन विक्रम्य गमितो यमसादनम् ॥ ४९॥

विक्रान्ता बलवन्तश्च भ्रातरस्सह भारत ।
केकयास्सर्वतश्चापि निहतास्सव्यसाचिना ॥ ५०॥

राधेयास्सूतपुत्राश्च कर्णस्य भ्रातरस्तथा ।
रिपूणां कदनं कृत्वा गता वैवस्वतक्षयम् ॥ ५१॥

मद्रका मालवाश्चैव द्रविलाश्चोग्रविक्रमाः ।
यौधेयाश्च लिलिन्धाश्च क्षुद्रकाश्चाप्युशीनराः ॥ ५२॥

मच्चिल्लकास्तुण्डिकेरास् सावित्रीपुत्रकास्तथा ।
प्रागुदीच्याः प्रतीच्याश्च दाक्षिणात्याश्च भारत ॥ ५३॥

पत्तीनां निहतास्सङ्ख्या हयानामर्बुदानि च ।
रथव्राताश्च निहतास् तथा वै वरवारणाः ॥ ५४॥
सध्वजास्सायुधाश्शूरास् सवर्माम्बरभूषणाः ।
कालेन महतायत्ताः कुशलैर्येऽभिवर्धिताः ॥ ५५॥
ते हतास्समरे राजन् पार्थेनाक्लिष्टकर्मणा ॥ ५६
अन्ये तथाऽमितबलाः परस्परममर्षिणः ॥ ५६॥
एते चान्ये च बहवो राजानस्सगणा रणे ।
हतास्सहस्रशो राजन् यन्मां त्वं परिपृच्छसि ॥ ५७॥
एवमेष क्षयो वृत्तः कर्णार्जुनसमागमे ॥ ५८
महेन्द्रेण यथा वृत्रो यथा रामेण रावणः ।
यथा कृष्णेन नरको मुरश्च निहतो रणे ॥ ५९
कार्तवीर्यश्च रामेण भार्गवेण यथा हतः ।
[1]सज्ञातिबान्धवश्शूरस् समरे युद्धदुर्मदः ॥ ६०
रणे कृत्वा महद्युद्धं घोरं त्रैलोक्यविश्रुतम् ॥ ६०॥
यथा स्कन्देन महिषो यथा रुद्रेण चान्तकः ।
तथाऽर्जुनेन निहतो द्वैरथे युद्धदुर्मदः ॥ ६१॥
सामात्यबान्धवश्शूरः कर्णः प्रहरतां वरः ॥ ६२
जयाशा धार्तराष्ट्राणां वैरस्य च मुखं नृप ॥ ६२॥

1. ख—अर्धलयं नास्ति

तीर्णं तत् पाण्डवै राजन् यत् पुरा नावबुध्यसे ।
प्रोच्यमानं महाराज बन्धुभिर्हितकाङ्क्षिभिः ॥ ६३॥

न कृतं च त्वया पूर्वं दैवेन विधिना बलात् ।
तदिदं समनुप्राप्तं व्यसनं त्वां महात्ययम् ॥ ६४॥

पुत्राणां राज्यकामानां त्वया राजन् हितैषिणा ।
अहितान्येव चीर्णानि तेषां ते फलमागतम् ॥ ६५॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि द्वितीयोऽध्यायः ॥ २ ॥
॥ ७३ ॥ कर्णपर्वणि द्वितीयोऽध्यायः ॥ २ ॥
[अस्मिन्नध्याये ६५॥ श्लोकाः]

॥ तृतीयोऽध्यायः ॥

सञ्जयेन धृतराष्ट्रं प्रति युद्धे निहतानां परेषां नामकथनम् ॥

धृतराष्ट्रः—
आख्याता मामकास्तात निहता युधि पाण्डवैः ।
मामकैर्निहतान् ब्रूहि पाण्डवेयांस्तु सञ्जय ॥ १

सञ्जयः—
कृतिनो युधि विक्रान्ता महासत्त्वा महाबलाः ।
सानुबन्धास्सहामात्या भीष्मेण युधि पातिताः ॥ २

नारायणा वल्लवाश्च रामाश्च शतशोऽपरे ।
अनुरक्ताश्च वीरेण भीष्मेण निहता रणे ॥ ३

समः किरीटिना सङ्ख्ये वीर्येण च बलेन च ।
सत्यजित् सत्यसन्धेन द्रोणेन निहतो युधि ॥ ४

[1]पाञ्चालाश्च महेष्वासाः प्रायो राजन्नमर्षिणः ।
द्रोणेन सह सङ्गम्य गता वैवस्वतक्षयम् ॥ ५

तथा विराटद्रुपदौ वृद्धौ सह सुतैर्नृपौ ।
पराक्रान्तौ च मित्रार्थे द्रोणेन निहतौ युधि ॥ ६

यो बाल एव समरे सम्मितस्सव्यसाचिना ।
केशवेन च दुर्धर्षो बलदेवेन चामिभूः ॥ ७

परेषां कदनं कृत्वा महद्रणविशारदः ।
परिवार्य मदामात्रैष् षड्भिः परमकै रणे ॥ ८
अशक्नुवद्भिर्बीभत्सुम् अभिमन्युर्निपातितः ॥ ८॥

तं कृतं विरथं वीरं क्षत्रधर्मे व्यवस्थितम् ।
दौश्शासनिर्महाराज सौभद्रं हतवान् रणे ॥ ९॥

पटच्चरान् निहन्ता तु महत्या सेनया वृतः ।
अम्बष्ठस्सहितश्श्रीमान् मित्रहेतोः पराक्रमी ॥ १०॥

---

1. ख—अर्धचतुष्टयं नास्ति

आसाद्य लक्ष्मणं वीरं दुर्योधनसुतं रणे ।
सुमहत् कदनं कृत्वा गतो वैवस्वतक्षयम् ॥ ११॥

बृहन्तस्तु महाराज कृतास्त्रो युद्धदुर्मदः ।
दुश्शासनेन विक्रम्य गमितो यमसादनम् ॥ १२॥

सामुद्रश्चित्रसेनश्च सह पुत्रेण भारत ।
[1]समुद्रसेनो बलवान् गमितो यमसादनम् ॥ १३॥

मणिमान् दण्डधारश्च राजानौ युद्धदुर्मदौ ।
पराक्रान्तौ तु मित्रार्थे द्रोणेन युधि पातितौ ॥ १४॥

अंशुमान् भोजराजश्च सहसैन्यौ महारथौ ।
भारद्वाजेन विक्रम्य गमितौ यमसादनम् ॥ १५॥

सामुद्रश्चित्रसेनश्च सह पुत्रेण भारत ।
समुद्रसेनेन बलाद् गमितो यमसादनम् ॥ १६॥

[2]अनूपवासी नीलश्च व्याघ्रदत्तश्च वीर्यवान् ।
अश्वत्थाम्ना महाराज गमितौ यमसादनम् ॥ १७॥

चित्रायुधश्चित्रवर्मा कृत्वाऽऽजौ कदनं महत् ।
चित्रमार्गेण विक्रम्य विकर्णेन हतौ युधि ॥ १८॥

वृकोदरसमो युद्धे वृकः केकयजो युधि ।
केकयेन च विक्रम्य भ्राता भ्रात्रा निपातितः ॥ १९॥

---

1. अ—नास्तीदमर्धद्वयम् 2. ख—अर्धचतुष्टयं नास्ति

जनमेजयो हि विक्रान्तः पार्वतीयः प्रतापवान् ।
दुर्मुखेन महाराज तव पुत्रेण पातितः ॥ २०॥

रोचमानौ नृपश्रेष्ठौ रोचमानौ ग्रहाविव ।
द्रोणेन युगपद्राजन् दिवं सम्प्रापितौ शरैः ॥ २१॥

नृपाश्च प्रतियुध्यन्तः पराक्रान्ता महीपते ।
कृत्वा नसुकरं कर्म गता वैवस्वतक्षयम् ॥ २२॥

पुरुजित् कुन्तिभोजश्च मातुलौ सव्यसाचिनः ।
सङ्ग्रामे निर्जिताँल्लोकान् गमितौ द्रोणसायकैः ॥ २३॥

अभिभूः काशिराजश्च काशिकैर्बहुभिर्वृतः ।
वसुदानस्य पुत्रेण त्याजितो देहमाहवे ॥ २४॥

अमितौजा जयत्सेनो जयानीकश्च वीर्यवान् ।
निहत्य शतशश्शूरान् अस्मदीयैर्निपातिताः ॥ २५॥

क्षत्रधर्मा च पाञ्चाल्यः क्षत्रवर्मा च भारत ।
द्रोणेन परमेष्वासौ गमितौ यमसादनम् ॥ २६॥

शिखण्डितनयो युद्धे क्षत्रदेवो युधां वरः ।
लक्ष्मणेन हतो राजंस् तव पौत्रेण भारत ॥ २७॥

सुचित्रश्चित्रवर्मा च पितापुत्रौ महारथौ ।
प्रहरन्तौ रणे वीरौ द्रोणेन निहतौ नृप ॥ २८॥

वार्धक्षेमिर्महाराज समुद्र इव पर्वणि ।
आयुधक्षयमासाद्य प्रशान्तिं परमां गतः ॥ २९॥

सेनाबिन्दुर्नृपश्रेष्ठश् शात्रवान् प्रतपन् युधि ।
बाह्लिकेन महाराज कौरवेन्द्रेण पातितः ॥ ३०॥

धृष्टकेतुर्महाराज चेदीनां प्रवरो रणे ।
कृत्वा नसुकरं कर्म गतो वैवस्वतक्षयम् ॥ ३१॥

तथा सत्यधृतिर्वीरः कृत्वा कदनमाहवे ।
पाण्डवार्थे पराक्रान्तो गमितो यमसादनम् ॥ ३२॥

पुत्रश्च शिशुपालस्य सुकेतुः पृथिवीपतिः ।
निहत्य शात्रवान् सङ्ख्ये द्रोणेन निहतो रणे ॥ ३३॥

विराटपुत्रश्शङ्खस्तु उत्तरश्च महारथः ।
कुर्वन्तौ सुमहत् कर्म गतौ वैवस्वतक्षयम् ॥ ३४॥

तथा सत्यधृतिर्मात्स्यो मदिराश्वश्च वीर्यवान् ।
सूर्यदत्तश्च विक्रान्तो निहतो द्रोणसायकैः ॥ ३५॥

मात्स्यादवरजश्श्रीमाञ् शतानीको निपातितः ॥ ३६
श्रेणिमांस्तु महाराज युध्यमानः पराक्रमी ।

कृत्वा नसुकरं कर्म गतो वैवस्वतक्षयम् ॥ ३७
तथैव युधि विक्रान्तो बलवानतिवीर्यवान् ।

मागधः परमास्त्रज्ञो गमितो यमसादनम् ॥ ३८
द्रोणेन निहतो राजन् सहदेवः प्रतापवान् ॥ ३८॥
वसुदानश्च कदनं कुर्वाणो दिवसं रणे ।
भारद्वाजेन विक्रम्य गमितो वै यमक्षयम् ॥ ३९॥
पाण्ड्यराजश्च विक्रान्तो बलवान् बाहुशालिना ।
अश्वत्थाम्ना हतस्तत्र गमितो वै यमक्षयम् ॥ ४०॥
एते चान्ये च बहवः पाण्डवानां महारथाः ।
हता द्रोणेन भूयिष्ठं यन्मां त्वं परिपृच्छसि ॥ ४१॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि तृतीयोऽध्यायः ॥ ३ ॥
॥ ७३ ॥ कर्णपर्वणि तृतीयोऽध्यायः ॥ ३ ॥
[अस्मिन्नध्याये ४१॥ श्लोकाः]

॥ चतुर्थोऽध्यायः ॥

सञ्जयेन धृतराष्ट्रं प्रति हतावशिष्टानां नामकथनम् ॥

धृतराष्ट्रः—
मामकस्यास्य सैन्यस्य हतोत्सेधस्य सञ्जय ।
अवशेषं न पश्यामि ककुदे मृदिते सति ॥ १
तौ हि वीरौ महेष्वासौ मदर्थे कुरुसत्तमौ ।

भीष्मद्रोणौ हतौ श्रुत्वा को न्वर्थो जीवितेन मे ॥ २

न च मृष्यामि राधेयं हतमाहवशोभिनम् ।
यस्य बाह्वोर्बलं तुल्यं कुञ्जराणां शतैश्शतैः ॥ ३

हतप्रवीरं सैन्यं मे यथा शंससि सञ्जय ।
अहतानपि मे शंस येऽत्र जीवन्ति के चन ॥ ४

एतेषु च हतेष्वद्य ये त्वया परिकीर्तिताः ।
येऽपि जीवन्ति ते सर्वे हता इति मतिर्मम ॥ ५

सञ्जयः—

यस्मिन् महास्त्राणि समर्पितानि
चित्राणि शुभ्राणि ससङ्ग्रहाणि ।
महारथः कृतिमान् क्षिप्रहस्तो
दृढायुधो दृढमुष्टिर्दृढेषुः ॥ ६

आचार्यवद् द्रोणसुतस्तरस्वी
व्यवस्थितो योद्धुकामस्त्वदर्थे ॥ ६॥

[1]आनर्तवासी हृदिकात्मजोऽसौ
महारथस्सत्त्ववतां वरिष्ठः ।
स्वयं भोजः कृतवर्मा कृतास्त्रो
व्यवस्थितो योद्धुकामस्त्वदर्थे ॥ ७॥

1. क-ङ—नास्तीदमर्धद्वयम्

आर्तायनिस्समरे दुष्प्रकम्प्यस्
सेनाग्रणीः प्रथमस्तावकानाम् ।
स्वान् स्वस्रीयान् पाण्डवेयान् विसृज्य
सत्यां वाचं स्वां चिकीर्षंस्तरस्वी ॥ ८॥

तेजोवधं सूतपुत्रस्य सङ्ख्ये
प्रतिश्रुत्याजातशत्रोः पुरस्तात् ।
दुराधर्षश्शक्रसमानवीर्यश्
शल्यस्थितो योद्धुकामस्त्वदर्थे ॥ ९॥

[1]शारद्वतो गौतमश्चापि राजन्
महाबलो बहुचित्रास्त्रयोधी ।
धनुश्चित्रं संवहन् भारसाहं
व्यवस्थितो योद्धुकामस्त्वदर्थे ॥ १०॥

गान्धारराजस्सुतश्च राजन्
दुर्द्यूतदेवी कलहप्रियश्च ।
गान्धारमुख्यैर्यवनैश्च राजन्
व्यवस्थितो योद्धुकामस्त्वदर्थे ॥ ११॥

[2]महारथः केकयराजपुत्रस्
सदश्वयुक्तं च पताकिनं च ।

---

1. ख—नास्तीदमर्धद्वयम् 2. ख—अयं श्लोको नास्ति

रथाभ्यमारुह्य कुरुप्रवीर
व्यवस्थितो योद्धुकामस्त्वदर्थे ॥ १२॥

तथा सुतस्ते ज्वलनार्कवर्णं
रथं समास्थाय कुरुप्रवीरः ।
व्यवस्थितः कुरुराजो नरेन्द्र
व्यभ्रे सूर्यो भ्राजमानो यथा खे ॥ १३॥

दुर्योधनो नागकुलस्य मध्ये
व्यवस्थितस्सह सैन्यैः प्रवीरैः ।
बिभ्रद्राजन् कवचं सूर्यभासं
जाम्बूनदं चित्रकक्ष्यावनद्धम् ॥ १४॥

स राजमध्ये पुरुषप्रवीरो
व्यवस्थितो योत्स्यमानस्त्वदर्थे ।
पद्मान्तराभोऽग्निरिवाल्पधूमो
मेघान्तरे सूर्य इव प्रकाशः ॥ १५॥

तथा सुषेणोऽप्यसिचर्मपाणिस्
तवात्मजस्सत्यसेनश्च वीरः ।
व्यवस्थितश्चित्रसेनेन सार्धं
हृष्टात्मना समरे योद्धुकामः ॥ १६॥

ह्रीनिषेधो भारतराजपुत्रश्
चित्रायुधश्श्रुतवर्मा जयश्च ।
शलश्च सत्यव्रतदुश्शलौ च
व्यवस्थिता बलिनो योद्धुकामाः ॥ १७॥

कैतव्यानामधिपश्शूरघाती
रणे रणे शत्रुहा राजपुत्रः ।
पत्तीरथी नागहयप्रयायी
व्यवस्थितो योद्धुकामस्त्वदर्थे ॥ १८॥

वीरश्श्रुतायुश्च श्रुतायुधश्च
चित्राङ्गदश्चित्रवर्मा च योधी ।
व्यवस्थिता यत्तसैन्या नराग्र्याः
प्रहारिणो मानिनस्सत्यसन्धाः ॥ १९॥

कर्णात्मजस्सत्यसेनो महात्मा
व्यवस्थितस्समरे योद्धुकामः ॥ २०

अथापरौ कर्णसुतौ वराहौ
महाबलौ लघुहस्तौ नरेन्द्र ।
बले महत्युल्बणसत्त्ववीर्यौ
व्यवस्थितौ योद्धुकामौ त्वदर्थे ॥ २१

एतैश्च मुख्यैरपरैश्च राजन
योधप्रवीरैरमितप्रभावैः ।
वृतो रणप्रेप्सुरमित्रसङ्घैर्
व्यवस्थितः कुरुराजो जयाय ॥ २२

धृतराष्ट्रः—
आख्याता जीवमाना ये परेभ्योऽन्ये यथातथम् ।
तान् हतानवगच्छामि व्यक्तमर्थोपपत्तितः ॥ २३

वैशम्पायनः—
एवं ब्रुवन्नेव तदा धृतराष्ट्रोऽम्बिकासुतः ।
हतप्रवीरभूयिष्ठं किञ्चिच्छेषं स्वकं बलम् ॥ २४
श्रुत्वा व्यामोहमागच्छच् छोकव्याकुलचेतनः ॥ २४॥

मुह्यमानोऽब्रवीच्चैनं मुहूर्तं तिष्ठ सञ्जय ।
व्याकुलं मे मनस्सूत श्रुत्वैतन्महदप्रियम् ॥ २५॥

नष्टचित्तस्ततस्सोऽथ बभूव जगतीपतिः ॥ २६

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि चतुर्थोऽध्यायः ॥ ४ ॥
॥ ७३ ॥ कर्णपर्वणि चतुर्थोऽध्यायः ॥ ४ ॥
[अस्मिन्नध्याये २६ श्लोकाः]

॥ पञ्चमोऽध्यायः ॥

धृतराष्ट्रेण कर्णगुणानुवर्णनपूर्वकं शोचनम् ॥

जनमेजयः—

श्रुत्वा कर्णं हतं युद्धे पुत्रांश्चैव पलायिनः ।
नरेन्द्रः किञ्चिदाश्वस्तो द्विजश्रेष्ठ किमब्रवीत् ॥ १

प्राप्तवान् परमं दुःखं पुत्रव्यसनजं महत् ।
तस्मिन् यदुक्तवान् काले तन्ममाचक्ष्व पृच्छतः ॥ २

वैशम्पायनः—

श्रुत्वा कर्णस्य निधनम् अश्रद्धेयमिवाद्भुतम् ।
भूतसम्मोहनं भीमं मेरोः पर्यसनं यथा ॥ ३

चित्तमोहमिवायुक्तं भार्गवस्य महात्मनः ।
पराजयमिवेन्द्रस्य द्विषद्भ्यो भीमकर्मणः ॥ ४

दिवः प्रपतनं भानोर् उर्व्यामिव महाद्युतेः ।
संशोषणमिवाचिन्त्यं समुद्रस्याक्षयाम्भसः ॥ ५

महीवियद्दिवाम्बूनां सर्वनाशमिवाद्भुतम् ।
कर्मणोरिव वैफल्यम् उभयोः पुण्यपापयोः ॥ ६

सञ्चिन्त्य निपुणं बुद्ध्या धृतराष्ट्रो जनेश्वरः ।
नेदमस्तीति सञ्चिन्त्य कर्णस्य समरे वधम् ॥ ७

प्राणिनामेवमात्मत्वात् स्यादपीति विचार्य च ।
शोकाग्निना दह्यमानो दह्यमान इवाशयः ॥ ८

[1]विस्रस्ताङ्गश्श्वसन् दीनो हा हेत्युक्त्वा सुदुःखितः ।
विललाप महाराज धृतराष्ट्रोऽम्बिकासुतः ॥ ९

धृतराष्ट्रः—

सञ्जयातिरथिर्वीरस् सिंहद्विरदविक्रमः ।
वृषभप्रतिमस्कन्धो वृषभाक्षगतिस्वरः ॥ १०

वृषभो वृषभस्येव यो युद्धे न निवर्तते ।
शत्रोरपि महेन्द्रस्य सिंहसंहननो युवा ॥ ११

यस्य ज्यातलशब्देन शरवृष्टिरयेण च ।
रथाश्वनरमातङ्गा न च तिष्ठन्ति संयुगे ॥ १२

यमाश्रित्य महाबाहुं द्विषत्सङ्घमच्युतम् ।
दुर्योधनोऽकरोद्वैरं पाण्डुपुत्रैर्महारथैः ॥ १३

स कथं रथिनां श्रेष्ठः कर्णः पार्थेन संयुगे ।
निहतः पुरुषव्याघ्रः प्रसह्यामितविक्रमः ॥ १४

यो नामन्यत वै नित्यम् अच्युतं सधनञ्जयम् ।
न वृष्णीन् नाहितानन्यान् स्वबाहुबलमाश्रितः ॥ १५

शार्ङ्गगाण्डीवधन्वानौ सहितावपराजितौ ।

---

1. क--नास्तीदमर्धम्

अहं दिव्याद्रथादेकः पातयिष्यामि संयुगे ॥ १६
इति यस्सततं मन्दम् अवोचल्लोभमोहितम् ।
दुर्योधनमवाचीनं राज्यकामुकमातुरम् ॥ १७
योऽजयत् सर्वकाम्भोजान् अम्बष्ठान् केकयैस्सह ।
गान्धारान् मद्रकान् मात्स्यांस् त्रिगर्तांस्तङ्कणाञ् शकान् ॥१८
पाञ्चालांश्च विदेहांश्च कुणिन्दान् काशिकोसलान् ।
सुह्मानङ्गांश्च वङ्गांश्च निषादान् पुण्ड्रकीकटान् ॥ १९
वत्सान् कलिङ्गान् दरदान् अश्मकानृषिकानपि ।
शबरान् परहूणांश्च प्रहूणान् सरलानपि ॥ २०
म्लेच्छराष्ट्राधिपांश्चैव दुर्गा[1]नाटविकांस्तथा ॥ २०॥
जित्वैतान् समरे वीरस् सुतीक्ष्णैः कङ्कपत्रिभिः ।
करमाहारयामास जित्वा सर्वानरींस्तथा ॥ २१॥
उच्चैश्श्रवा वरोऽश्वानां राज्ञां वैश्रवणो वरः ।
वरो महेन्द्रो देवानां कर्णः प्रहरतां वरः ॥ २२॥
यं लब्ध्वा मागधो राजा सांत्वमानोऽथ सौहृदैः ।
अरौत्सीत् क्षत्रमतुलम् ऋते कौरवयादवान् ॥ २३॥
तं श्रुत्वा निहतं कर्णं द्वैरथे सव्यसाचिना ।
शोकार्णवे निमग्नोऽहम् अप्लवस्सागरे यथा ॥ २४॥

1. क—नारङ्कानपि

ईदृशैर्यदहं दुःखैर् न विनश्यामि सञ्जय ।
वज्राद्दृढतरं मन्ये हृदयं मम दुर्भिदम् ॥ २५॥

ज्ञातिसम्बन्धिमित्राणाम् इमं श्रुत्वा पराभवम् ।
को मदन्यः पुमाँल्लोके न जह्यात् सूत जीवितम् ॥ २६॥

विषमग्निं प्रपातं वा पर्वताग्रादहं वृणे ।
महाप्रस्थानगमनं जलं प्रायोपवेशनम् ॥ २७॥
न हि शक्ष्यामि दुःखानि सोढुं कष्टानि सञ्जय ॥ २८

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि पञ्चमोऽध्यायः ॥ ५ ॥
॥ ७३ ॥ कर्णपर्वणि पञ्चमोऽध्यायः ॥ ५ ॥
[अस्मिन्नध्याये २८ श्लोकाः]

॥ षष्ठोऽध्यायः ॥

कर्णवधश्रवणानन्तरोत्थकधृतराष्ट्रप्रवृत्तिं जनमेजयेन पृष्टस्य वैशंपायनस्य कर्णदुर्योधनस्तुतिनिन्दापूर्वकं सञ्जयं प्रति कर्णार्जुनयुद्धकथनचोदनारूपधृतराष्ट्रप्रवृत्तिकथनम् ॥

सञ्जयः—

श्रिया कुलेन यशसा तपसा च श्रुतेन च ।
त्वामद्य सन्तो मन्यन्ते ययातिमिव नाहुषम् ॥ १

श्रुते महर्षिप्रतिमः कृतकृत्योऽसि पार्थिव ।

पर्यवस्थापयात्मानं मा विषादे मनः कृथाः ॥ २

धृतराष्ट्रः—

दैवमेव परं मन्ये पौरुषं तु निरर्थकम् ।
यत्र सालप्रतीकाशः कर्णोऽवध्यत संयुगे ॥ ३

हत्वा यौधिष्ठिरं सैन्यं पाञ्चालांश्च महारथान् ।
प्रताप्य शरवर्षेण दिशस्सर्वा महारथः ॥ ४

मोहयित्वा रणे पार्थान् वज्रहस्त इवासुरान् ।
कथं स निहतश्शेते वातनुन्न इव द्रुमः ॥ ५

शोकस्यान्तं न पश्यामि पारं जलनिधेरिव ।
चिन्ता मे वर्धते तीव्रा मुमूर्षा चोपजायते ॥ ६

कर्णस्य निधनं श्रुत्वा विजयं फल्गुनस्य च ।
अश्रद्धेयमिदं मन्ये वधं कर्णस्य सञ्जय ॥ ७

वज्रसारमयं नूनं हृदयं मम दुर्भिदम् ।
यच्छ्रुत्वा पुरुषव्याघ्रं हतं कर्णं न दीर्यते ॥ ८

आयुर्नूनं सुदीर्घं मे विहितं दैवतैः पुरा ।
यत्र कर्णं हतं श्रुत्वा जीवामीह सुदुःखितः ॥ ९

धिग्जीवितमिदं चैव सुहृद्धीनस्य सञ्जय ।
[1]अद्य चाहं दशामेतां गतस्सञ्जय कुत्सिताम् ॥ १०

---

1. ख—अर्धपञ्चकं नास्ति

कृपणं वर्तयिष्यामि शोच्यस्सर्वस्य मन्दधीः ॥ १०॥

अहमेव पुरा भूत्वा सर्वलोकस्य सत्कृतः ।
परिभूतः पुनस्सूत कथं शक्ष्यामि जीवितुम् ॥ ११॥

दुःखाद्दुःखतरं मन्ये प्राप्तवानस्मि सञ्जय ।
भीष्मद्रोणवधेनैव कर्णस्य च महात्मनः ॥ १२॥

नात्र शेषं प्रपश्यामि सूतपुत्रे हते युधि ।
स हि पारं महानासीत् पुत्राणां मम सञ्जय ॥ १३॥

युद्धे विनिहतश्शूरो विसृजन् सायकान् बहून् ।
को नु मे जीवितेनार्थस् तमृते पुरुषर्षभम् ॥ १४॥

रथादातिरथिर्नूनम् अपतत् सायकार्दितः ।
पर्वतस्येव शिखरं वज्रपातावदारितम् ॥ १५॥

स शेते पृथिवीं नूनं शोभयन् रुधिरोक्षितः ।
मातङ्ग इव मत्तेन मातङ्गेन निपातितः ॥ १६॥

यो बलं धार्तराष्ट्राणां पाण्डवानां यतो भयम् ।
सोऽर्जुनेन हतः कर्णः प्रतिमानं धनुष्मताम् ॥ १७॥

स हि वीरो महेष्वासः पुत्राणामभयङ्करः ।
शेते विनिहतश्शूरश् शक्रेणेव पुरा बलः ॥ १८॥

पङ्गोरिवाध्वगमनं दरिद्रस्येव कामिता ।
दुर्योधनस्य लोभश्च समान्येतानि सञ्जय ॥ १९॥

अन्यथा चिन्तितं कार्यम् अन्यथा तच्च जायते ।
अहो नु बलवद्दैवं कालश्च दुरतिक्रमः ॥ २०॥

पलायमानः कृपणो दीनात्मा दीनपौरुषः ।
कच्चिन्न निहतस्सूत पुत्रो दुश्शासनो मम ॥ २१॥

कच्चिन्न नीचाचरितं कृतवांस्तात संयुगे ।
पुत्रो दुर्योधनस्सङ्ख्ये न हतो मम सञ्जय ॥ २२॥
कच्चित् ते निहताश्शूरा यथा ते क्षत्रियास्तथा ॥ २३

युधिष्ठिरस्य वचनं मा युद्धमिति सर्वदा ।
दुर्योधनो नाभ्यगृह्णान्मूढः पथ्यमिवौषधम् ॥ २४

शरतल्पे शयानेन भीष्मेण सुमहात्मना ।
पानीयं याचितः पार्थस् सोऽविध्यन्मेदिनीतलम् ॥ २५

जलस्य धारां जनितां दृष्ट्वा तां पाण्डवेन च ।
अब्रवीत् सुमहाबुद्धिस् तात संशाम्य पाण्डवैः ॥ २६

प्रशमाद्धि भवेच्छ्रेयो मदन्तं युद्धमेव च ।
भ्रातृभावेन पृथिवीं भुङ्क्ष्व पाण्डुसुतैस्सह ॥ २७

अकुर्वन् वचनं तस्य नूनं शोचति पुत्रकः ।
तदिदं समनुप्राप्तं वचनं दीर्घदर्शिनः ॥ २८

अहं तु निहतामात्यो हतपुत्रश्च सञ्जय ।

[1]द्यूतेन कृच्छ्रमापन्नो लूनपक्ष इव द्विजः ॥ २९

[2]यथा गृहीत्वा शकुनिं पक्षौ लुप्त्वाऽथ सञ्जय ।
विसर्जयन्ते संहृष्टाः क्रीडमानाः कुमारकाः ॥ ३०

लूनपक्षतया तस्य गमनं नोपपद्यते ।
तथाऽहमपि सम्प्राप्तो लूनपक्ष इव द्विजः ॥ ३१

क्षीणस्सर्वार्थहीनश्च निर्बन्धुर्ज्ञातिसङ्क्षये ।
कां दिशं प्रतिपत्स्यामि दीनश्शोकवशं गतः ॥ ३२

वैशम्पायनः—
इत्येवं धृतराष्ट्रोऽथ विलप्य बहु दुःखितः ।
प्रोवाच सञ्जयं भूयश् शोकव्याकुललोचनः ॥ ३३

धृतराष्ट्रः—
दुर्योधनस्य वृद्ध्यर्थं पृथिवीं योऽजयत् प्रभुः ।
स जितः पाण्डवैश्शूरैस् समर्थैर्वीर्यशालिभिः ॥ ३४

तस्मिन् हते महेष्वासे कर्णे युधि किरीटिना ।
के वीराःपर्यतिष्ठन्त तन्ममाचक्ष्व सञ्जय ॥ ३५

कच्चिन्नैकः परित्यक्तःपाण्डवैर्निहतो रणे ।
उक्तं त्वया पुरा सूत यथा शूरौ निपातितौ ॥ ३६

भीष्ममप्रतियुध्यन्तं शिखण्डी सायकोत्तमैः ।
पातयामास समरे सर्वशस्त्रभृतां वरम् ॥ ३७

1. ङ—नास्तीदमर्धद्वयम् 2. ख—इदमाद्यर्धचतुष्टयं नास्ति

तथा द्रौपदिना द्रोणो न्यस्तसर्वायुधो युधि ।
धर्मराजवचश्श्रुत्वा अश्वत्थामा हतस्त्विति ॥ ३८

युक्तयोगो महेष्वासश् शरैर्बहुभिराचितः ।
निहतः खड्गमुद्धृत्य धृष्टद्युम्नेन सञ्जय ॥ ३९

अन्तरेण हतावेतौ च्छलेन च विशेषतः ।
अश्रौषमहमेतद्वै भीष्मद्रोणौ निपातितौ ॥ ४०

भीष्मद्रोणौ हि समरे न हन्याद्वज्रभृत् स्वयम् ।
न्यायेन युध्यन् समरे तद्वै सत्यं ब्रवीमि ते ॥ ४१

कर्णे त्वस्यन्तमस्त्राणि दिव्यानि च लघूनि च ।
कथमिन्द्रोपमं सङ्ख्ये मृत्युर्वीरं समस्पृशत् ॥ ४२

यस्य विद्युत्प्रभां शक्तिं दिव्यां कनकभूषणाम् ।
प्रायच्छद्विषतां हन्त्रीं कुण्डलाभ्यां पुरन्दरः ॥ ४३

यस्य सर्पमुखो दिव्यश् शरः काञ्चनभूषणः ।
स शेते निहतः पत्त्री समरेष्वरिसूदनः ॥ ४४

भीष्मद्रोणमुखान् वीरान् योऽवमत्य महारथान् ।
जामदग्न्यान्महाघोरं ब्राह्ममस्त्रमशिक्षयत् ॥ ४५

यश्च द्रोणमुखान् दृष्ट्वा विमुखानर्दिताञ् शरैः ।
सौभद्रस्य महाबाहुर् व्यधमत् कार्मुकं शरैः ॥ ४६

यश्च नागायुतप्राणं वातरंहसमच्युतम् ।
विरथं सहसा कृत्वा भीमसेनमपाहसत् ॥ ४७

सहदेवं च निर्जित्य शरैस्सन्नतपर्वभिः ।
कृपया विरथं कृत्वा नावधीद्धर्मवित्तमः ॥ ४८

यश्च मायासहस्राणि ध्वंसयित्वा घटोत्कचम् ।
रणोत्कटं राक्षसेन्द्रं शक्रशक्त्या निजघ्निवान् ॥ ४९

एतांश्च दिवसान् यस्य युद्धे भीतो धनञ्जयः ।
नागमद्वैरथं वीरस् स कथं निहतो रणे ॥ ५०

रथभङ्गो न चेत् तस्य धनुर्वा न व्यशीर्यत ।
न चेदस्त्राणि नष्टानि कथं स निहतः परैः ॥ ५१

को हि शक्तो रणे कर्णं विधून्वानं महद्धनुः ।
विमुञ्चन्तं शरान् घोरान् दिव्यान्यस्त्राणि चाहवे ॥ ५२
जेतुं पुरुषशार्दूल शार्दूलमिव वेगितम् ॥ ५२॥

ध्रुवमस्य धनुश्छिन्नं रथो वाऽभिगतो महीम् ।
अस्त्राणि वा प्रनष्टानि यथा शंससि मे हतम् ॥ ५३॥
न ह्यन्यदनुपश्यामि कारणं तस्य पातने ॥ ५४

न हन्यामर्जुनं यावत् तावत् पादौ न धावये ।
इति यस्य महाघोरं व्रतमासीन्महात्मनः ॥ ५५

यस्य भीतो वने नित्यं धर्मराजो युधिष्ठिरः ।

त्रयोदश समा निद्रां न लेभे पुरुषर्षभः ॥ ५६

यस्य वीर्यवतो वीर्यं समाश्रित्य महात्मनः ।
मम पुत्रस्सभां भार्यां पाण्डूनां नीतवान् बलात् ॥ ५७

तत्रापि च सभामध्ये पाण्डवानां स्म पश्यताम् ।
दासभार्येति पाञ्चालीम् अब्रवीत् कुरुसन्निधौ ॥ ५८

यश्च गाण्डीवमुक्तानां स्पर्शमुग्रमचिन्तयन् ।
अपतिर्ह्यसि कृष्णेति ब्रुवन् पार्थानवैक्षत ॥ ५९

यस्य नासीद्भयं पार्थात् सपुत्रात् सजनार्दनात् ।
स्वबाहुबलमाश्रित्य मुहूर्तमपि सञ्जय ॥ ६०

तस्य नाहं वधं मन्ये देवैरपि सवासवैः ।
प्रतीपमभिधावद्भिः किं पुनस्तात पाण्डवैः ॥ ६१

न हि ज्यां संस्पृशानस्य तलत्रे चापि गृह्णतः ।
पुमानतिरथेस्स्थातुं कश्चित् प्रमुखतोऽर्हति ॥ ६२

अपि स्यान्मेदिनी हीना सोमसूर्यप्रभांशुभिः ।
न वधः पुरुषेन्द्रस्य सत्त्वयुक्तस्य संयुगे ॥ ६३

येन मन्दस्सहायेन भ्रात्रा दुश्शासनेन च ।
ब्रुवतो वासुदेवस्य प्रत्याख्यानमरोचयत् ॥ ६४

स नूनं वृषभस्कन्धं दृष्ट्वा कर्णं निपातितम् ।
दुश्शासनं च निहतं मन्ये शोचति पुत्रकः ॥ ६५

हतं वैकर्तनं दृष्ट्वा द्वैरथे सव्यसाचिना ।
जयतः पाण्डवांश्चापि किं स्विद्दुर्योधनोऽब्रवीत् ॥ ६६

[1]दुर्मर्षणं च निहतं जयत्सेनं च संयुगे ।
[2]प्रभग्नं च बलं दृष्ट्वा वध्यमानं महारथैः ॥ ६७

पराङ्मुखांश्च नृपतीन् पलायनपरायणान् ।
विद्रुतान् रथिनो दृष्ट्वा मन्ये शोचति पुत्रकः ॥ ६८

अनयश्चातिमानी च बालबुद्धिरमर्षणः ।
हतोत्साहं बलं दृष्ट्वा किं स्विद्दुर्योधनोऽब्रवीत् ॥ ६९

स्वयं वैरं महत् कृत्वा वार्यमाणस्सुहृद्गणैः ।
प्रधने हतभूयिष्ठे बले किं वाऽब्रवीदसौ ॥ ७०

भ्रातरं निहतं दृष्ट्वा भीमसेनेन संयुगे ।
रुधिरे पीयमाने च किं स्विद् दुर्योधनोऽब्रवीत् ॥ ७१

सह गान्धारराजेन सभायां यदभाषत ।
कर्णोऽर्जुनं रणे हन्ता हते तस्मिन् किमब्रवीत् ॥ ७२

द्यूतं कृत्वा रणे हृष्टो वञ्चयित्वा च पाण्डवान् ।
शकुनिस्सौबलस्तात हते कर्णे किमब्रवीत् ॥ ७३

---

1. ङ—श्लोकत्रयं नास्ति
2. ख—भग्नं च स्वबलं दृष्ट्वा किं स्विद्दुर्योधनोऽब्रवीत् ।
सह गान्धार इति वर्तते मध्ये अर्धाष्टकं नास्ति

[1]कृतवर्मा महेष्वासस् सात्वतानां महारथः ।
हतं वैकर्तनं दृष्ट्वा हार्दिक्यः किमभाषत ॥ ७४

ब्राह्मणाः क्षत्रिया वैश्या यस्य शिक्षामुपासते ।
धनुर्वेदं चिकीर्षन्तो द्रोणपुत्रस्य धीमतः ॥ ७५

दिव्यरूपेण सम्पन्नो दर्शनीयो महायशाः ।
अश्वत्थामा हते कर्णे किमभाषत सञ्जय ॥ ७६

आचार्यो यो धनुर्वेदे गौतमो रथसत्तमः ।
स कृपस्तात तेजस्वी हते कर्णे किमब्रवीत् ॥ ७७

मद्रराजो महेष्वासश् शल्यस्तत्र किमप्रवीत् ।
दृष्ट्वा विनिहतं कर्णं सारथ्ये रथिनां वरः ॥ ७८
किमभाषत सौवीरो मद्राणामधिपो बली ॥ ७८॥

दृष्टं तेन हि तत् सर्वं यथा कर्णो निपातितः ॥ ७९
ये च केचन राजानः पृथिव्यां योद्धुमागताः ।

वैकर्तनं हतं दृष्ट्वा कान्यभाषन्त सञ्जय ॥ ८०

कर्णे विनिहते वीरे रथव्याघ्रे नरर्षभे ।
को वा मुखमनीकानाम् आसीत् सञ्जय भागशः ॥ ८१

---

1. अ-ग-घ-ङ—मद्रराजो महाष्वासो शल्यस्तत्र किमब्रवीत् ।
दृष्टं तेन हि तत् सर्वं यथा कर्णे निपातिते ॥
[अधिकः पाठः]

मद्रराजः कथं शल्यो नियुक्तो रथिनां वरः ।
वैकर्तनस्य सारथ्ये तन्ममाचक्ष्व सञ्जय ॥ ८२

केऽरक्षन् दक्षिणं चक्रं सूतपुत्रस्य संयुगे ।
वामं चक्रं ररक्षुर्वा के वा सन्नस्य पृष्ठतः ॥ ८३

के कर्णं न जहुश्शूराः के क्षुद्राः प्राद्रवन् भयात् ।
कथं च वस्समेतानां हतः कर्णो महारथः ॥ ८४

पाण्डवाश्च कथं शूराः प्रत्युदीयुर्महारथाः ।
सृजन्तश्शरवर्षाणि वारिधारा इवाम्बुदाः ॥ ८५

स च सर्पमुखो दिव्यो महेषुप्रवरस्तदा ।
व्यर्थः कथं समभवत् तन्माचक्ष्व सञ्जय ॥ ८६

[1]मामकस्यास्य सैन्यस्य हतोत्साहस्य सञ्जय ।
अवशेषं न पश्यामि ककुदे मृदिते युधि ॥ ८७

तौ हि वीरौ महेष्वासौ मदर्थे त्यक्तजीवितौ ।
भीष्मद्रोणौ हतौ श्रुत्वा को न्वर्थो जीवितेन मे ॥ ८८

पुनः पुनर्न मृष्यामि वधं कर्णस्य पाण्डवैः ।
यस्य बाह्वोर्बलं तुल्यं कुञ्जराणां शतैश्शतैः ॥ ८९

द्रोणे हते च यद्वृत्तं कौरवाणां परैस्सह ।
सङ्ग्रामे नरवीराणां तन्ममाचक्ष्व सञ्जय ॥ ९०

1. ख—इदमर्धं नास्ति

[1]यथा च कर्णः कौन्तेयैस् सह युद्धमयोजयत् ।
यथा वा द्विषतां हन्ता हतो युद्धे तदुच्यताम् ॥ ९१

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि षष्ठोऽध्यायः ॥ ६ ॥
॥ ७३ ॥ कर्णपर्वणि षष्ठोऽध्यायः ॥ ६ ॥
[अस्मिन्नध्याये ९१ श्लोकाः]

॥ सप्तमोऽध्यायः ॥

अश्वत्थामवचनाद्दुर्योधनेन सैनापत्येऽभिषिक्तेन कर्णेन रणाय सेनानियोजनम् ॥

सञ्जयः—

हते द्रोणे महेष्वासे तस्मिन्नहनि भारत ।
कृते च मोघसङ्कल्पे द्रोणपुत्रे महारथे ॥ १

त्रासयित्त्वा महाराज कौरवाणामनीकिनीम् ।
व्यूह्य पार्थस्स्वकं सैन्यम् अतिष्ठद्भ्रातृभिस्सह ॥ २

तमवस्थितमाज्ञाय पुत्रस्ते भरतर्षभ ।
द्रवमाणं बलं दृष्ट्वा पौरुषेण न्यवारयत् ॥ ३

स्वमनीकमवस्थाप्य बाहुवीर्यमुपाश्रितः ।
संयुद्ध्य सुचिरं कालं पाण्डवैस्सह भारत ॥ ४

1. ख—इदमर्धं नास्ति

लब्धलक्षैः परैर्हृष्टैर् व्यायच्छद्भिश्चिरं तदा ।
संध्याकालं समासाद्य प्रत्याहारमकारयत् ॥ ५

[1]निवेश्य बलवद्घोरं क्षुत्पिपासाभयैर्युतम् ।
श्रमेण महता युक्तं तथा द्रोणवधेन च ॥ ६

[2]दीनरूपा रणे कर्म कृत्वा घोरां च शर्वरीम् ।
निवेशं प्राप्य सा सेना विश्रम्य मुदिताऽभवत् ॥ ७

कृत्वाऽपहारं सैन्यानां प्रविश्य शिबिरं स्वकम् ।
कुरवस्सहिता मन्त्रं मन्त्रयाञ्चक्रिरे मिथः ॥ ८

पर्यङ्केषु परार्ध्येषु वरास्तरणवत्सु च ।
उपविष्टेषु तेष्वेवं राजपुत्रेषु भारत ॥ ९

तत्र दुर्योधनो राजा साम्ना परमवल्गुना ।
तानाभाष्य महेष्वासान् प्राप्तकालमभाषत ॥ १०

दुर्योधनः—

मतं मतिमतां श्रेष्ठास् सर्वे प्रब्रूत मा चिरम् ।
एवं गतेन यत् कार्यं भवेत् कार्यतरं नृपाः ॥ ११

सञ्जयः—

एवमुक्ता नरेन्द्रेण नरसिंहा युयुत्सवः ।
चक्रुर्नानाविधाश्चेष्टास् सिंहासनगतास्तदा ॥ १२

इङ्गितानि निशाम्यैषां प्राणान् युद्धे जुहूषताम् ।

1. ङ—श्लोकोऽयं नास्ति 2. ख—अर्धमयं नास्ति

समुद्वीक्ष्य मुखं राज्ञो बालार्कसमवर्चसम् ॥ १२
आचार्यपुत्रो मेधावी वाक्यमर्थवदाददे ॥ १३॥

अश्वत्थामा—

[1]रागो योगस्तथा दाक्ष्यं नयश्चेत्यर्थसाधकाः ।
उपायाः पण्डितैः प्रोक्तास् ते तु दैवं समाश्रिताः ॥ १४॥
लोकप्रवीरा येऽस्माकं देवकल्पा महारथाः ।
नीतिमन्तस्तथा युक्ता रक्ता दक्षाश्च ते हताः ॥ १५॥
न त्वेव कार्यं नैराश्यम् अस्माभिर्विजयं प्रति ।
सुनीतैरिह सर्वार्थैर् दैवमप्यनुलोम्यते ॥ १६॥
ते वयं प्रवरं नृणां सर्वैर्योधगुणैर्युतम् ।
कर्णं सेनापतिं कृत्वा प्रमथिष्यामहे रिपून् ॥ १७॥
एष ह्यतिबलश्शूरः कृतास्त्रो युद्धदुर्मदः ।
वैवस्वत इवासह्यश् शक्तो जेतुं रणे रिपून् ॥ १८॥

सञ्जयः—

एतदाचार्यतनयाच् छ्रुत्वा राजंस्तवात्मजः ।
दुर्योधनो महाराज भृशं प्रीतमनास्तदा ॥ १९॥
आशां बलवतीं चक्रे कर्णं प्रति महारथम् ।
हते भीष्मे मृते द्रोणे कर्णो जेष्यति पाण्डवान् ॥ २०॥

1. क-ख-ङ—त्यागी

तामेवमाशां हृदये कृत्वाऽऽश्वस्य च भारत ।
[1]स्वमनश्च व्यवस्थाप्य बाहुवीर्यमुपाश्रितः ॥ २१॥

प्रियसत्कारसंयुक्तं तथ्यमात्महिते रतम् ।
दुर्योधनो युधां श्रेष्ठो राधेयमिदमब्रवीत् ॥ २२॥

दुर्योधनः—

कर्ण जानामि ते वीर्यं सौहृदं च परं मयि ।
तथाऽपि त्वां महाबाहो प्रवक्ष्यामि हितं वचः ॥ २३॥

श्रुत्वा यथेष्टं कुरु वै वीर यत् तव रोचते ।
भवान् प्राज्ञतमो नित्यं मम चैव परा गतिः ॥ २४॥

भीष्मद्रोणौ त्वतिरथौ हतौ सेनापती मम ।
सेनापतिर्भवानस्तु ताभ्यां द्रविणवत्तरः ॥ २५॥

वृद्धौ च तौ महेष्वासौ सापेक्षौ च धनञ्जये ।
मानितौ च मया वीरौ राधेय वचनात् तव ॥ २६॥

पितामहत्वं सम्प्रेक्ष्य पाण्डुपुत्रा महारणे ।
रक्षितास्तात भीष्मेण दिवसानि दशैव तु ॥ २७॥

न्यस्तशस्त्रे तु भवति हतो भीष्मः पितामहः ।
शिखण्डिनं पुरस्कृत्य फल्गुनेन महारणे ॥ २८॥

हते तस्मिन् महेष्वासे शरतल्पगते पुनः ।

---

1. क-ग-ङ—स्वजनं च

त्वयोक्तः पुरुषव्याघ्रो द्रोणो ह्यासीत् पुरस्सरः ॥ २९॥
तेनापि रक्षिताः पार्थाश् शिष्यत्वादिह संयुगे ।
स चापि निहतो वृद्धो धृष्टद्युम्नेन सत्वरम् ॥ ३०॥
निहताभ्यां प्रधानाभ्यां ताभ्यामतुलविक्रम ।
त्वत्समं समरे योधं नान्यं पश्यामि चिन्तयन् ॥ ३१॥
भवानेव च नश्शक्तो विजयाय न संशयः ।
पूर्वं मध्ये तु पश्चाच्च विहितं च स्वकं हितम् ॥ ३२॥
स भवान् धुर्यवत् सङ्ख्ये धुरमुद्वोढुमर्हति ।
अभिषेचय सैनान्ये स्वयमात्मानमात्मना ॥ ३३॥
देवतानां यथा स्कन्दस् सेनानीः प्रभुरव्ययः ।
तथा भवानिमां सेनां धार्तराष्ट्रीं बिभर्तु वै ॥ ३४॥
जहि शत्रुगणान् सर्वान् महेन्द्रो दानवानिव ॥ ३५
अवस्थितं रणे ज्ञात्वा पाण्डवास्त्वां महारथाः ।
द्रविष्यन्ति सपाञ्चाला विष्णुं दृष्ट्वेव दानवाः ॥ ३६
तस्मात् त्वं पुरुषव्याघ्र प्रकर्षेथा महाचमूम् ॥ ३६॥
भवत्यवस्थिते यत्ते पाण्डवा मन्दचेतसः ।
भविष्यन्ति सहामात्याः पाञ्चालाश्च सकेकयाः ॥ ३७॥
यथा ह्यभ्युदितस्सूर्यः प्रतपन् स्वेन तेजसा ।
व्यपोहति तमस्तीव्रं तथा शत्रून् व्यपोहय ॥ ३८॥

सञ्जयः—

एवमुक्तस्तु राधेयो राज्ञा दुर्योधनेन ह ।
राज्ञां मध्ये महाबाहुः प्रीतात्मा स महाबलः ॥ ३९॥
हर्षयन्नब्रवीत् कर्णो दुर्योधनमिदं वचः ॥ ४०

कर्णः—

उक्तमेतन्मया पूर्वं गान्धारे तव सन्निधौ ।
जेष्यामि पाण्डवान् राजन् सपुत्रान् सजनार्दनान् ॥ ४१
सेनापतिर्भविष्यामि तवाहं नात्र संशयः ।
स्थिरो भव महाराज जितान् विद्धि च पाण्डवान् ॥ ४२

सञ्जयः—

एवमुक्तो महातेजास् तदा दुर्योधनो नृप ।
उत्तस्थे राजभिस्सार्धं देवैरिव शतक्रतुः ॥ ४३
सैनापत्येन सत्कर्तुं कर्णं स्कन्दमिवामराः ।
ततोऽभिषिषिचुः कर्णं विधिदृष्टेन कर्मणा ॥ ४४
दुर्योधनमुखा राजन् राजानो विजयैषिणः ।
शातकुम्भमयैः कुम्भैर् ब्राह्मणैश्चाभिमन्त्रितैः ॥ ४५
तोयपूर्णैर्विषाणैश्च द्वैपखड्गमहर्षभैः ।
मणिमुक्तामयैर्धान्यैः पुण्यैर्गन्धैस्तथौषधैः ॥ ४६
औदुम्बरे समासीनम् आसने क्षौमसंवृते ।
शास्त्रदृष्टेन विधिना सम्भारैश्च सुसम्भृतैः ॥ ४७

ब्राह्मणाः क्षत्रिया वैश्यास् तथा शूद्राश्च सम्मताः ।
तुष्टुवुस्तं महात्मानम् अभिषिक्तं वरासने ॥ ४८

ततोऽभिषिक्तो राजेन्द्र गोभिर्निष्कैर्धनेन च ।
वाचयामास विप्रांश्च ऋग्भिस्तोत्रैस्समन्ततः ॥ ४९

स व्यरोचत राधेयस् सूतमागधवन्दिभिः ।
[1]स्तूयमानो यथा भानुर् उदये ब्रह्मवादिभिः ॥ ५०

ततः पुण्याहघोषेण वादित्रनिनदेन च ।
जयशब्देन शूराणां तुमुलस्सर्वतोऽभवत् ॥ ५१

जयेत्यूचुर्नृपास्सर्वे राधेयं तत्र सङ्गताः ।
जय पार्थान् सगोविन्दान् सानुवन्धान् महाहवे ॥ ५२
इति तं वन्दिनः प्राहुर् द्विजाश्च भरतर्षभ ॥ ५२॥

वन्दिनः—

जय पार्थान् सपाञ्चालान् राधेय विजयाय नः ।
उद्यन्निव यथाऽऽदित्यस् तमांस्युग्रैर्गभस्तिभिः ॥ ५३॥

न ह्यलं त्वद्विसृष्टानां शराणां ते सकेशवाः ।
कृतघ्नास्सूर्यरश्मीनां ज्वलतामिव दर्शने ॥ ५४॥

न च पार्थास्सपाञ्चालाश् शक्तास्त्रातुं तवाग्रतः ।

---

1. ख—इदमर्धं नास्ति

आत्तवज्रस्य समरे महेन्द्रस्येव दानवाः ॥ ५५॥

सञ्जयः—

स सत्कृतस्स्तूयमानस् सुहृद्गणवृतो वृषा ।
कर्णो दुर्योधनं वाक्यम् अब्रवीत् प्रहसन् प्रियम् ॥ ५६॥

कर्णः—

दुर्योधनाद्य सगणं पाण्डूनां प्रवरैस्सह ।
फल्गुनं सूदयिष्यामि त्वत्प्रियार्थं सबान्धवम् ॥ ५७॥

सपर्वतार्णवद्वीपां शाधि गां गतपाण्डवाम् ।
पुत्रपौत्रप्रपौत्रेषु प्रतिष्ठां गमयिष्यसि ॥ ५८॥

नासह्यं विद्यते मह्यं त्वत्प्रियार्थमरिंदम ।
सत्यधर्मानुरक्तस्य सिद्धिरात्मवतो यथा ॥ ५९॥

सञ्जयः—

अभिषिक्तस्तु राधेयः प्रभया सोऽमितप्रभः ।
व्यत्यरिच्यत रूपेण दिवाकर इवापरः ॥ ६०॥

सैनापत्ये तु राधेयम् अभिषिच्य सुतस्तव ।
अमन्यत तदात्मानं कृतार्थं कालचोदितः ॥ ६१॥

कर्णोऽपि राज्ञस्सम्प्राप्य सैनापत्यमरिंदमः ।
योगमाज्ञापयामास सूर्यस्योदयनं प्रति ॥ ६२॥

तव पुत्रैर्वृतः कर्णश् शुशुभे तत्र भारत ।
देवैरिव यथा स्कन्दस् सङ्ग्रामे तारकामये ॥ ६३॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि सप्तमोऽध्यायः ॥ ७ ॥
॥ ७३ ॥ कर्णपर्वणि सप्तमोऽध्यायः ॥ ७ ॥
[अस्मिन्नध्याये ६३॥ श्लोकाः]

॥ अष्टमोऽध्यायः ॥

कर्णार्जुनाभ्यां व्यूहरचनापूर्वकं रणाय निर्याणम् ॥

धृतराष्ट्रः—
सैनापत्यं तु सम्प्राप्य कर्णो वैकर्तनस्तदा ।
तथोक्तस्तु स्वयं राज्ञा स्निग्धो भ्रातृसमो हि सः ॥ १
हितश्च प्रियकामश्च मम पुत्रस्य नित्यशः ।
किमकार्षीन्महाप्राज्ञस् तन्ममाचक्ष्व सञ्जय ॥ २

सञ्जयः—
कर्णस्य मतमाज्ञाय पुत्रस्ते भरतर्षभ ।
[1]योगमाज्ञापयामास नान्दीतूर्यपुरस्सरम् ॥ ३
महत्यपररात्रे च तव सैन्यस्य मारिष ।
योगो योग इति ह्याशु प्रादुरासीन्महास्वनः ॥ ४

1. अ-ख—नाखीदमर्धम्

कल्पतां नागमुख्यानां रथानां च वरूथिनाम् ।
सन्नह्यतां पदातीनां वाजिनां च विशां पते ॥ ५

क्रोशतां चापि योधानां त्वरितानां परस्परम् ।
बभूव तुमुलश्शब्दो दिवस्पृक् सुमहांस्ततः ॥ ६

ततश्श्वेतपताकेन बलाकावर्णवाजिना ।
हेमपृष्ठेन धनुषा हस्तिकक्ष्येण केतुना ॥ ७

तूणीरशतपूर्णेन सगदेन वरूथिना ।
शतघ्नीकिङ्किणीशक्तिशूलतोमरधारिणा ॥ ८

कार्मुकैरुपपन्नेन विमलादित्यवर्चसा ।
रथेनापतता तेन सूतपुत्रो व्यदृश्यत ॥ ९

ध्मापयित्वा रणे शङ्खं हेमजालविभूषितम् ।
विधून्वानं महच्चापं हेमपृष्ठं दृढं नृप ॥ १०

दृष्ट्वा कर्णं महेष्वासं रथस्थं रथिनां वरम् ।
भानुमन्तमिवोद्यन्तं तमोघ्नन्तं दुरासदम् ॥ ११

न भीष्मव्यसनं केचिन्नापि द्रोणस्य मारिष ।
नान्येषां पुरुषव्याघ्र मेनिरे तत्र कौरवाः ॥ १२

ततस्तु त्वरयन् योधाञ् शङ्खशब्देन मारिष ।
कर्णो निष्क्रामयामास कौरवाणां महद्बलम् ॥ १३

[1]व्यूहं व्यूह्य महेष्वासो मकरं शत्रुतापनः ।
प्रत्युद्ययौ तदा कर्णः पाण्डवान् विजिगीषया ॥ १४

मकरव्यूहमास्थाय दंशितो रविनन्दनः ।
मकरस्याथ तुण्डे तु कर्णो राजन् व्यवस्थितः ॥ १५

नेत्रयोरशकुनिश्शूर उलूकश्च महारथः ।
द्रोणपुत्रस्तु शिरसि ग्रीवायां सर्वसोदराः ॥ १६

मध्ये दुर्योधनो राजा बलेन महता वृतः ॥ १६॥

वामपादे तु राजेन्द्र कृतवर्मा व्यवस्थितः ।
नारायणबलैर्गुप्तो गोपालैर्युद्धदुर्मदैः ॥ १७॥

पादे तु दक्षिणे राजन् गौतमस्सत्यविक्रमः ।
त्रिगर्तैश्च महेष्वासैर् दाक्षिणात्यैश्च संवृतः ॥ १८॥

अनुपादस्तु यो वामस् तत्र शल्यो व्यवस्थितः ।
महत्या सेनया सार्धं नानादेशसमुत्थया ॥ १९॥

दक्षिणे तु महाराज सुषेणस्सत्यसङ्गरः ।
वृतो रथसहस्रैश्च दन्तिनां च शतैस्तथा ॥ २०॥

पुच्छे ह्यास्तां महावीर्यौ भ्रातरौ पार्थिवात्मजौ ।
विचित्रश्चित्रसेनश्च महत्या सेनया वृतौ ॥ २१॥

ततः प्रयाते राजेन्द्र कर्णे रथवरोत्तमे ।

---

1. ख-ङ—नास्तीदमर्धम्

धनञ्जयमभिप्रेक्ष्य धर्मराजोऽब्रवीदिदम् ॥ २२॥

युधिष्ठिरः—

पश्य पार्थ महासेनां धार्तराष्ट्रीं तु संयुगे ।
कर्णेन निर्मितां वीर गुप्तां वीरैर्महारथैः ॥ २३॥

हतवीरतमा ह्येषा धार्तराष्ट्री महाचमूः ।
फल्गुशेषा महाबाहो तृणैस्तुल्यतमा मता ॥ २४॥

एको ह्यत्र महेष्वासस् सूतपुत्रो व्यरोचत ॥ २५

सदेवासुरगन्धर्वैस् सकिन्नरमहोरगैः ।
चराचरैस्त्रिभिर्लोकैर् अजेयो यो महारथः ॥ २६

तं हत्वाऽद्य महाबाहो विजयस्तव फल्गुन ।
उद्धृतं च भवेच्छल्यं मम द्वादशवार्षिकम् ॥ २७

एतज्ज्ञात्वा महाबाहो व्यूहं व्यूह यथेच्छसि ॥ २७॥

सञ्जयः—

श्रुत्वा तद्वचनं भ्रातुः कौन्तेयश्श्वेतवाहनः ।
अर्धचन्द्रेण व्यूहेन प्रत्यव्यूहत तां चमूम् ॥ २८॥

वामशृङ्गे तु राजेन्द्र भीमसेनो व्यवस्थितः ।
[1]दक्षिणे तु महाबाहुर् धृष्टद्युम्नो व्यवस्थितः ॥ २९॥

मध्ये व्यूहस्य राजेन्द्र पाण्डवश्च धनञ्जयः ।

---

1. ख—इदमर्धं नास्ति

नकुलस्सहदेवश्च धर्मराजश्च पृष्ठतः ॥ ३०॥

चक्ररक्षौ तु पाञ्चाल्यौ युधामन्यूत्तमौजसौ ।
पार्थं न जहतुर्युद्धे पाल्यमानौ किरीटिना ॥ ३१॥

शेषा नृपतयो वीरास् स्थिता व्यूहस्य दंशिताः ।
यथाभागं यथोत्साहं यथासन्नं च भारत ॥ ३२॥

एवमेतन्महाव्यूहं व्यूह्य भारत पाण्डवाः ।
तावकाश्च महेष्वासा युद्धायैवावतस्थिरे ॥ ३३॥

दृष्ट्वा व्यूढां तव चमूं सूतपुत्रेण संयुगे ।
निहतान् पाण्डवान् मेने सकृष्णान् वै जनाधिपः ॥ ३४॥

तथैव पाण्डवीं सेनां दृष्ट्वा व्यूढां युधिष्ठिरः ।
धार्तराष्ट्रान् हतान् मेने सकर्णान् ससुयोधनान् ॥ ३५॥

ततश्शङ्खाश्च भेर्यश्च पणवानकगोमुखाः ।
पटहाश्चाभ्यहन्यन्त झर्झर्यश्च समन्ततः ॥ ३६॥

सेनयोरुभयो राजन् डिण्डिमाश्च महास्वनाः ।
सिंहनादाश्च सञ्जज्ञुश् शूराणां जयगृद्धिनाम् ॥ ३७॥

हयहेषितशब्दाश्च वारणानां च बृंहितम् ।
रथनेमिस्वनाश्चोग्रास् सम्बभूवुर्जनाधिप ॥ ३८॥

न द्रोणव्यसनं केचिद् विजग्मुस्तत्र भारत ।
दृष्ट्वा कर्णं महेष्वासं मुखे व्यूहस्य दंशितम् ॥ ३९॥

उभे सेने महाराज प्रहृष्टनरकुञ्जरे ।
योद्धुकामे स्थिते यत्ते हन्तुमन्योन्यमञ्जसा ॥ ४०॥
विजये जातसंरम्भे दृष्ट्वाऽन्योन्यमवस्थिते ।
अनीकमध्ये राजेन्द्र रेजतुः कर्णपाण्डवौ ॥ ४१॥
नृत्यन्त्याविव ते सेने प्रजग्मतुरभीतवत् ।
तयोः पक्षप्रपक्षेभ्यो निर्ययुश्च युयुत्सवः ॥ ४२॥
ततः प्रववृते युद्धं नरवारणवाजिनाम् ।
रथिनां च महाराज त्वन्योन्यं निघ्नतां भृशम् ॥ ४३॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि अष्टमोऽध्यायः ॥ ८ ॥
॥ ७३ ॥ कर्णपर्वणि अष्टमोऽध्यायः ॥ ८ ॥
[अस्मिन्नध्याये ४३॥ श्लोकाः]

॥ नवमोऽध्यायः ॥

सङ्कुलयुद्धम् ॥ भीमेन क्षेमधूर्तिवधः ॥

सञ्जयः—

ते सेनेऽन्योन्यमासाद्य प्रहृष्टाश्वनरद्विपे ।
बृहत्यौ सम्प्रजह्राते देवासुरचमूसमे ॥ १

ततो वररथाश्वेभाः पत्तयश्च महाहवे ।
सम्प्रहारं महच्चक्रुर् देहपाप्मविनाशनम् ॥ २
पूर्णचन्द्रार्कपद्मानां कान्तित्विङ्निन्धतस्समैः ।
उत्तमाङ्गैर्नृसिंहानां आवृता पतितैर्मही ॥ ३
अर्धचन्द्रैस्तथा भल्लैः क्षुरप्रैरसिपट्टसैः ।
परश्वधैस्त्वपाकृन्तन्नुत्तमाङ्गानि युध्यताम् ॥ ४
गदाभिरन्ये गुर्वीभिर् यष्टिभिर्मुसलैरपि ।
व्यायतायतबाहूनां व्यायतायतबाहुभिः ॥ ५
बाहवः पतिता रेजुस् साङ्गदा रुधिरोक्षिताः ॥ ५॥
तैस्स्फुरद्भिर्मही भाति रक्ताङ्गुलितलैस्तथा ।
गरुडप्रहारतो रुग्णैः पञ्चास्यैरिव पन्नगैः ॥ ६॥
द्विरदस्यन्दनाश्वेभ्यः पेतुर्वीरा द्विषद्धताः ।
विमानेभ्यो यथा पुण्ये क्षीणे स्वर्गसदस्तथा ॥ ७॥
पोथिताश्शतधा पेतुर् वीरा वरशितैश्शरैः ।
रथा रथैर्विनिहताः पातिताश्च द्विपैर्द्विपाः ॥ ८॥
सादिभिस्सादिनश्चैव तस्मिन् परमसङ्कुले ॥ ९
रथैर्नागा रथा नागैर् अश्वारोहाश्च पत्तिभिः ।
अश्वारोहैः पदाताश्च निहता युधि शेरते ॥ १०
रथाश्वपत्तयो नागैर् अश्वैर्नागैश्च पत्तयः ।

रथपत्तिद्विपाश्चाश्वैर् नृभिश्चाश्वरथद्विपाः ॥ ११

रथाश्वेभनराणां तु रथाश्वेभनरैः कृतम् ।
पाणिपादैश्च शस्त्रैश्च रथैश्च कदनं महत् ॥ १२

तथा तस्मिन् बले शूरैर् वध्यमाने हतेऽपि च ।
अस्मानभ्याययुः पार्था वृकोदरपुरोगमाः ॥ १३

धृष्टद्युम्नशिखण्डी च द्रौपदेयाः प्रभद्रकाः ।
सात्यकिश्चेकितानश्च द्रमिलैस्सैनिकैस्सह ॥ १४

भृता वित्तेन महता पाण्ड्याश्चोलास्सकेरलाः ।
व्यूढोरस्का दीर्घभुजाः प्रांशवः पृथुलोचनाः ॥ १५

आपीडिनो रक्तदन्ता मत्तमातङ्गविक्रमाः ।
नानाविरागवसना गन्धचूर्णावचूर्णिताः ॥ १६

बद्धासयः प्रासहस्ता वारणप्रतिवारणाः ।
समानमृत्यवो राजन् प्रसक्ताश्च परस्परम् ॥ १७

कलापिनः पाशहस्ता दीर्घकेशाः प्रहारिणः ।
पत्तयस्सायकैर्विद्धा घोररूपपराक्रमाः ॥ १८

अथापरे पुनश्शूराश् चेदिपाञ्चालकेकयाः ।
कारूशाः कोसला वङ्गा मागधाश्चापि दुद्रुवुः ॥ १९

तेषां रथाश्च नागाश्च प्रवराश्चापि पत्तयः ।
नानाबाणरवैर्हृष्टा नृत्यन्ति च हसन्ति च ॥ २०

तस्य सैन्यस्य महतो महामात्रशतैर्वृतः ।
मध्ये वृकोदरोऽभ्यायान्नागप्रवरधूर्गतः ॥ २१

स नागप्रवरो ह्युग्रो विधिवत् कल्पितो बभौ ।
उदयाग्रांशुभवनं यथाऽभ्युदितभास्करम् ॥ २२

तस्यायसं वर्मवरं वररत्नविभूषितम् ।
तारोद्भासस्य नभसश् शारदस्य समं त्विषा ॥ २३

स तोमरप्रासकरश् चारुमौलिस्स्वलङ्कृतः ।
शरन्मध्यन्दिनार्काभस् तेजसा प्रादहद्रिपून् ॥ २४

तं दृष्ट्वा द्विरदं दूरात् क्षेमधूर्तिस्स्थितो द्विपे ।
आह्वयानोऽभिदुद्राव प्रहसन् पृतनामुखे ॥ २५

तयोस्समभवद्युद्धं द्विपयोरुग्ररूपयोः ।
यदृच्छया द्रुतवतोर् महापर्वतयोरिव ॥ २६

संसक्तनागौ तौ वीरौ तोमरैरितरेतरम् ।
बलवत् सूर्यरश्म्याभैर् भित्त्वा भित्त्वा विनेदतुः ॥ २७

व्यतिसृत्य च नागाभ्यां मण्डलानि विचेरतुः ।
प्रगृह्य चोभौ धनुषी जघ्नतुर्वै परस्परम् ॥ २८

क्ष्वेळितास्फोटितरवैर् बाणशब्दैश्च सर्वशः ।
तौ जनान् हर्षयन्तौ च सिंहनादं प्रचक्रतुः ॥ २९

समुद्यतकराभ्यां तौ द्विपाभ्यां कृतिनावुभौ ।

वातोद्धूतपताकाभ्यां युयुधाते महाबलौ ॥ ३०

तावन्योन्यस्य धनुषी पुनश्छित्त्वा विनेदतुः ।
शक्तितोमरवर्षेण प्रावृण्मेघाविवाम्बुभिः ॥ ३१

क्षेमधूर्तिस्तदा भीमं तोमरेण स्तनान्तरे ।
निर्बिभेदाशु वेगेन षड्भिश्चाप्यपरैर्नदन् ॥ ३२

भीमसेनस्तु शुशुभे तोमरैरङ्गसंश्रितैः ।
क्रोधदीप्तवपुर्मेघैस् सप्तसप्तिरिवांशुमान् ॥ ३३

ततो भास्कररश्म्याभम् अञ्जोगतिमयस्मयम् ।
ससर्ज तोमरं भीमः प्रत्यमित्राय यत्नवान् ॥ ३४

ततः करूशाधिपतिश् चापमायम्य सायकैः ।
दशभिस्तोमरं भित्त्वा षष्ट्या विव्याध पाण्डवम् ॥ ३५

अथ कार्मुकमादाय महाजलदनिस्स्वनम् ।
रिपोरभ्यर्दयन्नागम् उन्नदन् पाण्डवश्शरैः ॥ ३६

स शरौघार्दितो नागो भीमसेनेन संयुगे ।
निगृह्यमाणो नातिष्ठद् वातध्वस्त इवाम्बुदः ॥ ३७

तमभ्यधावद्विरदं भीमसेनस्य नागराट् ।
महावातेरितं मेघं वातोद्धूत इवाम्बुदः ॥ ३८

स निवर्त्यात्मनो नागं क्षेमधूर्तिः प्रयत्नतः ।
विव्याधाभिद्रुतं बाणैर् भीमसेनं सकुञ्जरम् ॥ ३९

ततस्साधुविसृष्टेन क्षुरप्रेण सकार्मुकम् ।
छित्त्वा नरर्षभश्शत्रोर् नागं चापि प्रमार्दयत् ॥ ४०

ततश्शलाकया भीमं क्षेमधूर्तिः पराभिनत् ।
जघान चास्य द्विरदं नाराचैस्सर्वमर्मसु ॥ ४१

ततः पपात नागेन्द्रो भीमसेनस्य मारिष ।
पुरा नागस्य पतनात् सोऽवप्लुत्य स्थितो महीम् ॥ ४२

भीमसेनोऽपि तन्नागं गदया समपोथयत् ।
तस्मात् प्रमथितान्नागात् क्षेमधूर्तिरवप्लुतः ॥ ४३

उद्धृत्य खड्गं निशितम् अभ्यधावत् स पाण्डवम् ।
उद्यतासिमुपायान्तं गदयाऽहन् वृकोदरः ॥ ४४

स पपात हतस्सासिर् व्यसुस्तमभितो द्विपम् ।
वज्रप्ररुग्णमचलं सिंहो वज्रहतो यथा ॥ ४५

तं हतं नृपतिं दृष्ट्वा करूशानां यशस्करम् ।
प्राद्रवद्व्यथिता सेना त्वदीया भरतर्षभ ॥ ४६

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि नवमोऽध्यायः ॥ ९ ॥
॥ ७३ ॥ कर्णपर्वणि नवमोऽध्यायः ॥ ९ ॥
[अस्मिन्नध्याये ४६ श्लोकाः]

॥ दशमोऽध्यायः ॥

द्वन्द्वयुद्धम् ॥ १ ॥ सात्यकिना विन्दानुविन्दवधः ॥ २ ॥

सञ्जयः—

ततः कर्णो महेष्वासः पाण्डवानामनीकिनीम् ।
जघान समरे शूरश् शरैस्सन्नतपर्वभिः ॥ १

तथैव पाण्डवा राजंस् तव पुत्रस्य वाहिनीम् ।
कर्णस्य पश्यतो राजन् निजघ्नुस्ते महारथाः ॥ २

कर्णोऽपि सुमहाबाहुर् अविध्यत् पाण्डवीं चमूम् ।
नाराचैरर्करश्म्याभैः कर्मारपरिमार्जितैः ॥ ३

तत्र भारत कर्णेन नाराचैस्ताडिता गजाः ।
[1]नेदुस्सेदुश्च मम्लुश्च बभ्रमुश्च दिशो दश ॥ ४

वध्यमाने बले तस्मिन् सूतपुत्रेण मारिष ।
नकुलोऽभ्यद्रवत् तूर्णं सूतपुत्रं महारथम् ॥ ५

[2]भीमसेनस्तथा द्रौणिं कुर्वाणं कर्म दुष्करम् ।
विन्दानुविन्दौ कैकेयौ सात्यकिस्समवारयत् ॥ ६

श्रुतकर्माणमायान्तं चित्रसेनो महीपतिः ।

1. क—इदमर्धं नास्ति 2. अ—पञ्चार्धानि न सन्ति

प्रतिविन्ध्यस्तथा चित्रं चित्रकेतनकार्मुकम् ॥ ७

दुर्योधनस्तु राजानं धर्मपुत्रं युधिष्ठिरम् ।
संशप्तकगणा हृष्टा ह्यभ्यधावन् धनञ्जयम् ॥ ८

धृष्टद्युम्नः कृपं चापि तस्मिन् वीरवरक्षये ।
शिखण्डी कृतवर्माणम् आससाद महाबलः ॥ ९

श्रुतकीर्तिस्तथा शल्यं माद्रीपुत्रसुतः प्रभुः ।
दुश्शासनं महाराज सहदेवः प्रतापवान् ॥ १०

कैकेयौ सात्यकिं युद्धे शरवर्षेण भास्वता ।
सात्यकिः केकयौ चैव छादयामास सायकैः ॥ ११

तावेनं भ्रातरौ वीरौ युधि विव्यधतुर्भृशम् ।
[1]विषाणाभ्यां यथा नागौ प्रतिनागं महावने ॥ १२

शरसञ्छिन्नवर्माणौ तावुभौ भ्रातरौ रणे ।
सात्यकिं सत्यकर्माणं रणे विव्यधतुर्भृशम् ॥ १३

तौ सात्यकिर्महाराज प्रहसन् युद्धदुर्मदः ।
छादयञ् छरवर्षेण वारयामास सर्वतः ॥ १४

वार्यमाणौ ततस्तौ तु शैनेयशरवृष्टिभिः ।
शैनेयस्य रथं तूर्णं छादयामासतुश्शरैः ॥ १५

तयोस्तु धनुषी चित्रे छित्त्वा शौरिर्महाहवे ।

---

1. अ-ख-ग—अर्धत्रयं नास्ति

अथ तौ सायकैस्तीक्ष्णैः पूरयामास सात्वतः ॥ १६

अथान्ये धनुषी चित्रे प्रगृह्याशु महाशरान् ।
सात्यकिं पूरयन्तौ तौ चेरतुर्लघु सुष्ठु च ॥ १७

ताभ्यां मुक्ता महाबाणाः कङ्कबर्हिणवाससः ।
द्योतयन्तो दिशस्सर्वास् सम्पेतुर्हेमभूषणाः ॥ १८

बाणान्धकारमभवत् ततो राजन् महाहवे ।
अन्योन्यस्य तु चापानि चिच्छिदुस्ते महारथाः ॥ १९

ततः क्रुद्धो महाराज सात्यकिर्युद्धदुर्मदः ।
धनुरन्यत् समादाय सज्यं कृत्वा महाबलः ॥ २०

अनुमृज्य च राजेन्द्र तद्धनुर्भारसाधनम् ।
क्षुरप्रेण सुतीक्ष्णेन ह्यनुविन्दशिरोऽहरत् ॥ २१

तच्छिरोह्यपतद्भूमौ कुण्डलोपचितं शुभम् ।
शम्बरस्य शिरो यद्वन्निहतस्य महामृधे ॥ २२

शोचयन् केकयान् सर्वाञ् जगामाथ वसुन्धराम् ॥ २२॥

तं दृष्ट्वा निहतं शूरं भ्राता तस्य महारथः ।
सज्यमन्यद्धनुः कृत्वा शैनेयं प्रत्यवारयत् ॥ २३॥

सहसा सात्यकिर्विद्धस् स्वर्णपुङ्खैरिशलाशितैः ।
ननाद बलवन्नादं तिष्ठ तिष्ठेति चाब्रवीत् ॥ २४॥

सात्यकस्य पुनस्तूर्णं केकयानां महारथः ।

शरैरग्निशिखाकारैर् बाह्वोरुरसि चार्पयत् ॥ २५॥

स शराहतसर्वाङ्गस् सात्यकिस्सत्यविक्रमः ।
रराज समरे राजन् सपुष्प इव किंशुकः ॥ २६॥

सात्यकिस्समरे विद्धः कैकेयेन महात्मना ।
कैकेयं पञ्चविंशत्या विव्याध प्रहसन्निव ॥ २७॥

तावन्योन्यस्य धनुषी सञ्छिद्य समरे शुभे ।
हत्वा च सारथी तूर्णं हयांश्च रथिनां वरौ ॥ २८॥

विरथावसियुद्धाय समाजग्मतुराहवे।
शतचन्द्रचिते गृह्य चर्मणी सुभुजौ तु तौ ॥ २९॥

विरोचेतां महारङ्गे निस्त्रिंशवरधारिणौ ।
यथा दैवासुरे युद्धे बलशक्रौ महाबलौ ॥ ३०॥

मण्डलानि ततस्तौ तु विचरन्तौ महारणे ।
अन्योन्यमसिभिस्तूर्णं समाजघ्नतुराहवे ॥ ३१॥

[1]अन्योन्यस्य वधे चैव चक्रतुर्यत्नमुत्तमम् ।
कैकेयस्य ततश्चर्म द्विधा चिच्छेद सात्यकिः ॥ ३२॥

सात्यकेश्च तथैवासौ द्विधा चिच्छेद पार्थिवः ॥ ३३

शैनेयश्चर्म हित्वा तु तारागणशतैश्चितम् ।
चचार मण्डलान्येव गतप्रत्यागतानि च ॥ ३४

1. ख--नास्तीदमर्धम्

चरन्तं तं महारङ्गे निस्त्रिंशवरधारिणम् ।
अपहस्तेन चिच्छेद सात्यकिस्त्वरयाऽन्वितः ॥ ३५

सवर्मा केकयो राजन् द्विधा च्छिन्नो महाहवे ।
निपपात महेष्वासो वज्रनुन्न इवाचलः ॥ ३६

तं निहत्य रणे शूरश् शैनेयो रथसत्तमः ।
युधामन्यो रथं तूर्णम् आरुरोह परन्तपः ॥ ३७

ततोऽन्यं रथमारुह्य विधिवत् कल्पितं पुनः ।
केकयानां महत् सैन्यं व्यधमत् सात्यकिश्शरैः ॥ ३८

सा वध्यमाना समरे केकयानां महाचमूः ।
समुत्सृज्य रणे शस्त्रं प्रदुद्राव दिशो दश ॥ ३९

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि दशमोऽध्यायः ॥ १० ॥
॥ ७३ ॥ कर्णपर्वणि दशमोऽध्यायः ॥ १० ॥
[अस्मिन्नध्याये ३९ श्लोकाः]

॥ एकादशोऽध्यायः ॥

प्रतिविन्ध्यश्रुतकर्मभ्यां चित्रचित्रसेनयोस्संहारः ॥

सञ्जयः—
श्रुतकर्मा महाराज चित्रसेनं महीपतिम् ।
आजघान रणे क्रुद्धः पञ्चाशद्भिश्शिलीमुखैः ॥ १

चित्रसेनस्तु राजेन्द्र नवभिर्निशितैश्शरैः ।
श्रुतकर्माणमाहत्य सूतं विव्याध पञ्चभिः ॥ २

श्रुत[1]कर्मा ततः क्रुद्धश् चित्रसेनं चमूमुखे ।
नाराचेन सुतीक्ष्णेन शङ्खदेशे समार्पयत् ॥ ३

[2]सोऽतिविद्धो महाराज तदा तेन महात्मना ।
मूर्च्छामपि जगामाशु कश्मलं च समाविशत् ॥ ४

एतस्मिन्नन्तरे चैव श्रुतकर्मा महायशाः ।
नवत्या जगतीपालं छादयन्नतपर्वभिः ॥ ५

प्रतिलभ्य ततस्संज्ञां चित्रसेनो महाबलः ।
धनुश्चिच्छेद भल्लेन तं च विव्याध सप्तभिः ॥ ६

सोऽन्यत् कार्मुकमादाय वेगघ्नम् रुक्मभूषितम् ।
चित्रसेनं शरैश्चित्रैश् चित्ररूपमथाकरोत् ॥ ७

स शरैश्चित्रितो राजा चित्रमाल्यधरो युवा ।
अशोभत महारङ्गे श्वाविच्छललतो यथा ॥ ८

राजा तु श्रुतकर्माणं नाराचेन स्तनान्तरे ।
बिभेद समरे क्रूरस् तिष्ठ तिष्ठेति चाब्रवीत् ॥ ९

श्रुतकर्मा तु समरे नाराचेन समर्पितः ।
सुस्राव रुधिरं तत्र गैरिकाम्बु यथाऽचलः॥ १०

1. क—वर्मा 2. ख—अर्धद्वयं नास्ति

ततस्स रुधिराक्ताङ्गो रुधिरार्द्रीकृतच्छविः ।
रराज समरे राजन् सुफुल्ल इव किंशुकः ॥ ११

श्रुतकर्मा महाराज शत्रुणा समभिद्रुतः ।
शत्रुसंवरणं क्रुद्धो द्विधा चिच्छेद कार्मुकम् ॥ १२

अथैनं छिन्नधन्वानं नाराचानां शतैस्त्रिभिः ।
विव्याध भरतश्रेष्ठ श्रुतकर्मा महायशाः ॥ १३
नवत्या जगतीपालं छादयन्नतपर्वभिः ॥ १३॥

ततः पीतेन भल्लेन भृशं तीक्ष्णेन सत्वरः ।
जहार सशिरस्त्राणं शिरस्तस्य महात्मनः ॥ १४॥

तच्छिरो न्यपतद्भूमौ चित्रसेनस्य दीप्तिमत् ।
यदृच्छया यथा चन्द्रश् च्युतस्स्वर्गान्महीतले ॥ १५॥

राजानं निहतं दृष्ट्वा अभिसारास्तु मारिष ।
अभ्यद्रवन्त वेगेन श्रुतकर्माणमाहवे ॥ १६॥

ततः क्रुद्धो महेष्वासस् तत् सैन्यं समभिद्रवत् ।
अन्तकाले यथा क्रुद्धस् सर्वभूतानि चान्तकः ॥ १७॥

ते वध्यमानास्समरे तव पौत्रेण धन्विना ।
व्यद्रवन्त दिशस्तूर्णं मृगा व्याघ्रार्दिता इव ॥ १८॥

तांस्तु विद्रवतो दृष्ट्वा निरुत्साहान् द्विषज्जये ।
द्रावयन्निषुभिस्तूर्णं श्रुतकर्मा व्यरोचत ॥ १९॥

प्रतिविन्ध्यस्ततश्चित्रं विद्ध्वा पञ्चभिरायसैः ।
सारथिं त्रिभिरानर्च्छद् ध्वजमेकेन पत्रिणा ॥ २०॥

तं चित्रो नवभिर्बाणैर् बाह्वोरुरसि चार्पयत् ।
स्वर्णपुङ्खैरिशलाधौतैः कङ्कबर्हिणवाजितैः ॥ २१॥

प्रतिविन्ध्यो धनुस्तस्य च्छित्त्वा भारत सायकैः ।
पञ्चभिर्निशितैर्बाणैर् अथैनमभिजघ्निवान् ॥ २२॥

ततश्शक्तिं महाराज हेमदण्डां दुरासदाम् ।
प्राहिणोत् प्रतिविन्ध्याय विचिन्वन्तीमसूनिव ॥ २३॥

तामापतन्तीं सहसा शक्तिमुल्कामिवाम्बरात् ।
द्विधा चिच्छेद समरे प्रतिविन्ध्यो हसन्निव ॥ २४॥

सा पपात द्विधा च्छिन्ना प्रतिविन्ध्यशरैरिशतैः ।
युगान्ते सर्वभूतानि त्रासयन्ती यथाऽशनिः ॥ २५॥

शक्तिं विनिहतां दृष्ट्वा चित्रो गृह्य महागदाम् ।
प्रतिविन्ध्याय चिक्षेप रुक्मपट्टैर्विभूषिताम् ॥ २६॥

सा हत्वा सहसा सूतं गदा तस्य महात्मनः ।
रथं प्रमृद्य वेगेन धरणीमन्वपद्यत ॥ २७॥

प्रतिविन्ध्यस्ततः क्रुद्धो रथादाप्लुत्य भारत ।
शक्तिं चिक्षेप चित्राय स्वर्णदण्डामलङ्कृताम् ॥ २८॥

तामापतन्तीं जग्राह चित्रो राजन् महामनाः ।

ततस्तामेव चिक्षेप प्रतिविन्ध्याय पार्थिवः ॥ २९॥

सा समासाद्य तं शूरं प्रतिविन्ध्यं महाप्रभा ।
निर्भिद्य दक्षिणं बाहुं निपपात महीतले ॥ ३०॥

पतिताऽभासयच्चैव तं देशमशनिर्यथा ॥ ३१

प्रतिविन्ध्यस्ततो राजंस् तोमरं स्वर्णभूषितम् ।
प्रेषयामास सङ्क्रुद्धश् चित्रस्य वधकाङ्क्षया ॥ ३२

स तस्य देहावरणं भित्त्वा हृदयमेव च ।
जगाम धरणीं तूर्णं महोरग इवाशयम् ॥ ३३

स पपात तदा राजा तोमरेण समाहतः ।
प्रसार्य विपुलौ बाहू महापरिघसन्निभौ ॥ ३४

चित्रं सम्प्रेक्ष्य निहतं तावका रणशोभिनम् ।
अभ्यधावन्त वेगेन प्रतिविन्ध्यं समन्ततः ॥ ३५

सृजन्तो विविधान् बाणाञ् शतघ्नीश्च सकिङ्किणीः ।
तमेकं छादयामासुस् सूर्यमभ्रगणा इव ॥ ३६

तान् विव्याध महाबाहुश् शरजालैर्महाहवे ।
व्यद्रावयत् तव चमूं वज्रहस्त इवासुरान् ॥ ३७

ते वध्यमानास्समरे तावकाः पाण्डवैर्नृप ।
विप्रकीर्यन्त सहसा वातनुन्ना घना इव ॥ ३८

विद्रुते तु बले तस्मिन् वध्यमाने समन्ततः ।

द्रौणिरेकोऽद्रवत् तूर्णं भीमसेनं महाबलम् ॥ ३९

तयोस्समागमो घोरो बभूव समरे नृप ।
यथा दैवासुरे युद्धे वृत्रवासवयोरिव ॥ ४०

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि एकादशोऽध्यायः ॥ ११ ॥
॥ ७३ ॥ कर्णपर्वणि एकादशोऽध्यायः ॥ ११ ॥
[अस्मिन्नध्याये ४० श्लोकाः]

॥ द्वादशोऽध्यायः ॥

भीमाश्वत्थाम्नोर्युद्धम् ॥

सञ्जयः—

भीमसेनं ततो राजन् द्रौणिर्विव्याध पत्रिणा ।
त्वरया परया युक्तो दर्शयन्नस्त्रलाघवम् ॥ १

अथैनं पुनराजघ्ने नवत्या निशितैश्शरैः ।
सर्वमर्माणि सम्प्रेक्ष्य मर्मज्ञो लघुहस्तवत् ॥ २

भीमसेनस्समाकीर्णो द्रौणिना निशितैश्शरैः ।
रराज समरे राजन् रश्मिमानिव भास्करः ॥ ३

ततश्शरसहस्रेण सुप्रयुक्तेन पाण्डवः ।
द्रोणपुत्रमवच्छाद्य सिंहनादमथानदत् ॥ ४

शरैश्शरांस्तथा द्रौणिस् संवार्य युधि पाण्डवम् ।
ललाटेऽभ्याहनद्राजन् नाराचेन स्मयन्निव ॥ ५

[1]ललाटस्थं ततो बाणं धारयामास पाण्डवः ।
[2]यथा शृङ्गं वने दृप्तः खड्गो धारयते नृप ॥ ६

ततो द्रौणिं रणे भीमो यतमानं पराक्रमी ।
त्रिभिर्विव्याध नाराचैर् ललाटे विस्मयन्निव ॥ ७

ललाटस्थैस्त्रिभिर्बाणैर् अश्वत्थामा व्यरोचत ।
प्रावृष्यम्बुपरिक्षिप्तस् त्रिशृङ्ग इव पर्वतः ॥ ८

ततश्शरशतैर्द्रौणिम् अर्दयामास पाण्डवः ।
न चैनं कम्पयामास महावात इवाचलम् ॥ ९

तथैव पाण्डवं युद्धे द्रौणिश्शरशतैश्शितैः ।
नाकम्पयत संहृष्टो वार्योघ इव पर्वतम् ॥ १०

तावन्योन्यं शरैर्घोरैश् छादयन्तौ महारथौ ।
रथचर्यागतौ वीरौ शुशुभाते नरर्षभौ ॥ ११

आदित्याविव संदीप्तौ लोकक्षयकरावुभौ ।
स्वरश्मिभिरिवान्योन्यं तापयन्तौ शरोत्तमैः ॥ १२

कृतप्रतिकृते यत्नं कुर्वाणौ तौ महारथौ ।
कृतप्रतिकृते चैव बाणसङ्घैरभीतवत् ॥ १३

---

1. अ—चत्वार्यर्धानि न सन्ति 2. ख—षडर्धानि न सन्ति

व्याघ्राविव च संरब्धौ चेरतुस्तौ नरोत्तमौ ।
शरदंष्ट्रौ दुराधर्षौ चापहस्तौ भयङ्करौ ॥ १४

अदृश्यौ च मुहूर्तेन शरजालैर्बभूवतुः ।
मेघजालैः प्रतिच्छन्नौ सूर्याचन्द्रमसाविव ॥ १५

प्रकाशौ च मुहूर्तेन तत्रैवास्तामरिंदमौ ।
विमुक्तौ मेघजालेन शशिसूर्यौ यथा दिवि ॥ १६

[1]अथ तत्रैव सङ्ग्रामे वर्तमाने सुदारुणे ।
अपसव्यं ततश्चक्रे द्रौणिस्तत्र वृकोदरम् ॥ १७

किरञ् छरशतैरुग्रैर् धाराभिरिव पर्वतम् ।
न तु तन्ममृषे भीमश् शत्रोर्विजयलक्षणम् ॥ १८

प्रतिचक्रे ततो राजन् पाण्डवोऽप्यपसव्यतः ।
मण्डलानां विभागेन गतप्रत्यागतेन च ॥ १९

बभूव तुमुलं युद्धं तयोस्तत्र महामृधे ।
चरित्वा विविधान् मार्गान् मण्डलस्थानमेव च ॥ २०

शरैः पूर्णायतोत्सृष्टैर् अन्योन्यमभिजघ्नतुः ।
अन्योन्यस्य वधे चैव चक्रतुर्यत्नमाहवे ॥ २१

इयेषतुश्च विरथं कर्तुमन्योन्यमाहवे ॥ २१॥

ततो द्रौणिर्महास्त्राणि प्रादुश्चक्रे महारथः ॥ २२

1. ख—इदमर्धं नास्ति

तान्यस्त्रैरेव समरे प्रतिजघ्ने स पाण्डवः ॥ २२॥

ततो घोरं महाराज ह्यस्त्रयुद्धमवर्तत ।
ग्रहयुद्धं यथा घोरं प्रजासंहरणे ह्यभूत् ॥ २३॥

ते बाणास्समसज्जन्त ताभ्यां क्षिप्ता इतस्ततः ।
द्योतयन्तो दिशस्सर्वास् तच्च सैन्यं समन्ततः ॥ २४॥

बाणसङ्घावृतं सर्वम् आकाशं समपद्यत ।
उल्कापातावृतं यद्वत् प्रजासंहरणे नृप ॥ २५॥

बाणाभिघातात् सञ्जज्ञे तत्र भारत पावकः ।
सविष्फुलिङ्गो दीप्तार्चिर् योऽदहद्वाहिनीद्वयम् ॥ २६॥

तत्र सिद्धा महाराज सम्पतन्तोऽब्रुवन् वचः ॥ २७

अति युद्धानि सर्वाणि [1]युद्धमेतदवर्तत ।
सर्वयुद्धानि चैतस्य कलां नार्हन्ति षोडशीम् ॥ २८

नैतादृशं पुनर्युद्धं भविष्यति कदाचन ।
अहो ज्ञानेन सम्पन्नावुभौ चोग्रपराक्रमौ ॥ २९

अहोऽनयोर्बलं युद्धे अहो चापि कृतास्त्रता ।
अहो ज्ञानस्य सम्पच्च अहो सौष्ठवमेव च ॥ ३०

स्थितावेतौ हि समरे कालान्तकयमोपमौ ।
रुद्रौ द्वाविव सम्भूतौ तथा द्वाविव भास्करौ ॥ ३१

1. ख—अयं पादोऽनन्तरश्च न स्तः

यमाविव नरव्याघ्रौ घोररूपाविमौ रणे ॥ ३१॥

इति स्म वाचश्शूयन्ते सम्पतन्त्यो मुहुर्मुहुः ।
सिंहनादाश्च सञ्जज्ञुस् समेतानां दिवौकसाम् ॥ ३२॥

अद्भुतं चाप्यचिन्त्यं च दृष्ट्वा युद्धं महारणे ।
तौ शूरौ समरे राजन् परस्परकृतागसौ ॥ ३३॥

परस्परमुदीक्षेतां क्रोधादुद्वृत्य चक्षुषी ।
क्रोधरक्तेक्षणौ तौ तु क्रोधात् प्रस्फुरिताधरौ ॥ ३४॥

क्रोधात् संदश्य दशनैस् तथैव दशनच्छदौ ।
छादयामासतुरुभौ तावन्योन्यं रणे शरैः ॥ ३५॥

शराम्बुधारौ समरे शस्त्रविद्युत्प्रकाशिनौ ।
तावन्योन्यं ध्वजौ विद्ध्वा सारथी च महारथौ ॥ ३६॥

अन्योन्यस्य हयांश्चापि सायकैर्निर्बिभेदतुः ॥ ३७

[1]ततः क्रुद्धौ महाराज बाणौ गृह्य महाहवे ।
उभौ चिक्षिपतुस्तूर्णम् अन्योन्यस्य वधैषिणौ ॥ ३८

तौ सायकौ महाराज द्योतमानौ चमूमुखे ।
आजघ्नतुस्समासाद्य वज्रवेगौ दुरासदौ ॥ ३९

तौ परस्परवेगेन शराभ्यामाहतौ भृशम् ।
निपेततुर्महाराज स्वरथोपस्थयोस्तदा ॥ ४०

1. अ-ख—अर्धचतुष्टयं नास्ति

ततस्तु सारथिर्ज्ञात्वा द्रोणपुत्रमचेतनम् ।
अपोवाह रणाद्राजन् सर्वक्षत्रस्य पश्यतः ॥ ४१

तथैव पाण्डवं राजन् [1]विह्वलन्तं मुहुर्मुहुः ।
अपोवाह रणाद्राजन् विशोकश्शत्रुतापनम् ॥ ४२

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि द्वादशोऽध्यायः ॥ १२ ॥
॥ ७३ ॥ कर्णपर्वणि द्वादशोऽध्यायः ॥ १२ ॥
[अस्मिन्नध्याये ४२ श्लोकाः]

॥ त्रयोदशोऽध्यायः ॥

शल्येन श्रुतकीर्तिपराजयः ॥

सञ्जयः—
श्रुतकीर्तिमथायान्तं किरन्तं निशिताञ् शरान् ।
मद्रराजो महाराज वारयामास हृष्टवत् ॥ १

[2]मद्रराजं समासाद्य श्रुतकीर्तिर्महारथः ।
विव्याध भल्लैस्त्रिंशत्या कार्तस्वरविभूषितैः ॥ २

प्रतिविव्याध तं शल्यस् त्रिभिस्तूर्णमजिह्मगैः ।
सारथिं चास्य भल्लेन भृशं विव्याध भारत ॥ ३

1. क—अयं पादोऽनन्तरश्च न स्तः
2. अ—नास्तीदमर्धद्वयम्

स शल्यं शरवर्षेण च्छादयामास संयुगे ।
मुमोच निशितान् बाणान् मद्रराजरथं प्रति ॥ ४

ततश्शल्यो महाराज श्रुतकीर्तिभुजच्युतान् ।
चिच्छेद समरे बाणान् बाणैस्सन्ततपर्वभिः ॥ ५

श्रुतकीर्तिस्ततश्शल्यं भित्त्वा नवभिरायसैः ।
सारथिं त्रिभिरानर्च्छत् पुनश्शल्यं च पञ्चभिः ॥ ६

तस्य शल्यो धनुश्छित्त्वा हस्तावापं निकृत्य च ।
विव्याध समरे तूर्णं सप्तभिस्तं शरोत्तमैः ॥ ७

अथान्यद्धनुरादाय श्रुतकीर्तिर्महारथः ।
मद्रेश्वरं चतुष्षष्ट्या बाह्वोरुरसि चार्पयत् ॥ ८

ततस्तु समरे राजंस् तेन विद्धश्शिलीमुखैः ।
प्रतिविव्याध तं चापि नवत्या निशितैश्शरैः ॥ ९

तस्य मद्रेश्वरश्चापम् पुनश्चिच्छेद मारिष ।
सञ्छिन्नधन्वा समरे गदां चिक्षेप सत्वरः ॥ १०

पट्टैर्जाम्बूनदैर्बद्धां रूप्यपट्टैश्च भारत ।
भ्राजमानां यथा नारीं दिव्यवस्त्रविभूषिताम् ॥ ११

तामापतन्तीं सहसा दीप्यमानाशनिप्रभाम् ।
शरैरनेकसाहस्रैर् व्यष्टम्भयत मद्रराट् ॥ १२

विष्टभ्य च गदां वीरः पातयित्वा च भूतले ।

श्रुतकीर्तिमथायत्तो राजन् विव्याध पञ्चभिः ॥ १३
तस्य शक्तिं रणे भूयश् चिक्षेप भुजगोपमाम् ।
तां द्विधा चाच्छिनच्छल्यो मेदिन्यां सा त्वशीर्यत ॥ १४
तस्य शल्यः क्षुरप्रेण यन्तुः कायाच्छिरोऽहरत् ।
बालहस्ताद्यथा श्येन आमिषं वै नरोत्तम ॥ १५
स पपात रथोपस्थात् सारथिस्तस्य भारत ।
ततस्ते प्राद्रवन् सङ्ख्ये हयास्तस्य महात्मनः ॥ १६
पलायमानैस्तैरश्वैस् सोऽपनीतो रणाजिरात् ।
श्रुतकीर्तिर्महाराज पश्यतां सर्वयोधिनाम् ॥ १७
ततो मद्रेश्वरो राजा पाण्डवानामनीकिनीम् ।
व्यगाहत मुदा युक्तो नलिनीं द्विरदो यथा ॥ १८
लोलयामास स बलं सिंहः पशुगणानिव ।
शल्यस्तत्र महाराज्ञे पाण्डवानां महात्मनाम् ॥ १९
निपात्य पाण्डुपाञ्चालान् पृतनासु व्यवस्थितः ।
अशोभत रणे शल्यो विधूमोऽग्निरिव ज्वलन् ॥ २०
सेनाकक्षं महद्दग्ध्वा कक्षमग्निरिवोत्थितः ।
स्थितो रराज समरे पुरं दग्ध्वेव शङ्करः ॥ २१

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि त्रयोदशोऽध्यायः ॥ १३ ॥
॥ ७३ ॥ कर्णपर्वणि त्रयोदशोऽध्यायः ॥ १३ ॥
[अस्मिन्नध्याये २१ श्लोकाः]

॥ चतुर्दशोऽध्यायः ॥

सहदेवेन दुश्शासनपराजयः ॥

सञ्जयः—

सहदेवं तदा क्रुद्धं निघ्नन्तं तव वाहिनीम् ।
दुश्शासनो महाराज भ्राता भ्रातरमभ्ययात् ॥ १

तौ समेतौ महारङ्गे दृष्ट्वा तत्र समागताः ।
सिंहनादरवांश्चक्रुर् वासांस्यादुधुवुश्च ह ॥ २

तत्र भारत रुष्टेन तव पुत्रेण धन्विना ।
पाण्डुपुत्रस्त्रिभिर्बाणैर् वक्षस्यभिहतो भृशम् ॥ ३

सहदेवस्ततो राजन् नाराचैस्तु तवात्मजम् ।
विव्याधोरसि सप्तत्या सारथिं चेषुभिस्त्रिभिः ॥ ४

दुश्शासनस्ततश्चापं छित्त्वा राजन् महाहवे ।
सहदेवं त्रिसप्तत्या बाह्वोरुरसि चार्पयत् ॥ ५

सहदेवस्ततः क्रुद्धः खड्गमुद्यम्य मारिष ।
आविध्य व्यसृजत् तूर्णं तव पुत्ररथं प्रति ॥ ६

समार्गणगुणं चापं द्विधा कृत्वा महानसिः ।
निपपात ततो भूमौ च्युतस्सर्प इवाम्बरात् ॥ ७

अथान्यद्धनुरादाय माद्रेयः क्रोधमूर्छितः ।

दुःशासनाय चिक्षेप बाणमन्तकरं परम् ॥ ८

तमापतन्तं वेगेन यमदण्डमिवापरम् ।
खड्गेन शितधारेण द्विधा चिच्छेद कौरवः ॥ ९

ततस्तं निशितं खड्गं प्राविध्यत् तस्य सत्वरम् ।
धनुश्चान्यत् समादाय शरं जग्राह वीर्यवान् ॥ १०

तमापतन्तं वेगेन निस्त्रिंशं निशितैश्शरैः ।
समरेऽपातयद्धृष्टस् सहदेवो हसन्निव ॥ ११

ततो बाणांश्चतुष्षष्टिं तव पुत्रो महारथः ।
सहदेवरथे तूर्णं प्रेषयामास भारत ॥ १२

शरानापततस्तूर्णं समरे तान् सुवेगिनः ।
एकैकं पञ्चभिर्बाणैर् माद्रेयस्तु समाच्छिनत् ॥ १३

तान् निवार्य ततो बाणैस् सहदेवः प्रतापवान् ।
[1]शतसङ्ख्यांस्ततो बाणान् प्रेषयामास संयुगे ॥ १४

तान् बाणांस्तव पुत्रोऽपि छित्त्वैकैकं त्रिभिस्त्रिभिः ।
ननाद सुमहानादम् नादयानो वसुन्धराम् ॥ १५

ततो दुःशासनो राजन् द्वाभ्यां पाण्डुसुतं रणे ।
सारथिं नवभिर्बाणैर् माद्रेयस्य समाचिनोत् ॥ १६

ततः क्रुद्धो महाराज सहदेवः प्रतापवान् ।

---

1. अ—षडर्धानि न सन्ति

समधत्त शरं घोरं मृत्युकालान्तकोपमम् ॥ १७

विकृष्य बलवच्चापं तव पुत्राय सोऽसृजत् ॥ १७॥

स तं निर्भिद्य वेगेन भित्त्वा च कवचं महत् ।
प्राविशद्धरणीं तूर्णं वल्मीकमिव पन्नगः ॥ १८॥

स मुमोह ततः पुत्रस् तव राजन् महाबलः ॥ १९

मूढं चैनं समालक्ष्य सारथिस्त्वरितो रणात् ।
अपोवाह सुसंत्रस्तो वध्यमानं शितैश्शरैः ॥ २०

पराजित्य रणे तं तु पाण्डवः पाण्डुपूर्वज ।
दुर्योधनबलं बाणैः प्रामथद्वै समन्ततः ॥ २१

पिपीलिकापुटं राजन् यथा मृद्नन् नरो रुषा ।
तथा सा कौरवी सेना मृदिता तेन भारत ॥ २२

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि चतुर्दशोऽध्यायः ॥ १४ ॥
॥ ७३ ॥ कर्णपर्वणि चतुर्दशोऽध्यायः ॥ १४ ॥
[अस्मिन्नध्याये २२ श्लोकाः]

॥ पञ्चदशोऽध्यायः ॥

कर्णनकुलयोर्युद्धम् ॥ १ ॥ कर्णेन नकुलस्य पराभावनपूर्वकं सोपहासमधिक्षेपः ॥ २ ॥

सञ्जयः—

नकुलं रभसं युद्धे तपन्तं तव वाहिनीम् ।
कर्णो वैकर्तनो राजन् वारयामास वै रुषा ॥ १

नकुलस्तु ततः कर्णं प्रहसन्निदमब्रवीत् ॥ १॥

नकुलः—

चिरस्य बत दृष्टोऽसि दैवतैस्सौम्यचक्षुषा ।
यस्य मे त्वं रणे पाप चक्षुर्विषयमागतः ॥ २॥

त्वं हि मूलमनर्थानां वैरस्य कलहस्य च ।
त्वद्दोषात् कौरवाः क्षीणास् समासाद्य परस्परम् ॥ ३॥
त्वामद्य समरे हत्वा कृतकृत्योऽस्मि सत्वरः ॥ ४

सञ्जयः—

एवमुक्तः प्रत्युवाच नकुलं सूतनन्दनः ॥ ४॥

कर्णः—

सदृशं राजपुत्रस्य विशेषेण धनुष्मतः ।
प्रहरस्व रणे वीर पश्यामः पुरुषो भव ॥ ५॥
कर्म कृत्वा रणे शूर ततः कत्थितुमर्हसि ॥ ६

अनुक्त्वा समरे तात शूरा युध्यन्ति शक्तितः ।
युध्यस्व समरे शक्त्या प्रतियोत्स्यामि ते रणे ॥ ७

सञ्जयः—

इत्युक्त्वा प्राहरत् तूर्णं पाण्डुपुत्राय सूतजः ।
विव्याध चैनं समरे त्रिसप्तत्या शिलीमुखैः ॥ ८

नकुलस्तु ततो विद्धस् सूतपुत्रेण भारत ।
अशीत्याऽऽशीविषप्रख्यैस् सूतपुत्रमविध्यत ॥ ९

तस्य कर्णो धनुश्छित्त्वा स्वर्णपुङ्खान् शिलाशितान् ।
त्रिंशतं प्रेषयामास शरानाशीविषोपमान् ॥ १०

ते चास्य कवचं भित्त्वा पपुश्शोणितमाहवे ।
आशीविषा यथा राजन् भित्त्वा गां सलिलं भृशम् ॥ ११

अथान्यद्धनुरादाय हेमपृष्ठं दुरानमम् ।
कर्णं विव्याध सप्तत्या सारथिं च त्रिभिश्शरैः ॥ १२

ततः क्रुद्धो महाराज नकुलः परवीरहा ।
क्षुरप्रेण सुतीक्ष्णेन कर्णस्य धनुराच्छिनत् ॥ १३

अथैनं छिन्नधन्वानं सायकानां त्रिभिश्शतैः ।
आजघ्ने प्रहसन् वीरस् सर्वलोकमहारथम् ॥ १४

कर्णमभ्यर्दितं दृष्ट्वा पाण्डुपुत्रेण मारिष ।
विस्मयं परमं जग्मुर् ऋषयस्सह दैवतैः ॥ १५

अथान्यद्धनुरादाय कर्णो वैकर्तनस्तदा ।
नकुलं पञ्चभिर्बाणैर् जत्रुदेशे समार्पयत् ॥ १६

उरस्थैरथ तैर्बाणैर् माद्रीपुत्रो व्यरोचत ।
स्वरश्मिभिरिवादित्यो भुवने विसृजन् प्रभाम् ॥ १७

नकुलस्तु ततः कर्णं विद्ध्वा सप्तभिराशुगैः ।
अथास्य धनुषः कोटिं पुनश्चिच्छेद मारिष ॥ १८

सोऽन्यत् कार्मुकमादाय समरे वेगवत्तरम् ।
नकुलस्य ततो बाणैस् समन्ताद्वारयन् दिशः ॥ १९

सञ्छाद्यमानस्समरे कर्णचापच्युतैश्शरैः ।
चिच्छेद तान् शरांस्तूर्णं शरैरेव महायशाः ॥ २०

ततो बाणमयं जालं विततं व्योम्न्यदृश्यत ।
खद्योतानामिव व्रातैस् सम्पतद्भिर्यथा नभः ॥ २१

तैर्विमुक्तैश्शरशतैश् छादितं गगनं महत् ।
शलभानामिव व्रातैस् तद्धि ह्यासीद् विशां पते॥ २२

ते शरा हेमविकृतास् सम्पतन्तो मुहुर्मुहुः ।
श्रेणीकृता व्यरोचन्त क्रौञ्चाश्श्रेणीकृता इव ॥ २३

बाणजालावृते व्योम्नि च्छादिते च दिवाकरे ।
न स्म सम्पतते भूतं किञ्चिदप्यन्तरिक्षगम् ॥ २४

निरुद्धे तत्र मार्गे तु शरसङ्घैस्समन्ततः ।

व्यरोचेतां महात्मानौ बालसूर्याविवोदितौ ॥ २५

कर्णचापच्युतैर्बाणैर् वध्यमानास्तु सोमकाः ।
अवालीयन्त राजेन्द्र वेदनार्ता भृशार्दिताः ॥ २६

नकुलस्य ततो बाणैर् वध्यमाना चमूस्तव ।
व्यदीर्यत ततो राजन् वातनुन्न इवाम्बुदः ॥ २७

ते सेने वध्यमाने तु ताभ्यां दिव्यैर्महाशरैः ।
शरपातानतिक्रम्य तस्थतुः प्रेक्षके इव ॥ २८

प्रोत्सारिते जने तस्मिन् कर्णपाण्डवयोश्शरैः ।
जघ्नतुस्तौ महात्मानावन्योन्यं शरवृष्टिभिः ॥ २९

विदर्शयन्तौ शस्त्राणि दिव्यानि रणमूर्धनि ।
छादयन्तौ च सहसा परस्परवधैषिणौ ॥ ३०

नकुलेन शरा मुक्ताः कङ्कबर्हिणवाससः ।
सूतपुत्रमवच्छाद्य व्यतिष्ठन्त इवाऽम्बरे ॥ ३१

तथैव सूतपुत्रेण प्रेषिताः परमाहवे ।
[1]पाण्डुपुत्रमवच्छाद्य व्यतिष्ठन्त इवाम्बरे ॥ ३२

शरवेश्मप्रविष्टौ तौ न दृश्येते कथञ्चन ।
चन्द्रसूर्यौ यथा राजञ् छाद्यमानौ जलागमे ॥ ३३

ततः क्रुद्धो रणे कर्णः कृत्वा घोरतरं वपुः ।

1. ख—इदमर्धं नास्ति

पाण्डवं छादयामास समन्ताच्छरवृष्टिभिः ॥ ३४

सञ्छाद्यमानस्समरे सूतपुत्रेण पाण्डवः ।
न चकार व्यथां राजन् भास्करो जलदैर्यथा ॥ ३५

ततः प्रहस्यातिरथिश् शरजालानि मारिष ।
प्रेषयामास समरे शतशोऽथ सहस्रशः ॥ ३६

एकबाणमभूत् सर्वं तस्य बाणैर्महात्मनः ।
अभ्रच्छायेव सञ्जज्ञे सम्पतद्भिश्शरोत्तमैः ॥ ३७

ततः कर्णो महाराज धनुश्छित्त्वा महात्मनः ।
सारथिं पातयामास रथनीडाद्धसन्निव ॥ ३८

ततोऽश्वांश्चतुरस्तस्य चतुर्भिर्निशितैश्शरैः ।
यमस्य सदनं तूर्णं प्रेषयामास भारत ॥ ३९

अथास्य तं रथं दिव्यं तिलशो व्यधमच्छरैः ।
पताकां चक्ररक्षौ च गदां खड्गं च मारिष ॥ ४०

शतचन्द्रं च तद्वर्म सर्वोपकरणानि च ।
सुवर्णविकृतं तच्च धनुस्सशरमाहवे ॥ ४१

हताश्वो विरथश्चैव विचर्मा च विशां पते ।
अवतीर्य रथात् तूर्णं परिघं गृह्य विष्ठितः ॥ ४२

समुद्यतं महाघोरं परिघं तस्य सूतजः ।
व्यथमत् सायकैस्तूर्णं तदद्भुतमिवाभवत् ॥ ४३

व्यायुधं च समालक्ष्य शरैस्सन्नतपर्वभिः ।
अर्दयन् बहुशः कर्णो न चैनं समपीडयत् ॥ ४४

स वध्यमानस्समरे कृतास्त्रेण बलीयसा ।
प्राद्रवत् सहसा राजन् नकुलो व्याकुलेन्द्रियः ॥ ४५

अभिद्रुत्य च राधेयः प्रहसन् वै पुनःपुनः ।
सज्यं च स्वधनुः कण्ठे विससर्ज च भारत ॥ ४६

ततस्स शुशुभे राजन् कण्ठसक्तं महाधनुः ।
परिवेषमनुप्राप्तो नभसीव तमोनुदः ॥ ४७

यथा चैवासितो मेघश् शक्रचापेन शोभते ।
अशोभत महाराज पाण्डुपुत्रस्तथा रणे ॥ ४८

तमब्रवीत् ततः कर्णो व्यर्थं व्याहृतवानसि ।
वदेदानीं पुनर्ह्रष्टो वध्यो मे त्वं पुनः पुनः ॥ ४९

मा योत्सीर्गुरुभिस्सार्धं बलवद्भिश्च पाण्डव ।
सदृशैस्तात युध्यस्व व्रीडां मा कुरु पाण्डव ॥ ५०

गृहं वा गच्छ माद्रेय यत्र वा केशवार्जुनौ ॥ ५०॥

एवमुक्ता महाराज विससर्ज स तं तदा ॥ ५१

वधप्राप्तं तु तं शत्रुं नावधीत् सूतनन्दनः ।
स्मृत्वा मातुर्वचो राजंस् तत एनं व्यसर्जयत् ॥ ५२

विसृष्टः पाण्डवो राजन् सूतपुत्रेण धन्विना ।

व्रीडन्निव जगामाथ युधिष्ठिररथं प्रति ॥ ५३

आरुरोह रथं चापि धर्मराजस्य पाण्डवः ।
निश्श्वसन् दुःखसन्तप्तः कुम्भक्षिप्त इवोरगः ॥ ५४

तं विजित्य रणे कर्णः पाञ्चालांस्त्वरितो ययौ ।
रथेनातिपताकेन चन्द्रवर्णहयेन च ॥ ५५

तत्राक्रन्दो महानासीत् पाण्डवानां विशां पते ।
दृष्ट्वा सेनापतिं यान्तं पाञ्चालानां रथव्रजान् ॥ ५६

[1]तत्राकरोन्महाराज कदनं सूतनन्दनः ।
मध्यं प्राप्ते दिनकरे चक्रवद्व्यचरत् प्रभुः ॥ ५७

भग्नचक्रै रथैः केचिच् छिन्नध्वजपताकिभिः ।
ससूतैर्हतसूतैश्च भग्नाक्षैश्चापि मारिष ॥ ५८

ह्रियमाणानपश्याम पाञ्चालानां रथव्रजान् ॥ ५८॥

तत्र तत्र च सम्भ्रान्ता विचेरुस्तत्र कुञ्जराः ।
दावाग्न्यभिपरीताङ्गा यथैव स्युर्महावने ॥ ५९॥

भिन्नकुम्भास्स्रुधिराश् छिन्नहस्ताश्च वारणाः ।
छिन्नगात्रावराश्चैव च्छिन्नवालाश्च मारिष ॥ ६०॥

छिन्नाभ्राणीव सम्पेतुर् वध्यमाना महात्मना ॥ ६१

अपरे त्रासिता नागा नाराचशततोमरैः ।

---

1. ख—अर्धपञ्चकं नास्ति

तमेवाभिमुखं जग्मुश् शलभा इव पावकम् ॥ ६२

अपरे निष्टनन्तस्तु व्यदृश्यन्त महाद्विपाः ।
क्षरन्तश्शोणितं गात्रैर् नगा इव जलस्रवाः ॥ ६३

उरश्छदैर्विमुक्ताश्च वालबन्धैश्च वाजिनः ।
राजतैश्च तथा कांस्यैस् सौवर्णैश्च विभूषणैः ॥ ६४

हीना ह्याभरणैश्चैव खलीनैश्च विवर्जिताः ।
चामरैश्च कुथाभिश्च तूणीरैः पतितैरपि ॥ ६५

निहतैस्सादिभिश्चैव शूरैराहवशोभिभिः ।
वातायमानान् सहसा प्रपश्याम हयोत्तमान् ॥ ६६

[1]हयान् योधानपश्याम कञ्चुकोष्णीषवेष्टितान् ।
निहतान् धावमानांश्च वेष्टमानांश्च भारत ॥ ६७

रथान् हेमपरिष्कारान् सुयुक्ताञ् जवनैर्हयैः ।
भ्राम्यमाणानपश्याम हतेषु रथिषु द्रुतान् ॥ ६८

हताश्वकूबरान् कांश्चिद् भग्नचक्रांश्च भारत ।
विपताकध्वजांश्चैव छिन्नेषादण्डबन्धुरान् ॥ ६९

विहीनान् रथिभिस्तत्र धावमानांस्ततस्ततः ।
रथांस्तु तत्र विच्छिन्नांस् तिलशः कर्णविक्रमैः ॥ ७०

---

1. घ—एतदादि अर्धपञ्चकं नास्ति

[1]सूतपुत्रशरैस्तत्रान् अपश्याम जगत्पते ।
तारकाजालसञ्छिन्नान् उरुघण्टोपशोभितान् ॥ ७१

नानावर्णविचित्राभिः कदलीभिरलङ्कृतान् ।
नागानवयवैर्हीनांस् तत्र तत्र विनिष्ठितान् ॥ ७२

पदातीनप्यपश्याम धावमानान् समंततः ।
विशस्त्रांश्च तथैवान्यान् सशस्त्रांश्च बहून् हतान् ॥ ७३

शिरोभिर्बाहुभिर्हीनान् भिन्नैरूरुभिरेव च ।
कर्णचापच्युतैर्बाणैर् अदृश्यन्त विनाकृताः ॥ ७४

महान् व्यतिकरो रौद्रो योधानामन्वदृश्यत ।
कर्णसायकनुन्नानां वध्यतां निशितैश्शरैः ॥ ७५

[2]ते वध्यमानास्समरे सूतपुत्रेण सृञ्जयाः ।
तमेवाभिमुखा यान्ति पतङ्गा इव पावकम् ॥ ७६

तं दहन्तमनीकानि तत्र तत्र महारथम् ।
अपरे वर्जयामासुर् युगान्ताग्निमिवोल्बणम् ॥ ७७

हतशेषास्तु ये वीराः पाञ्चालानां रथव्रजाः ।
तान् भग्नान् विद्रुतान् कर्णः पृष्ठतो विकिरञ् छरान् ॥ ७८

अभ्यद्रवत तेजस्वी विकीर्णकवचध्वजान् ।

---

1. ख—नास्तीदमर्धद्वयम्
2. घ—सप्तार्धानि न सन्ति

तापयन् समरे बाणैस् सूतपुत्रो महारथः ॥ ७९
मध्यंदिनमनुप्राप्तो भूतानीव तमोनुदः ॥ ७९॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि पञ्चदशोऽध्यायः ॥ १५ ॥
॥ ७३ ॥ कर्णपर्वणि पञ्चदशोऽध्यायः ॥ १५ ॥
[अस्मिन्नध्याये ७९॥ श्लोकाः]

॥ षोडशोऽध्यायः ॥

युयुत्सूलूकयोर्युद्धम् ॥ १ ॥ शकुनिसुतसोमयोर्युद्धम् ॥ २ ॥

सञ्जयः—

युयुत्सुं तव पुत्रस्य तापयन्तं वरूथिनीम् ।
उलूकोऽभ्यपतत् तूर्णं तिष्ठ तिष्ठेति चाब्रवीत् ॥ १

युयुत्सुश्च ततो राजञ् शितधारेण पत्रिणा ।
उलूकं ताडयामास वज्रेणेव महाचलम् ॥ २

उलूकस्तु ततः क्रुद्धस् तव पुत्रस्य मारिष ।
क्षुरप्रेण सुतीक्ष्णेन धनुश्चिच्छेद संयुगे ॥ ३

अपास्य तद्धनुच्छिन्नं युयुत्सुर्वेगवत्तरम् ।
अन्यदादत्त सुमहच् चापं संरक्तलोचनः ॥ ४

शाकुनिं तु चतुष्षष्ट्या विव्याध भरतर्षभ ।

सारथिं त्रिभिरानर्च्छत् तं च भूयोऽप्यविध्यत ॥ ५

उलूकः पञ्चविंशत्या विद्ध्वा रुक्मविभूषितैः ।
अथास्य समरे क्रुद्धो ध्वजं चिच्छेद काञ्चनम् ॥ ६

स च्छिन्नयष्टिस्सुमहान् शीर्यमाणो महाध्वजः ।
पपात प्रमुखे राजन् युयुत्सोर्विद्रुताद्रथात् ॥ ७

ध्वजमुन्मथितं दृष्ट्वा युयुत्सुः क्रोधमूर्च्छितः ।
उलूकं पञ्चभिर्बाणैर् आजघान स्तनान्तरे ॥ ८

उलूकस्तस्य भल्लेन तैलधौतेन मारिष ।
शिरश्चिच्छेद समरे यन्तुर्भरतसत्तम ॥ ९

जघान चतुरोऽश्वांश्च तं च विव्याध पञ्चभिः ।
सोऽतिविद्धो बलवता प्रत्यपायाद्रथान्तरम् ॥ १०

निर्जित्य तं रणे राजन्नुलूकस्त्वरितो ययौ ।
पाञ्चालान् सृञ्जयांश्चैव विकिरन् निशितैश्शरैः ॥ ११

[1]शतानीकं महाराज श्रुतकर्मा सुतस्तव ।
व्यश्वसूतरथं चक्रे निमेषार्धादसम्भ्रमः ॥ १२

हताश्वे तु रथे तिष्ठन् शतानीको महारथः ।
गदां चिक्षेप सङ्क्रुद्धस् तव पुत्रस्य मारिष ॥ १३

सा कृत्वा स्यन्दनं भस्म हयान् सारथिमेव च ।

1. ख—सप्तदशार्धानि न सन्ति

ध्वजं चैव पताकां च मेदिनीमन्वपद्यत ॥ १४

तावुभौ विरथौ वीरौ कुरूणां कीर्तिवर्धनौ ।
व्यपाक्रमेतां युद्धात्तु प्रेक्षमाणौ परस्परम् ॥ १५

पुत्रस्तु तव सम्भ्रान्तो विविंशो रथमाव्रजत् ।
शतानीकोऽपि राजेन्द्र प्रतिविन्ध्यरथं गतः ॥ १६

सुतसोमं तु शकुनिर् विद्ध्वा सुनिशितैश्शरैः ।
नाकम्पयत सङ्क्रुद्धो वार्योघ इव पर्वतम् ॥ १७

सुतसोमस्तु तं दृष्ट्वा पितुरत्यन्तवैरिणम् ।
शरैरनेकसाहस्रैश् छादयामास भारत ॥ १८

ताञ् शराञ् शकुनिस्तस्य तूर्णं चिच्छेद पत्रिभिः ।
लघुहस्तश्चित्रयोधी जितकाशी च संयुगे ॥ १९

निवार्य समरे चापि शरांस्तान् निशितैश्शरैः ।
[1]आजघान ततः क्रुद्धस् सुतसोमं त्रिभिश्शरैः ॥ २०

नाकम्पयत सङ्क्रुद्धो वार्योघ इव पर्वतम् । २०॥

तस्याश्वान् स्यन्दनं केतुं तिलशो व्यधमच्छरैः ।
स्यालस्तव महावीर्यस् तत उच्चुक्रुर्जनाः ॥ २१॥

हताश्वो विरथश्चैव छिन्नकेतुश्च मारिष ।
धन्वी धनुर्वरं गृह्य रथाद्भूमौ व्यतिष्ठत ॥ २२॥

---

1. ख—अर्धद्वयं नास्ति

व्यसृजत् सायकांश्चैव स्वर्णपुङ्खाञ् शिलाशितान् ॥ २३
छादयामासुरथ ते तव स्यालस्य तं रथम् ।
पतङ्गानामिव व्राताश् शरव्राता महारथम् ॥ २४
सञ्छाद्यमानोऽपि दृढं विव्यथे नैव सौबलः ।
प्रामर्दत शरानस्ताञ् शरजालैर्महारथः ॥ २५
तत्रातुष्यन्त योधाश्च सिद्धाश्चैव दिवि स्थिताः ।
सुतसोमस्य तत् कर्म दृष्ट्वाऽश्रद्धेयमद्भुतम् ॥ २६
रथस्थं नृपतिं यत्तु पदातिस्समयोधयत् ॥ २६॥
तस्य तीक्ष्णैर्महावेगैर् भल्लैस्सन्नतपर्वभिः ।
व्यधमत् कार्मुकं राजंस् तूणीरांश्चैव सर्वशः ॥ २७॥
स च्छिन्नधन्वा समरे खड्गमुद्यम्य नानदत् ।
वैदूर्योत्पलपत्राभं दन्तिदन्तमयत्सरुम् ॥ २८॥
भ्राम्यमाणं ततस्तं तु विमलाम्बरदर्शनम् ।
कालोपमं तदा मेने सुतसोमस्य धीमतः ॥ २९॥
सोऽचरत् सहसा खड्गी मण्डलानि सहस्रशः ।
चतुर्दिशं महाराज शिक्षाबलसमन्वितः ॥ ३०॥
सौबलस्तु ततस्तस्य शरांश्चिक्षेप वीर्यवान् ।
तानापतत एवाशु चिच्छेद परमासिना ॥ ३१॥
ततः क्रुद्धो महाराज सौबलः परवीरहा ।

प्राहिणोत् सुतसोमस्य शरानाशीविषोपमान् ॥ ३२॥

चिच्छेद तांस्तु खड्गेन शिक्षया च बलेन च ।
दर्शयँल्लाघवं युद्धे तार्क्ष्यतुल्यपराक्रमः ॥ ३३॥

तस्य सञ्चरतो राजन् मण्डलावर्तने तदा ।
क्षुरप्रेण सुतीक्ष्णेन खड्गं चिच्छेद सुप्रभम् ॥ ३४॥

स च्छिन्नस्सहसा भूमौ निपपात महानसिः ॥ ३५

अर्धमस्य स्थितं हस्ते सत्सरोर्यत्तु भारत ।
छिन्नमाज्ञाय निस्त्रिंशम् अवप्लुत्य पदानि षट् ॥ ३६

प्राविध्यतासिं तच्छेषं सुतसोमो महाबलः ॥ ३६॥

तच्छित्त्वा सगुणं चापं स्वर्णवज्रविभूषितम् ।
पपात धरणीं तूर्णं रणे तस्य महात्मनः ॥ ३७॥

सुतसोमस्ततो राजञ् छ्रुतकीर्तिरथं गतः ॥ ३८

सौबलोऽपि धनुर्गृह्य घोरमन्यन्महाबलः ।
अभ्ययात् पाण्डवानीकं निघ्नञ् शत्रुगणान् बहून् ॥ ३९

तत्र नादो महानासीत् पाण्डवानां विशां पते ।
सौबलं समरे दृष्ट्वा विचरन्तमभीतवत् ॥ ४०

तान्यनीकानि दृप्तानि शस्त्रवन्ति महान्ति च ।
द्राव्यमाणान्यदृश्यन्त सौबलेन महात्मना ॥ ४१

यथा दैत्यचमूं राजन् देवराजो ममर्द ह ।
तथैव पाण्डवानीकं सौबलेयो व्यनाशयत् ॥ ४२

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि षोडशोऽध्यायः ॥ १६ ॥
॥ ७३ ॥ कर्णपर्वणि षोडशोऽध्यायः ॥ १६ ॥
[अस्मिन्नध्याये ४२ श्लोकाः]

॥ सप्तदशोऽध्यायः ॥

कृपकृतवर्मभ्यां धृष्टद्युम्नशिखण्डिनोः पराजयः ॥

सञ्जयः—
धृष्टद्युम्नं कृपो राजन् वारयामास संयुगे ।
यथा दृप्तं वने सिंहं शरभो वारयेद्युधि ॥ १
निरुद्धः पार्षतस्तेन गौतमेन बलीयसा ।
पदात् पदं विचलितुं नाशकत् तत्र भारत ॥ २
गौतमस्य रथं दृष्ट्वा धृष्टद्युम्नरथं प्रति ।
वित्रेसुस्सर्वभूतानि क्षयं प्राप्तं च मेनिरे ॥ ३
तत्र जल्पन्ति पाण्डूनां रथिनस्सादिनस्तथा ॥ ३॥

पाण्डुसैनिकाः—
द्रोणस्य निधनान्नूनं सङ्क्रुद्धो द्विपदां वरः ।

शारद्वतो महातेजा दिव्यास्त्रविदुदारधीः ॥ ४॥
अपि स्वस्ति भवेदस्य धृष्टद्युम्नस्य गौतमात् ।
अपीयं वाहिनी कृत्स्ना मुच्येत महतो भयात् ॥ ५॥
अप्ययं ब्राह्मणस्सर्वान् न नो हन्यात् समागतान् ॥ ६
यादृशं दृश्यते रूपम् अन्तकप्रतिमं रणे ।
गमिष्यत्यद्य पदवीं भारद्वाजस्य गौतमः ॥ ७
आचार्यः क्षिप्रहस्तश्च विजयी च सदा युधि ।
अस्त्रवाञ्च छलसम्पन्नः क्रोधेन च समन्वितः ॥ ८
पार्षतश्च महायुद्धे विमुखोऽद्यापि लक्ष्यते ॥ ८॥

सञ्जयः—

इत्येवं विविधा वाचो व्यश्रूयन्त रणाजिरे ॥ ९
विनिश्श्वस्य ततः क्रोधात् कृपश्शारद्वतो नृप ।
पार्षतं छादयामास निश्चेष्टं शरवृष्टिभिः ॥ १०
स वध्यमानस्समरे गौतमेन महात्मना ।
कर्तव्यं नाभिजज्ञे वै मोहेन महता वृतः ॥ ११
[1]तमब्रवीत् ततो यन्ता कच्चित् क्षेमं नु मारिष ।
ईदृशं व्यसनं युद्धे न ते दृष्टं कदाचन ॥ १२
दैवयोगादिमे बाणा न जघ्नुर्मर्म चाहवे ।

1. ख—अर्धषट्कं नास्ति

प्रेषिता द्विजमुख्येन मर्माण्युद्दिश्य सर्वशः ॥ १३

व्यावर्तये तव रथं नदीवेग इवाहवात् ।
अवध्यं ब्राह्मणं मन्ये येन ते विक्रमो हृतः ॥ १४

धृष्टद्युम्नस्ततो राजञ् शनकैरब्रवीद्वचः ॥ १४॥

धृष्टद्युम्नः—

मुह्यते मे मनस्तात गात्रस्वेदश्च जायते ।
[1]वेपथुश्च क्लमश्चैव रोमहर्षश्च जायते ॥ १५॥

ब्राह्मणं वर्जयन् युद्धे शनैर्याहि यतोऽच्युतौ ॥ १६

अर्जुनं भीमसेनं वा समरे प्राप्य सारथे ।
क्षेममद्य भवेन्मह्यम् इति मे नैष्ठिकी मतिः ॥ १७

सञ्जयः—

ततः प्रायान्महाराज सारथिस्त्वरयन् हयान् ।
यतो भीमो महेष्वासो युयुधे तव सैनिकैः ॥ १८

प्रद्रुतं तु रथं दृष्ट्वा धृष्टद्युम्नस्य मारिष ।
किरञ् शरशतान्येव गौतमोऽनुययौ तदा ॥ १९

शङ्खं च पूरयामास मुहुर्मुहुररिन्दमः ।
पार्षतं द्रावयामास महेन्द्र इव शम्बरम् ॥ २०

शिखण्डिनं तु समरे भीष्ममृत्युं दुरासदम् ।
हार्दिक्यो वारयामास स्मयन्निव मुहुर्मुहुः ॥ २१

1. ख—इदमर्धं नास्ति

शिखण्डी तु समासाद्य हृदिकानां महारथम् ।
पञ्चभिर्निशितैर्भल्लैर् जत्रुदेशे समर्पयत् ॥ २२

कृतवर्मा तु सङ्क्रुद्धो विद्ध्वा षष्टिभिराशुगैः ।
धनुरेकेन चिच्छेद स्मयन्निव महारथः ॥ २३

अथान्यद्धनुरादाय द्रुपदस्यात्मजो बली ।
तिष्ठ तिष्ठेति हार्दिक्यं सङ्क्रुद्धस्समपद्यत ॥ २४

ततोऽस्य नवतिं बाणान् रुक्मपुङ्खान् सुतेजनान् ।
प्रेषयामास समरे तेऽस्याभ्रश्यन्त वर्मणः ॥ २५

वितथांस्तान् समालक्ष्य पतितांश्च महीतले ।
क्षुरप्रेण सुतीक्ष्णेन सोऽच्छिनत् कार्मुकं दृढम् ॥ २६

अथैनं छिन्नधन्वानं भग्नशृङ्गमिवर्षभम् ।
अशीत्या मार्गणैः क्रुद्धो बाह्वोरुरसि चार्पयत् ॥ २७

सात्वतस्तु रणे क्रुद्धो मार्गणैः क्षतविग्रहः ।
व्यसृजद्रुधिरं गात्रैर् मुखात् कुम्भ इवोदकम् ॥ २८

रुधिरेण परिक्लिन्नः कृतवर्मा व्यरोचत ।
वर्षेण क्लेदितो राजन् यथा गैरिकपर्वतः ॥ २९

अथान्यद्धनुरादाय समार्गणगणं ततः ।
शिखण्डिनं त्रिभिर्बाणैश् शङ्खदेशेऽभ्यताडयत् ॥ ३०

शङ्खदेशे स्थितैर्बाणैश् शिखण्डी तु व्यराजत ।

शाखाप्रशाखैर्विमलैस् सुमहान् वै यथा द्रुमः ॥ ३१

तावन्योन्यं रणे विद्ध्वा रुधिरेण समुक्षितौ ।
पोप्लूयमानौ हि यथा महान्तौ शोणितह्रदे ॥ ३२

तद्वद्विरेजतुर्वीरौ शोणितेन परिप्लुतौ ।
यथा च किंशुकौ फुल्लौ पुष्पमासेऽभ्युपागते ॥ ३३

रुधिरोक्षितसर्वाङ्गौ रक्तचन्दनरूषितौ ।
भुजगाविव सङ्क्रुद्धौ रेजतुस्तौ नरोत्तमौ ॥ ३४

तावुभौ शरनुन्नाङ्गौ परस्परशरक्षतौ ।
अन्योन्यशृङ्गाभिहतौ रेजतुर्वृषभाविव ॥ ३५

अन्योन्यस्य वधे यत्नं कुर्वाणौ तौ महारथौ ।
रथाभ्यां चेरतुस्तत्र मण्डलानि सहस्रशः ॥ ३६

कृतवर्मा महाराज पार्षतं निशितैश्शरैः ।
रणे विव्याध सप्तत्या स्वर्णपुङ्खैश्शिलाशितैः ॥ ३७

ततोऽस्य समरे बाणं भोजः प्रहरतां वरः ।
जीवितान्तकरं घोरं व्यसृजत् त्वरयाऽन्वितः ॥ ३८

स तेनाभिहतो राजन् मूर्छयाऽभिपरिप्लुतः ।
ध्वजयष्टिं च सहसा शिश्रिये कश्मलावृतः ॥ ३९

अपोवाह रणात् तं तु सारथी रथिनां वरम् ।
हार्दिक्यशरसंतप्तम् निश्श्वसन्तं पुनः पुनः ॥ ४०

पराजिते तत्र शूरे द्रुपदस्य सुते प्रभो ।
प्राद्रवत् पाण्डवी सेना वध्यमाना समन्ततः ॥ ४१

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि सप्तदशोऽध्यायः ॥ १७ ॥
॥ ७३ ॥ कर्णपर्वणि सप्तदशोऽध्यायः ॥ १७ ॥
[अस्मिन्नध्याये ४१ श्लोकाः]

॥ अष्टादशोऽध्यायः ॥

अर्जुनेन संशप्तकपराजयः ॥

सञ्जयः—

श्वेताश्वोऽपि महाराज व्यधमत् तावकं बलम् ।
यथा वायुस्समासाद्य तूलराशिं समन्ततः ॥ १

प्रत्युद्ययुस्त्रिगर्तास्तं शिबयस्सह कौरवैः ।
वसातयोऽथ साल्वाश्च गोपालाश्च यशस्विनः ॥ २

सत्यदेवस्सत्यकीर्तिर् मित्रदेवश्श्रुतञ्जयः ।
सौश्रुतिश्चन्द्रदेवश्च मित्रवर्मा च भारत ॥ ३

त्रिगर्तराजस्समरे भ्रातृभिः परिवारितः ।
पुत्रैश्चैव महेष्वासैर् नानाशस्त्रधरैर्युधि ॥ ४

ते सृजन्तश्शरान् घोरान् किरन्तोऽर्जुनमाहवे ।

अभ्यवर्तन्त सहसा वार्योघा इव सागरम् ॥ ५

ते त्वर्जुनं समासाद्य योधाश्शतसहस्रशः ।
अगच्छन् विलयं सर्वे तार्क्ष्यं दृष्ट्वेव पन्नगाः ॥ ६

ते वध्यमानास्समरे न जहुः पाण्डवं तदा ।
दह्यमाना महाराज शलभा इव पावकम् ॥ ७

सत्यदेवस्त्रिभिर्बाणैर् विव्याध युधि पाण्डवम् ।
मित्रदेवस्त्रिषष्ट्या च चन्द्रदेवश्च सप्तभिः ॥ ८

[1]मित्रवर्मा त्रिसप्तत्या सौश्रुतिश्चापि पञ्चभिः ।
श्रुतञ्जयश्च विंशत्या सुशर्मा नवभिश्शरैः ॥ ९

स विद्धो बहुभिस्सङ्ख्ये प्रतिविव्याध तान् नृपान् ।
सौश्रुतिं पञ्चविंशत्या चन्द्रदेवं तथाऽष्टभिः ॥ १०

मित्रदेवं शतेनैव सत्यदेवं त्रिभिश्शरैः ।
अष्टाभिर्मित्रवर्माणं सुशर्माणं तथैव च ॥ ११
श्रुतञ्जयं च राजानं हत्वा तत्र शिलाशितैः ।

सौश्रुतेस्सशिरस्त्राणं शिरः कायादपाहरत् ॥ १२
त्वरितं चन्द्रदेवं च शरैर्निन्ये यमक्षयम् ॥ १२॥

अथेतरान् महाराज यतमानान् महारथान् ।
पञ्चभिः पञ्चभिर्बाणैर् एकैकं प्रत्यताडयत् ॥ १३॥

1. ख—इदमर्धं नास्ति

सत्यदेवस्तु सङ्क्रुद्धस् तोमरं ससृजे शितम् ।
समुद्दिश्य रणे कृष्णं सिंहनादं ननाद च ॥ १४॥

स निर्भिद्य भुजं सव्यं माधवस्य महात्मनः ।
अयस्मयस्स्वर्णदण्डो जगाम धरणीतलम् ॥ १५॥

माधवस्य तु विद्धस्य तोमरेण महारणे ।
प्रतोदो न्यपतद्धस्ताद् रश्मयश्च विशां पते ॥ १६॥

प्रतोदं गृह्य सोऽन्यत् तु रश्मीन् सङ्गृह्य च द्रुतम् ।
वाहयामास तानश्वान् सत्यदेवरथं प्रति ॥ १७॥

विष्वक्सेनं सुनिर्विद्धं दृष्ट्वा पार्थो धनञ्जयः ।
क्रोधमाहारयत् तीव्रं कृष्णं चेदमुवाच ह ॥ १८॥

अर्जुनः—

चोदयाश्वान् महाबाहो सत्यदेवरथं प्रति ॥ १९

सञ्जयः—

[1]ततस्स चोदयामास सत्यदेवरथं प्रति ॥ १९॥

अथ दिव्यास्त्रविच्छूरो जातमन्युर्धनञ्जयः ।
सत्यदेवं शरैस्तीक्ष्णैर् वारयित्वा महाबलः ॥ २०॥

ततस्सुनिशितैर्भल्लै राजंस्तस्य महात्मनः ।
कुण्डलोपहितं कायाच् चकर्त प्रहसञ् शिरः ॥ २१॥

1. क—कोश एकस्मिन्नेवेदमर्धं वर्तते

तं निहत्य शितैर्बाणैर् मित्रवर्माणमाहवे ।
वत्सदन्तेन हत्वा च सारथिं चास्य मारिष ॥ २२॥

ततश्शरशतैर्भूयस् संशप्तकगणान् बहून् ।
पातयामास सङ्क्रुद्धश् शतशोऽथ सहस्रशः ॥ २३॥

ततो राजतपुङ्खेन राजञ् शीर्षं महात्मनः ।
मित्रसेनस्य चिच्छेद क्षुरप्रेण महायशाः ॥ २४॥

सुशर्माणं ततः क्रुद्धो जत्रुदेशे समर्पयत् ।
[1]नाराचेन सुमुक्तेन सुतीक्ष्णेन महायशाः ॥ २५॥

ततस्संशप्तकास्सर्वे परिवार्य धनञ्जयम् ।
शस्त्रौघैर्ममृदुः क्रुद्धा नादयन्तो दिशो दश ॥ २६॥

स तैरभ्यर्दितो जिष्णुश् शक्रतुल्यपराक्रमः ।
ऐन्द्रमस्त्रममेयात्मा प्रादुश्चक्रे महारथः ॥ २७॥

ततश्शरसहस्राणि प्रादुरासन् विशां पते ।
कार्मुकात् पाण्डुपुत्रस्य पार्थस्यामिततेजसः ॥ २८॥

ततस्तु च्छिद्यमानानां ध्वजानां धनुषां तथा ।
रथानां सपताकानां तूणीराणां युगैस्सह ॥ २९॥

[2]अक्षाणामथ चक्राणां योक्त्राणां रश्मिभिस्सह ।
कूबराणां वरूथानां पृषत्कानां च संयुगे ॥ ३०॥

---

1. अ-ब—नास्तीदमर्धम् 2. अ—नास्तीदमर्धम्

अश्वानां पततां चापि प्रासानामसिचर्मणाम् ।
गदानां परिघानां च शक्तीनां तोमरैस्सह ॥ ३१॥

शतघ्नीनां सचक्राणां भुजानां चोरुभिस्सह ।
कण्ठसूत्राङ्गदानां च केयूराणां च मारिष ॥ ३२॥

हाराणां हेमसूत्राणां कटकानां च भारत ।
छत्राणां मकुटानां च व्यजनानां महात्मनाम् ॥ ३३॥
राशयश्चात्र दृश्यन्ते पतितानां महीतले ॥ ३४

सकुण्डलानि स्रग्वीणि पूर्णचन्द्रनिभानि च ।
शिरांस्युर्व्यामदृश्यन्त तारागण इवाम्बरे ॥ ३५

सुखार्हाणि सुवासांसि चन्दनेनोक्षितानि च ।
शरीराणि व्यदृश्यन्त निहतानां महीतले ॥ ३६

रुद्रस्याक्रीडसदृशं घोरमायोधनं तदा ॥ ३६॥

निहतै राजपुत्रैश्च क्षत्रियैश्च महाबलैः ।
अर्जुनेन महाराज तत्र तत्र महारणे ॥ ३७॥

हस्तिभिः पतितैश्चैव तुरङ्गैश्चाभवन्मही ।
अगम्यरूपा समरे विशीर्णैरिव पर्वतैः ॥ ३८॥

नासीद्रथपथस्तस्य पाण्डवस्य महात्मनः ।
निघ्नतश्शात्रवान् भल्लैर् हस्त्यश्वं चामितं महत् ॥ ३९॥

आस्तामितस्ततो राजन् रथचक्रे विशां पते

रणे विचरतस्तस्य तस्मिँल्लोहितकर्दमे ॥ ४०॥

सीदमाने तु चक्रे ते समूहुस्तुरगा भृशम् ।
श्रमेण महता युक्ता मनोमारुतरंहसः ॥ ४१॥

वध्यमानं तु तत् सैन्यं पाण्डुपुत्रेण धन्विना ।
प्रायशो विमुखं सैन्यं नावतिष्ठत संयुगे ॥ ४२॥

ताञ्जित्वा समरे जिष्णुस् संशप्तकगणान् बहून् ।
रराज स महाराज विधूमोऽग्निरिव ज्वलन् ॥ ४३॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि अष्टादशोऽध्यायः ॥ १८ ॥
॥ ७३ ॥ कर्णपर्वणि अष्टादशोऽध्यायः ॥ १८ ॥
[अस्मिन्नध्याये ४३॥ श्लोकाः]

॥ एकोनविंशोऽध्यायः ॥

सङ्कुलयुद्धम् ॥

सञ्जयः—

युधिष्ठिरं महाराज विसृजन्तं शरान् बहून् ॥
स्वयं दुर्योधनो राजा प्रत्यगृह्णादभीतवत् ॥ १

तमापतन्तं सदसा तव पुत्रं महाबल ।
धर्मराजो द्रुतं विद्ध्वा तिष्ठ तिष्ठेति चाब्रवीत् ॥ २

स तु तं प्रतिविव्याध नवभिर्निशितैश्शरैः ।
सारथिं चास्य भल्लेन भृशं क्रुद्धोऽभ्यताडयत् ॥ ३

ततो युधिष्ठिरो राजन् स्वर्णपुङ्खान् शिलाशितान् ।
दुर्योधनाय चिक्षेप त्रयोदश शितान् शरान् ॥ ४

चतुर्भिश्चतुरो वाहांस् तस्य हत्वा महारथः ।
पञ्चमेन शिरः कायात् सारथेस्तु समाक्षिपत् ॥ ५

षष्ठेन तु ध्वजं राज्ञस् सप्तमेन तु कार्मुकम् ।
अष्टमेन तथा खड्गं पातयामास भूतले ॥ ६
पञ्चभिर्नृपतिं चापि धर्मराजोऽर्दयद्भृशम् ॥ ६॥

हताश्वात् तु रथात् तस्माद् अवप्लुत्य तवात्मजः ।
उत्तमं व्यसनं प्राप्तो भूमावेव व्यतिष्ठत ॥ ७॥

तं तु कृच्छ्रगतं दृष्ट्वा कर्णद्रौणिकृपादयः ।
अभ्यवर्तन्त सहसा परीप्सन्तो जनाधिपम् ॥ ८॥

ततः पाण्डुसुतास्सर्वे परिवार्य युधिष्ठिरम् ।
अभ्ययुस्समरे राजंस् ततो युद्धमवर्तत ॥ ९॥

अथ तूर्यसहस्राणि प्रावाद्यन्त महामृधे ॥ १०
क्ष्वेलाः किलकिलाशब्दाः प्रादुरासन् विशां पते ॥ १०॥
ये येऽभ्यगच्छन् समरे पाञ्चालाः कौरवैस्सह ।
ते शूरास्समरे सर्वे प्राक्षीयन्त ततस्ततः ॥ ११॥

नरा नरैस्समाजग्मुर् वारणा वारणैस्सह ।
रथिनो रथिभिस्सार्धं हयाश्च हयसादिभिः ॥ १२॥
द्वन्द्वान्यासन् महाराज प्रेक्षणीयान्यनेकशः ।
तावकानां परेषां च चित्राणि च गुरूणि च ॥ १३॥

विस्मापकान्यनीकानि शस्त्रास्त्रगुणसम्पदा ।
युद्धानि चक्रिरे राजन् परस्परजिगीषया ॥ १४॥

अन्योन्यं समरे जघ्नुर् योधव्रतमनुष्ठिताः ।
न हि ते प्रहरन्ति स्म पृष्ठतो नाप्यनायुधम् ॥ १५॥

मुहूर्तमिव तद्युद्धम् आसीन्मधुरदर्शनम् ।
तत उन्मत्तवद्राजन् निर्मर्यादमवर्तत ॥ १६॥

रथी पत्तिं समासाद्य समरे निशितैश्शरैः ।
प्राहिणोद्यमलोकाय कश्चिदेव पराक्रमात् ॥ १७॥

नागानन्यस्समासाद्य बहुधा विकिरञ् शरान् ।
द्रावयामास समरे तत्र तत्र तदा तदा ॥ १८॥

पादातैराहता नागा विवरेषु समन्ततः ।
चक्रुरार्तस्वरान् राजन् सम्पतन्तस्ततस्ततः ॥ १९॥

पदातयश्च नागानां प्रद्रुतानां महामृधे ।
उत्सृज्य वारणांस्तूर्णम् अपसस्रुर्भयार्दिताः ॥ २०॥

[1]निमित्तं मन्यमानाश्च परिणाम्य महागजाः ।
जगृहुर्बिभिदुश्चैव छत्राण्याभरणानि च ॥ २१॥

विद्राव्य च बहूनश्वान् नागराजा मदोत्कटाः ।
विषाणैरभिनिर्जघ्नुर् ममृदुश्च परस्परम् ॥ २२॥

साश्वारोहांश्च तुरगान् विषाणैर्ममृदू रुषा ।
अपरांश्चिक्षिपुर्वेगात् प्रगृह्य च दिशो दश ॥ २३॥

प्रतिमानेषु कुम्भेषु दन्तवेष्टेषु चापरे ।
निगृहीता भृशं नागाः प्रासतोमरशक्तिभिः ॥ २४॥

निगृहीता हयाश्चान्ये पार्श्वस्थैस्तत्र भारत ।
नागाश्च शतशो राजन् निर्भिन्ना भूमिमाविशन् ॥ २५॥

सहसा सादिनं तत्र तोमरेण महागजः ।
भूमौ सममम्थ्नीत सवर्माणं विशां पते ॥ २६॥

रथाश्च सादिभिः कैश्चित् सञ्छिन्ना न्यपतन् भुवि ॥ २७
तथा साश्वान् पदातांश्च तत्र तत्र विशां पते ।

रथान् नागास्समासाद्य परिगृह्य च मारिष ॥ २८
व्याक्षिपन् सहसा तत्र घोररूपा भयानकाः ॥ २८॥

नाराचैर्निहताश्चापि निपतन्ति महागजाः ।
गिरीणां शिखराणीव वज्ररुग्णानि भूतले ॥ २९॥

---

1. ख—इदमर्धं नास्ति

योधा योधान् समासाद्य मुष्टिभिर्व्यहनन् भुवि ।
केशेष्वन्योन्यमाक्षिप्य चिक्षिपुर्बिभिदुश्च ह ॥ ३०॥
उद्यम्य तु भुजैरन्ये निक्षिप्य च महीतले ।
शिरस्युरसि चाक्रम्य स्फुरतो न्यहनञ्छिरः ॥ ३१॥
मृतमन्यो महाराज पदा ताडितवांस्तदा ॥ ३२
जीवतश्च तथैवान्यश् शस्त्रं काये न्यमज्जयत् ।
मुष्टियुद्धं महच्चासीद् योधानां तत्र भारत ॥ ३३
तथा केशग्रहश्चोग्रो बाहुयुद्धं च दारुणम् ॥ ३३॥
समासक्तस्य चान्योन्यम् अविज्ञातस्तथाऽपरः ।
जहार समरे प्राणान् नानाशस्त्रैरनेकशः ॥ ३४॥
संसक्तेषु च योधेषु वर्तमाने च सङ्कुले ।
कबन्धान्युत्थितानि स्म शतशोऽथ सहस्रशः ॥ ३५॥
शोणितैस्सिच्यमानानि शस्त्राणि कवचानि च ।
महाराजतरक्तानि वस्त्राणीव चकाशिरे[1] ॥ ३६॥
एवमेतत् तदा युद्धं तत्राभूद्रोमहर्षणम् ।
उन्मत्तगङ्गाप्रतिमं शब्देनापूरयद्दिशः ॥ ३७॥
नैव स्वे न परे राजन् व्यज्ञायन्त शरातुराः ।
योद्धव्यमित्ययुध्यन्त राजानो जयगृद्धिनः ॥ ३८॥

1. अ—उद्यस्य तुरगै रम्यै निक्षिप्य च महीतले । [अधिकः पाठः]

स्वान् स्वे जघ्नुर्महाराज परांश्चैव समागतान् ।
उभयोस्सेनयोर्वीरा व्याकुले तु रणे सति ॥ ३९॥

रथैर्भग्नैर्महाराज वारणैश्च निपातितैः ।
हयैश्च पातितैस्तत्र नरैश्च विनिपातितैः ॥ ४०॥

अगम्यरूपा पृथिवी मांसशोणितकर्दमा ।
क्षणेनासीन्महाराज क्षतजौघप्रवाहिनी ॥ ४१॥

शूराणां हर्षजननी भीरूणां भयवर्धनी ।
पाञ्चालानवधीत् कर्णस् त्रिगर्ताश्च धनञ्जयः ॥ ४२॥

भीमसेनः कुरून् सर्वान् हस्त्यनीकं च सर्वशः ॥ ४३
एवमेष क्षयो वृत्तः कुरुपाण्डवसेनयोः ।
अपराह्णे महाराज काङ्क्षन्त्योर्विपुलं यशः ॥ ४४

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि एकोनविंशोऽध्यायः ॥ १९ ॥
॥ ७३ ॥ कर्णपर्वणि एकोनविंशोऽध्यायः ॥ १९ ॥
[अस्मिन्नध्याये ४४ श्लोकाः]

॥ विंशोऽध्यायः ॥

युधिष्ठिरेण दुर्योधनपराजयः ॥

धृतराष्ट्रः—

अतितीव्राणि युद्धानि सुमहान्ति बहूनि च ।
तत्र सञ्जय चाश्रौषं पुत्राणामिह सङ्क्षयम् ॥ १

यथा तु मे कथयसे यथा युद्धं प्रवर्तते ।
न सन्ति सूत कौरव्या इति मे नैष्ठिकी मतिः ॥ २

दुर्योधनस्तु विरथः कृतस्तत्र महारणे ।
धर्मपुत्रः कथं चक्रे तस्मिन् वा नृपतिः कथम् ॥ ३

अपराह्णे कथं युद्धम् अभवद्रोमहर्षणम् ।
तन्ममाचक्ष्व तत्त्वेन कुशलो ह्यसि सञ्जय ॥ ४

सञ्जयः—

संशप्तकेषु सैन्येषु वध्यमानेषु भागशः ।
रथमन्यं समास्थाय पुत्रस्तव विशां पते ॥ ५

क्रोधेन महताऽऽविष्टस् सविषो भुजगो यथा ।
सर्वसैन्यमुदीक्ष्यैव क्रोधादुद्वृत्तलोचनः ॥ ६

दृष्ट्वा धर्मसुतं चापि सैन्यमध्ये व्यवस्थितम् ।
श्रिया ज्वलन्तं कौन्तेयम् यथा वज्रधरं युधि ॥ ७

दुर्योधनस्तु दृष्ट्वैव धर्मपुत्रं युधिष्ठिरम् ।
उवाच त्वरितो सूतम् याहि याहीति भारत ॥ ८

दुर्योधनः—

तत्र मां प्रापय क्षिप्रं सारथे यत्र पाण्डवः ।
छत्रेण ध्रियमाणेन राजा तिष्ठति दंशितः ॥ ९

सञ्जयः—

स सूतश्चोदितो राज्ञा रज्ञास्यन्दनमुत्तमम् ।
युधिष्ठिरस्याभिमुखम् प्रेषयामास संयुगे ॥ १०
ततो युधिष्ठिरः क्रुद्धः प्रणुन्न इव पन्नगः ।
सारथिं चोदयामास याहि यत्र सुयोधनः ॥ ११
तौ समाजग्मतुर्वीरौ भ्रातरौ राजसत्तमौ ॥ ११॥
समेत्य च महावीर्यौ संरब्धौ युद्धदुर्मदौ ।
ववर्षतुर्महेष्वासौ शरैरन्योन्यमाहवे ॥ १२॥
ततो दुर्योधनो राजा धर्मशीलस्य मारिष ।
शिलाशितेन भल्लेन धनुश्चिच्छेद संयुगे ॥ १३॥
तं नामृष्यत सङ्क्रुद्धो धनुषश्छेदमाहवे ।
दुर्योधनस्य कौरव्य तव पुत्रस्य मारिष ॥ १४॥
अपविध्य धनुश्चिच्छन्नं क्रोधसंरक्तलोचनः ।
अन्यत् कार्मुकमादाय धर्मराजश्चमूमुखे ॥ १५॥
दुर्योधनस्य चिच्छेद ध्वजं कार्मुकमेव च ॥ १६
अथान्यद्धनुरादाय पुत्रस्ते भरतर्षभ ।

युधिष्ठिरस्य चिक्षेप शरान् कनकभूषणान् ॥ १७
रुक्मपुङ्खान् प्रसन्नाग्रान् सविषानिव पन्नगान् ॥ १७॥

तावन्योन्यं सुसंरब्धौ शस्त्रवर्षाण्यमुञ्चताम् ।
सिंहाविव बलोद्वृत्तौ परस्परजिगीषया ॥ १८॥

जघ्नतुस्तौ रणेऽन्योन्यं नदन्तौ वृषभाविव ।
अन्तरं मार्गमाणौ च चेरतुस्तौ महारथौ ॥ १९॥

ततः पूर्णायतोत्सृष्टैश् शरैस्तौ तु कृतव्रणौ ।
विरेजतुर्महाराज पुष्पिताविव किंशुकौ ॥ २०॥

ततो राजन् प्रतिभयान् सिंहनादान् मुहुर्मुहुः ।
तलयोश्च महाशब्दं धनुषश्च महाहवे ॥ २१॥

शङ्खशब्दं तथा चोग्रं चक्रतुस्तौ नरेश्वरौ ॥ २२
अन्योन्यं च महाराज पीडयामासतुर्भृशम् ॥ २२॥

ततो युधिष्ठिरो राजा तव पुत्रं त्रिभिश्शरैः ।
आजघानोरसि क्रुद्धो वज्रवेगैर्दुरासदैः ॥ २३॥

प्रतिविव्याध तं तूर्णं तव पुत्रो महारथः ।
पञ्चभिर्निशितैर्बाणैस् स्वर्णपुङ्खैश्शिलाशितैः ॥ २४॥

ततो दुर्योधनो राजा शक्तिं चिक्षेप भारत ।
सर्वपारशवीं गुर्वीं महोल्कामतिमां तदा ॥ २५॥

तामापतन्तीं सहसा धर्मराजश्शिलाशितैः ।

त्रिभिः प्रहस्य चिच्छेद तं च विव्याध सप्तभिः ॥ २६॥

निपपात ततस्सा तु स्वर्णदण्डा महास्वना ।
दीपयन्ती महोल्काभा राजञ् शक्तिर्दिशो दश ॥ २७॥

शक्तिं विनिहतां दृष्ट्वा तव पुत्रो विशां पते ।
नवभिर्निशितैर्भल्लैर् आजघान युधिष्ठिरम् ॥ २८॥

सोऽतिविद्धो बलवता शत्रुणा शत्रुकर्शनः ।
दुर्योधनं समुद्दिश्य बाणं जग्राह सत्वरः ॥ २९॥

समधत्त च तं बाणं धनुर्मध्ये महाबलः ।
चिक्षेप च ततो राजा राज्ञः क्रुद्धः पराक्रमी ॥ ३०॥

स तु बाणस्समासाद्य तव पुत्रं महारथम् ।
व्यामोहयद्भृशं राजन् धरणीं च जगाम ह ॥ ३१॥

ततो दुर्योधनः क्रुद्धो गदामुद्यम्य वेगतः ।
विधित्सुः कलहस्यान्तम् अभिदुद्राव पाण्डवम् ॥ ३२॥

तमालक्ष्योद्यतगदं दण्डहस्तमिवान्तकम् ।
धर्मराजो महाशक्तिं पुत्राय प्राहिणोत् तव ॥ ३३॥

दीप्यमानां महाराज महोल्कां ज्वलितामिव ।
यमदण्डनिभां घोरां कालरात्रिमिवापराम् ॥ ३४॥

रथस्थस्स तया विद्धस् तव पुत्रस्तनान्तरे ।
भृशं संविग्नहृदयः पपात च मुमोह च ॥ ३५॥

[1]ततस्त्वरितमागम्य कृतवर्मा तवात्मजम् ।
प्रत्यपद्यत राजानं निमग्नं व्यसनार्णवे ॥ ३६॥
भीमोऽपि महतीं गृह्य गदां हेमपरिष्कृताम् ।
अभिदुद्राव वेगेन कृतवर्माणमाहवे ॥ ३७॥
एवं तदभवद्युद्धं त्वदीयानां परैस्सह ॥ ३८

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि विंशोऽध्यायः ॥ २० ॥
॥ ७३ ॥ कर्णपर्वणि विंशोऽध्यायः ॥ २० ॥
[अस्मिन्नध्याये ३८ श्लोकाः]

॥ एकविंशोऽध्यायः ॥

सङ्कुलयुद्धम् ॥ १ ॥ षोडशदिवसयुद्धोपसंहारः ॥ २ ॥

सञ्जयः—
ततः कर्णं पुरस्कृत्य त्वदीया युद्धदुर्मदाः ।
पुनरावृत्य सङ्ग्रामं चक्रुर्देवासुरोपमम् ॥ १

द्विरदनररथाश्वशङ्खशब्दैः
परिहृषिता विविधैश्च शस्त्रघोषैः ।
द्विरदरथपदातिसादिसङ्घाः
परिकुपिताभिमुखाः प्रजग्मिरे ते ॥ २

शितपरश्वगदासिपट्टसैर्
इषुभिरनेकविधैश्च सूदिताः ।
द्विरदरथहया महाहवे ते
पुरुषवराः पुरुषैश्च वाहनैः ॥ ३

कमलदिनकरेन्दुसन्निभैस्
सितदशनैस्सुमुखाक्षिनासिकैः ।
रुचिरमकुटकुण्डलैर्महीं
पुरुषशिरोभिरथास्तृता बभौ ॥ ४

परिघमुसलशक्तितोमरैर्
नखरमुसुण्ठिगदाशतैर्हताः ।
द्विरदनरहयास्सहस्रशो
रुधिरनदीप्रवहास्तदाऽभवन् ॥ ५

प्रहतरथनराश्वकुञ्जरं
प्रतिभयदर्शनमुल्बणं बभौ ।
तदहितहतमाहवे बलं
पितृपतिराष्ट्रमिव प्रजाक्षये ॥ ६

अथ तव नरदेव सैनिकास्
तव च सुतास्सुरसूनुसन्निभाः ।

अमितबलपुरस्सरा रणे
कुरुवृषभाद्दिशनिपुत्रमभ्ययुः ॥ ७

[1]तदतिरुधिरभीममाबभौ
पुरुषवराश्वरथद्विपाकुलम् ।
लवणजलसमुद्धतस्वनं
बलमसुरामरसैन्यसन्निभम् ॥ ८

सुरपतिसमविक्रमस्ततस्
त्रिदशवरावरजोपमं युधि ।
दिनकरकिरणप्रभैः पृषत्कै
रवितनयोऽभ्यहनच्छिनिप्रवीरम् ॥ ९

त्वरितमतिरथा रथर्षभं
द्विरदरथाश्वपदातिभिस्सह ।
तदुदधिनिभमाद्रवद्बलम्
त्वरिततरैस्समभिद्रुतं बलैः ॥ १०

द्रुपदसुतवरस्तदाऽकरोत्
पुरुषरथाश्वगजक्षयं महत् ॥ १०॥

तमपि सरथवाजिसारथिं
शिनिवृषभो विविधैश्शरैस्त्वरन् ।

1. अ-ख—सप्तार्धानि न सन्ति

भुजगविषनिभैश्शरोत्तमैः
पुरुषवरं समवास्तृणोत् तदा ॥ ११॥

शिनिवृषभशरप्रपीडितं
तव सुहृदो वसुषेणमभ्ययुः ॥ १२

अथ पुरुषवरौ कृताह्निकौ
भवमभिपूज्य यथाविधि प्रभुम् ।
[1]अरिवधकृतनिश्चयौ द्रुतं
तव बलमर्जुनकेशवौ श्रितौ ॥ १३

जलदनिनदनिस्स्वनं रथं
पवनविधूतपताककेतनम् ।
सितहयमुपयान्तमन्तिकं
कृतमनसो ददृशुस्तदाऽरयः ॥ १४

हस्तेन हस्तिवरहस्तसमानहस्तस्
तूणीमुखादथ शरान् मुहुराददानः ।
वज्रीव दानवचमूं प्रगृहीतचापो
भीमानुजस्तव नरेन्द्र चमूं जगाहे ॥ १५

अथ विष्फार्य गाण्डीवं रथे नृत्यन्निवार्जुनः ।
शरसम्बाधमकरोत् खं दिशः प्रदिशस्तथा ॥ १६

1. अ-ख—नासीदमर्षम्

रथान् विमानप्रतिमान् सज्जानिन्द्रायुधध्वजान् ।
सयोधान् सारथीन् बाणैर् अभ्राणीवानिलोऽवधीत् ॥ १७

गजान् गजप्रणेतॄंश्च वैजयन्तीश्शुभध्वजान् ।
सादिनोऽश्वांश्च पत्तींश्च निन्ये बाणैर्यमक्षयम् ॥ १८

तमन्तकमिव क्रुद्धम् अनिवार्यं महारथम् ।
दुर्योधनोऽभ्ययादेको निघ्नन् बाणैः पृथग्विधैः ॥ १९

तस्यार्जुनो धनुः केतुम् अश्वान् सूतं च सायकैः ।
हत्वा सप्तभिरेकेन च्छत्रं चिच्छेद पत्रिणा ॥ २०

शरमन्यं समादाय व्यसृजत् प्राणघातिनम् ।
दुर्योधनायेषुवरं तं द्रौणिस्सप्तधाऽच्छिनत् ॥ २१

ततो द्रौणेर्धनुश्छित्वा हत्वा च तुरगाञ् शरैः ।
कृपस्य महदत्युग्रं धनुश्चिच्छेद पाण्डवः ॥ २२

हार्दिक्यस्य धनुश्छित्त्वा ध्वजं चाश्वांस्तदाऽवधीत् ।
दुश्शासनस्य चेष्वासं छित्त्वा राधेयमभ्ययात् ॥ २३

अथ सात्यकिमुत्सृज्य त्वरन् कर्णोऽर्जुनं त्रिभिः ।
विद्ध्वा विव्याध विंशत्या कृष्णं पार्थं पुनस्त्रिभिः ॥ २४

कर्णस्य स्फुरदत्यर्थं प्रास्यतस्सायकान् धनुः ।
नानदत् त्रासजननं भूतानामहितान्तकम् ॥ २५

अथ सात्यकिरागत्य कर्णं विद्ध्वा शितैश्शरैः ।

नवत्या नवभिश्चोग्रैश् शतेन पुनरर्पयत् ॥ २६

ततः प्रवीराः पार्थानां सर्वे कर्णमपीडयन् ॥ २६॥
युधामन्युश्शिखण्डी च द्रौपदेयाः प्रभद्रकाः ।

उत्तमौजा युयुत्सुश्च यमौ पार्षत एव च ॥ २७॥
चेदिकारूशमात्स्यानां केकयानां च तद्बलम् ।

चेकितानश्च बलवान् धर्मराजश्च सुव्रतः ॥ २८॥
एते रथाश्वद्विरदैः पत्तिभिश्चोग्रविक्रमाः ।

परिवार्य रणे कर्णं नानाशस्त्रैरवाकिरन् ॥ २९॥
भाषन्तो वाग्भिरुग्राभिस् सर्वे कर्णवधे धृताः ॥ ३०

ताश्शस्त्रवृष्टीर्बहुधा कर्णश्छित्त्वा शितैश्शरैः ।
अपोवाहास्त्रवीर्येण द्रुमान् भङ्क्त्वेव मारुतः ॥ ३१

रथिनस्समहामात्रान् गजानश्वान् ससादिनः ।
पत्तित्रातांश्च सङ्क्रुद्धो निघ्नन् कर्णो व्यदृश्यत ॥ ३२

न ग्लानिरासीत् कर्णस्य प्रास्यतस्सायकान् बहून् ।
रणे विनिघ्नतश्शत्रून् क्रुद्धस्येव शतक्रतोः ॥ ३३

तद्वध्यमानं पाण्डूनां बलं कर्णास्त्रतेजसा ।
विशस्त्रपत्रदेहासु तत आसीत् पराङ्मुखम् ॥ ३४

अथ कर्णास्त्रमन्त्रेण प्रतिहत्यार्जुनस्स्मयन् ।
दिशः खं चैव भूमिं च प्रावृणोच्छरवृष्टिभिः ॥ ३५

मुसला इव निष्पेतुः परिघा इव चेषवः ।
शतघ्न्य इव चाप्यन्ये वज्रा उग्रा इवापरे ॥ ३६

वध्यमानं च तत् सैन्यं सपत्त्यश्वरथद्विपम् ।
निमीलिताक्षमत्यर्थं बभ्राम च ननाद च ॥ ३७

निष्कैवल्यं यथा दुःखं प्रापुरश्वनरद्विपाः ।
वध्यमानाश्शरैरार्तास् तदा भीताः प्रदुद्रुवुः ॥ ३८

तेषां चैव तदा युद्धे संसक्तानां जयैषिणाम् ।
गिरिमस्तं समासाद्य प्रत्यपद्यत भानुमान् ॥ ३९

तमसा च महाराज रजसा च विशेषतः ।
न किञ्चित् प्रत्यपश्याम शुभं वा यदि वाऽशुभम् ॥ ४०

ते त्रस्यन्तो महेष्वासा रात्रियुद्धस्य भारत ।
अपहारं ततश्चक्रुस् सहितास्सर्वसैनिकैः ॥ ४१

कौरवेष्वपयातेषु ततो राजन् दिनक्षये ।
जयं सुमनसः प्राप्य पार्थास्स्वशिबिरं ययुः ॥ ४२

वादित्रशब्दैर्विविधैस् सिंहनादैस्सनर्तनैः ।
परानपहसन्तश्च स्तुवन्तश्चाच्युतार्जुनौ ॥ ४३

कृतेऽपहारे तैर्वीरैस् सैनिकास्सर्व एव ते ।
आशिषः पाण्डवेयेषु प्रायुञ्जन्त नरेश्वराः ॥ ४४

ततः कृतेऽपहारे च प्रहृष्टाः कुरुपाण्डवाः ।

निशि स्वशिबिरान् गत्वा न्यवसन्त नरेश्वर ॥ ४५

रणे प्रवृत्तान्यहनि कथयन्तस्सुखं तथा ॥ ४५॥

ततो रक्षःपिशाचाश्च श्वापदानि च सङ्घशः ।

जग्मुरायोधनं घोरं रुद्रस्याक्रीडनोपमम् ॥ ४६॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि एकविंशोऽध्यायः ॥ २१ ॥
॥ ७३ ॥ कर्णपर्वणि एकविंशोऽध्यायः ॥ २१ ॥
[अस्मिन्नध्याये ४६॥ श्लोकाः]
इति कर्णस्य युद्धे प्रथमदिनयुद्धम्

॥ द्वाविंशोऽध्यायः ॥

कृष्णतुल्यसारथेरभावात् स्वस्यार्जुनान्न्यूनतां मन्यमानेन कर्णेन दुर्योधनं प्रति शल्यस्य सारथ्ये नियोजनचोदना ॥

धृतराष्ट्रः—

स्वेन च्छन्देन नस्सर्वान् अवधीद्व्यक्तमर्जुनः ।

न ह्यस्य समरे मुच्येद् अन्तकोऽप्याततायिनः ॥ १

पार्थो ह्येकोऽहरद्भद्राम् एकश्चाग्निमतर्पयत् ।

एकश्चेमां महीं जित्वा चक्रे बलिभृतो नृपान् ॥ २

निवातकवचानां च तिस्रः कोटीर्जघान ह ।

एकः किरातरूपेण स्थितं शर्वमयोधयत् ॥ ३

एको ह्यरक्षद्भरतान् एकश्शर्वमतोषयत् ।
तेनैकेन जितास्सर्वे मदीया ह्युग्रतेजसः ॥ ४
ते न निन्द्याः प्रशस्यास्ते यत् ते चक्रुः प्रचक्ष्व तत् ॥ ४॥

सञ्जयः—

हतप्रहतविध्वस्ता विवर्मायुधवाहनाः ।
दीनस्वरा दूयमाना मानिनश्शत्रुनिर्जिताः ॥ ५॥
शिबिरस्थाः पुनर्मन्त्रं मन्त्रयन्ति स्म कौरवाः ।
भग्नदंष्ट्रा हतविषाः पादाक्रान्ता इवोरगाः ॥ ६॥
तानब्रवीत् ततः कर्णः क्रुद्धस्सर्प इव श्वसन् ।
करं करेण निष्पिष्य प्रेक्षमाणस्तवात्मजम् ॥ ७॥

कर्णः—

यत् ते दृढञ्च दक्षञ्च स्मृतिमानर्जुनस्सदा ।
सम्बोधयति चाप्येनं प्राप्तकालमधोक्षजः ॥ ८॥
सहस्राक्षनिमृष्टा च शक्त्या तेन स्म वञ्चिताः ।
श्वस्त्वहं तस्य सङ्कल्पं सर्वं हन्ता विशां पते ॥ ९॥

सञ्जयः—

एवमुक्तस्तथेत्युक्त्वा सोऽनुजज्ञे नृपो नृपान् ।
तेऽनुज्ञाता नृपास्तेन स्वान् निवासान् स्म भेजिरे ॥ १०॥
सुखोषिताश्च रजनीं पुनर्युद्धाय निर्ययुः ॥ ११
तेऽपश्यन् विहितं व्यूहं धर्मराजेन दुर्जयम् ।

प्रयत्नात् कुरुमुख्येन बृहस्पत्युशनोपमात् ॥ १२

ततः प्रतीपकर्तारं सततं विदितात्मनाम् ।
सस्मार वृषभस्कन्धं कर्णं दुर्योधनस्तदा ॥ १३

पुरन्दरसमं वीर्ये प्रभञ्जनसमं बले ।
कार्तवीर्यसमं युद्धे कर्णं राज्ञोऽगमन्मनः ॥ १४

सर्वेषां चैव योधानां कर्णमेवागमन्मनः ।
सूतपुत्रं महेष्वासं बन्धुमात्ययिकेष्विव ॥ १५

धृतराष्ट्रः—

यद्वो मनोऽगमत् सूत कर्णं वैकर्तनं तदा ।
अप्यद्राक्षुस्सूतपुत्रं शीतार्ता इव भास्करम् ॥ १६

कृतेऽपहारे सैन्यानां प्रवृत्ते च रणे पुनः ।
दुर्योधनं च दृष्ट्वाऽऽजौ पाण्डवेन भृशार्दितम् ॥ १७

पराक्रान्तान् पाण्डुसुतान् दृष्ट्वा चापि महारणे ।
कथं वैकर्तनः कर्णस् तत्रायुध्यत संयुगे ॥ १८

कथं च पाण्डवास्सर्वे युयुधुस्तत्र सूतजम् ॥ १८॥

कर्णमाश्रित्य हि सदा मन्दबुद्धिस्सुयोधनः ।
जेतुमुत्सहते पार्थान् सहपुत्रान् सकेशवान् ॥ १९॥

यस्सौबलं तथा तात नीतिमानिति मन्यते ।
कर्णं चाप्रतिमं युद्धे देवैरपि दुरुत्सहम् ॥ २०॥

मन्यतेऽभ्यधिकं पार्थादेवं चास्य हृदि स्थितम् ।
विजेष्यति रणे कर्ण एकः पार्थान् ससोमकान् ॥ २१॥
कर्णस्य भुजयोर्वीर्यं शक्रविष्णुसमं युधि ॥ २२
तथाऽस्त्राणि च घोराणि विक्रमश्च महात्मनः ।
मम चैव सदा मन्दश् शंसते नित्यमग्रतः ॥ २३
कर्णश्च तान् महेष्वासान् पाण्डुपुत्रान् महारथान् ।
नातरद्रभसात् सूत दैवं नूनं परायणम् ॥ २४
अहो बत महद्दुःखं प्राप्तो दैववशादहम् ।
अहो द्यूतस्य निष्ठेयं घोरा सम्प्रति वर्तते ॥ २५
यदहं वर्तमानेषु महायुद्धेषु सञ्जय ।
अश्रौषं निहतान् पुत्रान् नित्यमेव च निर्जितान् ॥ २६
अहो दुःखानि तीव्राणि दुर्योधनकृतान्यहम् ।
कथं शक्ष्यामि संसोढुं शल्यभूतानि सञ्जय ॥ २७
न पाण्डवानां समरे कश्चिदस्ति हतः किल ।
स्त्रीमध्यमिव गाहन्ते दैवं तु बलवत्तरम् ॥ २८

सञ्जयः—

अतिक्रान्तं हि यत् कार्यं पश्चाच्चिन्तयते नरः ।
तच्चास्य न भवेत् कार्यं चिन्तया च विनश्यति ॥ २९
तदिदं तव कार्यं तु दूरप्राप्तं विजानतः ।

कृतं हि यत् त्वया पूर्वं अप्राप्तं प्राप्तवान् रणे ॥ ३०

उक्तोऽसि बहुशो राजन् मा युद्धमिति सर्वशः ।
न च तत्त्वग्रहीर्द्वैषात् पाण्डवेषु विशां पते ॥ ३१

त्वया पापानि कर्माणि समाचीर्णानि पाण्डुषु ।
त्वत्कृते वर्तते घोरः कौरवाणां जनक्षयः ॥ ३२

तदिदानीमतिक्रान्तं मा शुचो भरतर्षभ ।
शृणु सर्वं यथावृत्तं घोरं वैशसमुच्यते ॥ ३३

प्रभातायां तु शर्वर्यां कर्णो राजानमभ्ययात् ।
समेत्य च महाबाहुर् दुर्योधनमथाब्रवीत् ॥ ३४

कर्णः—

बहुत्वान्मम कार्याणां तथा पार्थस्य पार्थिव ।
नाभूत् समागमो राजन् मम चैवार्जुनस्य च ॥ ३५

अद्य राजन् समेष्यामि पाण्डवेन यशस्विना ।
निहनिष्यामि तं वीरं स मां वा निहनिष्यति ॥ ३६

अनिहत्य रणे पार्थं नाहमेष्यामि पार्थिव ॥ ३६॥

इदं तु मे महाप्राज्ञ शृणु वाक्यं नराधिप ॥ ३७

हतप्रवीरे सैन्येऽस्मिन् मयि चावस्थिते युधि ।
अभियास्यति मां पार्थश् शक्रशक्तिर्गता हि सा ॥ ३८

तत्र श्रेयस्करं यत्तु तन्निबोध जनेश्वर ॥ ३८॥

आयुधानां च मे वीर्यं दिव्यानामर्जुनस्य च ।
कार्यस्य महतो भेदे लाघवे दूरपातने ॥ ३९॥
सौष्ठवे चास्त्रयोगे च सव्यसाची न मत्समः ॥ ४०
[1]प्राणे च स्थैर्ये वीर्ये च विक्रमे चापि भारत ।
निमित्तज्ञानयोगे च सव्यसाची न मत्समः ॥ ४१
सर्वायुधमहामात्रं विजयं नाम मद्धनुः ।
इन्द्रार्थमभिकामेन निर्मितं विश्वकर्मणा ॥ ४२
येन दैत्यान् पुरा राजञ् जितवान् वै शतक्रतुः ।
यस्य घोषेण दैत्याश्च मुह्यन्ति च दिशो दश ॥ ४३
तद्भार्गवाय प्रायच्छच् छक्रः परमसम्मतः ।
तद्दिव्यं भार्गवो मह्यम् अददाद्धनुरुत्तमम् ॥ ४४
तेन योत्स्ये महाबाहुम् अर्जुनं जयतां वरम् ॥ ४४॥
यथेन्द्रस्समरे सर्वान् दैतेयान् वै समागतान् ।
निजघान तथा सर्वाञ् जेष्यामि युधि पाण्डवान् ॥ ४५॥
धनुर्घोरं रामदत्तं गाण्डीवात् तद्विशिष्यते ॥ ४६
त्रिस्सप्तकृत्वः पृथिवी धनुषा तेन निर्जिता ।
धनुषो ह्यस्य कर्माणि दिव्यानि प्राह भार्गवः ॥ ४७
तद्रामो ह्यददान्मह्यं तेन योत्स्ये धनञ्जयम् ॥ ४७॥

1. अ—अर्धाष्टकं नास्ति

अद्य दुर्योधनाहं त्वां नन्दयिष्ये सबान्धवम् ।
निहत्य समरे वीरम् अर्जुनं जयतां वरम् ॥ ४८॥
सपर्वतवनद्वीपा हतद्विड् भूस्ससागरा ।
पुत्रपौत्रप्रतिष्ठा ते भविष्यत्यद्य पार्थिव ॥ ४९॥
नाशक्यं विद्यते मेऽद्य त्वत्प्रियार्थं विशेषतः ।
सम्यग्धर्मानुरक्तस्य सिद्धिरात्मवतो यथा ॥ ५०॥
न हि मे विक्रमं सोढुं स शक्तोऽग्निं द्रुमो यथा ।
अवश्यं तु मया वाच्यं येन हीनोऽस्मि फल्गुनात् ॥ ५१॥
ज्या तस्य धनुषो दिव्या तथाऽक्षय्ये महेषुधी ।
[1]सारथिस्तस्य गोविन्दो मम तादृङ्न विद्यते ॥ ५२॥
तच्च दिव्यं धनुश्रेष्ठं गाण्डीवमजरं युधि ।
विजयं च महद्दिव्यं ममापि धनुरुत्तमम् ॥ ५३॥
तत्राहमधिकः पार्थाद् धनुषैकेन पार्थिव ।
यैस्समभ्यधिको वीरः पाण्डवस्तान् निबोध मे ॥ ५४॥
रश्मिग्राहोऽस्य दाशार्हो मम तादृङ् न विद्यते ।
अग्निदत्तश्च वै दिव्यो रथः काञ्चनभूषणः ॥ ५५॥
अच्छेद्यास्सर्वधा वीर वाजिनश्च मनोजवाः ।
ध्वजश्च दिव्यो द्युतिमान् वानरोऽपि भयङ्करः ॥ ५६॥

1. क-ख—इदमर्धं नास्ति

कृष्णश्च जगतस्स्रष्टा रथं तमभिरक्षति ।
एभिस्त्रिभिरहं हीनो योद्धुमिच्छामि पाण्डवम् ॥ ५७॥

अयं तु सदृशश्शौरेश् शल्यस्समितिशोभनः ।
सारथ्यं यदि मे कुर्याद् ध्रुवस्ते विजयो भवेत् ॥ ५८॥

तस्य मे सारथिश्शल्यो भवत्वसुकरः परैः ।
नाराचान् गृध्रपत्रांश्च शकटानि वहन्तु मे ॥ ५९॥

रथाश्च मुख्या राजेन्द्र युक्ता वाजिभिरुग्रगैः ।
आयान्तु पश्चात् सङ्ग्रामे मम वै भरतर्षभ ॥ ६०॥

एवमभ्यधिकः पार्थाद् भविष्यामि गुणैरहम् ।
शल्यो ह्यभ्यधिकः कृष्णात् पार्थादर्जुनतो ह्यहम् ॥ ६१॥

तथाऽस्त्रे मत्समो नास्ति कश्चिदन्यो धनुर्धरः ।
बाहुवीर्यान्मया ह्यद्य न तु तुल्यः कथञ्चन ॥ ६२॥

तथा शल्यसमो राजन् रथयाने न विद्यते ॥ ६३

यथाऽश्वहृदयं वेद दाशार्हः परवीरहा ।
तथा शल्यो विजानाति ह्यश्वानं महारथः ॥ ६४

वीर्यतस्सारत श्चैवयोगतः कर्मतोऽर्थतः ।
अहमभ्यधिकः पार्थाद् भविष्यामि न संशयः ॥ ६५

विजयेयमहं सङ्ख्ये फल्गुनं कुरुनन्दन ॥ ६५॥

एतत् कृतं महाराज त्वयेच्छामि परन्तप ।

क्रियतामेष कामो मे मा वः कालोऽत्यगादयम् ॥ ६६॥
एवं कृते कृतं मह्यं त्वया सर्वं भविष्यति ।
ततो द्रष्टासि समरे यत् करिष्यामि भारत ॥ ६७॥
सर्वथा पाण्डवान् सङ्ख्ये जेष्याम्यद्य समागतान् ॥ ६८
एवं युक्तं न मां शक्ता अपि जेतुं सुरासुराः ।
किमु पाण्डुसुता राजन् रणे मानुषयोनयः ॥ ६९

सञ्जयः—

एवमुक्तस्तव सुतः कर्णेनाहवशोभिना ।
सम्पूज्यैनं प्रहृष्टात्मा ततो राधेयमब्रवीत् ॥ ७०

दुर्योधनः—

एवमेतत् करिष्यामि यथा त्वं कर्ण मन्यसे ।
सोपासङ्गा रथास्साश्वा अनुयास्यन्ति तेऽनघ ॥ ७१
नाराचान् गृध्रपत्रांश्च वक्ष्यन्ति शकटानि ते ।
वयं च त्वाऽनुयास्यामः कर्ण सर्वे च पार्थिवाः ॥ ७२

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि द्वाविंशोऽध्यायः ॥ २२ ॥
॥ ७३ ॥ कर्णपर्वणि द्वाविंशोऽध्यायः ॥ २२ ॥
[अस्मिन्नध्याये ७२ श्लोकाः]

॥ त्रयोविंशोऽध्यायः ॥

दुर्योधनप्रार्थनया शल्येन कृच्छ्रात् कर्णरथसारथ्यकरणाभ्युपगमः ॥

सञ्जयः—

एवमुक्तो महाराज तव पुत्रः प्रतापवान् ।
मद्रेश्वरं प्रति रणे सुरसैन्यभयङ्करम् ॥ १

सर्वं तथाऽकरोत् तूर्णं राधेयस्तद्यदब्रवीत् ॥ १॥

मद्रराजं च समरे प्रणम्य च महारथम् ।
विनयेनोपसङ्गम्य प्रणयाद्वाक्यमब्रवीत् ॥ २॥

दुर्योधनः—

सत्यव्रत महाभाग द्विषतां भयवर्धन ।
मत्प्रियार्थं हितार्थं च तथा पार्थवधाय च ॥ ३॥

श्रुतवानसि कर्णस्य ब्रुवतो वदतां वर ।
तथा नृपतिसिंहानां मध्ये त्वां वरयाम्यहम् ॥ ४॥

स त्वामप्रतिवीर्याद्य शत्रुपक्षभयावह ।
मद्रेश्वर प्रयाचेऽहं शिरसा विनयानतः ॥ ५॥

त्वं पाहि सर्वतः कर्णं भवं ब्रह्मेव सुव्रत ॥ ६

सारथ्यं रथिनां श्रेष्ठ सुमनाः कर्तुमर्हसि ।
त्वयि यन्तरि राधेयो विजेष्यति ममाहितान् ॥ ७

अभीशूनां हि कर्णस्य ग्रहीताऽन्यो न विद्यते ।
ऋते त्वत्तो महाभाग वासुदेवसमाद्भुवि ॥ ८

यथा हि सर्वास्वापत्सु वार्ष्णेयः पाति पाण्डवम् ।
तथा भवानिमं पातु कर्णं वैकर्तनं रणे ॥ ९

भीष्मद्रोणौ कृपः कर्णो भवान् भोजश्च वीर्यवान् ।
शकुनिस्सौबलो द्रौणिर् अहमेव च नो बलम् ॥ १०

एवमेष कृतो भागो नवधा पृथिवीपते ।
नैव भागोऽत्र भीष्मस्य द्रोणस्य च महात्मनः ॥ ११

ताभ्यामतीत्य तौ भागौ निहता मम शत्रवः ।
वृद्धौ च तौ नरव्याघ्रौ छलेन विनिपातितौ ॥ १२

कृत्वा चासुकरं कर्म स्वर्गलोकमितो गतौ ।
ततोऽन्ये पुरुषव्याघ्राः परेषां निहता युधि ॥ १३

अस्मदीयाश्च बहवस् स्वर्गाय गमिताः परैः ।
त्यक्त्वा प्राणान् यथाशक्ति चेष्टां कृत्वा च पुष्कलाम् ॥ १४

तदिदं हतभूयिष्ठं बलं मम जनाधिप ।
पूर्वमप्यल्पकैः पार्थैर् हतं किन्त्वद्य विद्रुतम् ॥ १५

बलवन्तो महात्मानः कौन्तेयास्सत्यविक्रमाः ।
बलशेषं न हन्युर्मे यथा तत् कुरु पार्थिव ॥ १६

कर्णो ह्येको महाबाहुर् अस्मत्प्रियहिते रतः ।

भवांश्च पुरुषव्याघ्रस् सर्वलोकमहारथः ॥ १७

तस्मिंस्त्वयि च मद्रेश जयाशा विपुला मम ।
तस्माज्जयाय मे वीर सारथ्यं कर्तुमर्हसि ॥ १८

पार्थस्य समरे कृष्णो यथाऽभीशुग्रहो वरः ।
तथा कर्णस्य राजंस्त्वम् अभीशुग्राहको भव ॥ १९

तेन युक्तो रणे पार्थो रक्ष्यमाणश्च मद्रप ।
यानि कर्माणि कुरुते प्रत्यक्षाणि तथैव च ॥ २०

पूर्वं न समरे ह्येवम् अवधीदर्जुनो रिपून् ।
इदानीं विक्रमो ह्यस्य कृष्णेन सहितस्य च ॥ २१

कृष्णेन सहितः पार्थो धार्तराष्ट्रीं महाचमूम् ।
अहन्यहनि मद्रेश द्रावयन् युधि दृश्यते ॥ २२

भागोऽवशिष्टः कर्णस्य तव चैव महाद्युते ।
तं भागं सह कर्णेन युगपन्नाशयाहवे ॥ २३

अरुणेन यथा सार्धं तमस्सूर्यो व्यपोहति ।
तथा कर्णेन सहितो जहि पार्थं महारणे ॥ २४

सूर्यारुणौ यथा दृष्ट्वा तमो नश्यति मारिष ।
तथा नश्यन्तु कौन्तेयास् सपाञ्चालास्ससृञ्जयाः ॥ २५

रथिनां प्रवरः कर्णो यन्तॄणां प्रवरो भवान् ।
सन्निपातस्समो लोके भविता नास्ति नाप्यभूत् ॥ २६

यथा सर्वास्ववस्थासु वार्ष्णेयः पाति पाण्डवम् ।
तथा भवान् परित्रातु कर्णं वैकर्तनं रणे ॥ २७
सारथ्यं क्रियतां तस्य युध्यमानस्य संयुगे ॥ २७॥
यथा च समरे कृष्णो रक्षते सर्वतोऽर्जुनम् ।
तथा त्वमपि राधेयं रक्षस्व च महारणे ॥ २८॥
त्वया सारथिना ह्येष अप्रधृष्यो भविष्यति ।
देवानामपि सङ्ग्रामे सशक्राणां महीपते ॥ २९॥
किं पुनः पाण्डवेयानां नातिशङ्कीर्वचो मम ॥ ३०

सञ्जयः—

दुर्योधनवचश्श्रुत्वा शल्यः क्रोधसमन्वितः ।
धार्तराष्ट्रमथोवाच सृक्किणी परिलेलिहन् ॥ ३१
एवमुक्तस्तु सङ्क्रुद्धः पदा स्पृष्ट इवोरगः ।
त्रिशिखां भ्रुकुटीं कृत्वा धून्वन् हस्तं पुनः पुनः ॥ ३२
क्रोधरक्ते महानेत्रे परिवृत्य महाभुजः ।
कुलैश्वर्यश्रुतबलैर् हतश्शल्योऽब्रवीदिदम् ॥ ३३

शल्यः—

न मामर्हसि राजेन्द्र नियोक्तुं कर्मणीदृशे ।
न हि पापीयसश्श्रेयान् प्रेष्यत्वं कर्तुमर्हति ॥ ३४
यो ह्यभ्युपगतं मित्रं गरीयांसं विशेषतः ।

न चापि मम राधेयः कलामर्हति षोडशीम् ॥ ५२॥

सकर्णा ये त्रयो लोकास् सार्जुनास्सजनार्दनाः ।
निबद्धांस्तान् रणे राजन् न गणेयं कथञ्चन ॥ ५३॥

तथाऽपि शक्तिं कौरव्य विहाय हृदये पुमान् ।
न चाहं प्राकृतः कश्चिन्न चास्म्यधिगतस्त्वयम् ॥ ५४॥

अयं चाप्यवमानो मे न कर्तव्यः कथञ्चन ॥ ५५

आपृच्छे त्वाऽद्य गान्धारे यास्यामि विषयं प्रति ।
न चाहं सूतपुत्रस्य सारथ्यमुपजग्मिवान् ॥ ५६

सञ्जयः—

एवमुक्त्वा महाराज शल्यस्समितिशोभनः ।
उत्थाय प्रययौ तूर्णं राजमध्यादमर्षितः ॥ ५७

प्रणयाद्बहुमानाच्च सन्निगृह्य सुतस्तव ।
अब्रवीन्मधुरं वाक्यं साम्ना सर्वार्थसाधकम् ॥ ५८

दुर्योधनः—

यथा शल्य त्वमात्थेदम् एवमेतन्न संशयः ।
अभिप्रायस्तु मे कश्चित् तन्निबोध जनेश्वर ॥ ५९

न कर्णोऽभ्यधिकस्त्वत्तो न चान्ये चैव पार्थिवाः ।
न च मद्रेश्वर त्वां हि [1]कर्णस्सोढुं च शक्ष्यति ॥ ६०

ऋतमेव हि पूर्णं ते वर्त्म राजर्षिसत्तम ।

---

1. घ—कृष्णौ सोढुं च शक्ष्यतः

तस्मादार्तायनिः प्रोक्तो भवानिति मतिर्मम ॥ ६१

शल्यभूतस्तु शत्रूणां यस्मात् त्वं भुवि मानद ।
तस्माच्छल्येति ते नाम कथ्यते पृथिवीपते ॥ ६२

यदेतद्व्याहृतं पूर्वं भवता भूरिदक्षिण ।
तदेव कुरु धर्मज्ञ मदर्थं यद्यदुच्यते ॥ ६३

न च त्वत्तो हि राधेयो न चाहमपि वीर्यवान् ।
वृणीमस्त्वां हयाग्र्याणां यन्तारमिह संयुगे ॥ ६४

मन्ये ह्यभ्यधिकं कर्णं गुणैस्तात धनञ्जयात् ।
वासुदेवादति त्वां च लोकोऽयमिति मन्यते ॥ ६५

कर्णो ह्यभ्यधिकः पार्थात् सर्वास्वेषु नरर्षभ ।
भवानभ्यधिकः कृष्णाद् अश्वयाने बले तथा ॥ ६६

यथाऽश्वहृदयं वेद वासुदेवो महामनाः ।
द्विगुणं च तथा वेत्थ मद्रराजो न संशयः ॥ ६७

शल्यः—

यन्मां ब्रवीषि गान्धारे मध्ये सैन्यस्य मारिष ।
विशिष्टं देवकीपुत्रात् प्रीतिमानस्म्यतस्त्वयि ॥ ६८

एष सारथ्यमातिष्ठे राधेयस्य यशस्विनः ।
युध्यतः पाण्डवाग्र्येण यत्त्वं मां वीर मन्यसे ॥ ६९

समयस्त्वयि कौरव्य कश्चिद्वैकर्तनं प्रति ।

उत्सृजेयं यथाश्रद्धम् अहं वाचोऽस्य सन्निधौ ॥ ७०

सञ्जयः—

तथेति राजन् पुत्रस्ते सह कर्णेन भारत ।
[1]अब्रवीन्मद्रराजस्य मतं भरतसत्तम ॥ ७१

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां कर्णपर्वणि त्रयोविंशोऽध्यायः ॥ २३ ॥
॥ ७३ ॥ कर्णपर्वणि त्रयोविंशोऽध्यायः ॥ २३ ॥
[अस्मिन्नध्याये ७१ श्लोकाः]

॥ चतुर्विंशोऽध्यायः ॥

दुर्योधनेन शल्यं प्रति त्रिपुरासुरकथाकथनारम्भः ॥ १ ॥ त्रिपुरासुरोपद्रुतैर्देवैः स्तुत्या रुद्रप्रसादनम् ॥ २ ॥

दुर्योधनः—

भूय एव तु मद्रेश यत् त्वां वक्ष्यामि तच्छृणु ।
यथा पुरावृत्तमिदं युद्धे दैवासुरे प्रभो ॥ १
यदुक्तवान् पितुर्मह्यं मार्कण्डेयो महातपाः ।
ब्रुवतस्तदशेषेण मम राजर्षिसत्तम ॥ २
निबोध मनसा चात्र न ते कार्या विचारणा ॥ २॥
समुत्पन्ना हि राजानः प्रमोह इति निश्चयः ।

1. ख—इदमर्धं नास्ति

कृत्वा चैव व्यवस्यन्ति सर्वे धर्मार्थनिश्चयान् ॥ ३॥

देवानामसुराणां च महानासीत् समुच्छ्रयः ।
सैंहिकेयास्तदोद्वृत्ता विबुधानवसूदयन् ॥ ४॥
ते निरस्ताः कृता देवैर् दानवा बलगर्विताः ॥ ५

तत्रासीत् प्रथमो राजन् सङ्ग्रामस्तारकामयः ।
निर्जिताश्च ततो दैत्या दैवतैरिति नश्श्रुतिः ॥ ६

भग्नदर्पा निरुत्साहाः पातालं विविशुस्तदा ॥ ६॥
निर्जितेष्वसुरेष्वेषु तारकस्य सुतास्त्रयः ।
विद्युन्माली तारकाक्षः कमलाक्षश्च वीर्यवान् ॥ ७॥
तप उग्रं समास्थाय नियमे परमे स्थिताः ॥ ८

तपसा कर्शयामासुर् देहान् स्वान् शत्रुकर्शनाः ।
दमेन तपसा चैव नियमेन च पार्थिव ॥ ९

तेषां पितामहः प्रीतो वरदः प्रददौ वरम् ॥ ९॥
अवध्यत्वं च ते सर्वे सर्वभूतेषु सर्वदा ।
सहिता वरयामासुस् सर्वलोकपितामहम् ॥ १०॥

तानब्रवीत् तदा देवस् सर्वलोकगुरुः प्रभुः ॥ ११

ब्रह्मा—

नास्ति सर्वामरत्वं हि निवर्तध्वमितोऽसुराः ।
अन्यं वरं वृणीध्वं वै रोचते यादृशो हि वः ॥ १२

दुर्योधनः—

ततस्ते सहिता राजन् सम्प्रधार्यासकृद्बहु ।
सर्वलोकेश्वरं वाक्यं प्रणम्यैनमथाऽब्रुवन् ॥ १३

दैत्याः—

वस्तुमिच्छाम नगरं कर्तुं कामगमं शुभम् ।
सर्वकामसमृद्धार्थम् अवध्यं देवदानवैः ॥ १४

यक्षरक्षोरगगणैर् नानाजातिभिरेव च ।
न कृत्याभिर्न शस्त्रैश्च न शापैर्ब्रह्मवादिनाम् ॥ १५

वध्येत त्रिपुरं देव प्रसन्ने त्वयि सादरम् ॥ १५॥

[1]अस्माकं त्वं वरं देव प्रयच्छैतं पितामह ॥ १६

वयं पुराणि त्रीण्येव समास्थाय महीमिमाम् ।
विचरिष्याम लोकेश त्वत्प्रसादपुरस्कृताः ॥ १७

यथा वर्षसहस्रेषु समेष्यामः परस्परम् ॥ १७॥

ब्रह्मा—

विलयस्समयस्यान्ते मरणं जीवितस्य च ।
इति वित्त वधोपायं कञ्चिदेव निशामये ॥ १८॥

दैत्याः—

एकीभावं गमिष्यन्ति पुराण्येतानि चानघ ।
समागतानि चैतानि यो हन्याद्भगवन्नरः ॥ १९॥

1. ख—इदमर्धं नास्ति

देवो वा द्विपदां श्रेष्ठस् स नो मृत्युर्भविष्यति ॥ २०

दुर्योधनः—

तेषां तद्वचनं श्रुत्वा दानवानां महायशाः ।
एवमस्त्विति तान् देवः प्रत्युक्त्वा प्राविशद्दिवम् ॥ २१

ते तु लब्धवराः प्रीतास् सम्प्रधार्य परस्परम् ।
पुरत्रयविसृष्टचर्थं मयं वव्रुर्महासुराः ॥ २२

विश्वकर्माणमजरं दैत्यदानवपूजितम् ॥ २२॥

ततो मयस्स्वतपसा चक्रे धीरः पुराण्यथ ।
त्रीणि काञ्चनमेकं वै रौप्यं काष्णायसं तथा ॥ २३॥

काञ्चनं दिवि तत्रासीद् अन्तरिक्षे च राजतम् ।
आयसं चाभवद्भूमौ तदा तेषां परन्तप ॥ २४॥

एकैकं योजनशतं विस्तृतं तावदायतम् ।
दृढं चाट्टालकयुतं बृहत्प्राकारतोरणम् ॥ २५॥

गृहप्रवरसम्बाधम् असम्बाधमहापथम् ।
प्रासादैर्विविधैश्चैव द्वारैरप्युपशोभितम् ॥ २६॥

त्रिपुरं तेषु चाप्यासन् राजानो वै पृथक् पृथक् ।
दिव्यमाल्याम्बरधरा दैतेया राजसत्तम ॥ २७॥

काञ्चनं तारकाक्षस्य दिव्यमासीन्महात्मनः ।
राजतं कमलाक्षस्य विद्युन्मालेस्तथाऽऽयसम् ॥ २८॥

त्रयस्ते दैत्यराजानस् त्रीँल्लोकानाशु तेजसा ।
आक्रम्य तस्थुर्दुर्धर्षाः कश्च नाम प्रजापतिः ॥ २९॥

तेषु दानवमुख्यानां प्रयुतान्यर्बुदानि च ।
कोट्यश्चापि प्रवीराणां समाजग्मुस्समन्ततः ॥ ३०॥

महदैश्वर्यमिच्छन्तस् त्रिपुरं दुर्गमाश्रिताः ॥ ३१

सर्वेषां च पुनस्तेषां सर्वभोगावहो मयः ।
तमाश्रित्य हि ते सर्वे वर्तयन्त्यकुतोभयाः ॥ ३२

यो हि यं मनसा कामं दध्यौ त्रिपुरसंश्रितैः ।
तस्मै तस्मै मयस्तं तं विदधे मायया तदा ॥ ३३

तारकाक्षसुतश्चासीद्धरिर्नाम महाबलः ।
तपस्तेपे तु परमं तेनातुष्यत् पितामहः ॥ ३४

स तुष्टमवृणोद्देवं वापी भवतु नः पुरे ।
शस्त्रैर्विनिहता यत्र क्षिप्तास्स्युर्बलवत्तमाः ॥ ३५

स तु लब्ध्वा वरं वीरस् तारकाक्षसुतो हरिः ।
ससृजे तत्र वापीं तां मृतसञ्जीविनीं प्रभुः ॥ ३६

पूर्णां दिव्यस्य तोयस्य पीयूषप्रतिमस्य वै ॥ ३६॥
येन रूपेण यो दैत्यो येन वेषेण चाप्यथ ।
क्षिप्यते निहतो वाप्यां तादृशेनैव जायते ॥ ३७॥
सम्पूर्णबलवीर्यस्तु राजञ् छौर्यसमन्वितः॥ ३८

एवंवीर्येण संयुक्तां कृतां तेन महात्मना ।
तां प्राप्य त्रैपुरां वापीं लोकान् सर्वान् बबाधिरे ॥ ३९

महता तपसा सिद्धास् सुराणां भयवर्धनाः ।
एकस्मिन् निहते दैत्ये सृजन्ति स्म दशासुरान् ॥ ४०

न तेषां विद्यते युद्धे क्षयो राजन् कथञ्चन ॥ ४०॥

ततस्ते लोभमोहाभ्याम् अभिभूता विचेतसः ।
निर्भीकास्सहितास्सर्वे स्थापितास्समलोलुपाः ॥ ४१॥

विद्राव्य सगणान् देवांस् तत्र तत्र तदा तदा ।
विचेरुस्स्वेन कामेन वरदानेन दर्पिताः ॥ ४२॥

देवारण्यानि रम्याणि स्थानानि च दिवौकसाम् ।
ऋषीणामाश्रमान् पुण्यान् घर्म्याञ्जनपदांस्तथा ॥ ४३॥

उत्सादयन्त्यमर्यादा दानवा दुष्टचारिणः ॥ ४४

निस्स्थानाश्च कृता देवा ऋषयः पितृभिस्सह ।
दैत्यैस्त्रिभिस्त्रयो लोका ह्याक्रान्तास्तैस्सुरेतरैः ॥ ४५

पीड्यमानेषु लोकेषु ततश्शक्रो मरुद्वृतः ।
पुराण्यायोधयाञ्चक्रे वज्रहस्तस्समन्ततः ॥ ४६

नाशक्नोत् तान्यभेद्यानि यदा भेत्तुं पुरन्दरः ।
पुराणि वरदत्तानि धात्रा तेन नराधिप ॥ ४७

तदा भीतस्सुरपतिर् मुक्त्वा तानि पुराण्यथ ।

तैरेव विबुधैसार्धं ब्रह्माणं परमेश्वरम् ॥ ४८
जगामाथ तदाख्यातुं विप्रकारं सुरेतरैः ॥ ४८॥

ते सर्वमभिविख्याप्य शिरसाऽभिप्रणम्य च ।
तद्वधोपायमाचक्ष्व भगवन्निति चाब्रुवन् ॥ ४९॥

श्रुत्वा तु भगवान् देवो देवानिदमुवाच ह ॥ ५०

ब्रह्मा—

श्रूयतां त्रिदशास्सर्वे यथेदं वाक्यगौरवम् ॥ ५०॥

दुरात्मानोऽसुरा नित्यं ते चापि विबुधा मम ।
न शक्नुवन्ति ये सर्वे युष्मान् वै पीडयन्ति ते ॥ ५१॥

अहं समस्तु भूतानां सर्वेषां नात्र संशयः ।
अविनीता निहन्तव्या इत्येवं प्रब्रवीमि वः ॥ ५२॥

एकेषुणा विभेद्यानि तानि दुर्गाणि नान्यथा ।
शक्तस्तु तानि बाणेन भेत्तुं कामं त्रिलोचनः ॥ ५३॥

ते यूयं तपसा स्थाणुं जिष्णुमक्लिष्टकारिणम् ।
योद्धारं वृणुत क्षिप्रं स तान् हन्ता सुरेतरान् ॥ ५४॥

दुर्योधनः—

ते देवास्तेन वाक्येन चोदिताः प्रणतास्स्थिताः ।
दिव्यं वर्षसहस्रं वै तपस्तप्त्वा सुरर्षभाः ॥ ५५॥

शुद्धात्मानो महात्मानो जग्मुर्वै वृषभध्वजम् ॥ ५६

ब्रह्माणमग्रतः कृत्वा शरण्यं शरणागताः ।
तपः परममाजग्मुर् गृणन्तो ब्रह्म शाश्वतम् ॥ ५७

[1]अनङ्गमथनं सर्वे भवं सर्वात्मना गताः ।
देवदेवं परं स्थाणुं वरदं त्र्यम्बकं शिवम् ॥ ५८

शर्वमीड्यमजं रुद्रं शशाङ्काङ्कितमूर्धजम् ।
तुष्टुवुर्वाग्भिरग्र्याभिर् भयेष्वभयमच्युतम् ॥ ५९

सर्वात्मानं महात्मानं येनाप्तं विश्वमात्मना ॥ ५९॥

तपोविशेषैर्विविधैर् योगं यो वेद चात्मनः ।
यस्साङ्ख्यमात्मना वेत्ति यस्य चात्मा वशे सदा ॥ ६०॥

तं ते ददृशुरीशानं तेजोराशिमुमापतिम् ।
परेण यत्नेन भवं त्रिदशाश्शर्वमीश्वरम् ॥ ६१॥

अनन्यसदृशं देवं प्रतपन्तमकल्मषम् ॥ ६२

एकश्च भगवांस्तत्र नानारूपमकल्पयत् ।
आत्मनः प्रतिरूपाणि रूपाण्यथ महामतिः ॥ ६३

परस्परस्य चापश्यन् सर्वे परमविस्मिताः ॥ ६३॥

सर्वभूतमयं दृष्ट्वा तमजं जगतः पतिम् ।
देवा ब्रह्मर्षयस्सर्वे शिरोभिरवनिं गताः ॥ ६४॥

तान् स्वस्ति वाच्य चाभ्यर्च्य समुत्थाप्य च शङ्करः ।

---

1. क-ङ—कन्दर्पवैरिणं

ब्रूत ब्रूतेति भगवान् स्मयमानोऽभ्यभाषत ॥ ६५॥

त्र्यम्बकेणाभ्यनुज्ञातास् ततस्ते त्रस्तचेतसः ।
नमो नमो नमस्तेऽस्तु प्रभो इत्यब्रुवन् भवम् ॥ ६६॥

देवाः—

नमो देवादिदेवाय प्रियधाम्नेऽतिमन्यवे ।
प्रजापतिमखघ्नाय प्रजापतिभिरीडित ॥ ६७॥

नमस्तुताय स्तुत्याय स्तूयमानाय शम्भवे ।
विलोहिताय धूम्राय नीलग्रीवाय शूलिने ॥ ६८॥

[1]अमोघाय प्रदक्षाय शमाय क्रोधनाय च ।
दुर्वारणाय शुक्राय ब्रह्मणे ब्रह्मचारिणे ॥ ६९॥

ईशानायाप्रमेयाय निहन्त्रे चर्मवाससे ।
तपोनित्याय पिङ्गाय व्रतिने कृत्तिवाससे ॥ ७०॥

कुमारपित्रे त्र्यक्षाय प्रवरायुधयोधिने ।
प्रपन्नार्तिविनाशाय ब्रह्मद्विट्सङ्घघातिने ॥ ७१॥

वनस्पतीनां पतये वनानां पतये नमः ।
गवां च पतये नित्यं यज्ञानां पतये नमः ॥ ७२॥

---

1. क—शङ्कराया सृगाक्षाय क्षमाय
घ—अमोहाय मृगाक्षाय क्षमायाक्रोधनाय च ।
ङ—अमोघाय सृगक्षाय क्षायते मथनाय च ।

नमो नमस्ते सौम्याय त्र्यम्बकायोग्रतेजसे ।
मनोवाक्कर्मभिर्देव त्वां प्रपन्नान् भजस्व नः ॥ ७३॥

दुर्योधनः—

ततः प्रसन्नो भगवान् स्वागतेनाभिनन्द्य तान् ।
प्रोवाच व्येतु वस्त्रासो ब्रूत किं करवाणि वः ॥ ७४॥

देवाश्शर्वस्य वचनं श्रुत्वा हर्षमुपागताः ॥ ७५

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि चतुर्विंशोऽध्यायः ॥ २४ ॥
॥ ७३ ॥ कर्णपर्वणि चतुर्विंशोऽध्यायः ॥ २४ ॥
[अस्मिन्नध्याये ७५ श्लोकाः]

॥ पञ्चविंशोऽध्यायः ॥

देवै रुद्रवचनात्तस्य स्वस्वार्धबलदानपूर्वकं त्रिपुरसंहारायाभिवेचनम् ॥

दुर्योधनः—

पितृदेवर्षिसङ्घेभ्यो वरे दत्ते महात्मना ।
सत्कृत्य शङ्करं प्राह ब्रह्मा लोकपितामहः ॥ १

ब्रह्मा—

इमान्यसुरदुर्गाणि लोकांस्त्रीनाक्रमन्ति च ।
[1]कश्च प्रजापतिर्घोरांस् तान् सर्वाञ्जहि मा चिरम् ॥ २

1. ख—अर्धचतुष्टयं नास्ति

वरातिसर्गोदेवेश प्राजापत्यमिदं पदम् ।
मयाऽधितिष्ठता दत्तो दानवेभ्यो महान् वरः ॥ ३

नास्त्यन्यो युधि तेषां वै निहन्ता इति नश्श्रुतम् ।
तानतिक्रान्तमर्यादान् नान्यस्संहर्तुमर्हति ॥ ४

त्वामृते सर्वभूतेश त्वं ह्येषां प्रत्यरिर्वधे ॥ ४॥

स त्वं देव प्रपन्नानां याचतां च दिवौकसाम् ।
कुरु प्रसादं वरद दानवाञ्जहि संयुगे ॥ ५॥

त्वत्प्रसादाज्जगत् सर्वं सुखमेधेत मानद ।
शरण्यस्त्वं हि देवानां वयं त्वां शरणं गताः ॥ ६॥

रुद्रः—

हन्तव्याश्शत्रवस्सर्वे युष्माकमिति मे मतिः ।
न त्वेकश्चोत्सहे हन्तुं बलिनस्सुरविद्विषः ॥ ७॥

ते यूयं सहितास्सर्वे मदीयेनार्धतेजसा ।
जयध्वं युधि तान् सर्वान् सङ्घातेन महाबलान् ॥ ८॥

देवाः—

अस्मत्तेजोबलं यावत् तावद्द्विगुणमेव वा ।
तत् तेषामिति मन्यामो दृष्टतेजोबला हि ते ॥ ९॥

ईश्वरः—

वध्यास्ते सर्वथा पापा ये युष्मास्वपराधिनः ।

मम तेजोबलार्धेन सर्वान् मृद्नीत शात्रवान् ॥ १०॥

देवाः—

बिभर्तुं तव तेजोर्धं न शक्ष्यामस्सुरेश्वर ।
सर्वेषां नो बलार्धेन त्वमेव जहि शात्रवान् ॥ ११॥

वयं च सर्वथा देव रक्षणीयास्तथैव च ।
स नो रक्ष महादेव त्वमेव जहि शात्रबान् ॥ १२॥

रुद्रः—

मम तेजो न शक्ता हि सर्वे धारयितुं यदि ।
अहमेनान् वधिष्यामि युष्मत्तेजोर्धसंयुतः ॥ १३॥

बलार्धं यदि मे देवा न धारयितुमाहवे ।
शक्तास्सर्वे हि सङ्गम्य यूयं तत् प्रब्रवीमि वः ॥ १४॥

समा भवन्ति मे सर्वे दानवाश्चामराश्च ये ।
शिवोऽस्मि सर्वभूतानां शिवत्वं तेन मे सुराः ॥ १५॥

किंत्वधर्मेण वर्तन्ते यस्मात् ते सुरशत्रवः ।
[1]तस्माद्वध्या मयाऽप्येते युष्माकं च हितेप्सया ॥ १६॥
शरणं वः प्रपन्नानां धर्मेण च जिगीषताम् ।
साहाय्यं वः करिष्यामि निहनिष्यामि वो रिपून् ॥ १७॥
दीयतां च बलार्धं मे सर्वैरपि पृथक् पृथक् ॥ १८

1. अ—अष्टार्धानि न सन्ति

पशुत्वं चैव मे लोकास् सर्वे कल्पन्तु पीडिताः ।
पशूनां तु पतित्वं मे भवत्वद्य दिवौकसः ॥ १९

एवं न पापं प्राप्स्यामि पशून् हत्वाऽसुरद्विषः ।
कल्पयध्वं च मे दिव्यं रथं चाश्वान् मनोजवान् ॥ २०

धनुश्शरं सारथिं च ततो जेष्यामि वो रिपून् ॥ २०॥

दुर्योधनः—

इति श्रुत्वा वचो देवा देवदेवस्य भूपते ।
विषादमगमन् सर्वे पशुत्वं प्रति शङ्किताः ॥ २१॥

तेषां भावं भवो ज्ञात्वा देवांस्तानिदमब्रवीत् ॥ २२

रुद्रः—

मा वोऽस्तु पशुभावेऽस्मिन् भयं विबुधसत्तमाः ।

श्रूयतां पशुभावस्य विमोक्षः क्रियतां च सः ॥ २३

यो वः पशुपतेश्चर्यां चरिष्यति स मोक्ष्यते ।
पशुत्वादिति सत्यं वः प्रतिजाने समागमे ॥ २४

ये चाप्यन्ये चरिष्यन्ति व्रतं मोक्ष्यन्ति तेऽप्युत ॥ २४॥
नैष्ठिकं द्वादशाब्दं वा योऽब्दमर्धमृतुत्रयम् ।

मासं द्वादशरात्रं वा स पशुत्वाद्विमुच्यते ॥ २५॥
तस्मात् परमिदं गुह्यं व्रतं दिव्यं चरिष्यथ ॥ २६

दुर्योधनः—

तं तथेत्यब्रुवन् देवा देवदेवनमस्कृतम् ।
ऊचुश्चेदं गृहाणेदं तेजसोऽर्धमिति प्रभुम् ॥ २७

प्रत्युवाच तथेत्येवं शूलधृग्राजसत्तम ।
ततस्ते प्रददुस्सर्वे तेजसोऽर्धं महात्मने ॥ २८

सर्वमादाय सर्वेषां तेजसोऽर्धं दिवौकसाम् ।
तेजसाऽभ्यधिको भूत्वा भूयोऽप्यतिबलोऽभवत् ॥ २९

ततःप्रभृति देवानां देवदेवोऽभवद्भवः ।
पतिश्च सर्वभूतानां पशूनां चाभवत् तदा ॥ ३०

तस्मात् पशुपतिश्चोक्तो भवत्वाच्च भवेति वै ॥ ३०॥

[1]अर्धमादाय सर्वेषां तेजसा प्रज्वलन्निव ।
[2]भासयामास तान् सर्वान् देवदेवो महाद्युतिः ॥ ३१॥

ततोऽभिषिषिचुस्सर्वे सुरा रुद्रं पुरारिणम् ।
महादेव इति ह्यासीद् देवदेवो महेश्वरः ॥ ३२॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि पञ्चविंशोऽध्यायः ॥ २५ ॥
॥ ७३ ॥ कर्णपर्वणि पञ्चविंशोऽध्यायः ॥ २५ ॥
[अस्मिन्नध्याये ३२॥ श्लोकाः]

---

1. क—अर्धतयं नास्ति
2. ख—दाहयामास

॥ षड्विंशोऽध्यायः ॥

देवानामाज्ञया विश्वकर्मणा भूम्यादिसाधनै रुद्राय रथनिर्माणम् ॥

दुर्योधनः—

तेजसोऽर्धं सुरा दत्त्वा शङ्कराय महात्मने ।
पशुत्वमपि चोपेत्य विश्वकर्माणमव्ययम् ॥ १

ऊचुस्सर्वे समाभाष्य रथस्सङ्कल्प्यतामिति ॥ १॥
विश्वकर्माऽपि सञ्चिन्त्य रथं दिव्यमकल्पयत् ॥ २

सभेतां पृथिवीं देवीं विशालां पुरमालिनीम् ।
सपर्वतवनद्वीपां चक्रे भूतधरां रथम् ॥ ३

ईषां नक्षत्रवंशं च छत्रं मेरुमहागिरिम् ।
अनेकद्रुमसञ्छन्नं रत्नाकरमनुत्तमम् ॥ ४

हिमवन्तं च विन्ध्यं च नानाद्रुमलताकुलम् ।
अवस्करं प्रतिष्ठानं कल्पयामास वै तदा ॥ ५

अस्तं गिरिमधिष्ठानं नानाद्विजगणायुतम् ।
चकार भगवांस्त्वष्टा उदयं रथकूबरम् ॥ ६

मीननक्रझषावासं दानवालयमुत्तमम् ।
समुद्रमक्षं विदधे पत्तनाकरशोभितम् ॥ ७

चक्रं चक्रे चन्द्रमसं तारकागणमण्डितम् ।

दिवाकरं चाप्यपरं चक्रं चक्रेऽशुमालिनम् ॥ ८

गङ्गां सरस्वतीं तूर्णीं चक्रे विश्वकृदव्ययः ।
अलङ्कारा रथस्यासन्नापगास्सरितस्तथा ॥ ९

त्रीनग्नीन् मन्त्रवच्चक्रे रथस्याथ त्रिवेणुकम् ।
अनुकर्षान् ग्रहान् दीप्तान् वरूथांश्चापि तारकाः ॥ १०

ओषधीर्वीरुधश्चैव घण्टाजालं च भानुमत् ।
अलञ्चकार च रथं मासपक्षर्तुभिर्विभुः ॥ ११

अहोरात्रैः कलाभिश्च काष्ठाभिरयनैस्तथा ।
द्यां युगं युगपर्वाणि संवर्तकबलाहकान् ॥ १२

शम्यां धृतिं च मेधां च स्थितिं सन्नतिमेव च ।
ऋग्वेदं सामवेदं च धुर्यावश्वावकल्पयत् ॥ १३

पृष्ठाश्वौ च यजुर्वेदः कल्पितोऽथर्वणस्तथा ॥ १३॥
अश्वानां चाप्यलङ्कारं विदधे पदसञ्चयम् ॥ १४

सिनीवालीमनुमतिं कुहूं राकां च सुप्रभान् ।
योक्त्राणि चक्रे चाश्वानां कूश्माण्डांश्चापि पन्नगान् ॥ १५

कालपृष्ठोऽथ नहुषः कार्कोटकधनञ्जयौ ।
इतरे चाभवन्नागा हयानां वालबन्धनम् ॥ १६

अभीशवष्षडङ्गानि कल्पितानि महीपते ।
ओङ्कारः कल्पितस्तस्य प्रतोदो विश्वकर्मणा ॥ १७

यज्ञास्सर्वे पृथक् कृत्वा रथाङ्गानि च भागशः ।
अधिष्ठानं मनश्चासीत् परिरथ्या सरस्वती ॥ १८

नानावर्णानि शस्त्राणि पताकाः पवनेरिताः ।
विद्युदिन्द्रधनुर्युक्तं रथदीप्त्या व्यदीपयत् ॥ १९

वर्म योद्धुं च विहितं नभो ग्रहगणाकुलम् ।
अभेद्यं भानुमच्चित्रं कालचक्रपरिष्कृतम् ॥ २०

कृत्स्नं तु तं रथं दृष्ट्वा विस्मिता देवता भवन् ।
सर्वलोकस्य तेजांसि दृष्ट्वैकस्थानि मारिष ॥ २१

युक्तं निवेदयामासुर् देवास्तस्मै महात्मने ॥ २१॥

एवं तस्मिन् महाराज कल्पिते रथसत्तमे ।
त्वष्ट्रा मनुजशार्दूल द्विषतां भयवर्धने ॥ २२॥

स्वान्यायुधानि दिव्यानि न्यदधाच्छङ्करो रथे ।
ध्वजयष्टिं वियत् कृत्वा स्थापयामास गोवृषम् ॥ २३॥

ब्रह्मदण्डः कालदण्डो रुद्रदण्डश्च ते ज्वराः ।
परिष्कारा रथस्यासन् समन्ताद्दिशमुद्धताः ॥ २४॥

विचित्रमृतुभिष्षड्भिः कृत्वा संवत्सरं धनुः ।
छायामेवात्मनश्चक्रे धनुर्ज्यामक्षयां ध्रुवाम् ॥ २५॥

कालो हि भगवान् रुद्रस् तच्च संवत्सरं धनुः ।
तस्माद्रौद्रा कालरात्रिर् ज्या कृता धनुषोऽजरा ॥ २६॥

ततो रथे रथाश्वांस्तान् ऋषयस्समयोजयन् ।
एकैकशस्सुसंहृष्टान् आदाय सुधृतव्रताः ॥ २७॥

दक्षिणस्यां धुरि कृत ऋग्वेदो मन्त्रपारगैः ।
सव्यतस्सामवेदश्च युक्तो राजन् महर्षिभिः ॥ २८॥

पार्ष्णिदक्षिणतो युक्तो यजुर्वेदस्सुरद्विजैः ।
इतरस्यां तथा पार्ष्ण्यौ युक्तो राजन्नथर्वणः ॥ २९॥

एवं ते वाजिनो युक्ता यज्ञविद्भिस्तथा रथे ।
अशोभन्त तथा युक्ता यथैवाध्वरमध्यगाः ॥ ३०॥

कल्पयित्वा रथं दिव्यं ततो बाणमकल्पयत् ।
चिन्तयित्वा हरिं विष्णुम् अव्ययं यज्ञवाहनम् ॥ ३१॥

शरं सङ्कल्पयाञ्चक्रे विश्वकर्मा महामनाः ॥ ३२
तस्या वाजांश्च पुङ्खं च [1]कल्पयामास वै तदा ।

पुण्यगन्धवहं राजन् श्वसनं राजसत्तम ॥ ३३
अग्नीषोमौ शरमुखे कल्पयामास वै तदा ।

अग्नीषोमात्मकं कृत्स्नम् उच्यते वैष्णवं जगत् ॥ ३४
विष्णुरात्मा भगवतो भवस्यामिततेजसः ।

तस्माद्धनुर्ज्यासंस्पर्शं स विषेहे शरस्य वै ॥ ३५
तस्मिञ् शरे तीक्ष्णमन्युम् अमुञ्चद्दुस्सहं प्रभुम् ॥ ३५॥

---

1. ख—अथमुपरितनः पादश्च न स्तः

भृग्वङ्गिरोमन्युभवः क्रोधाग्निरतिदुस्सहः ।
स नीललोहितो धूम्रः कृत्तिवासा भयानकः ॥ ३६॥
आदित्यायुतसङ्काशस् तेजोज्वालावृतो भवः ।
[1]दुश्चर्याच्यावको जेता हन्ता ब्रह्मद्विषां हरः ॥ ३७॥
प्रमथानां गणैश्चैव भीमरूपैर्महाजवैः ।
विभाति भगवान् स्थाणुर् अतीतात्मा गणैर्वृतः ॥ ३८॥
तस्याङ्गानि समाश्रित्य स्थितं विश्वमिदं जगत् ।
जङ्गमाजङ्गमं राजञ् छुभेऽद्भुतदर्शनम् ॥ ३९॥
दृष्ट्वा तु तं रथं दिव्यं कवची स शरासनी ।
आददे स शरं दिव्यं सोमविष्ण्वग्निवायुजम् ॥ ४०॥
तमादाय महादेवस् त्रासयन् दैत्यदानवान् ।
आरूरोह तदा यत्तः कम्पयन्निव रोदसी ॥ ४१॥
महर्षिभिस्तूयमानो वन्द्यमानश्च वन्दिभिः ।
उपनृत्तश्चाप्सरसां गणैर्नृत्तविशारदैः ॥ ४२॥
स शोभमानो वरदः खड्गी बाणी शरासनी ।
हसन्निवाब्रवीद्देवान् सारथिः को भवेदिति ॥ ४३॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि षड्विंशोऽध्यायः ॥ २६ ॥
॥ ७३ ॥ कर्णपर्वणि षड्विंशोऽध्यायः ॥ २६ ॥
[अस्मिन्नध्याये ४३॥ श्लोकाः]

1. ख—नास्तीदमर्धम्

॥ सप्तविंशोऽध्यायः ॥

देवानां प्रार्थनया ब्रह्मणा रुद्ररथसारथ्यकरणम् ॥ १ ॥ रुद्रेण त्रिपुरदहनम् ॥ २ ॥ दुर्योधनेन दृष्टान्तप्रदर्शनपूर्वकं शल्यं प्रति कर्णरथसारथ्यकरणप्रार्थना ॥ ३ ॥

दुर्योधनः—

तमब्रुवन् देवगणा यं भवान् संनियोक्ष्यते ।
स भविष्यति देवेश सारथिस्ते न संशयः ॥ १

तानब्रवीन्महादेवो मत्तश्श्रेष्ठतरो हि यः ।
तं सारथिं कुरुध्वं वै स्वयं सञ्चिन्त्य मा चिरम् ॥ २

एतच्छ्रुत्वा वचो देवास् सर्वे गत्वा पितामहम् ।
प्रणिपत्योचुरेकाग्राः प्रसाद्यैनं महर्षिभिः ॥ ३

देवाः—

त्वया यत् कथितं देव त्रिदशारिनिबर्हणे ।
तथा तत् कृतमस्माभिः प्रसन्नश्च वृषध्वजः ॥ ४

रथश्च विहितोऽस्माभिर् विचित्रायुधसंवृतः ।
सारथिं च न जानीमः कस्यात् तस्मिन् रथोत्तमे ॥ ५

तस्माद्विधीयतां कश्चित् सारथिर्देवसत्तमः ।
सफलां तां गिरं देव कर्तुमर्हसि नो विभो ॥ ६

एवमस्मासु हि पुरा भगवन्नुक्तवानसि ।
एवं कर्तास्मि भवताम् इति तत् कर्तुमर्हसि ॥ ७

स देवयुक्तो रथसत्तमो वै
दुराधर्षो द्रावणश्शात्रवाणाम् ।
पिनाकधन्वा विहितोऽत्र योद्धा
विभीषयन् दानवानुद्यतोऽसौ ॥ ८

तथैव वेदाश्च रथे हयाग्र्या
धरा सशैला च रथो महात्मनः ।
नक्षत्रवंशानुगतो वरूथी
यस्मिन् योद्धा सारथिनाऽभिरक्ष्यः ॥ ९

तत्र सारथिरेष्टव्यस् सर्वैरेतैर्विशेषवान् ॥ ९॥

तं प्रविष्टा रथं देवा रथयोद्धारमेव च ।
कवचानि च शस्त्राणि कार्मुकं च पितामह ॥ १०॥

त्वामृते सारथिं तत्र नान्यं पश्यामहे वयम् ।
त्वं हि सर्वैर्गुणैर्युक्तो देवताभ्योऽधिकः प्रभो ॥ ११॥

त्वं देव शक्तो लोकेऽस्मिन् नियन्तुं प्रद्रुतानिमान् ।
वेदाश्वान सोपनिषदस् सारथिर्भव नस्स्वयम् ॥ १२॥

योद्धुं बलेन सत्त्वेन वीर्येण विनयेन च ।

अधिकस्सारथिः कार्यो नास्ति चान्योऽधिको भवात् ॥ १३॥
स भवांस्तारयत्वस्मान् कुरु सारथ्यमव्ययम् ।
भवानभ्यधिकस्त्वत्तो नान्योऽस्तीह पितामह ॥ १४॥
त्वं हि देवेश सर्वैस्तु विशिष्टो वदतां वर ।
तं रथं त्वं समारुह्य संयच्छ परमान् हयान् ॥ १५॥
तव प्रसादाद्वध्येरन् देव दैवतकण्टकः ।
स नो रक्ष महाबाहो दैत्येभ्यो महतो भयात् ॥ १६॥
त्वं हि नो गतिरव्यग्र त्वं नो गोप्ता महाव्रत ।
त्वत्प्रसादात् सुरास्सर्वे पूज्यन्ते त्रिदिवे प्रभो ॥ १७॥

दुर्योधनः—

इति ते शिरसा नत्वा त्रिलोकेशं पितामहम् ।
देवाः प्रसादयामासुस् सारथ्यायेति नश्श्रुतम् ॥ १८॥

ब्रह्मा—

एवमेतत् सुरास्तथ्यं नान्यस्त्वभ्यधिको भवात् ।
सारथित्वं करिष्यामि शङ्करस्य महात्मनः ॥ १९॥
सर्वथा रथिनश्श्रेयान् कर्तव्यो रथसारथिः ॥ २०
तस्मादेतद्यथातत्त्वं ज्ञात्वा युष्मांश्च सङ्गतान् ।
संयच्छामि हयानेष विबुधाय कपर्दिने ॥ २१

दुर्योधनः—

एवमुक्त्वा जटाभारं संयम्य प्रपितामहः ।

परिधायाजिनं गाढं सन्यस्य च कमण्डलुम् ॥ २२
प्रतोदपाणिर्भगवान् आरुरोह रथं तदा ॥ २२॥
सारथ्ये कल्पिते देवैर् ईशानस्य महात्मनः ।
तस्मिन्नारोहति रथं कल्पितं लोकसम्भृतम् ॥ २३॥
शिरोभिः पतिता भूमौ तुरगा वेद[1]सम्भृताः ॥ २४
उभाभ्यां लोकनाथाभ्याम् आस्थितं रथसत्तमम् ।
वोढुं न शक्ता वेदाश्वा जानुभ्याम[2]गमन्महीम् ॥ २५
अभीशुभिस्तु भगवान् उद्यम्य च हयान् विभुः ।
अस्तु शौर्यं च वीर्यं च वेदाश्वानामिति प्रभुः ॥ २६
रथं सञ्चोदयामास देवानां प्रभुरव्ययः ॥ २६॥
ततोऽधिरूढे वरदे रथं पशुपतिस्तदा ।
साधु साध्विति देवेशं स्मयमानोऽभ्यभाषत ॥ २७॥

रुद्रः—

याहि देव यतो दैत्याश् चोदयाश्वानरिन्दम ।
पश्य बाह्वोर्बलं मेऽद्य निघ्नतश्शात्रवान् रणे ॥ २८॥

दुर्योधनः—

ततोऽश्वांश्चोदयामास मनोमारुतरंहसः ।
पुराण्युद्दिश्य खस्थानि दानवानां तरस्विनाम् ॥ २९॥
ततस्ते सहसोत्पत्य वेदाख्या रथवाजिनः ।

---

1. क-घ-ङ—सम्भवाः 2. क-ङ—पतन्महीम्

क्षणेन तानि दैत्यानां पुराणि प्रापय[1]न् हरम् ॥ ३०॥
अथर्वाङ्गिरसौ चास्तां चक्ररक्षौ महात्मनः ॥ ३१
अथाधिज्यं धनुः कृत्वा शर्वस्सन्धाय तं शरम् ।
युक्त्वा पाशुपतास्त्रेण त्रिपुरं समचिन्तयत् ॥ ३२
तस्मिन् स्थिते ततो राजन् रुद्रे विततकार्मुके ।
पुराणि तेन कालेन जग्मुरेकत्वमाशु वै ॥ ३३
एकीभावं गते चैव त्रिपुरत्वमुपागते ।
बभूव तुमुलो हर्षो देवतानां महात्मनाम् ॥ ३४
ततो देवगणास्सर्वे सिद्धाश्च परमर्षयः ।
जयेति वाचो मुमुचुस् संस्तुवन्तो महेश्वरम् ॥ ३५
ततोऽग्रतः प्रादुरभूत् त्रिपुरं जघ्नुषोऽसुरान् ।
अनिर्देश्याव्ययवपुषो देवस्यासह्यतेजसः ॥ ३६
त्रीणि दृष्ट्वैकसंस्थानि पुराण्यथ पिनाकधृत् ।
स तद्विकृष्य भगवान् दिव्यं लोकेश्वरो धनुः ॥ ३७
त्रैलोक्यसारं तमिषुं मुमोच त्रिपुरं प्रति ॥ ३७॥
एकबाणेन तं देवस् त्रिपुरं परमेश्वरः ।
निजघ्ने सासुरगणं देवदेवो महेश्वरः ॥ ३८॥
बाणतेजोग्निदग्धं तत् प्रविशीर्णं सहस्रधा ।

---

1. ख-घ-ङ—प्रभुम्

महदार्तरवं कृत्वा नावशेषमुपागतम् ॥ ३९॥
मद्रेश सासुरगणं प्रापतत् पश्चिमार्णवे ॥ ४०
एवं हि त्रिपुरं दग्धं दानवाश्चाप्यशेषतः ।
महेश्वरेण क्रुद्धेन त्रैलोक्यस्य हितैषिणा ॥ ४१
स चात्मक्रोधजो वह्निर् दहेत्युक्तो निवारितः ।
त्रैलोक्यमविशेषेण पुनर्दग्धुं प्रचक्रमे ॥ ४२
कालाग्निमिव निर्दग्धुम् उत्थितं तं पुनः पुनः ।
मा कार्षीर्भस्मसाल्लोकान् इति त्र्यक्षोऽब्रवीद्वचः ॥ ४३
ततः प्रकृतिमापन्ना देवलोकास्तथर्षयः ।
तुष्टुवुर्वाग्भिरुग्राभिस् स्थाणुं त्रिपुरवैरिणम् ॥ ४४
तेऽनुज्ञाता भगवता सर्वे जग्मुर्यथागतम् ।
कृतकामाः प्रसन्नेन प्रजापतिमुखास्सुराः ॥ ४५
एवं रुद्रस्य कृतवान् सारथ्यं तु पितामहः ।
संयच्छ तुरगानस्य राधेयस्य महात्मनः ॥ ४६
त्वं हि कृष्णाच्च कर्णाच्च फल्गुनाच्च गुणाधिकः ।
बलतो रूपतो योगाद् अस्त्रसम्पद एव च ॥ ४७
समासक्तं महीपाल कुरु मे हितमीप्सितम् । ४८
युद्धे ह्ययं रुद्रकल्पस् त्वं च ब्रह्मसमो नये ॥
तस्माच्छक्तौ युवां जेतुं शत्रूंस्ताविव चासुरान् ॥ ४८॥

स यथा शल्य कर्णोऽयं श्वेताश्वं कृष्णसारथिम् ।
प्रमथ्य हन्यात् कौन्तेयं तथा नीतिर्विधीयताम् ॥ ४९॥

त्वयि राज्यं सुखं चैव जीवितं जय एव च ।
समासक्तं महीपाल कुरु मे हितमीप्सितम् ॥ ५०॥

संयच्छास्य हयान् राजन् मत्प्रियार्थं परन्तप ॥ ५१

इति श्रीमहाभारते शल्यसहस्रिकायां संहितायां वैयासिक्यां कर्णपर्वणि सप्तविंशोऽध्यायः ॥ २७ ॥
॥ ७३ ॥ कर्णपर्वणि सप्तविंशोऽध्यायः ॥ २७ ॥
[अस्मिन्नध्याये ५१ श्लोकाः]

॥ अष्टाविंशोऽध्यायः ॥

दुर्योधनेन कर्णसारथ्ये शङ्कमानं शल्यं प्रति परशुरामचरितकीर्तनपूर्वकं कर्णस्य तदन्तेवासित्वादिगुणवत्तया तत्सारथ्यकरणे दोषाभावप्रतिपादनम् ॥

दुर्योधनः—

इमं चाप्यपरं भूय इतिहासं निबोध मे ।
पितुर्मम सकाशे वै ब्राह्मणः प्राह धर्मवित् ॥ १

श्रुत्वा चैतद्वचश्चित्रं हेतुकार्यार्थतत्त्ववित् ।
कुरु शल्यं विनिश्चित्य मा भूदत्र विचारणा ॥ २

भार्गवाणां कुले जातो जमदग्निर्महातपाः ।
तस्य रामेति विख्यातः पुत्रस्तेजोगुणान्वितः ॥ ३

स तीव्रं तप आस्थाय सम्प्रसादितवान् भवम् ।
अस्त्रहेतोः प्रसन्नात्मा नियतस्संयतेन्द्रियः ॥ ४

तस्य तुष्टो महादेवो भक्त्या च प्रशमेन च ।
हृद्गतं चास्य विज्ञाय दर्शयामास शङ्करः ॥ ५

प्रत्यक्षेण महादेवस् स्वां तनुं सर्वशङ्करः ॥ ५॥

शङ्करः—
राम तुष्टोऽस्मि भद्रं ते विदितं मे तवेप्सितम् ।
कुरुष्व पूतमात्मानं सर्वमेतदवाप्स्यसि ॥ ६॥

दास्यामि ते तदाऽस्त्राणि यदा पूतो भविष्यसि ।
अपात्रमसमर्थं च दहन्त्यस्त्राणि भार्गव ॥ ७॥

दुर्योधनः—
इत्युक्तो जामदग्न्यस्तु देवदेवेन शूलिना ।
प्रत्युवाच महात्मानं शिरसाऽवनतः प्रभुम् ॥ ८॥

रामः—
यदा जानासि देवेश पात्रं मामस्त्रधारणे ।
तदा शुश्रूषतेऽस्त्राणि भवान् मे दातुमर्हति ॥ ९॥

दुर्योधनः—
ततस्स तपसा चैव व्रतेन नियमेन च ।
पूजोपहारबलिभिर् होममन्त्रपुरस्कृतैः ॥ १०॥

समाराधितवाञ् शर्वं बहुवर्षगणांस्तदा ॥ ११

प्रसन्नश्च महादेवो भार्गवस्य महात्मनः ।

असकृच्चाब्रवीत् तस्य गुणान् देव्यास्सकाशतः ॥ १२

शङ्करः—

भक्तिमानेष सततं मयि रामो दृढव्रतः ॥ १२॥

दुर्योधनः—

एवमस्य गुणान् देवो बहुशोऽकथयत् प्रभुः ।
देवतानां पितॄणां च समक्षमरिसूदन ॥ १३॥
एतस्मिन्नेव काले तु दैत्या ह्यासन् महाबलाः ।
तैस्तदा दर्पमोहाद्वै अबाध्यन्त दिवौकसः ॥ १४॥
ततस्सम्भूय विबुधास् तान् हन्तुं कृतनिश्चयाः ।
चक्रुश्शत्रुवधे यत्नं न च जेतुमशक्नुवन् ॥ १५॥
अभिगम्य ततो देवा महेश्वरमुमापतिम् ।
प्रासादयंस्तदा भक्त्या जहि शत्रुगणानिति ॥ १६॥
प्रतिज्ञाय ततो देवो देवतानां रिपुक्षयम् ।
रामं भार्गवमाहूय सोऽभ्यभाषत शङ्करः ॥ १७॥

शङ्करः—

रिपून् भार्गव देवानां जहि सर्वान् समागतान् ।
लोकानां हितकामार्थं मत्प्रियार्थं तथैव च ॥ १८॥

परशुरामः—

का शक्तिर्मम देवेश अकृतास्त्रस्य संयुगे ।
निहन्तुं दानवान् सर्वान् कृतास्त्रान् युद्धदुर्मदान् ॥ १९॥

ईश्वरः—

गच्छ त्वं मदनुध्यानान्निहनिष्यसि शात्रवान् ।

विजित्य च रिपून् सर्वान् गुणान् प्राप्स्यसि पुष्कलान् ॥२०॥

दुर्योधनः—

एतच्छ्रुत्वा तु वचनं प्रतिगृह्य च सर्वशः ।
रामः कृतस्वस्त्ययनः प्रययौ दानवान् प्रति ॥ २१॥

ततोऽवधीद्देवशत्रून् मदद्दर्पबलान्वितान् ।
वज्राशनिसमस्पर्शैः प्रहारैरेव भार्गवः ॥ २२॥

स दानवैः क्षततनुर् जामदग्न्यो नृपोत्तमः ।
संस्पृष्टस्स्थाणुना सद्यो निर्व्रणस्समपद्यत ॥ २३॥

प्रीतश्च भगवान् देवः कर्मणा तेन तस्य वै ।
वरान् प्रादाद्बहुविधान् भार्गवाय महात्मने ॥ २४॥

उक्तश्च प्रीतियुक्तेन देवदेवेन शूलिना ॥ २५

रुद्रः—

निपातात् तव शस्त्राणां शरीरे याऽभवद्रुजा ।
तया ते मानुषं कर्म व्यपोहं भृगुनन्दन ॥ २६
गृहाणास्त्राणि [1]सर्वाणि मत्सकाशाद्यथेप्सितम् ॥ २६॥

दुर्योधनः—

[2]ततोऽस्त्राणि समग्राणि वरांश्च मनसेप्सितान् ।
लब्ध्वा बहुविधान् रामः प्रणम्य शिरसा शिवम् ॥ २७॥
अनुज्ञां प्राप्य देवेशाज् जगाम स महातपाः ॥ २८

1. क-ब—दिव्यानि 2. ङ—नास्त्ययं श्लोकः

एवमेतत् पुरावृत्तं तथा कथितवानृषिः ॥ २८॥
भार्गवोऽपि ददौ सर्वं धनुर्वेदं महात्मने ।
कर्णाय पुरुषव्याघ्रस् सुप्रीतेनान्तरात्मना ॥ २९॥
वृजिनं न भवेत् किञ्चित् तस्य कर्णस्य भूपते ।
सूतेन वर्धितो नित्यं न सूतो नृप एव सः ॥ ३०॥
विशुद्धयोनिं विज्ञाय दिव्यान्यस्त्राण्यदाद्भृगुः ॥ ३१
नापि सूतकुले जातं मन्ये कर्णं कथञ्चन ।
देवपुत्रमहं मन्ये क्षत्रियाणां कुलोद्भवम् ॥ ३२
विसृष्टमविबोधार्थं कुलस्येति मतिर्मम ।
सर्वथा न ह्यसौ कर्णश् शल्य सूतकुलोद्भवः ॥ ३३
सकुण्डलं सकवचं दिव्यबाहुमरिन्दमम् ।
कथमादित्यसङ्काशं मृगी सिंहं प्रसूयते ॥ ३४
पश्य ह्यस्य भुजावेतौ नागराजकरोपमौ ।
वक्षः पश्य विशालं च सर्वशस्त्रसहं रणे ॥ ३५
न त्वेवं प्राकृतः कश्चित् कर्णो वैकर्तनो वृषा ।
महात्मा ह्येष राजेन्द्र रामशिष्यः प्रतापवान् ॥ ३६

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि अष्टाविंशोऽध्यायः ॥ २८ ॥
॥ ७३ ॥ कर्णपर्वणि अष्टाविंशोऽध्यायः ॥ २८ ॥
[अस्मिन्नध्याये ३६ श्लोकाः]

॥ एकोनत्रिंशोऽध्यायः ॥

दुर्योधनप्रार्थितेन शल्येन समयकरणपूर्वकं कर्णरथसारथ्यस्वीकरणम् ॥

दुर्योधनः—

एवं स भगवान् देवो ब्रह्मा लोकपितामहः ।
सारथ्यमकरोत् तत्र यत्र रुद्रोऽभवद्रथे ॥ १

रथिनोऽभ्यधिको वीरः कर्तव्यो रथसारथिः ।
तस्मात् त्वं पुरुषव्याघ्र नियच्छ तुरगान् युधि ॥ २

सञ्जयः—

ततश्शल्यः परिष्वज्य सुतं ते वाक्यमब्रवीत् ।
दुर्योधनममित्रघ्नं प्रीतो मद्राधिपस्तथा ॥ ३

शल्यः—

एवं चेन्मन्यसे राजन् गान्धरे प्रियदर्शनम् ।
तस्मात् ते यत् प्रियं किञ्चित् तत् सर्वं करवाण्यहम् ॥ ४

यस्मिंस्तु भरतश्रेष्ठ योग्यः कर्मणि कर्हिचित् ।
तत्र सर्वात्मना युक्तो वक्ष्ये कार्यधुरं तव ॥ ५

यद्यत् कर्णमहं ब्रूयां हितकामः प्रियाप्रियम् ।
मम तत् क्षमतां सर्वं भवान् कर्णश्च सर्वशः ॥ ६

कर्णः—

ईशानस्य यथा ब्रह्मा यथा पार्थस्य केशवः ।

तथा नित्यं हिते युक्तो मद्रराज भवस्व मे ॥ ७

शल्यः—

आत्मनिन्दा च पूजा च परनिन्दाऽऽत्मनस्स्तवः ।
अनाचरितमार्याणां वृत्तमेतच्चतुष्टयम् ॥ ८

यत्तु विद्वन् प्रवक्ष्यामि प्रत्ययार्थमिदं तव ।
आत्मनस्स्तवसंयुक्तं तन्निबोध यथातथम् ॥ ९

अहं शक्रस्य सारथ्ये योग्यो मातलिवत् प्रभो ।
अप्रमादात् प्रयोगाच्च ज्ञानविद्याचिकित्सितैः ॥ १०

तस्मात् पार्थेन सङ्ग्रामे युध्यमानस्य तेऽनघ ।
वाहयिष्यामि तुरगान् विज्वरो भव सूतज ॥ ११

दुर्योधनः—

अयं ते कर्ण सारथ्यं मद्रराजः करिष्यति ।
कृष्णादभ्यधिको यन्ता वासवस्येव मातलिः ॥ १२

यथा हरिहयैर्युक्तं रथं गृह्णाति मातलिः ।
शल्यस्तथा तवाद्याऽयं संयन्ता रथवाजिनाम् ॥ १३

योधे त्वयि रथस्थे च मद्रराजे महारथे ।
रथश्रेष्ठं ध्रुवं सङ्ख्येपार्थो नाभिभविष्यति ॥ १४

सञ्जयः—

ततो दुर्योधनो भूयो [1]मद्रराजं तरस्विनम् ।

---

1. ख—अयं पादोऽनन्तरञ्च न खः

उवाच राजन् सङ्ग्रामे प्रश्रितो मधुरं वचः ॥ १५

दुर्योधनः—

कर्णस्य यच्छ सङ्ग्रामे मद्रराज हयोत्तमान् ।
त्वयाऽभिगुप्तो राधेयो विजेष्यति धनञ्जयम् ॥ १६

सञ्जयः—

इत्युक्तो रथमास्थाय तथेति प्राह भारत ।
शल्येऽभ्युपगते कर्णस् सारथ्याय ततोऽब्रवीत् ॥ १७

स्वसूतं स्यन्दनं मह्यं कल्पयेत्यसकृत् त्वरन् ॥ १७॥

ततो जैत्रं रथवरं गन्धर्वनगरोपमम् ।
विधिवत् कल्पितं[1]भद्रं जयेत्युक्त्वा न्यवेदयत् ॥ १८॥

तं रथं रथिनां श्रेष्ठः कर्णोऽभ्यर्च्य यथाविधि ।
सम्पादितं ब्रह्मविदा पूर्वमेव पुरोधसा ॥ १९॥

कृत्वा प्रदक्षिणं यत्नाद् उपस्थाय च भास्करम् ।
समीपस्थं मद्रराजं समारोहेत्यथाब्रवीत् ॥ २०॥

ततः कर्णस्य दुर्धर्षं स्यन्दनप्रवरं महत् ।
आरुरोह महातेजाश् शल्यस्सिंह इवाचलम् ॥ २१॥

ततश्शल्यास्थितं राजन् कर्णस्स्वरथमुत्तमम् ।
अभ्यतिष्ठद्यथाऽम्भोदं विद्युत्वन्तं दिवाकरः ॥ २२॥

---

1. घ-ङ—भद्रं

तावेकरथमारूढावादित्याग्निसमद्युती ।
व्यभ्राजेतां तदा संख्ये सूर्याग्नी सहितौ दिवि ॥ २३॥

संस्तूयमानौ तौ वीरौ तदाऽऽस्तां द्युतिमत्तरौ ।
ऋत्विक्सदस्यैरिन्द्राग्नी स्तूयमानौ यथाऽध्वरे ॥ २४॥

स शल्यसङ्गृहीताश्वे रथे कर्णस्थितो बभौ ।
धनुर्विष्फारयन् घोरं परिवेषीव भास्करः ॥ २५॥

आस्थितस्सरथश्रेष्ठं कर्णश्शरगभस्तिमान् ।
प्रबभौ पुरुषव्याघ्रो मन्दरस्थ इवांशुमान् ॥ २६॥

तं प्रयान्तं महाबाहुं युद्धायामिततेजसम् ।
दुर्योधनोऽथ राधेयम् इदं वचनमब्रवीत् ॥ २७॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि एकोनत्रिंशोऽध्यायः ॥ २९ ॥
॥ ७३ ॥ कर्णपर्वणि एकोनत्रिंशोऽध्यायः ॥ २९ ॥
[अस्मिन्नध्याये २७॥ श्लोकाः]

॥ त्रिंशोऽध्यायः ॥

कर्णस्य रणप्रयाणकाले दुर्निमित्तप्रादुर्भावः ॥ १ ॥ कर्णेनात्मश्लाघनपूर्वकं पार्थवधे प्रतिज्ञाते तदहसमानेन शल्येनार्जुनप्रशंसनपूर्वकं कर्णोपालम्भः ॥ २ ॥

दुर्योधनः—

अकृतं द्रोणभीष्माभ्याम् आहवे कर्म दुष्करम् ।
कुरुष्वातिरथे वीर मिषतां सर्वधन्विनाम् ॥ १

मनोगतं मम ह्यासीद् भीष्मद्रोणौ महारथौ ।
अर्जुनं भीमसेनं च [1]निहन्ताराविति ध्रुवम् ॥ २

ताभ्यां यन्न कृतं वीर कर्म कर्ण महाहवे ।
तत् कर्म कुरु राधेय वज्रपाणिरिवापरः ॥ ३

गृहाण धर्मराजं वा जहि वा त्वं धनञ्जयम् ।
भीमसेनं च कौन्तेयं माद्रीपुत्रौ यमावपि ॥ ४

जयश्च तेऽस्तु भद्रं ते प्रयाहि त्वं नरर्षभ ।
पाण्डवेयानि सर्वाणि कुरु सैन्यानि भस्मसात् ॥ ५

सञ्जयः—

ततस्तूर्यसहस्राणि भेरीणामयुतानि च ।
वाद्यमानान्यशोभन्त मेघशब्दो यथा दिवि ॥ ६

1. क—न हन्ताराविति

प्रतिगृह्य तु तद्वाक्यं रथस्थो रथसत्तमः ।
अभ्यभाषत राधेयश् शल्यं युद्धविशारदः ॥ ७

कर्णः—

चोदयाश्वान् महेष्वास यावद्धन्मि धनञ्जयम् ।
भीमसेनं यमौ चोभौ राजानं च युधिष्ठिरम् ॥ ८

अद्य पश्यतु मे शल्य बाहुवीर्यं धनञ्जयः ।
अस्यतः कङ्कपत्राणां सहस्राणि शतानि च ॥ ९

अद्य क्षेप्स्याम्यहं शल्य शरान् परमतेजनान् ।
पाण्डवानां विनाशाय दुर्योधनजयाय च ॥ १०

सञ्जयः—

एतच्छ्रुत्वा वचस्तस्य शल्यः कर्णं वचोऽब्रवीत् ॥ १०॥

शल्यः—

कथं नु तान् महावीर्यान् पाण्डवानवमन्यसे ॥ ११

सर्वास्त्रज्ञान् महेष्वासान् सर्वानेव महारथान् ।
अनिवर्तिनो महाभागान् अजेयान् सत्यविक्रमान् ॥ १२
अपि सञ्जनयेयुस्ते भयं साक्षाच्छतक्रतोः ॥ १२॥

यदा श्रोतासि निर्घोषं विस्फूर्जितमिवाशनेः ।
राधेय पार्थधनुषस् तदा नैवं वदिष्यसि ॥ १३॥

यदा द्रष्टासि भीमेन कुञ्जरानीकमाहवे ।

विशीर्णदन्तं निहतं तदा नैवं वदिष्यसि ॥ १४॥

[1]यदा ज्येष्ठं पाण्डवेयं माद्रीपुत्रौ च पाण्डवौ ।
शितैः पृषत्कैः कुर्वाणान् अभ्रच्छायामिवायसैः ॥ १५॥

द्रष्टासि लघुचित्रास्त्रैर् निघ्नतोऽरीन् सहस्रशः ।
पार्थिवानपि चान्यांस्त्वं तदा नैवं वदिष्यसि ॥ १६॥

सञ्जयः—

अनादृत्य तु तद्वाक्यं मद्रराजेन भाषितम् ।
द्रक्ष्यस्यद्येत्यवोचत् तं शल्यं कर्णो जनेश्वर ॥ १७॥

दृष्ट्वा कर्णं महावीर्यं युयुत्सुं समुपस्थितम् ।
चुक्रुशुः कुरवस्सर्वे हृष्टरूपाः परन्तपाः ॥ १८॥

ततो दुन्दुभिघोषेण शङ्खानां निस्वनेन च ।
बाणशब्दैश्च विविधैर् गर्जितैश्च तरस्विनाम् ॥ १९॥
निर्ययुस्तावकास्सर्वे मृत्युं कृत्वा निवर्तनम् ॥ २०

प्रयाते च ततः कर्णे रथेषु मुदितेषु च ।
चचाल च मही सर्वा ररास च सुविस्वरम् ॥ २१

निस्सरन्तो व्यदृश्यन्त सूर्यात् सप्त महाग्रहाः ।
उल्कापाताश्च सञ्जज्ञुर् दिग्दाहाश्च सुदारुणाः ॥ २२
तथाऽशन्यश्च सम्पेतुर् ववुर्वाताश्च भैरवम् ॥ २२॥

---

1. ङ—अर्धचतुष्टयं नास्ति क—अर्धद्वयमेव नास्ति

मृगपक्षिगणाश्चैव पृतनां बहुशस्तव ।
अपसव्यं ततश्चक्रुर् वेदयन्तो महद्भयम् ॥ २३॥
प्रस्थितस्य च कर्णस्य निपेतुस्तुरगा भुवि ।
अस्थिवर्षं च पतितम् अन्तरिक्षाद्भयानकम् ॥ २४॥
जज्वलुश्चापि शस्त्राणि ध्वजाश्चास्य चकम्पिरे ।
अश्रूणि च व्यमुञ्चन्त वाहनानि विशां पते ॥ २५॥
एते चान्ये च बहव उत्पातास्तत्र मारिष ।
समुत्पेतुर्विनाशाय कौरवाणां सुदारुणाः ॥ २६॥
न च तान् गणयामासुस् सर्वे ते दैवमोहिताः ।
प्रस्थितं सूतपुत्रं च जयेत्यूचुर्नरा भुवि ॥ २७॥
शल्येन सहितं दृष्ट्वा कर्णमाहवशोभिनम् ।
निर्जितान् पाण्डवांश्चैव मेनिरे तत्र कौरवाः ॥ २८॥

ततो रथस्थः परवीरहन्ता
भीष्मद्रोणावात्तवीर्यौ समीक्ष्य ।
समुज्ज्वलन् भास्करपावकाभो
वैकर्तनोऽसौ रथकुञ्जरो वृषा ॥ २९॥

स शल्यमाभाष्य जगाद वाक्यं
पार्थस्य दृष्ट्वाऽप्रतिमं च कर्म ।
मानेन दर्पेण च दह्यमाणः
क्रोधेन दीप्यन्निव निश्श्वसित्वा ॥ ३०॥

कर्णः—

नाहं महेन्द्रादपि वज्रपाणेः
कुद्धाद्बिभेम्यात्तधनू रथस्थः ।
दृष्ट्वाऽपि भीष्मप्रमुखान् शयानान्
न त्वेव मां सा स्थिरता जहाति ॥ ३१॥

महेन्द्रविष्णुप्रतिमावनिन्दितौ
रथाश्वनागारिवरप्रमाथिनौ ।
अवध्यकल्पौ निहतौ यदा परैस्
ततोऽपि मे नास्ति रणेऽद्य साध्वसम् ॥ ३२॥

समीक्ष्य सङ्ख्येऽतिबलान् नराधिपैर्
नराश्वमातङ्गरथान् परैर्हतान् ।
कथं नु सर्वानहितान् रणेऽवधी-
न्महास्त्रविद्ब्राह्मणपुङ्गवो गुरुः ॥ ३३॥

स संस्मरन् द्रोणमहं महाहवे
ब्रवीमि सत्यं कुरवो निबोधत ।
न वो मदन्यः प्रसहेद्रणेऽर्जुनं
समागतं मृत्युमिवोग्ररूपिणम् ॥ ३४॥

शिक्षा प्रदानं च बलं धृतिश्च
द्रोणे महास्त्राणि च सन्नतिश्च ।

स चेदगान्मृत्युवशं महात्मा
सर्वानन्यानातुरानद्य मन्ये ॥ ३५॥

नेह ध्रुवं किञ्चिदपि प्रचिन्तयन्
वदामि लोके कर्मणो नित्ययोगात् ।
सूर्योदये को हि विमुक्तसंशयो
भावं कुर्वीताद्य गुरौ निपातिते ॥ ३६॥

न नूनमस्त्राणि बलं पराक्रमः
क्रियास्सुनीताः परमायुधानि च ।
अलं मनुष्यस्य सुखाय वर्तितुं
तथाहि युद्धे निहतः परैर्गुरुः ॥ ३७॥

हुताशनादित्यसमानतेजसं
पराक्रमे विष्णुपुरन्दरोपमम् ।
नये बृहस्पत्युशनस्समं सदा
न चैनमस्त्रं निजघान दुस्सहम् ॥ ३८॥

असम्प्रहृष्टे रुदितस्त्रीकुमारे
पराजिते पौरुषे धार्तराष्ट्रे ।
कृत्यं मया नाद्य जानामि शल्य
प्रयाहि तस्माद्विषतामनीकम् ॥ ३९॥

यत्रैव राजा पाण्डवस्सत्यसन्धो
व्यवस्थितौ भीमसेनार्जुनौ च ।
स वासुदेवस्सात्यकिस्सृञ्जयाश्च
यमौ च कस्तान् विषहेन्मदन्यः ॥ ४०॥

तस्मात् क्षिप्रं मद्रपते प्रयाहि
रणे पाञ्चालान् पाण्डवान् सृञ्जयांश्च ।
तान् वा हनिष्यामि समेत्य सङ्ख्ये
यास्यामि वा द्रोणमुखो यमाय ॥ ४१॥

न त्वेवाहं न गमिष्यामि मध्यं
तेषां शूराणामिति शल्याद्य विद्धि ।
मित्रद्रोहे मर्षणीयो न चाहं
त्यक्त्वा प्राणाननुयास्यामि द्रोणम् ॥ ४२॥

प्राज्ञस्य मूढस्य च जीवितान्ते
नास्ति प्रमोक्षोऽन्तकसन्निभस्य ।
अतो विद्वन्नभियोत्स्यामि पार्थै
दिष्टं न शक्यं व्यतिवर्तितुं हि ॥ ४३॥

कल्याणवृत्तस्सततं हि राजा
वैचित्रवीर्यस्य सुतो ममासीत् ।
तस्यार्थसिद्ध्यर्थमहं त्यजामि
प्रियान् भोगान् दुस्त्यजं जीवितं च ॥ ४४॥

वैयाघ्रचर्माणमकूजिताक्षं
हैमं त्रिकोणं रजतत्रिवेणुम् ।
रथप्रवर्हं तुरगप्रवीरैर्
युक्तं प्रादान्मद्यमिमं हि रामः ॥ ४५॥

धनूंषि चित्राणि निरीक्ष्य शल्य
गदां घोरां सायकांश्चोग्ररूपान् ।
असींश्च दीप्तान् परमायुधांश्च
शङ्खं च शुभ्रं स्वनवन्तमुग्रम् ॥ ४६॥

अस्त्राणि दिव्यान्यददान्महात्मा
पताकिनं वज्रनिपातनिस्स्वनम् ।
सिताश्वयुक्तं शुभवेणुशोभितम्
रथप्रवर्हं पुरुषप्रवर्हः ॥ ४७॥

इमं समास्थाय रथर्षभं रणे
दृढं हनिष्याम्यहमर्जुनं बलात् ॥ ४८

तं चेन्मृत्युस्सर्वहरोऽभिरक्षेत्
सदाऽप्रमत्तस्समरे पाण्डुपुत्रम् ।
तं वा हनिष्यामि समेत्य सङ्ख्ये
यास्यामि वा द्रोणमुखो यमाय ॥ ४९

यमवरुणकुबेरवासवा
यदि युगपत् सगणा महाहवे ।
जुगुपुरिह समेत्य फल्गुनं
किमु बहुना सह तैर्जयामि तम् ॥ ५०

सञ्जयः—

इति रणरभसस्य कत्थतस्
तदुपनिशम्य वचस्स मद्रराट् ।
अपहसदवमत्य वीर्यवान्
प्रतिषिषिधे च जगाद चोत्तरम् ॥ ५१

शल्यः—

विरम विरम कर्ण कत्थनाद्
अतिरभसोऽप्यति चाप्ययुक्तवाक् ।
क्व च हि नरवरो धनञ्जयः
क्व पुनरिह त्वमहो नराधमः ॥ ५२

यदुसदनमुपेन्द्रपालितं
त्रिदिवमिवामरराजरक्षितम् ।
प्रसभमभिविलोड्य को हरेत्
पुरुषवरावरजामृतेऽर्जुनात् ॥ ५३

त्रिभुवनसृजमीश्वरेश्वरं
क्व इह पुमान् भवमाह्वयेद्युधि ।

मृगवधकलहेऽर्जुनादृते
सुरपतिवीर्यसमात् प्रभावतः ॥ ५४

असुरसुरनरोरगान् मृगान्
गरुडपिशाचसयक्षराक्षसान् ।
इषुभिरजयदग्निगौरवात्
स्वभिलषितं च हविर्ददौ जयः ॥ ५५

स्मरसि ननु यदा परैर्हृतस्
सहधृतराष्ट्रसुतो विमोक्षितः ।
अतिरथज नरोत्तमैर्युधा
मरुषु बहून् विनिहत्य तानरीन् ॥ ५६

प्रथममपि पलायिते त्वयि
प्रियकलहा धृतराष्ट्रसूनवः ।
स्मरसि ननु यदा प्रमोक्षिताः
खगमगणानतिपात्य पाण्डवैः ॥ ५७

प्रमुदितबलवाहनाः पुनः
कुरुवृषभेण जितास्तु गोग्रहे ।
सगुरुगुरुसुतास्सभीष्मकाः
किमु न जितस्स तदा त्वयाऽर्जुनः ॥ ५८

इदमपरमुपस्थितं पुनस्
तव निधनाय नियुद्धमद्य वै ।
यदि न रिपुभयात् पलायसे
समरगतोऽद्य हतोऽसि सूतज ॥ ५९

सञ्जयः—

इति बहुपरुषं प्रभाषति
प्रमनसि मद्रपतौ रिपुस्तवम् ।
भृशमतिरुषितः परन्तपः
कुरुपृतनापतिराह मद्रपम् ॥ ६०

कर्णः—

भवतु भवतु किं विकत्थसे
ननु मम तस्य नियुद्धमद्य वै ।
यदि जयति स मामिहाहवे
तत इदमस्तु विकत्थितं तव ॥ ६१

सञ्जयः—

एवमस्त्विति मद्रेश उक्त्वा नोत्तरमुक्तवान् ।
याहि शल्येति चाप्येनं कर्णः प्राह युयुत्सया ॥ ६२

स रथः प्रययौ शत्रून् निघ्नतश्शल्यसारथिः ।
निघ्नन्मित्रान् समरे तमोघ्नस्सविता यथा ॥ ६३

ततः प्रायाद् द्युतिमान् वै रथेन
वैयाघ्रेण श्वेतयुजाऽथ कर्णः ।
आलोकयन् ध्वजिनीं पाण्डवानां
धनञ्जयं त्वरया पर्यपृच्छत् ॥ ६४

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि त्रिंशोऽध्यायः ॥ ३० ॥
॥ ७३ कर्णपर्वणि त्रिंशोऽध्यायः ॥ ३० ॥
[अस्मिन्नध्याये ६४ श्लोकाः]

॥ एकत्रिंशोऽध्यायः ॥

कर्णेन स्वस्यार्जुनप्रदर्शकाय तदभिमतपारितोषिकप्रदानप्रतिज्ञानम् ॥

सञ्जयः—

प्रयत्नेन तदा कर्णो हर्षयंस्तव वाहिनीम् ।
एकैकं समरे दृष्ट्वा पाण्डवं पर्यपृच्छत ॥ १

कर्णः—

यो ममाद्य महात्मानं पाण्डवं दर्शयेद्युधि ।
तस्मै दद्यामभिप्रेतं वरं यं मनसेच्छति ॥ २

अथवा शकटं पूर्णं रत्नानां षड्वायुतम् ।
धुरि क्षमैर्बृहद्भिश्च गोभिर्युक्तमकालिकम् ॥ ३

[1]न चेत् तदभिमन्येत तस्मै दद्यामहं पुनः ।
शकटं रत्नसम्पूर्णं यो मे ब्रूयाद्धनञ्जयम् ॥ ४

न चेत् तदभिमन्येत पुरुषोऽर्जुनदर्शिवान् ।
[2]ददाम्यस्मै गवामेकं शतं द्रोणदुहामहम् ॥ ५

अथवाऽस्मै पुनर्दद्यां श्वेतमश्वतरीरथम् ।
एकतश्श्यामकर्णीभिर् यो मे ब्रूयाद्धनञ्जयम् ॥ ६

अथवाऽस्मै पुनर्दद्यां वरमन्यं यथेप्सितम् ।
युक्तं हयवरैर्जैत्रं काम्भोजैरभिनिष्ठितम् ॥ ७

न चेत् तदभिमन्येत पुरुषोऽर्जुनदर्शिवान् ।
अन्यमस्मै वरं दद्यां सौवर्णं हस्तिषङ्गवम् ॥ ८

न चेत्तदभिमन्येत पुरुषोऽर्जुनदर्शिवान् ।
[3]अन्यमस्मै वरं दद्यां श्वेतान् पञ्चशतं हयान् ॥ ९

अथवाऽस्मै विचित्राङ्गान् विचित्रमणिमण्डितान् ।
रथान् जात्यैर्हयैर्युक्तान् दद्यामष्टादशैव तान् ॥ १०

अन्यमस्मै वरं दद्यां धुर्यान् दान्तांश्चतुश्शतम् ॥ १०॥
रोहिणी रूपसम्पन्ना हैमशृङ्गीश्चतुश्शतम् ।

---

1. क-ख—इदमर्धद्वयं नास्ति 2. ख—अर्धचतुष्टयं नास्ति
3. अ—अष्टार्धानि न सन्ति

दद्यामस्मै पयस्विन्यो यो मे ब्रूयाद्धनञ्जयम् ॥ ११॥
रथं च शुभ्रं सौवर्णं दद्यामस्मै स्वलङ्कृतम् ।
हयानष्टौ च काम्भोजान् यो मे ब्रूयाद्धनञ्जयम् ॥ १२॥
ददाम्यस्मै गवामेकं शतं द्रोणदुहामहम् ॥ १३
अथवाऽस्मै पुनर्दद्यां स्त्रीणां शतमलङ्कृतम् ।
श्यामानां निष्ककण्ठीनां यो मे ब्रूयाद्धनञ्जयम् ॥ १४
अन्यमस्मै वरं दद्यां कुञ्जरान् दश शोभनान् ।
काञ्चनैर्विविधैर्भाण्डैर् आच्छन्नान् हेममालिनः ॥ १५
[1]न चेत् तदभिमन्येत पुरुषोऽर्जुनदर्शिवान् ।
उत्पन्नानपरान्तेषु विनीतान् हस्तिशिक्षकैः ॥ १६
अन्यमस्मै वरं दद्यां वैश्यग्रामांश्चतुर्दश ।
प्रकृष्टसीमान् सस्याढ्यान् प्रत्यासन्नवनोदकान् ॥ १७
आप्तोदयान् पशुमत उपभोग्यान् जनायुतान् ॥ १७॥
दासीनां निष्ककण्ठीनां मागधीनां शतं तथा ।
प्रत्यग्रवयसां दद्यां यो मे ब्रूयाद्धनञ्जयम् ॥ १८॥
न चेत् तदभिमन्येत पुरुषोऽर्जुनदर्शिवान् ॥ १९
[2]दद्यां वर्णस्य वर्णस्य हयाग्र्याणां शतं शतम् ।
धुर्याणां साधु दान्तानां शिक्षितानां नरोत्तमैः ॥ २०

1. अ-ख—अष्टार्धानि न सन्ति 2. अ—अर्धचतुष्टयं नास्ति

न चेत् तदभिमन्येत पुरुषोऽर्जुनदर्शिवान् ।
अन्यमस्मै वरं दद्यां यमसौ कामयेत् स्वयम् ॥ २१

पुत्रदारान् विहायैव यदन्यद्वित्तमस्ति मे ।
तच्च तस्मै पुनर्दद्यां यद्यच्च मनसेच्छति ॥ २२

हत्वा च सहितौ कृष्णौ तयोर्वित्तानि सर्वशः ।
तस्मै दद्यामहं यो मे प्रब्रूयात् केशवार्जुनौ ॥ २३

सञ्जयः—

एता वाचस्सुबहुशः कर्ण उच्चारयन् युधि ।
दध्मौ सागरसम्भूतं सस्वनं शङ्खमुत्तमम् ॥ २४

ता वाचस्सूतपुत्रस्य तथा युक्ता निशम्य तु ।
दुर्योधनो महाराज संहृष्टस्सानुजोऽभवत् ॥ २५

ततो दुन्दुभिनिर्घोषो मृदङ्गानां च सर्वशः ।
सिंहनादस्सवादित्रः कुञ्जराणां च निस्स्वनः ॥ २६

प्रादुरासीत् तदा राजंस् त्वत्सैन्ये पुरुषर्षभ ॥ २६॥

योधानां च प्रहृष्टानां तदा समभवत् स्वनः ॥ २७

तथा प्रहृष्टे सैन्ये तं प्लवमानं महारथम् ।
विकत्थमानं च तदा राधेयमरिकर्शनम् ॥ २८

मद्रराजः प्रहस्यैनं वचनं प्रत्यभाषत ॥ २८॥

शल्यः—

मा सूतपुत्र मन्येथास् सौवर्णं हस्तिषङ्गवम् ।
प्रयच्छसि मुधैव त्वं द्रक्ष्यस्यद्य धनञ्जयम् ॥ २९॥

बलेन मत्तस्त्यजसि वसु वैश्रवणो यथा ।
अयत्नेनैव राधेय द्रक्ष्यस्यद्य धनञ्जयम् ॥ ३०॥

पुरा सृजसि यच्चापि वित्तं बहु च मूढवत् ।
अपात्रदानाद्ये दोषास् तान् मोहान्नावबुध्यसे ॥ ३१॥

यत् प्रवेदयसे वित्तं बहु तेन खलु त्वया ।
शक्यं बहुविधैर्यज्ञैर् यष्टुं सूत यजस्व तैः ॥ ३२॥

यच्च प्रार्थयसे कृष्णौ मोहाद्धन्तुं मृषैव तत् ।
न हि शुश्रुम सम्मर्दे क्रोष्ट्रा सिंहौ निपातितौ ॥ ३३॥

अप्रार्थितं प्रार्थयसे सुहृदो न हि सन्ति ते ।
ये त्वां निवारयन्त्यद्य प्रपतन्तं हुताशने ॥ ३४॥

कार्याकार्यं न जानीषे कालपक्वोऽस्यसंशयम् ।
बह्वबद्धमकर्णीयं न हि ब्रूयाज्जिजीविषुः ॥ ३५॥

समुद्रतरणं दोर्भ्यां कण्ठे बद्ध्वा शिलां यथा ।
गिर्यग्राद्वा निपतनं तादृक् तव चिकीर्षितम् ॥ ३६॥

सहितस्सर्वयोधैस्तु व्यूढानीकस्सुरक्षितः ।
धनञ्जयेन युध्यस्व जयं चेत् प्राप्तुमिच्छसि ॥ ३७॥

हितार्थं धार्तराष्ट्रस्य ब्रवीमि त्वां न हिंसया ।
श्रद्धत्स्वेदं मया प्रोक्तं यदि तेऽस्ति जिजीविषा ॥ ३८॥

कर्णः—

स्ववीर्येणाहमाश्वस्तः प्रार्थयाम्यर्जुनं रणे ।
त्वं तु मित्रमुखश्शत्रुर् मां भीषयितुमिच्छसि ॥ ३९॥

न मामस्मादभिप्रायात् कश्चिदद्य निवर्तयेत् ।
अपीन्द्रो वज्रमुद्यम्य किमु मर्त्यः कथञ्चन ॥ ४०॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि एकत्रिंशोऽध्यायः ॥ ३१ ॥
॥ ७३ ॥ कर्णपर्वणि एकत्रिंशोऽध्यायः ॥ ३१ ॥
[अस्मिन्नध्याये ४०॥ श्लोकाः]

॥ द्वात्रिंशोऽध्यायः ॥

कर्णगर्वोक्तिमसहमानेन शल्येन तद्गर्हणम् ॥

सञ्जयः—

इति कर्णस्य वाक्यान्ते शल्यः प्राहोत्तरं वचः ।
चुकोपयिषुरत्यर्थं कर्णं मद्रेश्वरः पुनः ॥ १

शल्यः—

यदा वै त्वा फल्गुनबाहुवेगाज्
ज्याचोदिता वेगवन्तोऽग्निकल्पाः ।

अन्वेतारः कङ्कपत्राशिताग्रास्
त्यक्ष्यत्येषा त्वां तदा कर्ण बुद्धिः ॥ २

यदा दिव्यं धनुरादाय पार्थः
प्रतापयन् पृतनां सव्यसाची ।
त्वां मर्दयिष्यत्यसुखैः पृषत्कैस्
तदा पृच्छां त्यक्ष्यसे पाण्डवस्य ॥ ३

बालश्चन्द्रं मातुरङ्के शयानो
यथा कश्चित् प्रार्थयतेऽपहर्तुम् ।
तद्वन्मोहाद् द्योतमानं रथस्थं
जेतुं पार्थं काङ्क्षसे सूतपुत्र ॥ ४

[1]खन्यादसिं तीक्ष्णधारं यथाऽज्ञस्
सुतेजनं निहितं वै पृथिव्याम् ।
तथा खनस्यद्य शितान् पृषत्कान्
यत् प्रार्थयस्यर्जुनेनेह युद्धम् ॥ ५

त्रिशूलमाश्लिष्य सुतीक्ष्णधारं
सर्वाणि गात्राणि विकर्षसि त्वम् ।
सुतीक्ष्णशस्त्रोपमकर्मणेह
युयुत्ससे फल्गुनेनाद्य कर्ण ॥ ६

1. अ-ख—अर्धचतुर्थं नास्ति

क्रुद्धं सिंहं केसरिणं बृहन्तं
बालो भूत्वा क्षुद्रमृगस्तरस्वी ।
समाह्वयेद्धृष्टमुपेत्य योद्धुं
तथा त्वमद्याह्वयसे ह पार्थम् ॥ ७

मा सूतपुत्राह्वय राजपुत्रं
महावीर्यं केसरिणं यथैव ।
वने सृगालः पिशिताभितृप्तः
पार्थं समासाद्य विनङ्क्ष्यसि त्वम् ॥ ८

ईषादन्तं महानागं प्रभिन्नकरटामुखम् ।
शशो भूत्वाऽऽह्वयस्यद्य युद्धे कर्ण धनञ्जयम् ॥ ९

सृगालो हि वने कर्ण शशैः परिवृतो वसन् ।
मन्यते सिंहमात्मानं यावत् सिंहं न पश्यति ॥ १०

तथा त्वमपि राधेय सिंहमात्मानमिच्छसि ।
अपश्यञ् शत्रुदमनं नरसिंहं रणेऽर्जुनम् ॥ ११

बिलस्थं कृष्णसर्पं त्वं सम्बोधयितुमिच्छसि ।
महाविषं कर्ण मोहाद्योऽद्याह्वयसि फल्गुनम् ॥ १२

सिंहं केसरिणं क्रुद्धम् अभिक्रम्याभिनर्दसे ।
सृगाल इव मूढस्त्वं नृसिंहं कर्ण पाण्डवम् ॥ १३

सुपर्णं पतगश्रेष्ठं वैनतेयं तरस्विनम् ।

लट्वेवाह्वयसे पार्थं तथा कर्ण धनञ्जयम् ॥ १४
सर्वाम्भसां निधिं भीमम् ऊर्मिमन्तं झषाकुलम् ।
चन्द्रोदयेन वर्धन्तम् अप्लवस्त्वं तितीर्षसि ॥ १५
यथा वत्सतरो भूत्वा जातस्कन्धेन शुष्मिणा ।
युद्धमिच्छेद्वृषपतिना तथेच्छसि किरीटिना ॥ १६
महामेघं महाघोषं दर्दुरः प्रतिनर्दसे ।
कामतोयप्रदं काले नरपर्जन्यमर्जुनम् ॥ १७
यथा च श्वा गृहस्थस्तु व्याघ्रं वनगतं भषेत् ।
तथा त्वं भषसे कर्ण नरव्याघ्रं धनञ्जयम् ॥ १८
व्याघ्रं त्वं मन्यसे त्मानं यावत् कृष्णौ न पश्यसि ।
समास्थितावेकरथे सूर्याचन्द्रमसाविव ॥ १९
यावद्गाण्डीवघोषं च न शृणोषि महामृधे ।
तावदेव त्वया कर्ण वक्तुं शक्यं यथेष्टतः ॥ २०
रथशङ्खधनुश्शब्दैर् नादयन्तं दिशो दश ।
नर्दन्तमिव शार्दूलं दृष्ट्वा क्रोष्टा भविष्यसि ॥ २१
[1]नित्यमेव सृगालस्त्वं नित्यं सिंहः कपिध्वजः ।
वीरप्रद्वेषणान्मूढ तस्मात् क्रोष्टेव लक्ष्यसे ॥ २२
यथाऽऽखुस्स्याद्विडालश्च श्वा व्याघ्रश्च बलाबले ।
यथा सृगालस्सिंहश्च यथा च शशकुञ्जरौ ॥ २३

1. ख—षडर्षानि न सन्ति

यथाऽनृतं च सत्यं च यथा वाऽपि विषामृते ।
तथा त्वमपि पार्थश्च प्रख्यातावात्मकीर्तिभिः ॥ २४

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि द्वात्रिंशोऽध्यायः ॥ ३२ ॥
॥ ७३ ॥ कर्णपर्वणि द्वात्रिंशोऽध्यायः ॥ ३२ ॥
[अस्मिन्नध्याये २४ श्लोकाः]

॥ त्रयस्त्रिंशोऽध्यायः ॥

कर्णेन मर्मोद्घाटनपूर्वकं शल्यगर्हणम् ॥

सञ्जयः—
अधिक्षिप्तस्तु राधेयश् शल्येनामिततेजसा ।
प्रत्यब्रवीन्महाराज वाक्शल्यमविचारयन् ॥ १

कर्णः—
गुणान् गुणवतां शल्य गुणवान् वेत्ति नागुणः ।
त्वं तु नित्यं गुणैर्हीनः किं ज्ञास्यसि गुणागुणान् ॥ २
अर्जुनस्य महास्त्राणि क्रोधं वीर्यं धनुश्शरान् ।
अहं शल्याभिजानामि न त्वं जानासि तत् तथा ॥ ३
एवमेवात्मनो वीर्यं महद्वैरं च पाण्डवैः ।
पाण्डवस्याभिजानामि विक्रमं च महात्मनः ॥ ४
तथा कृष्णस्य माहात्म्यम् ऋषभस्य महात्मनः ।

यथाऽहं शल्य जानामि मूढ शल्य न जानसि ॥ ५

अहमेवात्मना वीर्यं महद्वीर्यं च पाण्डवे ।
जानंस्तावाह्वये युद्धे शल्य नाग्निं पतङ्गवत् ॥ ६

अस्ति चायमिषुश्शल्य सुमुखो रक्तभोजनः ।
एकस्तूणीशयः पत्री सुधौतस्समलङ्कृतः ॥ ७

शेते चन्दनचूर्णेन पूजितो बहुलास्समाः ॥ ७॥

[1]आहेयो विषवानुग्रो नराश्वद्विपसङ्गहा ॥ ८

एकरूपो महानुग्रस् तनुत्रास्थिविदारणः ।
निर्भिन्द्यां येन रुष्टोऽहम् अपि मेरुं महागिरिम् ॥ ९

तमहं जातु नास्येयम् अन्यस्मिन् फल्गुनादृते ।
कृष्णाद्वा देवकीपुत्रात् सत्यं चात्र शृणुष्व मे ॥ १०

तेनाहमिषुणा शल्य वासुदेवधनञ्जयौ ।
योत्स्ये परमसंरब्धौ तत् कर्तुं सदृशं मम ॥ ११

सर्वेषां वृष्णिवीराणां कृष्णे लक्ष्मीः प्रतिष्ठिता ।
सर्वेषां पाण्डुपुत्राणां जयः पार्थे प्रतिष्ठितः ॥ १२

उभयं तत् समासाद्य कोऽतिवर्तितुमर्हति ॥ १२॥

तावेतौ पुरुषव्याघ्रौ समाने स्यन्दने स्थितौ ।
मामेकमभिसंयुक्तौ सुजातं पश्य शल्य मे ॥ १३॥

---

1. क-ख—आहवे

पितृष्वसामातुलजौ भ्रातरावपराजितौ ।
मणी सूत्र इव प्रोतौ द्रष्टासि निहतौ मया ॥ १४॥
अर्जुने गाण्डिवं कृष्णे चक्रं तार्क्ष्यकपिध्वजौ ।
भीरूणां त्रासजननौ शल्य हर्षकरौ मम ॥ १५॥
त्वं तु दुष्प्रकृतिर्मूढो महायुद्धेष्वकोविदः ।
भयावर्तार्णस्संत्रासाद् अबद्धं बहु भाषसे ॥ १६॥
संस्तौषि तौ तु केनापि हेतुना त्वं कुदेशज ।
तौ हत्वा समरे हन्ता त्वामप्यद्य सबान्धवम् ॥ १७॥
पापदेशज दुर्बुद्धे क्षुद्र क्षत्रियपांसन ।
सुहृद्रूपो रिपुः किं मां कृष्णाभ्यां भीषयिष्यसि ॥ १८॥
तौ वा मामद्य हन्तारौ हनिष्ये तौ न संशयः ।
नाहं बिभेमि कृष्णाभ्यां विजानन्नात्मनो बलम् ॥ १९॥
वासुदेवसहस्रं वा फल्गुनानां शतानि वा ।
अहमेको हनिष्यामि जोषमास्स्व कुदेशज ॥ २०॥
स्त्रियो बालाश्च वृद्धाश्च प्रायः क्रीडागता जनाः ।
या गाथास्सम्प्रगायन्ति कुर्वन्तोऽध्ययनं यथा ॥ २१॥
ता गाथाश्शृणु मे शल्य मद्रकेषु दुरात्मसु ॥ २२
ब्राह्मणैः कथिताः पूर्वं यथाघद्राजसन्निधौ ।
श्रुत्वा चैकमना मूर्ख मम वा ब्रूहि चोत्तरम् ॥ २३

मित्रध्रुङ्मद्रको नित्यम् यो नो द्वेष्टि स मद्रकः ।
मद्रके सङ्गतं नास्ति क्षुद्रवाक्ये नराधमे ॥ २४

दुरात्मा मद्रको नित्यं नित्यमानृतिकोऽनृजुः ।
यच्चान्यदपि दौरात्म्यं मद्रकेष्विति नश्श्रुतम् ॥ २५

पिता माता च पुत्राश्च श्वश्रूश्वशुरमातुलाः ।
भगिनी दुहिता भ्राता नप्ता चान्ये च बान्धवाः ॥ २६

वयस्याभ्यागताश्चान्ये दासीदासाश्च सङ्गताः ।
पुम्भिर्विमिश्रिता नार्यो ज्ञाताज्ञातास्त्वयेच्छया ॥ २७

[1]येषां गृहेष्वशिष्टानां सक्तुमद्याशिनां सदा ।
पीत्वा शीधु सगोमांसं क्रन्दन्ति च हसन्ति च ॥ २८

गायन्ति चाप्यबद्धानि प्रवर्तन्ते च कामतः ।
कामप्रलापिनोऽन्योन्यं तेषु धर्मः कथं भवेत् ॥ २९

मद्रकेष्ववलिप्तेषु प्रख्याताशुभकर्मसु ।
नापि वैरं न सौहार्दं मद्रकेषु समाचरेत् ॥ ३०

मद्रके सङ्गतं नास्ति मद्रको हि सदा मलः ।
मद्रकेषु च संसृष्टं शौचं गान्धारकेषु च ॥ ३१

राजयाजकयाज्याभ्यां यथा दत्तं हविर्नेशेत् ।

---

1. ख—अर्धचतुष्टयं नास्ति

शूद्रसंस्कारको विप्रो यथा याति पराभवम् ॥ ३२

[1]यथा ब्रह्मद्विषोऽत्यन्तं गच्छन्तीह पराभवम् ।
तथैव सङ्गतं चापि मद्रकेषु दुरात्मसु ॥ ३३

बालेष्वपि सदा न स्म धनं वृश्चिकतो विषम् ।
आथर्वणेन मन्त्रेण सर्वशान्तिः कृता मया ॥ ३४

इति वृश्चिकदष्टस्य नानाविषहतस्य च ।
कुर्वन्ति भेषजं प्राज्ञास् सद्यस्तत्रापि दृश्यते ॥ ३५

[2]भूयस्त्वं शृणु मे वाचो ब्रूहि चात्रोत्तरं वचः ।
वासांस्युत्सृज्य नृत्यन्ति स्त्रियो मद्यविमोहिताः ॥ ३६

मैथुनेऽसङ्गतायाश्च तथा कामकराश्च ह ।
तासां पुत्रः कथं धर्मं मद्रको बोद्धुमर्हति ॥ ३७

यास्तिष्ठन्त्यः प्रमेहन्ति यथैवोष्ट्रा यथैडकाः ।
तासां विभ्रष्टधर्माणां निर्लज्जानां ततस्ततः ॥ ३८

त्वं पुत्रस्तादृशानां हि धर्मं वक्तुमिहेच्छसि ॥ ३८॥

सौवीरकं याच्यमाना मादिका घर्षति स्फिचौ ।
अदातुकामा वचनम् इदमाह सुदारुणम् ॥ ३९॥

---

1. ख—इदमर्धं नास्ति

२. घ—एवं विद्वानास्व जोषं शृणु चोक्तमिदं वचः । [पाठान्तरम्]

न मां सौवीरकं कश्चिद् याचेत दयितं मम ।
पुत्रं दद्यां पतिं दद्यां न तद्दद्यां सुवीरकम् ॥ ४०॥

गौर्यो बृहत्यो निर्ह्रीका माद्रिकाः कम्बलावृताः ।
घस्मरा नष्टशौचाश्च प्राय इत्यनुशुश्रुम ॥ ४१॥

प्रमेहित्वा स्फिचौ भूमौ घर्षन्त्यो हीनशोधनाः ।
स्पृष्ट्वा वाऽद्भिर्न मृद्भिश्च नित्योच्छिष्टा भवन्ति हि ॥ ४२॥

एवमादि मयाऽन्यैर्वा शक्यं वक्तुं भवेद्बहु ।
आकेशादानखाग्राच्च वक्तव्येषु कुवर्त्मसु ॥ ४३॥

मद्रकास्सिन्धुसौवीरा धर्मं विद्युः कथं त्विह ।
पापदेशोद्भवा म्लेच्छा धर्माणामविचक्षणाः ॥ ४४॥

एष मुख्यतमो धर्मः क्षत्रियस्येति नश्श्रुतम् ।
यदाजौ निहतश्शेते सद्भिस्समभिपूजितः ॥ ४५॥

आयुधानां साम्पराये यन्मुञ्चेयमहं तनुम् ।
य एष प्रथमः कल्पस् स एव स्वर्गगामिनाम् ॥ ४६॥

सोऽहं प्रियस्सखा चैव धार्तराष्ट्रस्य धीमतः ।
तदर्था हि मम प्राणा यच्च मे विद्यते वसु ॥ ४७॥

व्यक्तं त्वमस्युपहितः पाण्डवैः पापदेशज ।
तथा ह्यमित्रवत् सर्वं त्वमस्मासु प्रवर्तसे ॥ ४८॥

कामं खलु न शक्योऽहं त्वद्विधानां शतैरपि ।
सङ्ग्रामाद् विमुखीकर्तुं सद्धर्म इव नास्तिकैः ॥ ४९॥

सारङ्ग इव घर्मार्तः कामं विलप शुष्य च ।
नाहं भीषयितुं शक्यः क्षत्रधर्मे व्यवस्थितः ॥ ५०॥

तनुत्यजां नृसिंहानाम् आहवेष्वनिवर्तिनाम् ।
या गतिर्गुरुणा प्रोक्ता प्रेम्णा रामेण तां स्मरे ॥ ५१॥

स्वेषां त्राणार्थमुद्युक्तं वधार्थं द्विषतामपि ।
विद्धि मामास्थितं वृत्तं पौरूरवसमुत्तमम् ॥ ५२॥

न तं भूतं प्रपश्यामि त्रिषु लोकेषु मद्रप ।
यो मामस्मादभिप्रायद्वारयेदिति मे मतिः ॥ ५३॥

एवं विद्वानास्स्व जोषं किं त्रासाद्बहु भाषसे ।
मा त्वा हत्वा प्रदास्यामि क्रव्याद्भ्यो मद्रकाधिप ॥ ५४॥

मित्रप्रतीक्षया शल्य धृतराष्ट्रस्य चोभयोः ।
अपवादतितिक्षाभिस् त्रिभिरेतैर्हि जीवसि ॥ ५५॥

पुनश्चेदीदृशं वाक्यं मद्रराज वदिष्यति ।
शिरस्ते पातयिष्यामि गदया वज्रकल्पया ॥ ५६॥

श्रोतारस्त्विदमद्येह द्रष्टारो वा कुदेशज ।
कर्णं वा जघ्नतुः कृष्णौ कर्णो वा निजघान तौ ॥ ५७॥

एवमुक्त्वा तु राधेयः पुनरेव विशां पते ।
अब्रवीन्मद्रराजानं याहि याहीति सम्भ्रमात् ॥ ५८॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥
॥ ७३ ॥ कर्णपर्वणि त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥
[अस्मिन्नध्याये ५८॥ श्लोकाः]

॥ चतुस्त्रिंशोऽध्यायः ॥

शल्येन कर्णं प्रति हंसकाकीयाख्यानकथनम् ॥

सञ्जयः—

मारिषातिरथेरश्रुत्वा वचो युद्धाभिनन्दिनः ।
शल्योऽब्रवीत् कर्णमिदं निदर्शनमुदाहरन् ॥ १

शल्यः—

यथैव मत्तो मद्येन त्वं तथा पानपो यथा ।
तथाऽपि त्वां प्रमाद्यन्तं चिकित्सेयं सुहृत्तया ॥ २
इमां काकोपमां कर्ण प्रोच्यमानां निबोध मे ।
श्रुत्वा यथेष्टं कुर्यास्त्वं विहीन कुलपांसन ॥ ३
नाहमात्मनि किञ्चिद्वै किल्बिषं कर्ण संस्मरे ।
येन मां त्वं महाबाहो हन्तुमिच्छस्यनागसम् ॥ ४
अवश्यं तु मया वाच्यं बुद्ध्वा तव हिताहितम् ।

विशेषतो रथस्थेन राज्ञश्चापि हितार्थिना ॥ ५

समं च विषमं चैव रथिनश्च बलाबलम् ।
श्रमः खेदश्च सततं हयानां रथिना सह ॥ ६

आयुधानां परीमाणं रुतं च मृगपक्षिणाम् ।
सारं चैवाप्यसारं च शल्यानां च प्रतिक्रिया ॥ ७

अस्त्रयोगं च युद्धं च निमित्तानि तथैव च ।
सर्वमेतन्मया ज्ञेयं रथस्यास्य कुटुम्बिना ॥ ८

अतस्त्वां कथये कर्ण दर्शयामि पुनः पुनः ॥ ८॥

वैश्यः किल समुद्रान्ते प्रभूतधनधान्यवान् ।
यज्वा दानपतिश्शान्तस् स्वधर्मनिरतश्शुचिः ॥ ९॥

बहुपुत्रः प्रियापत्यस् सर्वभूतानुकम्पनः ।
राष्ट्रे धर्मप्रधानस्य राज्ञो वसति निर्भयः ॥ १०॥

पुत्राणां तस्य बालानां कुमाराणां च धीमताम् ।
काको बहूनामभवद् उच्छिष्टकृतभोजनः ॥ ११॥

तस्मै सदा प्रयच्छन्ति वैश्यपुत्राः कुमारकाः ।
मांसोदनं दधि क्षीरं पायसं सर्पिषा सह ॥ १२॥

तथोच्छिष्टभृतः काको वैश्यपुत्रैः कुमारकैः ।
सदृशान् पक्षिणो मत्तश् श्रेयसश्चावमन्यते ॥ १३॥

अथ हंसास्समुद्रान्ते प्रजग्मुरतिपातिनः ।

गरुडस्य गतौ तुल्याश्चक्राङ्गा हृष्टचेतसः ॥ १४॥

कुमारकास्ततो दृष्ट्वा हंसान् काकमथाब्रुवन् ॥ १५

वैश्यपुत्राः—

भवानेव विशिष्टोऽसि पतत्रिभ्यो विहङ्गम ।

एतेऽतिपातिनः पश्य विहङ्गान् वियदाश्रितान् ॥ १६

एभिस्त्वमपि शक्तो हि कस्मान्न पतितं त्वया ॥ १६॥

शल्यः—

प्रतार्यमाणस्तु स तैर् अल्पबुद्धिभिरण्डजः ।

तद्वचस्सत्यमित्येव मौढ्याद्दर्पाच्च जग्मिवान् ॥ १७॥

तान् सोऽतिपत्य जिज्ञासुः क एषां श्रेष्ठभागिति ।

उच्छिष्टदर्पितः काको बहूनामेकपातिनाम् ॥ १८॥

तेषां यं प्रवरं मेने हंसानां दूरपातिनाम् ।

तमाह्वयत दुर्बुद्धिः पताव इति पक्षिणम् ॥ १९॥

तच्छ्रुत्वा प्राहसन् हंसा ये तत्रासन् समागताः ।

भाषतो बहु काकस्य बालिश्यात् पततां वराः ॥ २०॥

इदमूचुस्तु चक्राङ्गा वचः काकं विहङ्गमाः ॥ २१

हंसाः—

वयं हंसाश्चरामेमां पृथिवीं मानसौकसः ।

पक्षिणां च वयं नित्यं दूरपातेन पूजिताः ॥ २२

कथं नु बलिनं हंसं समाह्वयसि दुर्मते ।

काको भूत्वा निपतने चक्राङ्गान् दूरपातिनः ॥ २३
कथं त्वं पतसे काक सहास्माभिः प्रचक्ष्व तत् ॥ २३॥

शल्यः—

अथ हंसवचो मूढः कुत्सयित्वा पुनः पुनः ।
प्राहोत्तरं वचः काकः कत्थनस्सोऽतिलाघवात् ॥ २४॥

काकः—

शतमेकं च पातानां पतितास्मि न संशयः ।
शतयोजनमेकैकं विचित्रं विविधं तथा ॥ २५॥
उड्डीनमवडीनं च प्रडीनं डीनमेव च ।
निड्डीनमथ सण्डीनं तिरश्चीनगतानि च ॥ २६॥
आडीनं परडीनं च पराडीनं सुडीनकम् ।
अतिडीनं महाडीनं विडीनमुपडीनकम् ॥ २७॥
प्रतिडीनं निडीनं चाप्यनुडीनं कुडीनकम् ॥ २८
गतागतप्रतिगता बह्वीश्चैव कुडीनकाः ।
कर्तास्मि मिषतां वोऽद्य नूनं द्रक्ष्यथ मे बलम् ॥ २९
तद्भावध्वं विनिश्चित्य कुरुध्वं सहिताः खगाः ।
पातैरेतैस्सह मया पतितुं खे निराश्रये ॥ ३०

शल्यः—

एवमुक्ते तु काकेन तेषामेको विहङ्गमः ।
प्रहसन्नब्रवीत् काकम् इदं राधेय तच्छृणु ॥ ३१

हंसः—

शतमेकं च पातानां काक त्वं पतिता ध्रुवम् ।
[1]एकमेव तु सम्पातं विदुस्सर्वे विहङ्गमाः ॥ ३२

एतेनाहं पते काक नान्यं जानामि कञ्चन ॥ ३२॥

काकः—

पत त्वमपि तत्राशु येन पातेन मन्यसे ॥ ३३

शल्यः—

अथ काकं प्रजहसुर् ये तत्रासन् समागताः ।
कथमेकेन पातेन जयेम शतपातिनम् ॥ ३४

एकेन वायस त्वेनं पातेनाभिभविष्यति ॥ ३४॥

शल्यः—

हंसश्चोत्पतितः काको बलवानाशुविक्रमः ।
प्रपेततुस्तथेत्युक्त्वा तावुभौ हंसवायसौ ॥ ३५॥

उपर्युपरि वेगेन समुद्रं मकरालयम् ॥ ३६

हंसस्त्वेकेन पातेन काकः पातशतेन च ।
स्पर्धिनौ महितौ तूर्णं खमास्थाय तरस्विनौ ॥ ३७

हंसस्तु मृदुनैकेन विक्रान्तुमुपचक्रमे ।
[2]पूर्वमेव तु वै काकस् तूर्णं गन्तुं प्रचक्रमे ॥ ३८

---

1. ब—कोश एकस्मिन्नेवेदमर्धं वर्तते
2. ख—इदमर्धं नास्ति

नात्यहीयत काकश्च मुहूर्तमिव सूतज ॥ ३८॥

काकोऽथ हंसं चापल्याच् छीघ्रतां प्रतिदर्शयन् ।
वेगेनातीत्य तरसा पुनरेति मुहुर्मुहुः ॥ ३९॥

तुण्डेनाभ्यहनच्चैनं कुर्वन्नामापसव्यतः ।
रोरूयन्निति चाप्येनं समाह्वयति वै मुहुः ॥ ४०॥

विसिस्मापयिषुः पातैर् दर्शयन्नात्मनः क्रियाम् ॥ ४१

अथ काकस्य चित्राणि पतितानीतराणि च ।
दृष्ट्वा प्रमुदिताः काका विनेदुरधिकैस्स्वरैः ॥ ४२

हंसाश्चापहसन्ति स्म प्रवदन्तोऽप्रियाणि च ।
कुर्वाणा विविधान् रावान् इच्छन्तो जयमात्मनः ॥ ४३

उत्पत्योत्पत्य च प्राहुर् मुहूर्तमिति चेति च ।
वृक्षाग्रेभ्यस्स्थलेभ्यश्च निपतन्त्युत्पतन्ति च ॥ ४४

अवमत्य च हंसं तम् इदं काकोऽब्रवीद्वचः ॥ ४४॥

काकः—

योऽसावुत्पतितो हंसस् सोऽसावेव प्रहीयते ॥ ४५

शल्यः—

अथ हंसस्तु तच्छ्रुत्वा भाषितं पततां वरः ।
विगाह्य हंसो विक्षोभ्य प्रापतत् पश्चिमां दिशम् ॥ ४६

उपर्युपरि वेगेन सागरं मकरालयम् ।

बहुसत्त्वसमाकीर्णं वीचीभिर्भीमदर्शनम् ॥ ४७

अथाचिरेण राधेय काको वेगादहीयत ।
ततोऽतीव परिश्रान्तः कथञ्चिद्ध्वंसमन्वगात् ॥ ४८

भीश्चैनमाविशत् तीव्रं काकं कर्ण विचेतसम् ।
द्वीपान् द्रुमान्वितान् पश्यन् विश्रमार्थं श्रमातुरः ॥ ४९
निपतेयं कनु श्रान्त इति तस्मिञ्जलार्णवे ॥ ४९॥

अविषह्यस्समुद्रो हि बहुसत्त्वगणालयः ।
महान् भूतशतोद्भासी नभसस्तु विशिष्यते ॥ ५०॥
गाम्भीर्याद्धि समुद्रस्य न विशेषं कुलाधम ॥ ५१

दिशश्च नाम्भसां कर्ण समुद्रस्था विदुर्जनाः ।
विपश्चितोऽप्यपारत्वात् किं पुनः कर्ण वायसः ॥ ५२

अथ हंसोऽप्यतिक्रामन्मुहूर्तमिव दूरतः ॥ ५२॥

अतिक्रभ्य च चक्राङ्गः काकं तं समुदैक्षत ।
शनकैः परिहीनं तं परिश्रान्तमचेतसम् ॥ ५३॥

अवेक्षमाणस्तं काकं प्रत्यागम्य हसन्निव ।
तं प्रहस्य च चक्राङ्गः काकं मन्दगतिं तदा ॥ ५४॥

हीयमानमथो दृष्ट्वा हंसः प्राह यथार्थवत् ।
ऊर्ज्जिहीर्षुर्निमज्जन्तं स्मरन् सत्पुरुषव्रतम् ॥ ५५॥

हंसः—

बहूनि पतितानि त्वम् आचक्षाणो मुहुर्मुहुः ।
पतस्यव्याहरन् खेदं ततो गुह्यं प्रभाषसे ॥ ५६॥

किं नाम पतितं काक यत् त्वं पतसि साम्प्रतम् ।
जलं स्पृशसि पक्षाभ्यां तुण्डेन च पुनः पुनः ॥ ५७॥

प्रब्रूहि कतमोऽयं ते पातो वर्तति वायस ।
एह्येहि काक शीघ्रं त्वम् एष त्वां परिपालये ॥ ५८॥

शल्यः—

स पक्षाभ्यां स्पृशन्नार्तस् तुण्डेन च जलं तदा ।
काको दृढं परिश्रान्तस् सहसा निपपात ह ॥ ५९॥

सागराम्भसि तं दृष्ट्वा पतन्तं दीनचेतसम् ।
म्रियमाणमिदं वाक्यं हंसः काकमुवाच ह ॥ ६०॥

हंसः—

शतमेकं च पातानां पताम्यहमिति स्म ह ।
श्लाघन्नात्मानमद्य त्वं काक भाषितवानसि ॥ ६१॥

स त्वमेकशतं पातं पतन्नभ्यधिको मया ।
कथमेवं परिश्रान्तः पतितोऽसि महार्णवे ॥ ६२॥

शल्यः—

प्रत्युवाच ततः काकस् सीदमान इदं वचः ।
उपरिस्थं तदा हंसं प्रसमीक्ष्य प्रसादयन् ॥ ६३॥

काकः—

उच्छिष्टान्नेन पुष्टोऽहं दर्पोत्सिक्तः कुसत्त्वतः ।
सुपर्ण इव चात्मानं ज्ञातवान् बुद्धिलाघवात् ॥ ६४॥

शरणं त्वां प्रपन्नोऽहम् उदकान्तमवाप्नुयाम् ।
[1]हंसेदानीं परिश्रान्तम् आपदो मां समुद्धर ॥ ६५॥

यदि नाम पुनर्जीवन् गच्छेयं स्वं निवेशनम् ।
नैवं पुनर्हीनमपि क्षेप्ताऽहं खे विचारिणम् ॥ ६६॥

शल्यः—

तमेवं करुणं दीनं विलपन्तमचेतनम् ।
काक काकेति वाश्यन्तं निमज्जन्तं महार्णवे ॥ ६७॥

कृपयाऽभिपरीतो हि कृपां चक्रे दुरात्मनि ॥ ६८

अथ तं पतितं दीनं जलक्लिन्नमचेतनम् ।
पद्भ्यामुत्क्षिप्य वेपन्तं पृष्ठमारोपयत् तदा ॥ ६९

स हंसः पृष्ठमारोप्य काकं कर्णं विचेतसम् ।
अविस्मयस्तदा कर्ण पुनरेनं समानयत् ॥ ७०

तमेव देशं तरसा स्पर्धया पेततुर्यतः ॥ ७०॥

उत्सृजंश्चाब्रवीन्नैवं पुनः कार्यं त्वयेति हि ।
स्थाप्य चैनं पुनर्द्वीपे समाश्वस्य च विक्लवम् ॥ ७१॥

---

1. ख—अर्धचतुष्टयं नास्ति

गतो यथेप्सितं देशं हंसो मन इवाशुगः ॥ ७२

एवमुच्छिष्टपुष्टस्स काको हंसपराजितः ।
बलं वीर्यं मदं कर्ण त्यक्त्वा क्षान्तिमुपागमत् ॥ ७३

उच्छिष्टभोजनः काको यथा वैश्यकुले पुरा ।
एवं त्वमुच्छिष्टभृतो धार्तराष्ट्रैर्न संशयः ॥ ७४

सदृशाञ् श्रेयसश्चापि सर्वान् कर्णावमन्यसे ।
द्रोणद्रौणिकृपैर्गुप्तो भीष्मेणान्यैश्च कौरवैः ॥ ७५

विराटनगरे पार्थम् एकं किं नावधीस्तदा ।
यत्र व्यस्तास्समस्ताश्च निर्जितास्स्थ किरीटिना ॥ ७६

सृगाल इव सिंहेन क ते वीर्यं तदा गतम् ॥ ७६॥

भ्रातरं निहतं दृष्ट्वा समरे सव्यसाचिना ।
पश्यतां कुरुवीराणां प्रथमं त्वं पलायथाः ॥ ७७॥

तथा द्वैतवने कर्ण गन्धर्वैस्समभिद्रुतान् ।
कुरून् सदारानुत्सृज्य त्वमेवाग्रे पलायथाः ॥ ७८॥

हत्वा जित्वा च गन्धर्वांश् चित्रसेनमुखान् रणे ।
कर्ण दुर्योधनं पार्थस् सभ्रातृकममोचयत् ॥ ७९॥

पुनः प्रभावः पार्थस्य पुराणः केशवस्य च ।
कथितः कर्ण रामेण सभायां कुरुसंसदि ॥ ८०॥

सततं च त्वमश्रौषीर् वचनं द्रोणभीष्मयोः ।

अवध्यौ वदतोः कृष्णौ सन्निधाने महीक्षिताम् ॥ ८१॥
कियन्तं तत्र वक्ष्यामि येन येन धनञ्जयः ।
त्वत्तोऽतिरिक्तो भूतेभ्यस् सर्वेभ्यो ब्राह्मणो यथा ॥ ८२॥
द्रक्ष्यसि त्वमिदानीं तौ प्रधाने स्यन्दने स्थितौ ।
पुत्रं च वसुदेवस्य कुन्तीपुत्रं च पाण्डवम् ॥ ८३॥
[1]यथाऽश्रयत चक्राङ्गं वायसो बुद्धिमास्थितः ।
त्वं शीघ्रमेहि वार्ष्णेयं पाण्डवं च धनञ्जयम् ॥ ८४॥
देवासुरमनुष्येषु प्रख्यातौ यौ नरोत्तमौ ॥ ८५
यथाऽशिक्षत चक्राङ्गं वायसो बुद्धिमाश्रितः ।
तद्वच्छिक्षस्व वार्ष्णेयं पाण्डवं च धनञ्जयम् ॥ ८६
सूर्याचन्द्रमसौ यद्वत् तद्वदच्युतपाण्डवौ ।
प्रकाशेनाद्य विख्यातौ त्वं तु खद्योतवन्नृषु ॥ ८७
तौ माऽवमंस्था मौढ्यात् त्वं खद्योत इव रोचनौ ॥ ८७॥
एवं विद्वन् माऽवमंस्थास् सूतपुत्राच्युतार्जुनौ ।
नरसिंहौ नरश्वा त्वं जोषमास्व विकत्थनात् ॥ ८८॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥
॥ ७३ ॥ कर्णपर्वणि चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥
[अस्मिन्नध्याये ८८॥ श्लोकाः]

---

1. अ-ब—नासीदमर्षम्

॥ पञ्चत्रिंशोऽध्यायः ॥

कर्णेन शल्यं प्रति परशुरामात् तथा कुतश्चिद् ब्राह्मणाच्च शापप्राप्ति-कथनम् ॥

[1]सञ्जयः—

मद्राधिपस्याधिरथिर्महात्मा
वचो निशम्याप्रियमप्रतीतः ।
उवाच शल्यं विदितं ममैतद्
यथाविधावर्जुनवासुदेवौ ॥ १

शौरे रथं वाहयतोऽर्जुनस्य
बलं महास्त्राणि च पाण्डवस्य ।
अहं विजानामि यथावदद्य
परोक्षभूतं तव तत् तु शल्य ॥ २

तौ चाप्यहं शस्त्रभृतां वरिष्ठौ
व्यपेतभीर्योधयिष्यामि कृष्णौ ।
सन्तापयत्यभ्यधिकं हि रामाच्
छापोऽद्य मां ब्राह्मणसत्तमाच्च ॥ ३

1. अ—एकोनचत्वारिंशश्लोका न सन्ति

पुरा महेन्द्राद्गिवरे समृद्धे
तपस्विनं राममुपेत्य शल्य ।
अस्त्रार्थिनं मामद्य शिष्यं गृहाणे-
त्यथाब्रुवं ब्राह्मणच्छद्मना च ॥ ४

तत्रावसं ब्राह्मण इत्यविप्रो
ब्रह्मास्त्रलोभादनृतेन चाहम् ।
तज्जामदग्न्येन परं महास्त्रं
समन्त्रयुक्तं विहितं ममासीत् ॥ ५

अस्त्रं यदा तद्विदितं ममासीत्
तदाऽब्रवीद् ब्राह्मणो मां महर्षिः ।
आपद्गतेनास्त्रमिदं प्रयोज्यं
त्वया रणे गच्छता साधयेति ॥ ६

तत्रापि मे देवराजेन विघ्नो
हितार्थिना फल्गुनस्यैव शल्य ।
कृतो विभेदेन ममोरुमेत्य
प्रविश्य कीटस्य तनुं विरूपाम् ॥ ७

गुरोर्भयाच्चापि न चेलिवानहं
तत्रैव बुद्धो ददृशे स विप्रः ।

स धैर्ययुक्तं प्रसमीक्ष्य मां वै
न त्वं विप्रः कोऽसि सत्यं वदेति ॥ ८

तस्मै तदाऽऽत्मानमहं यथावद्
आख्यातवान् सूत इत्येव शल्य ।
स मां निशम्याथ महातपस्वी
संशप्तवान् रोषपरीतचेताः ॥ ९

सूतोपधाच्चाप्तमिदं महास्त्रं
न कर्मकाले प्रतिभास्यतीति ।
अन्यत्र तु स्यात् तव मृत्युकालाद्
अब्राह्मणे ब्रह्म न हि ध्रुवं स्यात् ॥ १०

तदद्य पर्यापततीव मेऽस्त्रम्
उपस्थितेऽस्मिंस्तुमुले विमर्दे ।
ध्रुवं कुरूणामयमन्तकालो
महाभयश्शोणितौघप्रवाही ॥ ११

ध्रुवः क्षयः क्षत्रियपुङ्गवानां
महाभयोऽयं समुपस्थितोऽद्य ।
अस्त्रं हि मे न प्रतिभामुपैति
येन क्षयं शत्रुगणान् नयिष्ये ॥ १२

तस्मात् तदासाद्य मद्रराज
दिव्यं धनुर्यस्य महेषवश्च ।
अस्त्राणि दिव्यानि च सन्ति यस्मिन्
तस्मिन् रथं प्रापय शीघ्रमद्य ॥ १२

श्रोष्यन्तीमं कथ्यमानं विचित्रं
यावद्भूमौ भवितारो मनुष्याः ॥ १३॥

शल्योऽप्रधन्वानमहं वरिष्ठं
तरस्विनं भीममसह्यवीर्यम् ।
सत्यप्रतिज्ञं युधि पाण्डवेयं
धनञ्जयं मृत्युवशं नयिष्ये ॥ १४॥

अपांपतिर्वेगवानप्रमेयो
निमज्जयिष्यन् बहुलाः प्रजा इव ।
महारवं यः कुरुते समुद्रो
वेलेव तं वारयाम्यप्रमेयम् ॥ १५॥

प्रमुञ्चन्तं बाणसङ्घानमोघान्
मर्मच्छिदः प्रवरान् कङ्कपत्रान् ।
कुन्तीपुत्रं प्रतियोत्स्यामि युद्धे
ज्याकर्षिणामुत्तमं मर्त्यलोके ॥ १६॥

एवं बलेनातिबलं महास्त्रं
समुद्रकल्पं सुदुरापमुग्रम् ।
शरौघिणं पार्थिवान् मज्जयन्तं
वेलेव पार्थमिषुभिर्वारयिष्ये ॥ १७॥

कृती कृतास्त्रो दृढहस्तयोधी
दिव्यास्त्रविच्छ्वेतहयः प्रमाथी ।
सुरासुरान् युधि वै यो जयेत
तेनाद्य मे पश्य युद्धं सुघोरम् ॥ १८॥

अभीमानी पाण्डवो युद्धकामो
योऽमानुषैरस्यति मां महास्त्रैः ।
तस्यास्त्रमस्त्रैरभिभूय सङ्ख्ये
बाणोत्तमैः पातयिष्यामि पार्थम् ॥ १९॥

सहस्ररश्मिप्रतिमं ज्वलन्तं
दिशश्च सर्वाः प्रतपन्तमुग्रम् ।
तमोनुदं मेघ इवातिमात्रो
धनञ्जयं छादयिष्यामि बाणैः ॥ २०॥

वैश्वानरं धूमकेतुं ज्वलन्तं
तेजस्विनं नरवीरान् दहन्तम् ।

पर्जन्यभूतश्शरवर्षैर्यथाऽग्निं
निर्वापयिष्यामि रणे हि पार्थम् ॥ २१॥

आशीविषं दृष्टिविषं सुघोरं
सुतीक्ष्णदंष्ट्रं ज्वलनप्रभावम् ।
क्रोधात् प्रदीप्तानलवद्दहन्तं
कुन्तीसुतं शमयिष्यामि भल्लैः ॥ २२॥

प्रवाहिणं बलवन्तं महौजसं
प्रभञ्जनं मातरिश्वानमुग्रम् ।
युद्धे सहिष्ये हिमवानिवाचलः
क्रोधोद्धतं पार्थममृष्यमाणम् ॥ २३॥

विशारदं रथमार्गेष्वसक्तं
धुर्यं नित्यं समरेषु प्रवीरम् ।
लोके वरं सर्वधनुर्धराणां
धनञ्जयं समरेऽहं हनिष्ये ॥ २४॥

अद्याहवे यस्य न तुल्यमन्यं
मन्ये मनुष्यं धनुराददानम् ।
सर्वामिमां यः पृथिवीं सहेत
तथाऽपि तेनाद्य रणे समेष्ये ॥ २५॥

यस्सर्वभूतानि सदैवतानि
प्रस्थेऽजयत् खाण्डवे सव्यसाची ।
को जीवितं रक्षमाणो हि तेन
युयुत्सतेऽस्त्रैर्मानुषैर्मामृतेऽन्यः ॥ २६॥

मानी दृढास्त्रः कृतहस्तयोधी
दिव्यास्त्रविच्छ्वेतहयः प्रमाथी ।
तस्याहमद्यातिरथस्य कायाच्
छिरो हरिष्यामि शितैः पृषत्कैः ॥ २७॥

योत्स्याम्यहं शल्य धनञ्जयेन
मृत्युं पुरस्कृत्य रणे जयं वा ।
अन्यो हि नास्त्येकरथो न मत्तो
युध्येत यः पाण्डवमिन्द्रकल्पम् ॥ २८॥

तस्याहवे पौरुषं पाण्डवस्य
ब्रूयाः पृष्टस्समितौ क्षत्रियाणाम् ।
किं त्वं मूर्खः प्रसभं मूढचेता
आख्यासि मे पौरुषमर्जुनस्य ॥ २९॥

अत्यप्रियो यः पुरुषो नीचकर्मा
क्षुद्रः क्षेप्ता क्षमिणामक्षमावान् ।

हन्यामहं त्वादृशानां शतानि
क्षमामि त्वा क्षमिणां काल एषः ॥ ३०॥

अवोचस्त्वं पाण्डवार्थेऽप्रियाणि
प्रधर्षयन् मूढवत् पापकर्मा ।
मय्यार्जवे जिह्ममतिर्यतस्त्वं
मित्रद्रोही साम्नपदं हि मित्रम् ॥ ३१॥

कालस्त्वयं प्रत्युपयाति दारुणो
दुर्योधनो युद्धमुपागमद्यत् ।
तस्यार्थसिद्धिमभिकाङ्क्षमाणस्
तमन्वेष्ये यत्र चैकान्तमस्ति ॥ ३२॥

[1]तथाऽप्यहं पाण्डववासुदेवौ
योत्स्ये रणे मद्विधस्यैव कर्म ।
न प्राकृतस्सज्जते वै कदाचिद्
यः प्रत्युदीयात् कृष्णधनञ्जयौ तौ ॥ ३३॥

मित्रं मिधेर्नन्दतेः प्रीयतेर्वा
सन्त्रायतेर्मन्यतेर्मोदतेर्वा ।
ब्रवीमि ते सर्वमिदं ममास्ति
तच्चापि सर्वं मम वेत्ति राजा ॥ ३४॥

1. क-ख-ङ—कोशेष्वेव सप्तार्धानि वर्तन्ते

तस्माद्बिभेमि बलवद् ब्राह्मणव्याहृतादहम् ।
एते हि सोमराजान ईश्वरास्सुखदुःखयोः ॥ ५

कदाचिद्ब्राह्मणस्याथ योग्यहेतेरहं नृप ।
अजानन्नक्षिपं बाणं घोररूपं भयावहम् ॥ ६

होमधेन्वास्ततो वत्सः प्रमत्त इषुणा हतः ।
चरन् वै विजने शल्य ततो मां व्याजहार सः ॥ ७

ब्राह्मणः—

यस्माद्वत्सस्त्वया चात्र होमधेन्वा हतो नृप ।
तस्मात् त्वमपि राधेय वाक्शल्यं महदाप्नुहि ॥ ८

श्वभ्रे ते पतिता चक्रं युध्यमानस्य शत्रुणा ।
प्राप्त एकायने काले मृत्युसाधारणे त्वयि ॥ ९

स्पर्धसे येन सङ्ग्रामे यदर्थं घटसेऽनिशम् ।
तत एव ध्रुवं मृत्युं सूत प्राप्स्यसि संयुगे ॥ १०

कर्णः—

अहं प्रसादयाञ्चक्रे ब्राह्मणं संशितव्रतम् ॥ १०॥

गवां दशशतं वित्तं बलीवर्दांश्च षट्शतम् ।
प्रयच्छन् नालभं कामं ब्राह्मणात् तमहं तदा ॥ ११॥

दासीशतं निष्ककण्ठं शतमश्वतरीरथान् ।
कन्यानां निष्ककण्ठीनां सहस्रं समलङ्कृतम् ॥ १२॥

ईषादन्तान् सप्तशतान् दासीर्दशशतानि च ।

ददतो द्विजमुख्यो मे प्रसादं न चकार वै ॥ १३॥
कृष्णानां श्वेतवत्सानां गोशतानि चतुर्दश ।
अददं न लभे तस्मात् प्रसादं द्विजसत्तमात् ॥ १४॥
यत् किञ्चिन्मामकं वित्तं त्वदधीनं करोमि तत् ।
इति मां याचमानं वै ब्राह्मणः प्रत्यवारयत् ॥ १५॥

ब्राह्मणः—

क्रोधदीप्तेक्षणश्शल्य निर्दहन्निव चक्षुषा ॥ १६
यन्मया व्याहृतं सूत तत् तथा न तदन्यथा ।
अनृतोक्तं प्रजा हन्यात् ततः पापमवाप्नुयाम् ॥ १७
तस्माद्धर्माभिरक्षार्थं नानृतं वक्तुमुत्सहे ।
मा त्वं ब्राह्मणगर्ह्यस्याः प्रायश्चित्तं कृतं त्वया ॥ १८
नैतत् तदनृतं कुर्यात् सर्वलोकोऽपि सूतज ।
यन्मयोक्तं सरोषेण गच्छ सूतज मा चिरम् ॥ १९

कर्णः—

इति मामसकृत् क्रुद्धस् स उवाच द्विजोत्तमः ॥ १९॥
एते हि सोमराजेन ईश्वरास्सुखदुःखयोः ॥ २०
नाहं बिभेमि बीभत्सोर् न शल्य मधुसूदनात् ।
तस्माद्बिभेम्यहं शापात् तेन सत्येन ते शपे ॥ २१
सह युद्धं समेताभ्याम् अद्येदं समुपस्थितम् ।
युद्धेऽस्मिञ्जीवितं मेऽद्य शल्ये संशयमागतम् ॥ २२

शक्रोऽप्यमरराट् ताभ्याम् उपगम्याहवं सह ।
संशयं परमं गच्छेत् कथं वा मन्यते भवान् ॥ २३
इत्येवं ते मयाऽऽख्यातं क्षिप्तेन च सुहृत्तया ।
जानामि त्वाऽधिक्षिपन्तं दोषमात्मगतं शृणु ॥ २४

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि षट्त्रिंशोऽध्यायः ॥ ३६ ॥
॥ ७३ ॥ कर्णपर्वणि षट्त्रिंशोऽध्यायः ॥ ३६ ॥
[अस्मिन्नध्याये २४ श्लोकाः]

॥ सप्तत्रिंशोऽध्यायः ॥

कर्णेन सोपहासं शल्यगर्हणम् ॥

सञ्जयः—
ततः पुनर्महाराज मद्रराजमरिन्दमम् ।
अभ्यभाषत राधेयस् संनिवार्योत्तरं वचः ॥ १

कर्णः—
निदर्शनार्थं शल्य त्वं यत् तु जल्पितवानसि ।
नाहं शक्यस्त्वया वाचा विभीषयितुमाहवे ॥ २
यदि मां देवतास्सर्वा योधयेयुस्समागताः ।
ततोऽपि मे भयं न स्यात् किमु पार्थात् सकेशवात् ॥ ३
नाहं भीषयितुं शक्यश् शुद्धकर्माऽहमाहवे ।

अभिजानीहि शक्तस्त्वम् अन्यं भीषयितुं रणे ॥ ४

नीचस्य बलमेतावत् परुषं यत् त्वमात्थ माम् ।
अशक्तो हि गुणान् वक्तुं वल्गसे बहु दुर्मते ॥ ५

न हि कर्णस्समुद्भूतो भयार्थमिह मारिष ।
विक्रमार्थमहं जातो यशोर्थं च तथैव हि ॥ ६

सखिभावेन सौहार्दान्मित्रभावेन चैव हि ।
कारणैस्त्रिभिरेतैस्त्वं शल्य जीवसि साम्प्रतम् ॥ ७

[1]राज्ञश्च धार्तराष्ट्रस्य कार्यं हि महदुद्यतम् ।
मयि तच्चाहितं शल्य तेन जीवसि मे क्षणम् ॥ ८

कृतश्च समयः पूर्वं क्षन्तव्यं विप्रियं तव ।
समयः परिपाल्यो मे तेन जीवसि साम्प्रतम् ॥ ९

ऋते शल्यसहस्रेण विजयेयमहं परान् ।
[2]मित्रद्रोहस्तु पापीयान् इति जीवसि मद्रक ॥ १०

शल्यः—

आर्तप्रलापांस्त्वं कर्ण यान् ब्रवीषि परान् प्रति ।
न ते कर्णसहस्रेण शक्या जेतुं परे युधि ॥ ११

---

1. क-ङ—कोशयोरेवेदमर्धंचतुष्टयं वर्तते
2. घ—राज्ञश्च धार्तराष्ट्रस्य कार्यं हि महदुद्यतम् ।
मयि तच्चाहितं शल्य तेन जीवसि मे क्षणम् ॥
[अस्तवर्तेतेऽधिकः पाठः]

सञ्जयः—

तथा ब्रुवन्तं परुषं शल्यं वैकर्तनस्तदा ।
परुषं द्विगुणं भूयः प्रोवाचाप्रियवादिनम् ॥ १२

कर्णः—

इदं त्वमेकाग्रमनाश् शृणु मद्रजनाधिप ।
सन्निधौ धृतराष्ट्रस्य प्रोच्यमानं मया श्रुतम् ॥ १३

देशांश्च विविधांश्चित्रान् पूर्ववृत्तांश्च पार्थिवान् ।
ब्राह्मणाः कथयन्ति स्म धृतराष्ट्रसमीपतः ॥ १४

तत्र वृद्धः पुरावृत्ताः कथाः कश्चिद्द्विजोत्तमः ।
बाह्लीकदेशान् मद्रांश्च कुत्सयन् वाक्यमब्रवीत् ॥ १५

ब्राह्मणः—

बहिष्कृता हिमवता गङ्गया च तिरस्कृताः ।
सरस्वत्या यमुनया कुरुक्षेत्रेण चापि ये ॥ १६

पञ्चानां सिन्धुषष्ठानां नदीनामुत्तराश्रिताः ।
तान् धर्मबाह्यानशुचीन् बाह्लीकान् परिवर्जयेत् ॥ १७

[1]पटच्चरं नाम वटं सुभाण्डं नाम पत्तनम् ।
एतद्राजकुलद्वारम् आकुमारात् स्मराम्यहम् ॥ १८

कार्येणात्यर्थगाढेन बाह्लीकेषूषितं मया ।
तत एषां समाचारस् समासाद्विदितो मया ॥ १९

1. घ-ङ—गोवर्धनो नाम वटः क—गोवर्धनंनाम वटः पट्टणम्

शाकलं नाम नगरम् अनापगमनिम्नगम् ।
चण्डाला नाम बाह्लीकास् तेषां वृत्तं सुनिन्दितम् ॥ २०

पानं गुडासवं पीत्वा गोमांसं लशुनैस्सह ।
अपूपसक्तुमद्यानाम् आशिताश्शीलवर्जिताः ॥ २१

हसन्ति गान्ति नृत्यन्ति स्त्रीभिर्मत्ता विवाससः ।
नगरापणवेशेषु बहिर्माल्यानुलेपनाः ॥ २२

मत्तापगीतविरुतैः खरोष्ट्रनिनदोपमैः ।
सुरामैरेयपुष्टाश्च सर्वे नग्ना मदोत्कटाः ॥ २३

हेहते हेहतेत्येवं स्वामिभर्तृहतेति च ।
आक्रोशन्तः प्रनृत्यन्ति सर्वे सर्वा मदोत्कटाः ॥ २४

तेषां मदावलिप्तानां निवसन् कुरुजाङ्गले ।
कश्चिद्बाह्लीकमत्तानां नातिहृष्टमना जगौ ॥ २५

सा नूनं बृहती गौरी मत्ता कम्बलवासिनी ।
मामनुस्मरती शेते बाह्लीकी कुरुवासिनम् ॥ २६

शतद्रुं तरसा तीर्त्वा चन्द्रभागामिरावतीम् ।
गत्वा स्वदेशं द्रक्ष्यामि स्थूलजङ्घाश्शुभास्स्त्रियः ॥ २७

मनश्शिलोज्ज्वलापाङ्ग्यो गौर्यस्ताः काककुञ्जकाः ।
कम्बलाजिनसंवीता रुदन्त्यः प्रियदर्शनाः ॥ २८

मृदङ्गानां च शङ्खानां पटहानां च निस्स्वनैः ।

खरोष्ट्राश्वतरीयानैः कथं यास्यामहे सुखम् ॥ २९

शमीपीलुकरीराणां वनेषु शुभवर्त्मसु ।
अपूपान् सक्तुपिण्डांश्च प्राश्नन्तो मदिरान्विताः ॥ ३०

पथिषु प्रबला भूत्वा तथा सम्पततोऽध्वगान् ।
चेलापहारं कुर्वाणास् ताडयिष्याम भूयशः ॥ ३१

एवंशीलेषु व्रात्येषु बाह्लीकेषु दुरात्मसु ।
कश्चेतयानो निवसेन्मुहूर्तमपि मानवः ॥ ३२

कर्णः—

ईदृशा ब्राह्मणेनोक्ता बाह्लीका मोघचारिणः ।
येषां षड्भागहर्ता त्वम् उभयोः पुण्यपापयोः ॥ ३३

इत्युक्त्वा ब्राह्मणस्साधुर् उत्तरं पुनरब्रवीत् ।
बाह्लीकेष्वविनीतेषु प्रोच्यमानं निबोध तत् ॥ ३४

ब्राह्मणः—

तत्र स्म राक्षसी गाति सदा कृष्णचतुर्दशीम् ।
शाकले नगरे स्फीते आहत्य निशि दुन्दुभिम् ॥ ३५

कथं वा तादृशा गाथाः पुनर्गास्यामि शाकले ।
गव्यस्य तृप्ता मांसस्य पीत्वा गौडं वरासवम् ॥ ३६

गौरीभिस्सह नारीभिर् बृहतीभिस्स्वलङ्कृताः ।
पलाण्डुगण्डूषयुतान् खादन्तश्चेलुकान् बहून् ॥ ३७

वाराहं कौक्कुटं मांसं गव्यं गार्दभमौष्ट्रकम् ।
धानाश्च ये न खादन्ति तेषां जन्म निरर्थकम् ॥ ३८

कर्णः—

एवं गायन्ति ये मत्ताश् शीधुना पीलुकावने ।
सबालवृद्धाः क्रन्दन्ति तेषां धर्मः कथं भवेत् ॥ ३९

यत्र लोकेश्वरः कृष्णो देवदेवो जनार्दनः ।
विस्मृतः पुरुषैरुग्रैस् तेषां धर्मः कथं भवेत् ॥ ४०

इति शल्य विजानीहि हन्त भूयो ब्रवीमि ते ॥ ४०॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि सप्तत्रिंशोऽध्यायः ॥ ३७ ॥
॥ ७३ ॥ कर्णपर्वणि सप्तत्रिंशोऽध्यायः ॥ ३७ ॥
[अस्मिन्नध्याये ४०॥ श्लोकाः]

॥ अष्टात्रिंशोऽध्यायः ॥

कर्णेन शल्यदेशगर्हणम् ॥

कर्णः—

यदन्योऽप्युक्तवांस्तत्रा ब्राह्मणः कुरुसंसदि ॥ ॥
पञ्च नद्यो वहन्त्येता यत्र पीलुवनान्युत ॥ १
शतद्रूश्च विपाशा च तृतीयैरावती तथा ।
चन्द्रभागा वितस्ता च सिन्धुषष्ठा महानदी ॥ २

आरट्टा नाम बाह्लीका एतेष्वार्यो हि नो वसेत् ॥ २॥

व्रात्यानां निन्दनीयानां विदेहानामयज्वनाम् ।
न देवाः प्रतिगृह्णन्ति पितरो ब्राह्मणास्तथा ॥ ३॥

तेषां प्रनष्टधर्माणां बाह्लीकानामिति श्रुतिः ।
ब्राह्मणेन यथा प्रोक्तं विदुषा साधुसंसदि ॥ ४॥

काष्ठकुण्डेषु बाह्लीका मृण्मयेषु च भुञ्जते ।
सक्तुमद्यावलिप्तेषु श्वावलीढेषु निर्घृणाः ॥ ५॥

आविकं चौष्ट्रिकं चैव क्षीरं गार्दभमेव च ।
तद्विकारांश्च बाह्लीकाः खादन्ति च पिबन्ति च ॥ ६॥

पात्रसङ्करिणो जाल्मास् सर्वान्नक्षीरभोजनाः ।
आरट्टा नाम बाह्लीका वर्जनीया विपश्चिताम् ॥ ७॥

इति शल्य विजानीहि हन्त भूयो ब्रवीमि ते ।
यदन्योऽप्युक्तवान् वाक्यं ब्राह्मणः कुरुसंसदि ॥ ८॥

युगन्धरे पयः पीत्वा प्रोष्य चाप्यच्युतस्थले ।
तद्वद्भूतिपथे स्नात्वा कथं स्वर्गं गमिष्यति ॥ ९॥

पञ्च नद्यो वहन्त्येता यत्र निस्सृत्य पर्वतान् ।
आरट्टा नाम बाह्लीका न तेष्वार्योऽवतिष्ठते ॥ १०॥

बाह्लीका नाम भीकश्च पिशाची च पिशाचकः ।
तयोरपत्यं बाह्लीका नैषा सृष्टिः प्रजापतेः ॥ ११॥

ते कथं विविधान् धर्मान् ज्ञास्यन्ते हीनयोनयः ॥ १२

कारस्करान् माहिषकान् करम्भान् कीकटान् शकान् ।
कर्करान् वीरकाश्मन्तान् उन्मार्गांश्च विवर्जयेत् ॥ १३

इति तीर्थानुसञ्चारा राक्षसी काचिदब्रवीत् ।
एकरात्रमुषित्वेह महोलूखलमेखला ॥ १४

आरट्टा नाम ते देशा बाह्लीकं नाम तद्वनम् ।
वसातिसिन्धुसौवीरा इति प्रायोहि कुत्सिताः ॥ १५

इति शल्य विजानीहि हन्त भूयो ब्रवीमि ते ।
उच्यमानं मया सम्यक् त्वं ह्येकाग्रमनाश्शृणु ॥ १६

ब्राह्मणः किल नो गेहम् अभ्यागच्छत् पुराऽतिथिः ।
आचारं तत्र सम्प्रेक्ष्य प्रीतो वचनमब्रवीत् ॥ १७

ब्राह्मणः—

मया हिमवतश्शृङ्गे एकेनाध्युषितं चिरम् ।
दृष्टाश्च बहवो देशा नानाधर्मसमावृताः ॥ १८

न च केन च धर्मेण विरुध्यन्त इमाः प्रजाः ।
सर्वांश्चाप्यवदद्धर्मान् यथोक्तं वेदपारगैः ॥ १९

अटता तु मया देशान् नानाधर्मसमाकुलान् ।
आगच्छता महाराज बाह्लीकेषु निशामितम् ॥ २०

तत्र वै ब्राह्मणो भूत्वा पुनर्भवति क्षत्रियः ।

वैश्यश्शूद्रश्च बाह्लीकस् ततो भवति नापितः ॥ २१

नापितश्च ततो भूत्वा पुनर्भवति ब्राह्मणः ।
द्विजो भूत्वा हि तत्रैव पुनर्दासोऽपि जायते ॥ २२

भवन्त्येककुला विप्राश् शिष्टा ये ब्रह्मचारिणः ।
गान्धारका मद्रकाश्च बाह्लीकाश्चाप्यचेतसः ॥ २३

एवं श्रुतं मया तत्र धर्मसङ्करकारकम् ।
कृत्स्नामटित्वा पृथिवीं बाह्लीकेषु विपर्ययः ॥ २४

कर्णः—

इति शल्य विजानीहि हन्त भूयो ब्रवीमि ते ।
यदप्यन्योऽब्रवीद्वाक्यं बाह्लीकानां विकुत्सितम् ॥ २५

आनीयेहाक्षता काचिद् आरट्टे किल दस्युभिः ।
अधर्मतश्चोपयाता सा तानभ्यशपत् ततः ॥ २६

स्त्री—

बालां बन्धुमतीं यन्माम् अधर्मेणोपगच्छथ ।
तस्मात् कुमार्यस्स्वैरिण्यो भविष्यन्ति कुलेषु वः ॥ २७

नैव तस्माद्विमोक्ष्यध्वं घोराच्छापान्नराधमाः ॥ २७॥

कर्णः—

तस्मात् तेषां भागहरः कथं धर्मान् वदिष्यसि ॥ २८

कुरवस्सहपाञ्चालास् साल्वा मात्स्याश्च नैमिशाः ।
कौसलाः काशयश्चैव कालिङ्गा मागधास्तथा ॥ २९

चेदयश्च महाभागा धर्मं जानन्ति शाश्वतम् ।
नानादेशेषु सन्तश्च प्रायो बाह्यालयादृते ॥ ३०

आमत्स्येभ्यः कुरुपाञ्चालसाल्वैस्
ते नैमिशाश्चेदयो ये विशिष्टाः ।
धर्मं पुराणमुपजीवन्ति सन्तो
मद्रानृते पाञ्चनदांश्च जिह्मान् ॥ ३१

एवं जानन् धर्मकथासु नित्यं
तूष्णींभूतश्शल्य भवेस्सदा त्वम् ।
त्वं तस्य गोप्ता च जनस्य राजा
षड्भागहर्ता शुभदुष्कृतस्य ॥ ३२

अथवा दुष्कृतानि त्वं हर्ता तेषामरक्षिता ।
रक्षिता पुण्यभाग्राजा प्रजानां त्वं तु पापभाक् ॥ ३३

पूज्यमाने तथा धर्मे सर्वदेशेषु शाश्वते ।
धर्मं पाञ्चनदं श्रुत्वा धिगित्याह पितामहः ॥ ३४

व्रात्यानां दाशमीयानां कृतेऽप्यशुभकारिणाम् ।
ब्रह्मणा गर्हितान् सर्वान् कश्चित् सिद्धात्मकोऽब्रवीत् ॥ ३५

इति पाञ्चनदान् धर्मान् अवमेने पितामहः ।
स्वधर्मस्थेषु वर्णेषु सोऽप्येनान नात्यपूजयत् ॥ ३६

इति शल्य विजानीहि हन्त भूयो ब्रवीमि ते ॥ ३६॥

कल्माषपादस्सरसि निमज्जन् राक्षसोऽब्रवीत् ॥ ३७

क्षत्रियस्य मलं भैक्षं ब्राह्मणस्याश्रुतं मलम् ।
मलं पृथिव्या बाह्लीकास् स्त्रीणां कौतूहलं मलम् ॥ ३८

निमज्जमानमुद्धृत्य कश्चिद्राजा निशाचरम् ।
अपृच्छत् तेन चाख्यातं तच्छृणुष्व नराधिप ॥ ३९

मानुषाणां मलं म्लेच्छा म्लेच्छानां मुष्टिका मलम् ।
मुष्टिकानां मलं षण्ढाष् षण्ढानां राजयाजकाः ॥ ४०

राजयाजकयाज्यानां मद्रकाणां च यन्मलम् ।
तद्भूवेद्वै तव मलं यद्यस्मान्न विमुञ्चसि ॥ ४१

इति रक्षोपसृष्टेषु विषवीर्यहतेषु च ।
विद्वद्भिर्भेषजं दृष्टं संसिद्धं वचनोत्तरम् ॥ ४२

ब्राह्माः पाञ्चालाः कौरवैयाश्च धर्म्यास्
सत्या मत्स्याश्शूरसेनास्तु याज्याः ।
प्राच्या दासा वृषला दाक्षिणात्यास्
स्तेना बाह्लीकास्सङ्करा वै सुराष्ट्राः ॥ ४३

कृतघ्ना वै परवित्तापहारा
मत्ताः पानैर्गुरुदारावमर्दाः ।

येषां धर्मस्तान् प्रति नास्ति धर्म
आरट्टजान् पाञ्चनदान् धिगस्तु ॥ ४४

आपाञ्चालाः कुरवो नैमिशाश्च
मत्स्याश्चैवाप्यनुजानन्ति धर्मम् ।
अथोदीच्याश्चेदयो मागधाश्च
शिष्टान् धर्मानुपजीवन्ति वृद्धाः ॥ ४५

प्राचीं दिशं श्रिता देवा जातवेदःपुरोगमाः ।
दक्षिणा पितृभिर्गुप्ता यमेन शुभकर्मणा ॥ ४६

प्रतीचीं वरुणः पाति पालयन्नसुरान् बहून् ।
उदीचीं भगवान्त्सोमो ब्रह्मा च ब्राह्मणैस्सह ॥ ४७

रक्षःपिशाचान् हिमवान् गुह्यकान् गन्धमादनः ।
ध्रुवं सर्वाणि भूतानि विष्णुः पाति सुरोत्तमः ॥ ४८

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि अष्टात्रिंशोऽध्यायः ॥ ३८ ॥
॥ ७३ ॥ कर्णपर्वणि अष्टात्रिंशोऽध्यायः ॥ ३८ ॥
[अस्मिन्नध्याये ४८ श्लोकाः]

॥ एकोनचत्वारिंशोऽध्यायः ॥

शल्यकर्णयोः कलहः ॥ १ ॥ दुर्योधनेन तयोस्सान्त्वनम् ॥ २ ॥

कर्णः—

इङ्गितज्ञास्तु मगधाः प्रेक्षितज्ञास्तु कोसलाः ।
अर्धोक्ताः कुरुपाञ्चालास् सर्वोक्ता दाक्षिणापथाः ॥ १

पार्वतीयास्तु विषमा यथैव गिरयस्तथा ।
सर्वज्ञा यवना राजञ् शूराश्चैव विशेषतः ॥ २

म्लेच्छास्त्वसंज्ञानिरता नानुक्तमितरे जनाः ।
प्रतिरब्धास्तु बाह्लीका न च केचन मद्रकाः ॥ ३

स त्वमेतादृशश्शल्य मा ब्रूया वाक्यमुत्तरम् ॥ ३॥

एवं ज्ञात्वा जोषमास्व त्वमद्य
मा स्म क्रुधः पापभृतां वरिष्ठ ।
पूर्वं हत्वा त्वां सपुत्रं बलैश्च
पश्चाद्धंस्ये वासुदेवार्जुनौ च ॥ ४॥

शल्यः—

आतुराणां परित्यागस् स्वदाराणां च विक्रयः ।
तान् विदित्वाऽऽत्मनो दोषान् निर्मन्युर्भव मा क्रुधः ॥ ५॥

अङ्गेषु वर्तते कर्ण येषामधिपतिर्भवान् ॥ ६

रथातिरथसङ्ख्यायां यत् त्वां भीष्मस्तथोचिवान् ॥ ६॥

सर्वत्र ब्राह्मणास्सन्ति क्षत्रियास्सन्ति सर्वशः ।
वैश्याश्शूद्रास्तथा कर्ण स्त्रियस्सत्यश्च सुव्रताः॥ ७॥

रमन्ते चोपहासेन पुरुषाः पुरुषैस्सह ।
[1]अन्योन्येन मदक्षीबा देशे देशे च मैथुनम् ॥ ८॥

परवाच्येषु निपुणस् सर्वो भवति सर्वदा ।
आत्मवाच्यं न जानाति जानन्नपि स मुह्यते ॥ ९॥

[2]सर्वत्र सन्ति राजानस् स्वं स्वं धर्ममनुव्रताः ।
दुर्मनुष्यान् निगृह्णन्तस् सन्ति सर्वत्र धार्मिकाः ॥ १०॥

न कर्ण देशसामान्यात् सर्वः पापं निषेवते ।
यादृशास्तु स्वभावेन देवास्तांस्तादृशान् विदुः ॥ ११॥

सञ्जयः—

ततो दुर्योधनो राजा कर्णशल्याववारयत् ।
सखिभावेन राधेयं शल्यं सौजन्यकेन च ॥ १२॥

ततो निवारितः कर्णो धार्तराष्ट्रेण मारिष ।
प्रहस्य तत्र राजेन्द्र याहि शल्येत्यचोदयत् ॥ १३॥

ततः प्रयान्तं राधेयं मद्रराजस्स्मयन्निव ।
अवधूय इदं वाक्यम् अब्रवीत् कुरुसन्निधौ ॥ १४॥

---

1. ख—इदमर्धं नास्ति 2. अ-ख—नास्तीदमर्धम्

शल्यः—

चमूं तवेमां विपुलं समृद्धाम्
असङ्ख्येयामश्वनराकुलां च ।
तथा प्रवेष्टा समरे धनञ्जयः
कक्षं दहन् दीप्त इवाश्रयाशी ॥ १५॥

रथे स्थितौ वीरवरौ वरेण्यौ
सिंहस्कन्धौ लोहितपद्मनेत्रौ ।
द्रष्टा भवानद्य विना प्रयत्नात्
तथाहीमे शकुना वेदयन्ति ॥ १६॥

अद्य द्रष्टाऽसि तं वीरं श्वेताश्वं कृष्णसारथिम् ।
निघ्नन्तं शात्रवान् सङ्ख्ये यं कर्ण परिपृच्छसि ॥ १७॥

अद्य तौ पुरुषव्याघ्रौ लोहिताक्षौ परन्तपौ ।
वासुदेवार्जुनौ कर्ण द्रष्टाऽस्यमितविक्रमौ ॥ १८॥

सारथिर्यस्य गोविन्दो गाण्डीवं यस्य कार्मुकम् ।
तं चेद्धन्तासि राधेय त्वं नो राजा भविष्यसि ॥ १९॥

प्रवात्येष महावायुर् अभितस्तव वाहिनीम् ।
क्रव्यादा व्याहरन्त्येते मृगाः कुर्वन्ति भैरवम् ॥ २०॥

पश्य कर्ण महाघोरं भयं वै रोमहर्षणम् ।
अर्कं जीमूतसङ्काशः कबन्धो वार्य तिष्ठति ॥ २१॥

पश्य यूथं बहुशतं मृगाणां सर्वतोदिशम् ।

ररास दीप्तलाङ्गूलम् आदित्यमभितस्थितम् ॥ २२॥

पश्य काकांश्च गृध्रांश्च समवेतान् सहस्रशः ।
[1]आदित्यमभिवीक्षन्ते ह्याशिवाः कर्ण सस्वराः ॥ २३॥

श्वेतवाजिसमायुक्ते तव कर्ण महारथे ।
पताकाः प्रज्वलन्त्येता ध्वजश्चातीव कम्पते ॥ २४॥

सवेपथून् हयान् पश्य महाकायान् मनोजवान् ।
प्लवमानान् महावीर्यान् आकाशे गरुडानिव ॥ २५॥

ध्रुवमेषु निमित्तेषु भूमिमावृत्य पार्थिवाः ।
स्वप्स्यन्ति निहताः कर्ण शतशोऽथ सहस्रशः ॥ २६॥

शङ्खानां तुमुलश्शब्दश् श्रूयते रोमहर्षणः ।
आनकानां च राधेय मृदङ्गानां च हन्यताम् ॥ २७॥

शृणु शब्दान् बहुविधान् नराश्वरथदन्तिनाम् ।
ज्यातलत्रेषुशब्दांश्च शृणु कर्ण महात्मनाम् ॥ २८॥

हेमरूप्यप्रमृष्टानां वाससां शिल्पिनिर्मिताः ।
सहेमचन्द्रताराभाः पताकाः किङ्किणीयुताः ॥ २९॥

नानावर्णा रणे भान्ति श्वसनेन प्रकम्पिताः ।
पश्य कर्णार्जुनस्यैतास् सौदामिन्य इवाम्बुदे ॥ ३०॥

ध्वजाः कणकणायन्ते वातेनातिसमीरिताः ।
सपताका रथाश्चापि पाञ्चालानां महात्मनाम् ॥ ३१॥

एष रेणुस्समुद्भूतो दिवमावृत्य तिष्ठति ।
गजवाजिप्रणुन्ना च कम्पते कर्ण मेदिनी ॥ ३२॥

श्रूयते मेघसङ्काशो रथनेमिस्वनस्तथा ।
पश्य कुन्तीसुतं वीरं बीभत्सुमपराजितम् ॥ ३३॥

प्रहरिष्यन्तमायान्तं कपिप्रवरकेतनम् ॥ ३४

रथाश्वगजपत्त्योघांस् तावकान् युधि निघ्नतः ।
ध्वजाग्रं दृश्यते ह्यस्य ज्याशब्दश्चैव श्रूयते ॥ ३५

एष संशप्तकाहूतस् तानेवाभिमुखो गतः ।
करोति कदनं चैष सङ्ग्रामे द्विषतां बली ॥ ३६

सञ्जयः—

इति ब्रुवाणं मद्रेशं कर्णः प्रोवाच मन्युमान् ॥ ३६॥

कर्णः—

पश्य संशप्तकैः क्रुद्धैस् समन्तात् समभिद्रुतम् ।
एष सूर्य इवाम्भोदैश् छन्नः पार्थो न दृश्यते ॥ ३७॥

एष दान्तोऽर्जुनश्शल्य निमग्नश्शोकसागरे ॥ ३८

शल्यः—

वरुणं कोऽम्भसा हन्याद् इन्धनेन च कोऽनलम् ।
को वाऽनिलं निगृह्णीयात् पिबेद्वा को महार्णवम् ॥ ३९

ईदृग्रूपमहं मन्ये पार्थस्य युधि निर्जयम् ।
न हि शक्योऽर्जुनो जेतुं युधि देवासुरैरपि ॥ ४०

अथैवं परितोषस्ते वाग्भिस्त्वं सुमना भव ।
न हि शक्यो युधा जेतुम् अन्यं कुरु मनोरथम् ॥ ४१

बाहुभ्यामुद्धरेद्भूमिं दहेत् क्रुद्ध इमाः प्रजाः ।
पातयेत् त्रिदिवाद्देवान् नार्जुनं समरे जयेत् ॥ ४२

पश्य कुन्तीसुतं भीमं वीरमक्लिष्टकारिणम् ।
प्रहसन्तं महाबाहुं स्थितं मेरुमिवाचलम् ॥ ४३

अमर्षी पुरुषव्याघ्रस् सदा वैरमनुस्मरन् ।
एष भीमो जयप्रेप्सुर् युधि तिष्ठति वीर्यवान् ॥ ४४

एष धर्मभृतां श्रेष्ठो धर्मराजो युधिष्ठिरः ।
तिष्ठत्यसुकरस्सङ्ख्ये परैः परपुरञ्जयः ॥ ४५

एतौ च पुरुषव्याघ्रावाश्विनेयौ महारथौ ।
नकुलस्सहदेवश्च तिष्ठतो युधि दुर्जयौ ॥ ४६

एते तिष्ठन्ति वार्ष्णेयाः पञ्च पञ्चाचला इव ।
योत्स्यमाना महावीर्या भीमार्जुनसमा युधि ॥ ४

एते द्रुपदपुत्राश्च धृष्टद्युम्नपुरोगमाः ।
हीनास्सत्यजिता वीरास् तिष्ठन्ति परमौजसः ॥ ४८

यत्र कृष्णार्जुनौ वीरौ यत्र राजा युधिष्ठिरः ।
तत्र धर्मश्च सत्यं च यतो धर्मस्ततो जयः ॥ ४९

सञ्जयः—

इति संवदतोरेवं तयोः पुरुषसिंहयोः ।
ते सेने समसज्जेतां गङ्गायमुनवद्भृशम् ॥ ५०

इति श्रीमद्दाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि एकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥
॥ ७३ ॥ कर्णपर्वणि एकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥
[अस्मिन्नध्याये ५० श्लोकाः]

॥ चत्वारिंशोऽध्यायः ॥

दुर्योधनेन सेनाप्रोत्साहनम् ॥ १ ॥ भीमेन दुर्योधनपराजयपूर्वकं गजानीकवधः ॥ २ ॥

सञ्जयः—

दुर्योधनस्ततः कर्णम् उपेत्य भरतर्षभ ।
अब्रवीन्मद्रराजं च तथैवान्यान् महारथान् ॥ १

दुर्योधनः—

यदृच्छयाऽयमभ्यग्रो धर्मः परमकस्सखा ।
सुखिनः क्षत्रिया[1]श्शल्य लभन्ते युद्धमीदृशम् ॥ २
यादृशं क्षत्रियैश्शूरैश् शूराणां दीव्यतां युधि ।
इष्टं भवति राधेय तदिदं समुपस्थितम् ॥ ३

---

1. क-ङ—कर्णं ध—:पार्थाः

हत्वा तु पाण्डवान् युद्धे स्थिरामुर्वीं प्रशासथ ।
निहता वा परैर्युद्धे वीरलोकानवाप्स्यथ ॥ ४

सञ्जयः—

दुर्योधनस्य वचनं श्रुत्वा तत् क्षत्रियर्षभाः ।
सिंहनादानुदक्रोशन् वादित्राणि च जघ्निरे ॥ ५

तस्मिन् प्रमुदिते सैन्ये त्वदीये भरतर्षभ ।
हर्षयंस्तावकान् योधान् द्रौणिर्वचनमब्रवीत् ॥ ६

अश्वत्थामा—

प्रत्यक्षं सर्वसैन्यानां भवतां चापि पश्यताम् ।
न्यस्तशस्त्रो मम पिता धृष्टद्युम्नेन पातितः ॥ ७

स तेनाहममर्षेण पित्र्यं चापि भारत ।
धृष्टद्युम्नमहत्वाऽहं न विमोक्ष्यामि दंशनम् ॥ ८

कृत्वाऽनृतां प्रतिज्ञां वो नास्मि प्राप्तो महत् फलम् ।
अर्जुनं भीमसेनं च यश्च मां प्रतियोत्स्यति ॥ ९

सर्वांस्तान् प्रमथिष्यामि इति मे निश्चिता मतिः ॥ ९॥

सञ्जयः—

एवमुक्ते ततस्सर्वा हर्षिता भारती चमूः ।
अभ्यवर्तत कौन्तेयांस् तथा तां चापि पाण्डवाः ॥ १०॥

स सन्निपातो रथयूथपानां
महाहवे भारत लोभनीये ।

जनक्षयः कालयुगान्तकल्पः
प्रावर्ततामे कुरुसृञ्जयानाम् ॥ ११॥

ततः प्रवृत्ते युधि सम्प्रहारे
भूतानि सर्वाणि सदैवतानि ।
आसन् समेतानि सहाप्सरोभिर्
[1]निरीक्षतीभिर्युधि वीरसङ्घान् ॥ १२॥

दिव्यैश्च गन्धैः परमैश्च पुष्पैर्
अन्यैश्च रत्नैर्विविधैर्नराढ्यान् ।
रणेषु कर्मोद्वहतः प्रहृष्टान्
अनन्दयन्नप्सरसः प्रहृष्टाः ॥ १३॥

समीरणस्तांस्तु निषेव्य गन्धान्
निषेवते तानपि योधमुख्यान् ।
निषेव्यमाणास्त्वनिलेन योधाः
परस्परं चुक्रुशुराजिमध्ये ॥ १४॥

तथा तु तस्मिंस्तुमुले प्रवृत्ते
दुर्योधनः क्रोधममृष्यमाणः ।
अवेक्ष्य भीमं बलिनं बलस्थस्
समार्पयत् क्षुद्रकाणां शतेन ॥ १५॥

1. ख-घ—निनीषतीभिर

दुश्शासनश्चित्रसेनश्च वीरस्
तथोलूकः कितवस्सौबलश्च ।
गजानीकैस्सर्वतो भीमसेनं
तथा विषक्तं सहसैवाभ्यगच्छन् ॥ १६॥

तमापतन्तं सम्प्रेक्ष्य गजानीकं वृकोदरः ।
दुर्योधनं महाबाहुश् शरवर्षैरवाकिरत् ॥ १७॥

दुर्योधनं ततो भीमस् सायकैश्शतशश्शितैः ।
पाण्डवो विमुखीकृत्य गजानभ्यद्रवद्बली ॥ १८॥

ततः पावकसङ्काशैर् भीमबाणैरवक्रगैः ।
शलभैरिव नागांस्तान् अर्दयामास पाण्डवः ॥ १९॥

ततः कुञ्जरयूथानि भीमसेनो महाबलः ।
व्यधमन्निशितैर्बाणैर् महावातो घनानिव ॥ २०॥

[1]नित्यमत्ताश्च मातङ्गाश् शूरैर्मत्तैरधिष्ठिताः ।
आरोहकैर्महामात्रैस् तोमराङ्कुशपाणिभिः ॥ २१॥

सुवर्णजालैः प्रच्छन्ना मणिजालैश्च कुञ्जराः ।
रूप्यजाम्बूनदाभासाः क्षुरमालाभ्यलङ्कृताः ॥ २२॥

वध्यमानाश्शरै राजन् भीमसेनेन ते गजाः ।

---

1. अ-ख—इत आरभ्य षोडशार्धानि उपरितनाध्याये भिन्नभिन्नस्थलेषु दृश्यन्ते

विभिन्नहृदयाः केचित् तत्रैव ह्यपतन् भुवि ॥ २३॥

निपतद्भिर्महावेगैर् हेमभाण्डविभूषितैः ।
अशोभत महाराज धातुचित्रैरिवाचलैः ॥ २४॥

दीप्ताभरणवद्भिश्च गजपृष्ठान्निपातितैः ।
सङ्गरश्शुशुभे राजन् क्षीणपुण्यैरिवामरैः ॥ २५॥

महापरिघसङ्काशौ चन्दनागरुरूषितौ ।
अपश्यं भीमसेनस्य धनुर्विक्षिपतो भुजौ ॥ २६॥

तस्य ज्यातलनिर्घोषम् अस्यतस्सव्यदक्षिणम् ।
तं श्रुत्वाऽभ्यद्रवन् नागा भीमसेनभयार्दिताः ॥ २७॥

तस्य भीमस्य तत् कर्म राजन्नेकस्य धीमतः ।
अपश्याम महाराज तदद्भुतमिवाभवत् ॥ २८॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि चत्वारिंशोऽध्यायः ॥ ४० ॥
॥ ७२ ॥ कर्णपर्वणि चत्वारिंशोऽध्यायः ॥ ४० ॥
[अस्मिन्नध्याये २८॥ श्लोकाः]

॥ एकचत्वारिंशोऽध्यायः ॥

सेनाद्वये व्यूहरचनावर्णनम् ॥

[1]ततः परानीकमिदं व्यूढमप्रतिमं महत् ।
समीक्ष्य कर्णः पार्थानां धृष्टद्युम्नाभिरक्षितम् ॥ १

प्रययौ रथघोषेण सिंहनादरवेण च ।
वादित्राणां च निनदैः कम्पयन्निव मेदिनीम् ॥ २

वेपमानभुजः क्रोधाद् युद्धशौण्डः प्रतापवान् ।
प्रतिव्यूह्य महातेजा यथावद्भरतर्षभ ॥ ३

व्यधमत् पाण्डवीं सेनाम् आसुरीं मघवानिव ।
युधिष्ठिरं चाभिभवन्नपसव्यं चकार ह ॥ ४

कर्णस्य रथघोषेण मौर्वीनिष्पेषणेन च ।
सङ्ग्राहेण च रश्मीनां समकम्पन्त सृञ्जयाः ॥ ५

तानि सर्वाणि सैन्यानि कर्णं दृष्ट्वा विशां पते ।
बभूवुस्सम्प्रहृष्टानि तावकानि युयुत्सया ॥ ६

अश्रूयन्त ततो वाचस् तावकानां विशां पते ॥ ६॥

सैनिकाः—
कर्णार्जुनमहायुद्धम् एतदद्य भविष्यति ॥ ७

1. अ-ख—अष्टार्धानि न सन्ति

[1]अद्य दुर्योधनो राजा हृतामित्रो भविष्यति ।
अद्य कर्णे रणे दृष्ट्वा फल्गुनो विद्रविष्यति ॥ ८

अद्य तावद्वयं युद्धे कर्णस्यैवानुगामिनः ।
कर्णबाणमयं भीमं युद्धं द्रक्ष्याम संयुगे ॥ ९

चिरकालागतमिदम् अद्येदानीं भविष्यति ।
अद्य द्रक्ष्याम सङ्ग्रामं घोरं दैवासुरोपमम् ॥ १०

अद्येदानीं महद्युद्धं भविष्यति भयानकम् ।
अद्येदानीं जयो नित्यम् एकस्यैकस्य वा रणे ॥ ११

अर्जुनं किल राधेयो वधिष्यति महारणे ।
अथवा कं नरं लोके न स्पृशन्ति मनोरथाः ॥ १२

सञ्जयः—

इत्युक्त्वा विविधा वाचः कुरवः कुरुनन्दन ।
आजघ्नुः पटहांश्चैव तूर्याश्चैव सहस्रशः ॥ १३

भेरीनादांश्च विविधान् सिंहनादांश्च पुष्कलान् ।
मुरजानां महाशब्दान् आनकानां महारवान् ॥ १४

नृत्यमानाश्च बहवस् तर्जमानाश्च मारिष ।
अन्योन्यमभ्ययुर्युद्धे युद्धरङ्गगता नराः ॥ १५

तेषां पदाता नागानां पादरक्षास्समन्ततः ।

---

1. ख—इदमर्धं नास्ति

पट्टसासिधराश्शूराश् चापबाणमुसुण्ठिनः ॥ १६

भिण्डिपालधराश्चैव शूलहस्तास्सुचक्रिणः ।
तेषां समागमो घोरो देवासुररणोपमः ॥ १७

धृतराष्ट्रः—

कथं सञ्जय राधेयः प्रत्यव्यूहत पाण्डवान् ।
धृष्टद्युम्नमुखान् सङ्ख्ये भीमसेनाभिरक्षितान् ॥ १८

के वा पक्षे प्रपक्षे च मम सैन्यस्य सञ्जय[1] ।

सञ्जयः—

1. अ—ततः परानीकमिदं व्यूहमप्रतिमं महत् ।
समीक्ष्य कर्णः पार्थानां धृष्टद्युम्नाभिरक्षितम् ॥
प्रययौ रथघोषेण सिंहनादरवेण च ।
वादित्राणां च निनदैः कम्पयन्निव मेदिनीम् ॥
वेपमान इव क्रोधाद् युद्धशौण्डः प्रतापवान् ।
प्रतिव्यूह्य महातेजा यथावद्भरतर्षभ ॥
व्यधमत् पाण्डवीं सेनाम् आसुरीं मघवानिव ।
युधिष्ठिरं चाभिभवन्नपसव्यं चकार ह ॥
तेषां पदाता नागानां पादरक्षास्समन्ततः ।
पट्टसासिधराश्शूराश् चापबाणमुसुंठिनः ॥
भिण्डिपालधराश्चैव शूलहस्तास्सुचक्रिणः ।
तेषां समागमो घोरो देवासुररणोपमः ॥

प्रविभज्य यथान्यायम् अवतस्थुस्सुदंशिताः ॥ १

कथं पाण्डुसुताश्चापि प्रत्यव्यूहन्त मामकान् ।
कथं चैतन्महद्युद्धं प्रावर्तत सुदारुणम् ॥ २

क्व च बीभत्सुरभवत् कर्णो यत्र व्यवस्थितः ।
को ह्यर्जुनस्य सान्निध्ये शक्तो जेतुं युधिष्ठिरम् ॥ २

सर्वभूतानि यो ह्येकः खाण्डवे जितवान् पुरा ।
कस्तमन्यस्तु राधेयात् प्रतियुद्ध्येज्जिजीविषुः ॥ २

सञ्जयः—

शृणु व्यूहस्य रचनाम् अर्जुनश्च यथा गतः ।
परिवार्य नृपान् सर्वान् सङ्ग्रामश्चाभवद्यथा ॥ २

कृपश्शारद्वतो राजन् मागधाश्च तरस्विनः ।
सात्वतः कृतवर्मा च दक्षिणं पक्षमाश्रिताः ॥ २

तेषां प्रपक्षे शकुनिर् उलूकश्च महाबलः ।
सादिभिर्विमलप्रासैस् तदानीमभ्यरक्षताम् ॥ २

धृतराष्ट्रः—

कथं सञ्जय राधेयः प्रत्यव्यूहत पाण्डवान् ।
धृष्टद्युम्नमुखान् सङ्ख्ये भीमसेनाभिरक्षितान् ॥
के वा पक्षे प्रपक्षे च मम सैन्यस्य सञ्जय ।

[अधिकः पाठः

गान्धारैश्चाप्यसम्भ्रान्तैः पार्वतीयैश्च दुर्जयैः ।
शलभानामिव व्रातैः पार्वतीयैश्च दुर्जयैः ॥ २६

शलभानामिव व्रातैः [1]पिशाचैरिव दुर्दृशैः ॥ २६॥

चतुर्विंशत्सहस्राणि रथानामनिवर्तिनाम् ।
संशप्तका युद्धशौण्डा वामं पक्षमपालयन् ॥ २७॥

समूहितास्तव सुतैः कृष्णार्जुनजिघांसवः ॥ २८
तेषां प्रपक्षाः काम्भोजाश् शकाश्च यवनैस्सह ।

निदेशात् सूतपुत्रस्य सरथाश्वेभपत्तयः ॥ २९
आह्वयन्तोऽर्जुनं तस्थुः केशवं च जिघांसवः ॥ २९॥

ततस्सेनामुखे कर्णो व्यवातिष्ठत दंशितः ।
चित्रवर्माङ्गदस्रग्वी पालयन् ध्वजिनीमुखम् ॥ ३०॥

रक्ष्यमाणस्सुसंरब्धैः पुत्रैश्शस्त्रभृतां वरैः ।
वाहिनीप्रमुखं वीरैस् सम्प्रकर्षन्नशोभत ॥ ३१॥

अशोकस्तु महाबाहुश् चन्द्रवैश्वानरद्युतिः ।
महाद्विपस्कन्धगतः पिङ्गलः प्रियदर्शनः ॥ ३२॥

दुश्शासनो वृतस्सैन्यैस् स्थितो व्यूहस्य पृष्ठतः ॥ ३३

तन्मध्ये स महाबाहुस् स्वयं दुर्योधनो नृपः ।
चित्राश्वैश्चित्रसन्नाहैस् सोदर्यैरभिरक्षितः ॥ ३४

---

1. ख—इतः षट् पादा न सन्ति

रक्ष्यमाणो महावीर्यैस् सहितैर्मद्रकेकयैः ।
अशोभत महाराज देवैरिव शतक्रतुः ॥ ३५

अश्वत्थामा कुरूणां च ये प्रवीरा महारथाः ।
नित्यमत्ताश्च मातङ्गाश् शूरैर्म्लेच्छैरधिष्ठिताः ॥ ३६
अन्वयुस्तद्रथानीकं क्षरन्त इव तोयदाः ॥ ३६॥

ते ध्वजैर्वैजयन्तीभिर् ज्वलद्भिः परमायुधैः ।
सादिभिश्चास्थिता रेजुर् धूयमाना इवाचलाः ॥ ३७॥

तेषां पदाता नागानां पादरक्षास्सहस्रशः ।
पट्टसासिधराश्शूरा बभूवुरनिवर्तिनः ॥ ३८॥

सादिभिस्स्यन्दनैर्नागैः पत्तिभिश्चाप्यलङ्कृतः ।
स व्यूहराजो विबभौ देवराजचमूपमः ॥ ३९॥

बार्हस्पत्यस्सुविहितो नायकेन विपश्चिता ।
नृत्यन्निव महाव्यूहः परेषामदधाद्भयम् ॥ ४०॥

तस्य पक्षप्रपक्षेभ्यो निस्सरन्ति युयुत्सवः ।
पत्त्यश्वरथमातङ्गाः प्रावृषीव बलाहकाः ॥ ४१॥

ततस्सेनामुखे कर्णं दृष्ट्वा राजा युधिष्ठिरः ।
धनञ्जयमभित्रघ्नम् एकवीरमुवाच ह ॥ ४२॥

युधिष्ठिरः—

पश्यार्जुन महाव्यूहं कर्णेन विहितं रणे ।

युक्तं पक्षैः प्रपक्षैश्च परानीकं प्रकाशते ॥ ४३॥

तत्समीपगतं ह्येतत् प्रत्यमित्रं महद्बलम् ।
यथा नाभिभवत्यस्मांस् तथा नीतिर्विधीयताम् ॥ ४४॥

सञ्जयः—

एवमुक्तोऽर्जुनो राज्ञा प्राञ्जलिर्भूपमब्रवीत् ॥ ४५

अर्जुनः—

यथा यथा भवानाह तत् सत्यं न तदन्यथा ।
यत्तस्य विहितं तात तत् करिष्यामि भारत ॥ ४६
प्रधानमथ चैवास्य विनाशं च करोम्यहम् ॥ ४६॥

युधिष्ठिरः—

तस्मात् त्वं जहि राधेयं भीमसेनस्सुयोधनम् ।
वृषसेनं च नकुलस् सहदेवोऽपि सौबलम् ॥ ४७॥

दुश्शासनं शतानीको हार्दिक्यं शिनिपुङ्गवः ।
धृष्टद्युम्नस्तथा द्रौणिं स्वयं योत्स्याम्यहं कृपम् ॥ ४८॥

द्रौपदेया धार्तराष्ट्रान् छेषान् सह शिखण्डिना ।
ततस्तानहितान् शीघ्रम् अस्माकं घ्नन्तु मामकाः ॥ ४९॥

सञ्जयः—

इत्युक्तो धर्मराजेन तथेत्युक्त्वा धनञ्जयः ।
व्यादिदेश स्वसैन्यानि स्वयमागाच्चमूमुखम् ॥ ५०॥

धनञ्जयो महाराज दक्षिणं पक्षमास्थितः ।

भीमसेनो महाबाहुर् वामं पक्षमुपाश्रितः ॥ ५१॥
सात्यकिर्द्रौपदेयाश्च स्वयं राजा च पाण्डवः ।
व्यूहस्य प्रमुखे तस्थुस् स्वेनानीकेन संवृताः ॥ ५२॥
स्वबलेनारिसैन्यं तत् प्रत्यवस्थाप्य पाण्डवः ।
प्रत्यव्यूहत् पुरस्कृत्य धृष्टद्युम्नशिखण्डिनौ ॥ ५३॥
तत् सादिनागकलिलं पदातिरथसङ्कुलम् ।
[1]धृष्टद्युम्नमुखं व्यूहम् अशोभत महाबलम् ॥ ५४॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि एकचत्वारिंशोऽध्यायः ॥ ४१ ॥
॥ ७३ ॥ कर्णपर्वणि एकचत्वारिंशोऽध्यायः ॥ ४१ ॥
[अस्मिन्नध्याये ५४॥ श्लोकाः]

॥ द्विचत्वारिंशोऽध्यायः ॥

सङ्कुलयुद्धम् ॥

धृतराष्ट्रः—

तथा व्यूढेष्वनीकेषु संसक्तेषु च सञ्जय ।
संशप्तकाः कथं पार्थं कथं कर्णश्च पाण्डवान् ॥ १
एतद्विस्तरतो युद्धं प्रब्रूहि कुशलो ह्यसि ।

1. ख—इदमर्धं नास्ति

न हि तृप्यामि वीराणां शृण्वानो युधि विक्रमम् ॥ २

सञ्जयः—

तत् संस्थितमथो दृष्ट्वा प्रत्यमित्रं महद्बलम् ।
प्रत्यव्यूहत् ततः कर्णो हितार्थं तनयस्य ते ॥ ३

तत् सादिनागकलिलं पदातिरथसङ्कुलम् ।
धृष्टद्युम्नमुखं घोरम् अशोभत महद्बलम् ॥ ४

पारावतसवर्णाश्वैश् चन्द्रसूर्यसमद्युतिः ।
स पार्षतो बभौ धन्वी कालो विग्रहवानिव ॥ ५

पार्षतं त्वभितस्तस्थुर् द्रौपदेया युयुत्सवः ।
सानुगा दीप्तवपुषश् चन्द्रं तारागणा इव ॥ ६

अथ व्यूढेष्वनीकेषु प्रेक्ष्य संशप्तकान् रणे ।
क्रुद्धोऽर्जुनोऽभिदुद्राव व्याक्षिपन् गाण्डिवं धनुः ॥ ७

अथ संशप्तकाः पार्थम् अभ्यधावन् वधैषिणः ।
विजये धृतसङ्कल्पा मृत्युं कृत्वा निवर्तनम् ॥ ८

तदश्वसङ्घबहुलं पत्तिनागरथाकुलम् ।
उदीर्यमाणं संरब्धं धनञ्जयमभिद्रवत् ॥ ९

तदुद्यतं महत् सैन्यं सागरौघसमं जवे ।
पार्थवेलां समासाद्य विष्ठितं समदृश्यत ॥ १०

मृद्नन्तं शरवर्षौघैर् बलमर्जुनमार्दयत् ॥ १०॥

स सम्प्रहारस्तुमुलस् तेषामासीत् किरीटिना ।
तस्यैव तु यथा राजन् निवातकवचैस्सह ॥ ११॥

रथिनोऽश्वान् ध्वजान् पत्तीन् गजान् गजगतानपि ।
इषून् धनूंषि खड्गांश्च सगदान् सपरश्वधान् ॥ १२॥

सायुधानुद्यतान् बाहून् विविधान्यायुधानि च ।
चिच्छेद द्विषतां पार्थश् शिरांसि च सहस्रशः ॥ १३॥

तस्मिन् सैन्यमहावर्ते पातालावर्तसन्निभे ।
निमग्नं तं रथं दृष्ट्वा नेदुस्संशप्तका मुदा ॥ १४॥

[1]स पुरस्तादरीन् हत्वा पुनरुत्तरतोऽवधीत् ।
दक्षिणेन च पश्चाच्च क्रुद्धो रुद्रः पशूनिव ॥ १५॥

अथ पाञ्चालचेदीनां पाण्डवानां च सर्वशः ।
त्वदीयैस्सह सङ्ग्रामो बभूव भुवि दारुणः ॥ १६॥

कृपश्च कृतवर्मा च शकुनिश्चापि सौबलः ।
धृष्टसेनास्सुसंरब्धा रथानीकैःप्रहारिभिः ॥ १७॥

कोसलैः काशिभिर्मत्स्यैः कारूशैः केकयैरपि ।
शूराश्शूरैर्भृशं जघ्नुस् सङ्ग्रामे रोमहर्षणे ॥ १८॥

तेषां तदाऽभवद्युद्धं देहपाप्मविनाशनम् ।
शूद्रविट्क्षत्रविप्राणां धर्म्यं स्वर्ग्यं यशस्करम् ॥ १९॥

---

1. ख—अधिकपाठोऽयं नास्ति

दुर्योधनोऽपि सहितो भ्रातृभिर्भरतर्षभ ।
गुप्तः कुरुप्रवीरैश्च मद्राणां च महारथैः ॥ २०॥

पाण्डवैस्सह पाञ्चालैश् चेदिभिः केकयैस्सह ।
युध्यमानं रणे कर्णं कुरुवीरोऽभ्यपालयत् ॥ २१॥

कर्णोऽपि निशितैर्बाणैर् विनिपात्य महाचमूम् ।
प्रमृद्य च युधि श्रेष्ठान् युधिष्ठिरमपीडयत् ॥ २२॥

विपत्रायुधदेहासून् कृत्वा योधान् सहस्रशः ।
युक्तान् स्वर्गयशोभ्यां च स्वेभ्यो मुदमुदावहत् ॥ २३॥

तद्विगाह्य रथानीकं सूतपुत्रो महारथः ।
नदीं प्रवर्तयामास शोणितौघतरङ्गिणीम् ॥ २४॥

शोणितोदां क्षुद्रमत्स्यां नागनक्रां दुरत्ययाम् ।
[1]मांसमज्जाकर्दमिनीं चक्रकूर्ममहोडुपाम् ॥ २५॥

पातितैर्मेघसङ्काशैस् तत्र तत्र महाद्विपैः ।
अशनीभिरिव ध्वस्ता नदी राजन् विराजते ॥ २६॥

तां शरोर्मिमहावर्तां छत्रहंससमाकुलाम् ।
तनुत्रोष्णीषसङ्घाटाम् अस्थिपाषाणसङ्कुलाम् ॥ २७॥

अपारामनपारां च शङ्खदुन्दुभिघोषिणीम् ।
रौद्रां नदीं महाराज रजसा सर्वतोवृताम् ॥ २८॥

---

1. ख—अर्धचतुष्टयं नास्ति

अतितीक्ष्णां नराकीर्णां नदीमन्तकगामिनीम् ।
समं च विषमं चैव समायान्तीं महाभयाम् ॥ २९॥

आगुल्फाच्चात्र सीदन्ति नराश्शोणितकर्दमैः ।
नरैरभिपरिक्षिप्ता यथा राजन् महाद्रुमाः ॥ ३०॥

ततस्ते तत्र तत्रैव प्रतरन्तो महानदीम् ।
विचेरुस्सर्वतो योधा नौवारणमहारथैः ॥ ३१॥

शोणितेन समं राजन् कृतमासीत् समन्ततः ।
नदीवेगैर्यथा भूमिस् तद्वदासीद्दिशां पते ॥ ३२॥

एवं भारत सङ्ग्रामो गजवाजिजनक्षयः ।
कुरूणां सृञ्जयानां च देवासुरसमोऽभवत् ॥ ३३॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥
॥ ७३ ॥ कर्णपर्वणि द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥
[अस्मिन्नध्याये ३३॥ श्लोकाः]

॥ त्रिचत्वारिंशोऽध्यायः ॥

सङ्कुलयुद्धम् ॥

धृतराष्ट्रः—

[1]युक्तां प्रविश्य पार्थानां सेनां कुर्वन् बलक्षयम् ।
कर्णो राजानमायच्छत् तन्ममाचक्ष्व सञ्जय ॥ १

के च प्रवीराः पार्थानां युधि कर्णमवारयन् ।
कांश्च प्रमथ्याधिरथिर् युधिष्ठिरमपीडयत् ॥ २

सञ्जयः—

धृष्टद्युम्नमुखान् पार्थान् दृष्ट्वा कर्णो व्यवस्थितान् ।
समभ्यधावत् त्वरितः पाञ्चालाञ् छत्रुकर्शनः ॥ ३

तं तूर्णमभिधावन्तं पाञ्चाला जितकाशिनः ।
प्रत्युद्ययुर्महाराज हंसास्सर इवोष्णगे ॥ ४

ततश्शङ्खसहस्राणां निस्स्वनो हृदयङ्गमः ।
प्रादुरासीदुभयतो भेरीशब्दस्सुदारुणः ॥ ५

नानाबाणनिनादश्च द्विपाश्वरथनिस्स्वनः ।
सिंहनादश्च वीराणाम् अभवद्दारुणस्तदा ॥ ६

सादिद्रुमार्णवा भूमिस् सघनाम्बुदमम्बरम् ।
सार्केन्दुग्रहनक्षत्रा द्यौश्च व्यक्तं विघूर्णिता ॥ ७

1. अ—अर्धचतुष्टयं नास्ति

इति भूतानि तं शब्दं मेनिरे विव्यथुस्तदा ।
यानि चाप्यल्पसत्त्वानि प्रायस्तानि मृतानि वै ॥ ८

अथ कर्णो भृशं क्रुद्धश् शीघ्रमस्त्रमुदीरयन् ।
जघान पाण्डवीं सेनाम् आसुरीं मघवानिव ॥ ९

स पाण्डवचमूं कर्णः प्रविश्य विविधैश्शरैः ।
प्रभद्रकाणां प्रवरान् न्यहनत् सप्तसप्ततिम् ॥ १०

ततस्सुपुङ्खैर्विशिखैर् अथ श्रेष्ठान् रथेषुभिः ।
अहनत् पञ्चविंशत्या पाञ्चालान् पञ्चविंशतिम् ॥ ११

सुवर्णपुङ्खैर्नाराचैः परकायविदारणैः ।
चेदिकानवधीद्वीरश् शतशोऽथ सहस्रशः ॥ १२

तं तथा समरे कर्म कुर्वाणमपराजितम् ।
परिवव्रुर्महाराज पाञ्चालानां रथव्रजाः ॥ १३

ततस्सन्धाय विशिखान् पञ्च भारत दुस्सहान् ।
पाञ्चालानवधीत् पञ्च कर्णो वैकर्तनो वृषा ॥ १४

भानुदेवं चित्रसेनं सेनाबिन्दुं च भारत ।
तपनं शूरसेनं च पाञ्चालानहनद्रणे ॥ १५

पाञ्चालेषु तु वीरेषु वध्यमानेषु सायकैः ।
हाहाकारो महानासीत् पाञ्चालानां महाहवे ॥ १६

तेषां सङ्क्षीयमाणानां हाहाकारं प्रकुर्वताम् ।

पुनरेव च तान् कर्णो जघानाशु पतत्रिभिः ॥ १७

चक्ररक्षौ तु कर्णस्य पुत्रौ मारिष दुर्जयौ ।
सुषेणस्सत्यसेनश्च त्यक्त्वा प्राणानयुध्यताम् ॥ १८

पृष्ठगोपस्तु कर्णस्य ज्येष्ठः पुत्रो महारथः ।
वृषसेनोऽन्वयात् कर्णं पृष्ठतः परिपालयन् ॥ १९

धृष्टद्युम्नस्सात्यकिश्च द्रौपदेया वृकोदरः ।
जनमेजयश्शिखण्डी च प्रवीराश्च प्रभद्रकाः ॥ २०

चेदिकेकयपाञ्चाला यमौ मात्स्याश्च दंशिताः ।
समभ्यधावन् राधेयं जिघांसन्तः प्रहारिणः ॥ २१

तथा तं विविधैश्शस्त्रैश् शरधाराभिरेव च ।
समभ्यवर्षन्नर्दन्तः प्रावृषीवाम्बुदा गिरिम् ॥ २२

पितरं च परीप्सन्तः कर्णपुत्राः प्रहारिणः ।
त्वदीयाश्चापरे वीराः परवीरानवारयन् ॥ २३

सुषेणो भीमसेनस्य च्छित्त्वा भल्लेन कार्मुकम् ।
नाराचैस्सप्तभिर्विद्ध्वा हृदि भीमं ननाद ह ॥ २४

अथान्यद्धनुरादाय बलवद्वेगवत्तरम् ।
सज्यं वृकोदरः कृत्वा सुषेणस्याच्छिनद्धनुः ॥ २५

विव्याध चैनं दशभिः क्रुद्धो राजन् महेषुभिः ।
कर्णं तु तूर्णं विव्याध त्रिसप्तत्या शितैश्शरैः ॥ २६

सत्यसेनं च दशभिस् साश्वसूतायुधध्वजम् ।
पश्यतां सुहृदां मध्ये कर्णपुत्रमपातयत् ॥ २७

क्षुरप्रकृत्तं तत्तस्य शिरश्चन्द्रनिभाननम् ।
शुभदर्शनमेवासीन्नालभ्रष्टमिवाम्बुजम् ॥ २८

हत्वा कर्णसुतं भीमस् तावकान् पुनरार्दयत् ।
कृपहार्दिक्ययोश्चापे च्छित्वा तावप्यमर्दयत् ॥ २९

दुश्शासनं त्रिभिर्विद्ध्वा शकुनिं षड्भिरायसैः ।
उलूकं च पतत्रिं च चकार विरथावुभौ ॥ ३०

हे सुषेण हतोऽसीति ब्रुवन्नादत्त सायकम् ।
तमस्य कर्णश्चिच्छेद त्रिभिश्चैनमताडयत् ॥ ३१

अथ प्रगृह्यान्यमपि सुपर्वाणं सुतेजनम् ।
सुषेणायासृजद्भीमस् तमप्यस्याच्छिनद्वृषा ॥ ३२

पुनः कर्णस्त्रिसप्तत्या भीमसेनमथेषुभिः ।
पुत्रं परीप्सन् विव्याध क्रुद्धश्शत्रुजिघांसया ॥ ३३

[1]नकुलं पञ्चभिर्बाणैर् बाह्वोरुरसि चार्पयत् ॥ ३३॥

नकुलस्तं तु विंशत्या विद्ध्वा भारत संयुगे ।
ननाद बलवन्नादं कर्णस्य भयमादधत् ॥ ३४॥

तं सुषेणो महाराज विद्ध्वा दशभिरायसैः ।

---

1. अ—षडर्धानि न सन्ति

धनुरस्याच्छिनच्छीघ्रं क्षुरप्रेण महारथः ॥ ३५॥

अथान्यद्धनुरादाय नकुलः क्रोधमूर्च्छितः ।
सुषेणं बहुभिर्बाणैर् वारयामास संयुगे ॥ ३६॥

तस्य बाणैर्दिशो राजन्नाच्छाद्य परवीरहा ।
आजघ्ने सारथिं क्रुद्धस् सुषेणं च पतत्रिभिः ॥ ३७॥
चिच्छेद चास्य सुदृढं धनुर्भल्लैस्त्रिभिस्तदा ॥ ३८

अथान्यद्धनुरादाय सुषेणः परवीरहा ।
अविध्यन्नकुलं षष्ट्या सहदेवं च सप्तभिः ॥ ३९

तद्युद्धमभवत् तेषां घोरं दैवासुरोपमम् ।
निघ्नतां सायकैस्तूर्णम् अन्योन्यस्य वधं प्रति ॥ ४०

सात्यकिर्वृषसेनं तु विद्ध्वा सप्तभिरायसैः ।
पुनर्विव्याध सप्तत्या सारथिं च त्रिभिश्शरैः ॥ ४१

वृषसेनस्तु शैनेयं शरेणानतपर्वणा ।
आजघान महाराज शङ्खदेशे महारथम् ॥ ४२

शैनेयो वृषसेनेन पत्रिणा परिपीडितः ।
कोपं चक्रे महाराज क्रुद्धो वेगं च दारुणम् ॥ ४३
जग्राहेषुवरान् वीरश् शीघ्रं वै दश पञ्च च ॥ ४३॥

सात्यकिर्वृषसेनस्य सूतं हत्वा त्रिभिश्शरैः ।
धनुश्चिच्छेद चैकेन जघानाश्वांश्च सप्तभिः ॥ ४४॥

ध्वजमेकेषुणोन्मथ्य त्रिभिस्तं हृद्यताडयत् ।
अथापतच्च स्वरथे मुहूर्तात् पुनरुत्थितः ॥ ४५॥
अथो जिघांसुश्शैनेयं खड्गचर्मभृदभ्ययात् ॥ ४६
तस्य चापततश्शीघ्रं वृषसेनस्य सात्यकिः ।
वाराहकर्णैर्दशभिर् विव्याधास्यासिचर्मणी ॥ ४७
दुश्शासनस्तु तं दृष्ट्वा विरथं व्यायुधं तथा ।
आरोप्य स्वरथं तूर्णम् अपोवाह रथान्तरम् ॥ ४८
अथान्यं रथमास्थाय वृषसेनो महारथः ।
कर्णस्य युधि दुर्धर्षं पुनः पृष्ठमपालयत् ॥ ४९
युयुधानं तु राधेयो नवैर्नवभिरायसैः ।
विसूताश्वरथं कृत्वा ललाटे त्रिभिरार्पयत् ॥ ५०
स चान्यं रथमास्थाय विधिवत् कल्पितं पुनः ।
युयुधे पाण्डवैस्सार्धं कर्णस्य व्यधमद्बलम् ॥ ५१
धृष्टद्युम्नस्ततः कर्णम् अविध्यद्दशभिश्शरैः ।
[1]द्रौपदेयास्त्रिसप्तत्या युयुधानश्च सप्तभिः ॥ ५२
भीमसेनश्चतुष्षष्ट्या सहदेवश्च सप्तभिः ।
नकुलस्त्रिंशता बाणैश् शतानीकश्च सप्तभिः ॥ ५३
शिखण्डी दशभिर्वीरो धर्मराजश्शतेन च ।

1. ख—इदमर्धं नास्ति

एते चान्ये च राजेन्द्र प्रवीरा जयगृद्धिनः ॥ ५४
अभ्यर्दयन् महेष्वासं सूतपुत्रं विशां पते ॥ ५४॥
तान् सूतपुत्रो विशिखैर् दशभिर्दशभिश्शितैः ।
रथप्रचारान् विचरन् प्रत्यविध्यदरिन्दमः ॥ ५५॥
[1]सात्यकिं भीमसेनं च धृष्टद्युम्नशिखण्डिनौ ।
द्रौपदेयांश्च संरब्धान् यतमानान् महारथान् ॥ ५६॥
पश्यतां सर्वसैन्यानाम् अथैतान् सूतनन्दनः ।
विरथान् रथिनां श्रेष्ठान् निमेषार्धाच्चकार ह ॥ ५७॥
अमोघत्वाच्च बाणानां भूतसङ्घा विसिस्मिरे ॥ ५८
तत्रास्त्रवीर्यं कर्णस्य लाघवं च महात्मनः ।
अपश्याम महाराज तदद्भुतमिवाभवत् ॥ ५९
नाप्याददानं ददृशुस् सन्दधानं च सायकान् ।
विमुञ्चन्तं च संरम्भाद् अपश्यन्नेव तं जनाः ॥ ६०
प्रतीच्यां दिशि तं दृष्ट्वा प्राच्यां पश्याम लाघवात् ।
न तं पश्याम राजेन्द्र क नु कर्णोऽद्य तिष्ठति ॥ ६१
इषूनेव स्म पश्यामो विनिकीर्णान् समन्ततः ।
[2]छादयानान् दिशो राजञ् शलभानामिव व्रजान् ॥ ६२

1. क—अर्धश्लोकं नास्ति
2. ख—अर्धश्लोकं नास्ति

तस्य तैरिषुभिस्तीक्ष्णैस् सम्पतद्भिस्सहस्रशः ।
[1]मरीचिभिरिवोष्णांशोश् शरैस्सन्नतपर्वभिः ॥ ६३
व्याप्तास्सर्वा दिशो राजन् योधाश्च ददृशुस्तदा ॥ ६३॥
शरैस्संवृतमाकाशं ताम्राभ्रैरिव चाभवत् ॥ ६४
द्यौर्वियद्भूर्दिशश्चैव प्रच्छन्ना निशितैश्शरैः ।
अरुणाभ्रावृताकारास् तस्मिन् देशेऽभवंस्तदा ॥ ६५
ततः पुनरमेयात्मा कर्णो राजन् महारथः ।
न्यहनत् समरे योधान् योधवृत्तमनुष्ठितः ॥ ६६
नृत्यन्निव हि राधेयश् चापहस्तो रणाजिरे ।
यैर्विद्धः प्रत्यविद्धच्त् तान् एकैकं त्रिगुणैश्शरैः ॥ ६७
दशभिर्दशभिश्चैव पुनर्विव्याथ नानदत् ।
साश्वसूतध्वजच्छत्रास् ततस्ते विवरं ददुः ॥ ६८
ते हन्यमानाः कर्णेन पलायन्ते दिशो दश ।
नादयन्तो दिशस्सर्वाः कर्णत्रस्ता विचेतसः ॥ ६९
तान् प्रमृद्य महेष्वासान् राधेयश्शरवृष्टिभिः ।
राजानीकमसम्बाधं प्राविशच्छत्रुकर्शनः ॥ ७०
स रथांस्त्रिंशतं हत्वा चेदीनामनिवर्तिनाम् ।
राधेयो निशितैर्बाणैस् ततोऽभ्यागाद्युधिष्ठिरम् ॥ ७१

1. अ-ख-घ-ङ—अर्धद्वयं नास्ति

ततस्ते विरथाश्शूरा रथानन्यान् समास्थिताः ।
परिवव्रुर्महाराज धर्मपुत्रं युधिष्ठिरम् ॥ ७२

ततस्ते च परे राजञ् छिखण्डी च ससात्यकिः ।
राधेयात् परिरक्षन्तो राजानं पर्यवारयन् ॥ ७३

मुञ्चन्तो विविधान् बाणान् स्वर्णपुङ्खान् शिलाशितान् ॥ ७३॥

तथैव तावकास्सर्वे कर्णं दुर्वारणं रणे ।
यत्तसेना महेष्वासा पर्यरक्षन्त सर्वशः ॥ ७४॥

नादो वादित्रघोषाणां प्रादुरासीत् समन्ततः ।
सिंहनादाश्च सञ्जज्ञुश् शूराणामनिवर्तिनाम् ॥ ७५॥

ततः पुनस्समाजग्मुर् अभीताः कुरुसृञ्जयाः ।
युधिष्ठिरमुखाः पार्थास् सूतपुत्रमुखा वयम् ॥ ७६॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥
॥ ७३ ॥ कर्णपर्वणि त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥
[अस्मिन्नध्याये ७६॥ श्लोकाः]

॥ चतुश्चत्वारिंशोऽध्यायः ॥

कर्णयुधिष्ठिरयुद्धम् ॥ १ ॥ सङ्कुलयुद्धम् ॥ २ ॥

सञ्जयः—

विदार्य कर्णस्तां सेनां धर्मराजमुपाद्रवत् ।
रथहस्त्यश्वपत्तीनां सहस्रैः परिवारितम् ॥ १

नानायुधसहस्राणि प्रेषितान्यरिभिर्वृषा ।
हत्वा बाणगणैरुग्रैस् तानविध्यदसम्भ्रमः ॥ २

उच्चकर्त शिरांस्युग्रो बाहूनूरूंश्च सूतजः ।
ते हता भूतले पेतुः प्रद्रुताश्चापरे दिशः ॥ ३

द्रविलान्ध्रानिषादास्तु पुनस्सात्यकिचोदिताः ।
अभ्यद्रवञ्जिघांसन्तः पत्तयः कर्णमाहवे ॥ ४

ते विबाहुशिरश्शस्त्रास् सहसा कर्णसायकैः ।
निपेतुरुर्व्यां युगपच् छिन्नं तालवनं यथा ॥ ५

एवं योधशतान्याजौ सहस्राण्ययुतानि च ।
हतान्यगुर्महीं देहैर् यशसाऽऽपूर्य वै दिशः ॥ ६

अथ वैकर्तनं कर्णं रणे क्रुद्धमिवान्तकम् ।
रुरुधुः पाण्डुपाञ्चाला व्याधिं मन्त्रौषधा इव ॥ ७

[1]स तान् प्रमृद्याभ्यपतत् पुनरेव युधिष्ठिरम् ।
मन्त्रौषधं विना व्याधिर् विधिहीनाः क्रिया इव ॥ ८

स राजगृध्रभी रुद्धः पाण्डुपाञ्चालकेकयैः ।
नाशकत् तानतिक्रान्तुं मृत्युर्ब्रह्मविदो यथा ॥ ९

ततो युधिष्ठिरः कर्णम् अदूरस्थं निवारितम् ।
तैर्योधप्रमुखैर्वीरं दृष्ट्वा विव्याध सायकैः ॥ १०

कर्णः पार्थशरैर्विद्धस् तोत्रार्दित इव द्विपः ।
प्रमथ्य सहितान् वीरान् युधिष्ठिरमपीडयत् ॥ ११

ततो युधिष्ठिरः कर्णम् आसाद्य जयतां वरम् ।
अब्रवीत् परवीरघ्नं क्रोधसंरक्तलोचनः ॥ १२

युधिष्ठिरः—

कर्ण कर्ण वृथादृष्टे सूतपुत्र वचश्शृणु ।
सदा स्पर्धसि सङ्ग्रामे फल्गुनेन यशस्विना ॥ १३

यथाऽस्मान् द्विषसे नित्यं धार्तराष्ट्रमनुव्रतः ।
यद्बलं यच्च ते वीर्यं प्रद्वेषो यश्च पाण्डुषु ॥ १४

तत् सर्वं दर्शयस्वाद्य पौरुषं महदास्थितः ।
युद्धश्रद्धां च तेऽद्याहं विनेष्यामि महारणे ॥ १५

सञ्जयः—

एवमुक्त्वा महाराज कर्णं पाण्डुसुतस्ततः ।

---

1. क—अर्धचतुष्टयं नास्ति

सुवर्णपुङ्खैर्दशभिर् विव्याधायस्मयैश्शरैः ॥ १६

तं सूतपुत्रो दशभिः प्रत्यविद्ध्यदरिन्दमः ।
वत्सदन्तैर्महेष्वासः प्रहसन्निव भारत ॥ १७

सोऽवज्ञाय च निर्विद्धस् सूतपुत्रेण पाण्डवः ।
प्रजज्वाल महाबाहुर् हविषा हव्यवाडिव ॥ १८

ततो विष्फार्य सुमहच् चापं हेमपरिष्कृतम् ।
समाधत्त शितं बाणं गिरीणामपि दारणम् ॥ १९

[1]ततः पूर्णायतं तीक्ष्णं यमदण्डनिभं शरम् ।
मुमोच त्वरितं राजा सूतपुत्रजिघांसया ॥ २०

स तु वेगवता मुक्तो बाणो वज्राशनिप्रभः ।
बिभेद समरे कर्णं सव्यपार्श्वे स्तनान्तरे ॥ २१

स तु तेन प्रहारेण पीडितः प्रमुमोह वै ।
स्रस्तबाहुर्महेष्वासो धनुरुत्सृज्य कम्पितः ॥ २२

ततो हाहाकृतं सर्वं धार्तराष्ट्रबलं महत् ।
विवर्णमुखमार्तं च कर्णं दृष्ट्वा तथागतम् ॥ २३

सिंहनादाश्च सञ्जज्ञुः क्ष्वेलाः किलकिलास्तथा ॥ २३॥
पाण्डवानां महाराज दृष्ट्वा राज्ञः पराक्रमम् ॥ २४

प्रतिलभ्य तु राधेयस् संज्ञां नातिचिरादिव ।

---

1. क—सन्धाय धनुषि श्रेष्ठे

दध्रे राजविनाशाय मनः क्रूरपराक्रमः ॥ २५

स हेमविकृतं चापं विष्फार्य विजयं महत् ।
अवाकिरदमेयात्मा पाण्डवं निशितैश्शरैः ॥ २६

ततः क्षुराभ्यां पाञ्चालौ चक्ररक्षौ महात्मनः ।
जघान चन्द्रदेवं च [1]दण्डधारं च वैशसे ॥ २७

तावुभौ धर्मराजस्य प्रवीरौ युधि भारत ।
रथाभ्याशे चकाशेते चन्द्रस्येव पुनर्वसू ॥ २८

युधिष्ठिरः पुनः कर्णम् अविद्ध्यत् त्रिंशता शरैः ।
[2]सुषेणं सत्यसेनं च त्रिभिस्त्रिभिरताडयत् ॥ २९

शल्यं नवत्या विव्याध त्रिसप्तत्या च सूतजम् ।
तांश्चास्य गोप्तॄन् विव्याध त्रिभिस्त्रिभिरजिह्मगैः ॥ ३०

ततः प्रहस्यातिरथिष् षष्ट्या राजञ्शितैश्शरैः ।
विद्ध्वा युधिष्ठिरं सङ्ख्ये ननादातिरथस्तदा ॥ ३१

ततः प्रवीराः पाण्डूनाम् अभ्यधावन्नमर्षिताः ।
युधिष्ठिरं परीप्सन्तः कर्णं चाभ्यर्दयञ् शरैः ॥ ३२

[3]सात्यकिश्चेकितानश्च युयुत्सुः पाण्ड्य एव च ।

---

1. क—अयं पादः अनन्तरञ्च आहृत्य अर्धं नास्ति
2. अ—नास्तीदमर्धम्
3. ख—सात्यकिं चेकितानं च युयुत्सुं पाण्ड्यमेव च ।
चोलं च केरलं चैव सिंहलद्वीपवासिनः॥
कर्णो विव्याथ संक्रुद्धो दाक्षिणात्यान् सहस्रशः । [अधिकः पाठः]

धृष्टद्युम्नश्शिखण्डी च द्रौपदेयाः प्रभद्रकाः ॥ ३३

यमौ च भीमसेनश्च शिशुपालस्य चात्मजः ।
[1]कारूशा मात्स्यशेषाश्च केकयाः काशिकोसलाः ॥ ३४

एते तु त्वरिता वीरा वसुषेणमवारयन् ॥ ३४॥

जनमेजयश्च पाञ्चाल्यः कर्णं विव्याध सायकैः ॥ ३५

वराहकर्णनालीकैर् नाराचैर्विविधैश्शरैः ।
वत्सदन्तैर्विपाठैश्च क्षुद्रकैश्चटकामुखैः ॥ ३६

नानाप्रहरणैश्चोग्रैर् हस्त्यश्वरथसादिनः ।
सर्वतोऽभ्यद्रवन् कर्णं परिवार्य जिघांसया ॥ ३७

स पाण्डवानां प्रवरैस् सर्वतस्समभिद्रुतः ।
छाद्यमानश्शितैर्घोरैस् स्वस्वनामाङ्कितैश्शरैः ॥ ३८

न चचाल रणे कर्णो महेन्द्रो दानवैरिव ॥ ३८॥

उदीरयन् ब्राह्ममस्त्रं शरैरापूरयन् दिशः ।
निजघान महेष्वासान् पाञ्चालानेकविंशतिम् ॥ ३९॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥
॥ ७३ ॥ कर्णपर्वणि चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥
[अस्मिन्नध्याये ३९॥ श्लोकाः]

---

1. ख—अर्धचतुष्टयं नास्ति

॥ पञ्चचत्वारिंशोऽध्यायः ॥

कर्णेन युधिष्ठिरस्य पराजयपूर्वकमपहासः ॥

सञ्जयः—

[1]ततः पुनरमेयात्मा चेदीनां प्रवरान् दश ।
न्यहनद्भरतश्रेष्ठ कर्णो वैकर्तनस्तदा ॥ १

तस्य बाणसहस्राणि सम्प्रपन्नानि मारिष ।
दृश्यन्ते दिक्षु सर्वासु शलभानामिव व्रजाः ॥ २

कर्णनामाङ्किता बाणास् स्वर्णपुङ्खास्सुतेजनाः ।
नराश्वकायान् निर्भिद्य पेतुरुर्व्यां समन्ततः ॥ ३

[2]कर्णेनैकेन समरे चेदीनां प्रवरा रथाः ।
सृञ्जयानां च सर्वेषां शतशो निहता रणे ॥ ४

कर्णस्य शरसञ्छन्नं बभूव विपुलं तमः ।
नाज्ञायत ततः किञ्चित् परेषामात्मनोऽपि वा ॥ ५

तस्मिंस्तमसि भूते च क्षत्रियाणां भयङ्करे ।
विचचार महाबाहुर् निर्दहन् क्षत्रियान् बहून् ॥ ६

---

1. ख—अर्धचतुष्टयं नास्ति
2. ख—तस्य बाणसहस्राणि सम्प्रवृत्तानि मारिष । [अधिकः पाठः]

ततश्शरमहाज्वालो वीर्यार्चिः कर्णपावकः ।
निर्दहन् पाण्डववनं चारु पर्यचरद्रणे ॥ ७

ततस्तेषां महाराज पाण्डवानां महारथाः ।
सृञ्जयानां च सर्वेषां शतशोऽथ सहस्रशः ॥ ८

अस्त्रैः कर्णं महेष्वासं समन्तात् पर्यवारयन् ॥ ८॥

स संवार्य महास्त्राणि महेष्वासो महात्मनाम् ।
प्रहस्य पुरुषेन्द्रस्य कर्णश्चिच्छेद कार्मुकम् ॥ ९॥

ततस्सन्धाय नवतिं निमेषान्नतपर्वणाम् ।
बिभेद कवचं राज्ञो रणे कर्णश्शितैश्शरैः ॥ १०॥

तद्वर्म हेमविकृतं रत्नचित्रं पतद्भुवि ।
सविद्युदभ्रं सवितुश् श्लिष्टं वातहतं यथा ॥ ११॥

तदङ्गात् पुरुषेन्द्रस्य भ्रष्टं वर्म व्यशोभत ।
रत्नैरलङ्कृतं पुण्यैर् व्यभ्रं निशि यथाऽम्बरम् ॥ १२॥

भिन्नवर्मा शरैः पार्थो रुधिरेण परिप्लुतः ।
बभासे पुरुषश्रेष्ठ उद्यन्निव दिवाकरः ॥ १३॥

स शराचितसर्वाङ्गश् छिन्नवर्माऽथ संयुगे ।
क्षत्रधर्मं समास्थाय सिंहनादमकुर्वत ॥ १४॥

नदित्वा सुचिरं कालं पाण्डवो रभसो रणे ।
शक्तिं चिक्षेप वेगेन प्रदीप्तामशनीमिव ॥ १५॥

तां ज्वलन्तीमिवाकाशे शक्तिं सप्तभिराशुगैः ।
भल्लैश्चिच्छेद राधेयस् सा व्यशीर्यत वै रणे ॥ १६॥

हृदि बाह्वोर्ललाटे च क्षिप्रकारी युधिष्ठिरः ।
चतुर्भिस्तोमरैः कर्णं ताडयित्वाऽनदन्मुदा ॥ १७॥

उद्भिन्नरुधिरः कर्णः क्रुद्धस्सर्प इव श्वसन् ।
जघान सूतं पार्थस्य पार्ष्णिं च नवभिश्शरैः ॥ १८॥

ध्वजं चिच्छेद नृपतेस् त्रिभिर्विव्याध चैव तम् ।
इषुधी चास्य चिच्छेद रथं च तिलशोऽच्छिनत् ॥ १९॥

एतस्मिन्नन्तरे शूराः पाण्डवानां महारथाः ।
ववृषुश्शरवर्षाणि राधेयं प्रति भारत ॥ २०॥

सात्यकिः पञ्चविंशत्या शिखण्डी नवभिश्शरैः ।
अवर्षतां महाराज राधेयं शत्रुकर्शनम् ॥ २१॥

शैनेयं तु ततः क्रुद्धः कर्णः पञ्चभिरायसैः ।
विव्याध समरे राजंस् त्रिभिश्चान्यैश्शिलीमुखैः ॥ २२॥

दक्षिणं तु भुजं तस्य त्रिभिः कर्णोऽप्यविध्यत ।
सव्यं षोडशभिर्बाणैर् यन्तारं चास्य सप्तभिः ॥ २३॥

अथास्य चतुरो वाहांश् चतुर्भिर्निशितैश्शरैः ।
सूतपुत्रोऽनयत् क्षिप्रं यमस्य सदनं प्रति ॥ २४॥

अपरेणाथ भल्लेन धनुश्चिच्छेद महारथः ।

सारथेस्सशिरस्त्राणं शिरः कायादपाहरत् ॥ २५॥

हताश्वसूते तु रथे स्थितस्स शिनिपुङ्गवः ।
शक्तिं चिक्षेप कर्णाय वैडूर्यमणिभूषिताम् ॥ २६॥

तामापतन्तीं सहसा द्विधा चिच्छेद भारत ।
कर्णो वै धन्विनां श्रेष्ठस् तांश्च सर्वानवारयत् ॥ २७॥

ततस्तान् निशितैर्बाणैः पाण्डवानां महारथान् ।
न्यवारयदमेयात्मा शिक्षया च बलेन च ॥ २८॥

अर्दयित्वा शरैस्तांस्तु सिंहः क्षुद्रमृगानिव ।
पीडयन् धर्मराजानं शरैस्सन्नतपर्वभिः ॥ २९॥

अभ्यद्रवत राधेयो धर्मपुत्रं शितैश्शरैः ॥ ३०

ततः पार्थो व्यपायासीद्धताश्वो हतसारथिः ।
अशक्नुवन् मुखे स्थातुं तदा कर्णस्य दुर्मनाः ॥ ३१

तमभिद्रुत्य राधेयः पाण्डुपुत्रं युधिष्ठिरम् ।
अब्रवीत् प्रहसन् राजन् कुत्सयन्निव पाण्डवम् ॥ ३२

कर्णः—

कथं नाम कुले जातः क्षत्रधर्मे व्यवस्थितः ।
प्रजह्यात् समरे शत्रून् प्राणान् रक्षन् महाहवे ॥ ३३

न भवान् क्षत्रधर्मेषु कुशलोऽसीति मे मतिः ।
ब्राह्मे बले भवान् युक्तस् स्वाध्याये यज्ञकर्मणि ॥ ३४

[1]मा स्म युध्यस्व कौन्तेय मा स्म वीरान् समासदः ।
मा चैवं विप्रियं ब्रूहि मा च त्वं भज संयुगम् ॥ ३५

वक्तव्या मारिषाऽन्ये तु न वक्तव्यास्तु मादृशाः ।
मादृशान् हि ब्रुवन् युद्धे एतदन्यच्च लप्स्यसे ॥ ३६

स्वगृहं गच्छ कौन्तेय यत्र वा केशवार्जुनौ ।
न हि त्वा समरे कर्णो हन्याद्राजन् कथञ्चन ॥ ३७

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि पञ्चचत्वारिंशोऽध्यायः ॥ ४५ ॥
॥ ७३ ॥ कर्णपर्वणि पञ्चचत्वारिंशोऽध्यायः ॥ ४५ ॥
[अस्मिन्नध्याये ३७ श्लोकाः]

॥ षट्चत्वारिंशोऽध्यायः ॥

सङ्कुलयुद्धम् ॥

सञ्जयः—
वरप्रदानं कुन्त्यास्तु कर्णस्स्मृत्वा महारथः ।
वधप्राप्तं च कौन्तेयं नावधीद्भरतर्षभ ॥ १

एवमुक्त्वा ततः पार्थं विसृज्य च महारथः ।
न्यहनत् पाण्डवीं सेनां वज्रहस्त इवासुरीम् ॥ २

1. ख—इदमर्धं नास्ति

ततोऽपायाद्धृतं राजा व्रीडन्निव जनेश्वरः ॥ २॥

अपयातं च राजानम् अन्वयासिषुरच्युतम् ।
चेदिपाण्डवपाञ्चालास् सात्यकिश्च महारथः ॥ ३॥

द्रौपदेयास्तथा शूरा माद्रीपुत्रौ च पाण्डवौ ॥ ४

ततो युधिष्ठिरानीकं दृष्ट्वा कर्णः पराङ्मुखम् ।
कुरुभिस्सहितो वीरः प्रहृष्टः पृष्ठतोऽन्वगात् ॥ ५

शङ्खभेरीनिनादाश्च कार्मुकाणां च निस्स्वनाः ।
बभूवुर्धार्तराष्ट्राणां सिंहनादरवैस्सह ॥ ६

युधिष्ठिरस्तु कौरव्यो रथमारुह्य मारिष ।
श्रुतकीर्तेर्महाराज दृष्टवान् कर्णविक्रमम् ॥ ७

कालयमानं बलं दृष्ट्वा सूतपुत्रेण पाण्डवः ।
तान् योधानब्रवीत् क्रुद्धो निघ्नतैनान् सहस्रशः ॥ ८

ततो राज्ञाऽभ्यनुज्ञाताः पाण्डवानां महारथाः ।
भीमसेनमुखास्सर्वे पुत्रास्ते प्रत्युपाद्रवन् ॥ ९

बभूव तुमुलश्शब्दो योधानां तत्र भारत ।
रथहस्त्यश्वपत्तीनां द्रवतां निनदो महान् ॥ १०

उद्यतप्रतिविष्टानां शस्त्राणां च ततस्ततः ॥ १०॥

आगच्छत प्रहरत क्षिप्रं विपरिधावत ।

इति ब्रुवाणा ह्यन्योन्यं जघ्नुर्योधा रणाजिरे ॥ ११॥
अभ्रच्छायेव तत्रासीच् छस्त्रवृष्टिभिरम्बरे ।
समावृतैर्नरवरैर् निघ्नद्भिरितरेतरम् ॥ १२॥
विपताकध्वजच्छत्रा व्यश्वसूतायुधा रथाः ।
[1]व्यङ्गाङ्गावयवाः पेतुः क्षितौ क्षीणा हतेश्वराः ॥ १३॥
शिखराणीव शैलानां वज्राभिन्नानि मारिष ॥ १४
सारोहा निहताः पेतुर् द्विपा भिन्ना महीतले ।
छिन्नभिन्नविपर्यस्तवर्मालङ्कारविग्रहाः ॥ १५
सारोहास्तुरगाः पेतुर् हतवीरास्सहस्रशः ।
विप्रविद्धायुधाङ्गाश्च द्विरदा रथिभिर्हताः ॥ १६
प्रतिवीरैश्च सम्मर्दे पत्तिसङ्घास्सहस्रशः ।
विशालायतताम्राक्षैः पद्मेन्दुप्रतिमाननैः ॥ १७
शिरोभिर्युद्धशौण्डानां युद्धशौण्डैस्तृता मही ॥ १७॥
यथा भुवि तथा व्योम्नि निस्स्वनं शुश्रुवुर्जनाः ।
विमानेऽप्सरसां सङ्घैर् गीतवादित्रनिस्स्वनैः ॥ १८॥
हतानभिमुखान् वीरैश् शतशोऽथ सहस्रशः ।
आरोप्यारोप्य गच्छन्ति विमानैरप्सरोगणाः ॥ १९॥
तद्दृष्ट्वा महदाश्चर्यं प्रत्यक्षं स्वर्गलिप्सया ।

1. ख—इदमर्धं नास्ति

प्रहृष्टमनसश्शूराः क्षिप्रं जघ्नुः परस्परम् ॥ २०॥

रथिनो रथिभिस्सार्धं चित्रं युयुधुराहवे ।
पत्तयः पत्तिभिर्नागास् सह नागैर्हया हयैः ॥ २१॥

एवं प्रवृत्ते सङ्ग्रामे नरवाजिगजक्षये ।
सैन्येन रजसा व्याप्ते स्वे स्वाञ्जघ्नुः परे परान् ॥ २२॥

कचाकचं रणं ह्यासीद् दन्तादन्तं नखानखम् ।
मुष्टियुद्धं नियुद्धं च देहपापविनाशनम् ॥ २३॥

वर्तमाने तथा युद्धे जगतो रोमहर्षणे ।
नराश्वगजदेहेभ्यः प्रसृता लोहितापगा ॥ २४॥

नराश्वगजदेहांस्तान् उवाह पतितान् बहून् ।
नराश्वगजसम्बाधे गजाश्वनरयोधिनाम् ॥ २५॥

लोहितोदा महाघोरा नदी लोहितकर्दमा ।
नराश्वगजदेहान् वै वहन्ती भीरुभीषणा ॥ २६॥

तस्या नद्याः परं पारं व्रजन्ति विजयैषिणः ।
नागेन च प्लवन्तो वै निमज्ज्योन्मज्ज्य चापरे ॥ २७॥

ते तु लोहितदिग्धाङ्गा रक्तवर्माम्बरायुधाः ।
सस्रुस्तस्यां पपुश्चासृङ् मम्लुश्च भरतर्षभ ॥ २८॥

रथानश्वान् नरान् नागान् आयुधाभरणानि च ।

वर्माणि चाप्यपश्याम [1]पतितानि सहस्रशः ॥ २९॥

खं द्यां भूमिं दिशश्चापि प्रायः पश्याम लोहिताः ॥ ३०

लोहितस्य च गन्धेन स्पर्शेन च रसेन च ।
रूपेण चातिरक्तेन शब्देन च विसर्पता ॥ ३१

विषादस्सुमहानासीत् प्रायस्सैन्यस्य मारिष ॥ ३१॥

तत्तु विप्रहतं सैन्यं भीमसेनमुखैस्तव ।
भूयस्समाद्रवन् वीरास् सात्यकिप्रमुखा रथाः ॥ ३२॥

तेषामापततां वेगम् अविषह्यं निरीक्ष्य वै ।
पुत्राणां ते महत् सैन्यम् आसीद्राजन् पराङ्मुखम् ॥ ३३॥

तद्विदीर्णनराश्वेभं रथवाजिसमाकुलम् ।
विध्वस्तवर्मकवचं प्रविद्धायुधकार्मुकम् ॥ ३४॥

व्यद्रवत् तावकं सैन्यं लोड्यमानं समन्ततः ।
सिंहार्दितमिवारण्ये यथा गजकुलं तथा ॥ ३५॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥
॥ ७३ ॥ कर्णपर्वणि षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥
[अस्मिन्नध्याये ३५॥ श्लोकाः]

---

1. ख—अयं पादोऽनन्तरञ्च न स्तः

॥ सप्तचत्वारिंशोऽध्यायः ॥

कर्णं पराजित्य जिघांसोर्भीमस्य शल्येन हेतुकथनपूर्वकं निषेधनम् ॥

सञ्जयः—

तानभिद्रवतो दृष्ट्वा पाण्डवांस्तावकं बलम् ।
क्रोशतस्सूतपुत्रस्य न स्म राजन् न्यवर्तत ॥ १

ततः पक्षप्रपक्षस्थाः प्रकुक्षिस्थाश्च भारत ।
उदात्तशस्त्राः कुरवो भीममभ्यद्रवन् रणे ॥ २

कर्णोऽपि दृष्ट्वा द्रवतो धार्तराष्ट्रान् पराङ्मुखान् ।
हंसवर्णान् हयानग्र्यान् प्रैषयद्यत्र पाण्डवः ॥ ३

ते प्रेषिता महाराज शल्येनाहवशोभिना ।
भीमसेनरथं प्राप्य समसज्जन्त वाजिनः ॥ ४

दृष्ट्वा कर्णं समायान्तं भीमः क्रोधसमन्वितः ।
मतिं दधे विनाशाय कर्णस्य भरतर्षभ ॥ ५

सोऽब्रवीत् सात्यकिं वीरं धृष्टद्युम्नं च पार्षतम् ॥ ५॥

भीमः—

एनं रक्षत राजानं धर्मात्मानं युधिष्ठिरम् ।
संशयान्महतो मुक्तं कथञ्चित् प्रेक्षतो मम ॥ ६॥

अग्रतो मे कृतो राजा भिन्नसर्वपरिच्छदः ।

दुर्योधनस्य प्रीत्यर्थं राधेयेन दुरात्मना ॥ ७॥

अन्तमद्य गमिष्यामि तस्य दुःखस्य मारिष ॥ ८

हन्ता वाऽस्मि रणे कर्णं स मां वा निहनिष्यति ।
सङ्ग्रामेऽद्य सुघोरेऽस्मिन् सत्यमेतद्ब्रवीमि वः ॥ ९

राजानमद्य भवतां न्यासभूतं ददानि वै ।
अस्य संरक्षणे सर्वे यतध्वं विगतज्वराः ॥ १०

सञ्जयः—

एवमुक्त्वा महाबाहुः प्रायादातिरथिं प्रति ।
सिंहनादेन महता सर्वान् सन्नादयन् दिशः ॥ ११

दृष्ट्वा त्वरितमायान्तं भीमं युद्धाभिनन्दिनम् ।
सूतपुत्रमथोवाच मद्राणामीश्वरः प्रभुः ॥ १२

शल्यः—

पश्य कर्णं महाबाहुं सङ्क्रुद्धं पाण्डुनन्दनम् ।
दीर्घकालार्जितं क्रोधं मोक्तुकामस्त्वयि ध्रुवम् ॥ १३

ईदृशं नास्य रूपं मे दृष्टपूर्वं कदाचन ।
अभिमन्यावपि हते राक्षसे वा घटोत्कचे ॥ १४

त्रैलोक्यस्य समग्रस्य शक्तः क्रुद्धो निवारणे ।
बिभर्ति यादृशं रूपं कालाग्न्यनिलवर्चसम् ॥ १५

सञ्जयः—

एवं ब्रुवति राधेयं मद्राणामीश्वरे नृप ।
अभ्यवर्तत वै कर्णं क्रोधदीप्तो वृकोदरः ॥ १६

तथा गतं तु सम्प्रेक्ष्य भीमं युद्धाभिनन्दिनम् ।
अब्रवीद्वचनं शल्यं राधेयः प्रहसन्निव ॥ १७

कर्णः—

यदुक्तं वचनं मेऽद्य त्वया मद्रजनेश्वर ।
भीमसेनं प्रति विभो तत् सत्यं नात्र संशयः ॥ १८

एष शूरश्च वीरश्च क्रोधनश्च वृकोदरः ।
निरपेक्षश्शरीरे च प्राणतश्च बलाधिकः ॥ १९

अज्ञातवासं वसता विराटनगरे तदा ।
द्रौपद्याः प्रियकामेन केवलं बाहुसंश्रयात् ॥ २०

प्रसह्य विक्रमेणाजौ कीचकस्सगणो हतः ॥ २०॥

सोऽद्य सङ्ग्रामशिरसि सन्नद्धः क्रोधमूर्च्छितः ।
किङ्करोद्यतदण्डेन मृत्युनाऽपि व्रजेद्रणम् ॥ २१॥

चिरकालाभिलषितो मम यस्तु मनोरथः ।
अर्जुनं समरे हन्यां मां वा हन्याद्धनञ्जयः ॥ २२॥

स मे कदाचिदद्यैव भीमसेनसमागमात् ॥ २३

निहते भीमसेने तु यदि वा विरथीकृते ।

अभियास्यति मां पार्थस् तन्मे साधु भविष्यति ॥ २४
अत्र यन्मन्यसे प्राप्तं तच्छीघ्रं सम्प्रधारय ॥ २४॥

सञ्जयः—

एतच्छ्रुत्वा तु वचनं राधेयस्यामितौजसः ।
उवाच वचनं शल्यस् सूतपुत्रं तथा गतम् ॥ २५॥

शल्यः—

अभियाहि महाबाहो भीमसेनं महाबलम् ।
निरपेक्षश्च युध्यस्व शक्तिं स्वां सम्प्रदर्शयन् ॥ २६॥

यस्ते कामोऽभिलषितश् चिरात् प्रभृति हृद्गतः ।
स ते सम्पत्स्यते कर्ण सत्यमेतद्ब्रवीमि ते ॥ २७॥

सञ्जयः—

एवमुक्तस्तु राधेयश् शल्यं पुनरुवाच ह ॥ २८

कर्णः—

हन्ताऽहमेनं संरब्धं मां वा हन्याद्वृकोदरः ॥ २८॥

सञ्जयः—

[1]एवमुक्त्वा ततो राजन् राधेयो रथिनां वरः ।
युद्धे मनस्समाधाय याहि याहीत्यचोदयत् ॥ २९॥

ततः प्रायाद्रथेनाशु शल्यस्तत्र विशां पते ।
यतो भीमो महेष्वासो व्यद्रावयत वाहिनीम् ॥ ३०॥

ततस्तूर्यनिनादाश्च भेरीणां च महास्वनाः ।

---

1. ख—इदमर्धं नास्ति

उदतिष्ठन्त राजेन्द्र कर्णभीमसमागमे ॥ ३१॥

भीमसेनो हि सङ्क्रुद्धस् तव सैन्यं दुरासदम् ।
नाराचैर्विमलैस्तीक्ष्णैर् दिशः प्राद्रावयद्बली ॥ ३२॥

स सन्निपातस्तुमुलो घोररूपो विशां पते ।
आसीद्रौद्रो महाराज कर्णपाण्डवयोर्मुधे ॥ ३३॥

ततो मुहूर्ताद्राजेन्द्र नातिकृच्छ्राद्वसन्निव ।
भीमसेनो महाबाहुः कर्णप्रेप्सुरभिद्रवत् ॥ ३४॥

तमापतन्तं सम्प्रेक्ष्य कर्णो वैकर्तनो वृषा ।
आजघानोरसि क्रुद्धो नाराचेन परन्तपः ॥ ३५॥

पुनश्चैनममेयात्मा शरवर्षैरवाकिरत् ॥ ३६

स विद्धस्सूतपुत्रेण च्छादयामास पत्रिभिः ।
विव्याध निशितैः कर्णं नवभिर्नतपर्वभिः ॥ ३७

तस्य कर्णो धनुर्मध्ये द्विधा चिच्छेद पत्रिणा ।
अथैनं छिन्नधन्वानं प्रत्यविध्यत् स्तनान्तरे ॥ ३८

नाराचेन सुतीक्ष्णेन सर्वावरणभेदिना ॥ ३८॥

सोऽन्यत् कार्मुकमादाय सूतपुत्रं वृकोदरः ।
राजन् मर्मसु मर्मज्ञो विव्याध निशितैश्शरैः ॥ ३९॥

ननाद बलवान्नादं कम्पयन्निव रोदसी ॥ ४०

तं कर्णः पञ्चविंशत्या नाराचानां समर्पयत् ।
मदोत्कटं रणे दृप्तम् उल्काभिरिव कुञ्जरम् ॥ ४१

स कर्णबाणाभिहतः पाण्डवः क्रोधमूर्च्छितः ।
संरम्भामर्षताम्राक्षस् सूतपुत्रजिघांसया ॥ ४२

स कार्मुके महावेगं भारसाधनमुत्तमम् ।
गिरीणामपि भेत्तारं सायकं समयोजयत् ॥ ४३

व्याकृष्य बलवच्चापम् आकर्णान्तमविच्युतम् ।
तं मुमोच महेष्वासः क्रुद्धः कर्णजिघांसया ॥ ४४

स विसृष्टो बलवता बाणो वज्राशनिस्वनः ।
अदारयद्रणे कर्णं वज्रवेगो यथाऽचलम् ॥ ४५

स भीमसेनाभिहतस् सूतपुत्रोऽप्यरिन्दमः ।
निषसाद रथोपस्थे विसंज्ञः पृतनापतिः ॥ ४६

[1]रुधिरेणावसिक्ताङ्गो गतासुवदरिन्दमः ॥ ४६॥

एतस्मिन्नन्तरे दृष्ट्वा मद्रराजो वृकोदरम् ।
जिह्वां छेत्तुं समायान्तं सान्त्वयन्निदमब्रवीत् ॥ ४७॥

शल्यः—

भीमसेन महाबाहो यत् त्वां वक्ष्यामि तच्छृणु ।
वचनं हेतुसम्पन्नं श्रुत्वा चैतत् तथा कुरु ॥ ४८॥

---

1. अ-ब—नास्तीदमर्धम्

अर्जुनेन प्रतिज्ञातो वधः कर्णस्य शुष्मिणः ।
तां तथा कुरु भद्रं ते प्रतिज्ञां सव्यसाचिनः ॥ ४९॥

भीमः—

दृढव्रतत्वं पार्थस्य जानामि नृपसत्तम ।
राज्ञस्तु धर्षणं पापः कृतवान् मम सन्निधौ ॥ ५०॥

ततः कोपाभिभूतेन शेषं न गणितं मया ।
पतिते चापि राधेये न मे मन्युरशमं गतः ॥ ५१॥

जिह्वोद्धरणमेवास्य प्राप्तकालं मतं मम ॥ ५२

अनेन सुनृशंसेन समवेतेषु राजसु ।
अस्माकं शृण्वतां कृष्णा यानि वाक्यानि मातुल ॥ ५३

असह्यानि च नीचेन बहूनि श्रावितानि भो ॥ ५३॥

नूनं चैतत् परिज्ञातं दूरस्थस्यापि पार्थिव ।
छेदनं चास्य जिह्वायास् तदेवाकाङ्क्षितं मया ॥ ५४॥

राज्ञस्तु प्रियकामेन कालोऽयं परिपालितः ॥ ५५

भवता तु यदुक्तोऽस्मि वाक्यं हेत्वर्थसंहितम् ।
तद्गृहीतं महाराज कटुकस्थमिवौषधम् ॥ ५६

हीनप्रतिज्ञो बीभत्सुर् न हि जीवेत कर्हिचित् ।
अस्मिन् विनष्टे नष्टास्मस् सर्व एव सकेशवाः ॥ ५७

अद्य चैव नृशंसात्मा पापः पापकृतां वरः ।

गमिष्यति पराभावं दृष्टमात्रः किरीटिना ॥ ५८

युधिष्ठिरस्य कोपेन पूर्वं दग्धो नृशंसकृत् ।
त्वया संरक्षितस्त्वद्य मत्समीपादुपायतः ॥ ५९

सञ्जयः—

एवं मद्राधिपश्श्रुत्वा विसंज्ञं सूतनन्दनम् ।
अपोवाह रथेनाजौ कर्णमाहवशोभिनम् ॥ ६०

पराजिते ततः कर्णे धार्तराष्ट्री महाचमूः ।
व्यपायात् सर्वतो भग्ना हाहाभूता समन्ततः ॥ ६१

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥
॥ ७३ ॥ कर्णपर्वणि सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥
[अस्मिन्नध्याये ६१ श्लोकाः]

॥ अष्टचत्वारिंशोऽध्यायः ॥

भीमकर्णयोर्युद्धम् ॥ १ ॥ भीमेन दुर्योधनानुजानां कतिपयानां हननम् ॥ २ ॥ सङ्कुलयुद्धं च ॥ ३ ॥

धृतराष्ट्रः—

सुदुष्करमिदं कर्म कृतं भीमेन सञ्जय ।
येन कर्णो महेष्वासो रथोपस्थे निपातितः ॥ १

कर्णो ह्येको रणे हन्ता पाण्डवान् सृञ्जयैस्सह ।
इति दुर्योधनस्सूत प्रोक्तवान् मां मुहुर्मुहुः ॥ २

पराजितं तु राधेयं दृष्ट्वा भीमेन संयुगे ।
ततः परं किमकरोत् पुत्रो दुर्योधनो मम ॥ ३

सञ्जयः—

विसंज्ञं प्रेक्ष्य राधेयं सूतपुत्रं महाहवे ।
महत्या सेनया सार्धं सोदरानिदमब्रवीत् ॥ ४

दुर्योधनः—

शीघ्रं गच्छत भद्रं वो राधेयं परिरक्षत ।
भीमसेनभये घोरे मज्जन्तं व्यसनार्णवे ॥ ५

सञ्जयः—

ते तु राज्ञा समादिष्टा भीमसेनजिघांसया ।
अभ्यवर्तन्त सहसा पतङ्गा इव पावकम् ॥ ६

श्रुतायुर्दुर्धरः क्राथो विविंत्सुर्विकटस्समः ।
निषङ्गी कवची पाशी तथा नन्दोपनन्दकौ ॥ ७

दुष्प्रधर्षस्सुबाहुश्च वातवेगसुवर्चसौ ।
दुर्धरो दुर्मदश्चैव तथा सन्धिश्शमस्सहः ॥ ८

एते रथैः परिवृता वीर्यवन्तो बलान्विताः ।
भीमसेनं समासाद्य समन्तात् पर्यवारयन् ॥ ९

ते किरन्तश्शरव्रातान् नानालिङ्गान् समन्ततः ॥ ९॥
स तैरभ्यर्द्यमानस्तु भीमसेनो महाबलः ॥ १०

तेषामापततां शीघ्रं पुत्राणां ते जनाधिप ।
रथैः पञ्चशतैस्सार्धं पञ्चाशन्यहनद्रथान् ॥ ११

विवित्सोस्तु ततः क्रुद्धो भल्लेनापाहरच्छिरः ।
भीमसेनो महाराज तत् पपात ततो भुवि ॥ १२

सकुण्डलशिरस्त्राणं पूर्णचन्द्रनिभाननम् ।
अशोभत महाराज पूर्णचन्द्र इवाम्बरे ॥ १३

तं दृष्ट्वा निहतं शूरं भ्रातरस्सर्वतस्तदा ।
अभ्यवर्तन्त समरे भीमं भीमपराक्रमम् ॥ १४

ततोऽपराभ्यां भल्लाभ्यां पुत्रयोस्ते जनाधिप ।
जहार समरे प्राणाञ् छिताभ्यां पाण्डुनन्दनः ॥ १५

तौ धरामन्वपद्येतां वातरुग्णाविव द्रुमौ ।
विकटश्च समश्चोभौ देवपुत्रसमौ नृप ॥ १६

ततस्तु त्वरितो भीमः क्राथिं निन्ये यमक्षयम् ।
नाराचेन सुतीक्ष्णेन स हतो न्यपतद्भुवि ॥ १७

हाहाकारस्ततस्तीव्रस् सम्बभूव जनेश्वर ।
वध्यमानेषु वीरेषु तव पुत्रेषु धन्विषु ॥ १८

तेषां संलुलिते सैन्ये पुनर्भीमो महाबलः ।

नन्दोपनन्दौ समरे प्राहिणोद्यमसादनम् ॥ १९

ततस्ते प्राद्रवन् भीताः पुत्रास्ते विह्वलीकृताः ।
भीमसेनं रणे दृष्ट्वा कालान्तकयमोपमम् ॥ २०

पुत्रांस्ते निहतान् दृष्ट्वा कर्णः क्रोधसमन्वितः ।
हंसवर्णान् हयान् भूयः प्रैषयद्यत्र पाण्डवः ॥ २१

ते प्रेषिता महाराज मद्रराजेन वाजिनः ।
भीमसेनरथं प्राप्य समसज्जन्त वेगिताः ॥ २२

स सन्निपातस्तुमुलो घोररूपो विशां पते ।
आसीद्रौद्रो महाराज कर्णपाण्डवयोर्मृधे ॥ २३

दृष्ट्वा मम महाराज तौ समेतौ महारथौ ।
आसीद्बुद्धिः कथं नु स्याद् एतदद्य भविष्यति ॥ २४

ततो भीमो रणश्लाघी छादयामास पत्रिभिः ।
कर्णं रणे महाराज पुत्राणां तव पश्यताम् ॥ २५

[1]ततः कर्णो भृशं क्रुद्धो भीमं नवभिरायसैः ।
विव्याध परमास्त्रज्ञो भल्लैस्सन्ततपर्वभिः ॥ २६

तान् निहत्य महाराज भीमो भीमपराक्रमः ।
आकर्णपूर्णैर्विशिखैः कर्णं विव्याध सप्तभिः ॥ २७

ततः कर्णो महाराज आशीविष इव श्वसन् ।

1. ख—इदमर्धं नास्ति

शरवर्षेण महता छादयामास पाण्डवम् ॥ २८

भीमोऽपि तं शरव्रातैश् छादयित्वा महारथम् ।
पश्यतां कौरवेयाणां विननाद महारथः ॥ २९

[1]ततः कर्णो भृशं क्रुद्धो द्रुतमायम्य कार्मुकम् ।
भीमं विव्याध दशभिः कङ्कपत्रैश्शिलाशितैः ॥ ३०

कार्मुकं चास्य चिच्छेद भल्लेन निशितेन च ॥ ३०॥

ततो भीमो महाबाहुर् हेमपट्टपरिष्कृतम् ।
परिघं घोरमादाय मृत्युदण्डमिवापरम् ॥ ३१॥

कर्णस्य निधनाकाङ्क्षी चिक्षेपातिबलो नदन् ॥ ३२

तमापतन्तं परिघं वज्राशनिसमस्वनम् ।
चिच्छेद बहुधा कर्णश् शरैराशीविषोपमैः ॥ ३३

ततः कार्मुकमादाय भीमो भीमतरं दृढम् ।
छादयामास विशिखैः कर्णं परबलार्दनम् ॥ ३४

ततो युद्धमभूद्घोरं कर्णपाण्डवयोर्मृधे ।
मृगेन्द्रयोरिव महत् परस्परवधैषिणोः ॥ ३५

ततः कर्णो महाराज भीमसेनं त्रिभिश्शरैः ।

---

1. क-ङ—अथ वैकर्तनः कोपाद्धनुराकृष्य वेगितः ॥ [पाठान्तरम्]
ख—ततः कर्णो महाराज भीमसेनं त्रिभिश्शरैः ।
आकर्णपूर्णैरभ्यघ्नद्दृढमानम्य कार्मुकम् ॥ [पाठान्तरम्]

आकर्णपूर्णैरभ्यघ्नद् दृढमायम्य कार्मुकम् ॥ ३६
भीमं विव्याध दशभिः क्रङ्कपत्रैरिशलाशितैः ॥ ३६॥
सोऽतिविद्धो महेष्वासः कर्णेन बलिनां वरः ।
घोरमादत्त विशिखं कर्णकायविभेदनम् ॥ ३७॥
तस्य वर्म तनुत्राणं भित्त्वा देहं च सायकः ।
प्राविशद्धरणीं राजन् वल्मीकमिव पन्नगः ॥ ३८॥
स तेनातिप्रहारेण व्यथितो विह्वलन्निव ।
सञ्चचाल रथे कर्णः क्षितिकम्पे यथाऽचलः ॥ ३९॥
ततः कर्णो महाराज कोपामर्षसमन्वितः ।
भीमं तं पञ्चविंशत्या [1]नाराचानां समर्पयत् ॥ ४०॥
चिच्छेद कार्मुकं तूर्णं पाण्डवस्य महात्मनः ॥ ४१
ततो मुहूर्ताद्राजेन्द्र नातिकृच्छ्राद्धसन्निव ।
विरथं भीमकर्माणं भीमं चक्रे नराधिप ॥ ४२
ततो भीमो महातेजा विरथो रथिनां वरः ।
गदां गृह्य महाबाहुर् अपतत् स्यन्दनोत्तमात् ॥ ४३
गदया च महाराज कर्णस्य रथकूबरम् ।
पोथयामास सङ्क्रुद्धस् समरे शत्रुतापनः ॥ ४४
स क्रोधवशमापन्नः पाण्डुपुत्रः प्रतापवान् ।

1. क—इतः षट् पादा न सन्ति

विद्राव्य गदया वीरस् तव पुत्रान् महाहवे ॥ ४५
नागान् सप्तशतान् राजन्नीषादन्तान् प्रहारिणः ।
व्यधमद्गदया भीमो दण्डपाणिरिवान्तकः ॥ ४६
दन्तवेष्टेषु नेत्रेषु कुम्भेषु च मुखेषु च ।
मर्मस्वपि च मर्मज्ञस् सोऽर्दयामास संयुगे ॥ ४७
तेऽभ्यर्दिता मारुतिना विनदन्तो भृशातुराः ।
ततस्ते प्राद्रवन् भीताः प्रहताश्च पुनः पुनः ॥ ४८
महामात्रास्तमावव्रुर् मेघा इव दिवाकरम् ॥ ४८॥
तान् सप्तशतनागेन्द्रान् सारोहायुधकेतनान् ।
भूमिष्ठो गदयाऽभ्यघ्नच् छरन्मेघानिवानिलः ॥ ४९॥
ततस्सुबलपुत्रस्य हयानतिजवान् पुनः ।
पोथयामास कौन्तेयस् त्रिसाहस्रानरिन्दमः ॥ ५०॥
रथानां च शतं साग्रं पत्तींश्च शतशोऽपरान् ।
न्यहनत् पाण्डवो युद्धे तापयंस्तव वाहिनीम् ॥ ५१॥
प्रतप्यमानं सूर्येण भीमेन च महात्मना ।
तव सैन्यं सङ्कुकोच चर्मेवाग्नौ समाहितम् ॥ ५२॥
ते भीमभयसन्त्रस्तास् तावका भरतर्षभ ।
विहाय समरे [1]भीमं विप्रकीर्णा दिशो दश ॥ ५३॥

1. क-ख-ङ—कर्णं

रथाः पञ्चदशैवान्ये ह्रादिनश्शरवर्षिणः ।
भीममभ्यद्रवन् घ्नन्तश् शरसङ्घैस्समन्ततः ॥ ५४॥

तान् ससूतरथाश्वेभान् सपताकाध्वजायुधान् ।
पोथयामास समरे भीमो विष्णुरिवासुरान् ॥ ५५॥

ततश्शकुनिनिर्दिष्टास् सादिनश्शूरसम्मताः ।
त्रिसाहस्राण्याभिययुश् शरशक्त्यृष्टिपाणयः ॥ ५६॥

तान् प्रत्युद्गम्य यवनान् साश्वारोहान् परारिहा ।
विविधान् विचरन् मार्गान् गदया समपोथयत् ॥ ५७॥

तेषामासीन्महाञ्छब्दस् ताडितानां च सर्वशः ।
अग्निभिर्दह्यमानानां नलानामिव भारत ॥ ५८॥

एवं सुबलपुत्रस्य त्रिसाहस्रान् हयोत्तमान् ।
हत्वाऽन्यं रथमास्थाय क्रुद्धो राधेयमभ्ययात् ॥ ५९॥

कर्णोऽपि समरे राजन् धर्मपुत्रमरिन्दमम् ।
शरैः प्रच्छादयामास सरथं चाप्यपातयत् ॥ ६०॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि अष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥
॥ ७३ ॥ कर्णपर्वणि अष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥
[अस्मिन्नध्याये ६०॥ श्लोकाः]

॥ एकोनपञ्चाशोऽध्यायः ॥

सङ्कुलयुद्धम् ॥

सञ्जयः—

ततस्सम्प्रद्रुतं सैन्यं दृष्ट्वा कर्णो महारथः ।
अन्वधावत् किरन् बाणैः कङ्कपत्रैरजिह्मगैः ॥ १

राजानमनुधावन्तं शरैरावृत्य रोदसी ।
क्रुद्धः प्रच्छादयामास शरजालेन मारुतिः ॥ २

सन्निवृत्तस्ततस्तूर्णं राधेयश्शत्रुकर्शनः ।
भीमं प्रच्छादयामास समन्तान्निशितैश्शरैः ॥ ३

भीमसेनरथप्रेप्सुं कर्णं भारत सात्यकिः ।
अभ्यद्रवदमेयात्मा पार्ष्णिग्रहणकारणात् ॥ ४

भीमसेनरथप्रेप्सुः कर्णो भारत सात्यकिम् ।
अभ्यवर्तत शैनेयम् अर्दयञ्छरवृष्टिभिः ॥ ५

तावन्योन्यं समासाद्य वृषभौ सर्वधन्विनाम् ।
विसृजन्तौ शरांस्तत्र व्यभ्राजेतां परस्परम् ॥ ६

ताभ्यां वियति राजेन्द्र विततं भीमदर्शनम् ।
क्रौञ्चपृष्ठारुणं रौद्रं बाणजालमदृश्यत ॥ ७

नैव सूर्यप्रभां खं वा दिशो वा प्रदिशस्तथा ।
अज्ञासिष्म वयं ते वा शरैर्मुक्तैस्समन्ततः ॥ ८

मध्याह्ने तपतो राजन् भास्करस्य महाप्रभाः ।
क्रान्तास्सर्वाश्शरौघैस्तैः कर्णमाधवयोस्तदा ॥ ९

सौबलं कृतवर्माणं द्रौणिमाधिरथिं कृपम् ।
संसक्तान् पाण्डवैर्दृष्ट्वा निवृत्ताः कुरवः पुनः ॥ १०

तेषामापततां वेगस् तीव्र आसीद्दिशां पते ।
उद्भूतानां यथा वृष्ट्या सागराणां भयावहः ॥ ११

ते सेने भृशसंविग्ने दृष्ट्वाऽन्योन्यं महाहवे ।
हर्षेण महता युक्ते प्रत्युपेत्य परस्परम् ॥ १२

ततः प्रववृते युद्धं मध्यं प्राप्ते दिवाकरे ।
यादृशं नैवमस्माभिर् दृष्टपूर्वं न च श्रुतम् ॥ १३

बलौघास्ते समासाद्य बलौघान् सुमहामृधे ।
[1]अभ्यवर्तन्त वेगेन वार्योघा इव सागरम् ॥ १४

[2]आसीन्निनादस्सुमहान् बाणौघानां परस्परम् ।
[3]गर्जतां सागरौघाणां यथा स्यान्निनदो महान् ॥ १५

[4]ते तु सेने समासाद्य वेगवत्यौ परस्परम् ।

---

1. अ—नास्तीदमर्धम्
2. अ—नास्तीदमर्धम्
3. अ-क—नास्तीदमर्धम्
4. अ-ब-ङ—नास्तीदमर्धम्

एकीभावमनुप्राप्ते नद्योघाविव सङ्गतौ ॥ १६

[1]ततः प्रववृते युद्धं घोररूपं विशां पते ।
[2]कुरूणां पाण्डवानां च लिप्सूनां सुमहद्यशः ॥ १७

शूराणां गर्जतां तत्र साधिक्षेपकृता गिरः ।
अश्रूयन्त महाराज न्यङ्गान्युद्दिश्य भारत ॥ १८

यस्य यद्यद् रणे न्यङ्गं पितृतो मातृतोऽपि वा ।
कर्मतश्शीलतो वाऽपि श्रावयामासुराहवे ॥ १९

[3]तान् दृष्ट्वा समरे शूरांस् तर्जमानान् परस्परम् ।
बभूव मे मती राजन्नैतेषामस्ति जीवितम् ॥ २०

तेषां दृष्ट्वा तु क्रुद्धानां वपूंष्यमिततेजसाम् ।
भयं तीव्रं ममाभूद्वै कथमेतद्भविष्यति ॥ २१

ततस्ते पाण्डवा राजन् कौरवाश्च महारथाः ।
ततक्षुस्सायकैस्तूर्णम् अन्योन्यं विजयैषिणः ॥ २२

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि एकोनपञ्चाशोऽध्यायः ॥ ४९ ॥
॥ ७४ ॥ कर्णपर्वणि एकोनपञ्चाशोऽध्यायः ॥ ४९ ॥
[अस्मिन्नध्याये २२ श्लोकाः]

---

1. ख—ततःप्रववृते युद्धं कुरुपाण्डवयोस्तदा ।
विशांपते घोररूपं भीरूणां भयवर्धनम् ॥ [अधिकःपाठः]
2. क-घ-ङ—हर्षेण महतायुक्तं कुरुपाण्डवसैनिकैः ।
3. अ—नास्तीदमधैम्

॥ पञ्चाशोऽध्यायः ॥

सङ्कुलयुद्धम् ॥

सञ्जयः—

क्षत्रियास्ते महाराज परस्परवधैषिणः ।
अन्योन्यं समरे जघ्नुः कृतवैरा महौजसः ॥ १

रथौघाश्च हयौघाश्च नरौघाश्च समन्ततः ।
गजौघाश्च महाराज संसक्ताश्च परस्परम् ॥ २

[1]गदानां परिघाणां च शक्तीनां च परस्परम् ।
प्रासानां भिण्डिपालानां मुसुण्ठीनां च सर्वशः ॥ ३

सम्पातं समपश्याम सङ्ग्रामे भृशदारुणे ॥ ३॥

शलभा इव सम्पेतुश् शस्त्रवृष्टयस्समन्ततः ॥ ४

नागान् नागास्समासाद्य व्यधमन्त समन्ततः ।
हया हयांश्च समरे रथिनो रथिनस्तथा ॥ ५

पत्तयः पत्तिसङ्घांश्च सादिनश्च गजान् रथान् ।
पत्तयो रथमातङ्गान् रथिनः पत्तिसादिनः ॥ ६

हस्तिनोऽश्वान् रथांश्चैव ममृदुश्शीघ्रगा नृप ॥ ६॥

नागाश्च समरे व्यङ्गं हयास्व्यङ्गं च मारिष ।

1. अ—नासीदमर्षम्

[1]नराश्च ममृदुस्त्र्यङ्गं रथास्त्र्यङ्गं च मारिष ॥ ७॥
शरतोमरनाराचैर् गदाशक्तिपरश्वधैः ।
वध्यतां तत्र शूराणां क्रोशतां च परस्परम् ॥ ८॥
घोरमायोधनं जज्ञे पशूनां घातने यथा ॥ ९
रुधिरेण समुत्सिक्ता बभौ भारत मेदिनी ।
शक्रगोपसमाकीर्णा प्रावृषीव वसुन्धरा ॥ १०
यथैव वाससी शुभ्रे महारजतरञ्जिते ।
बिभ्रती युवती श्यामा तद्वदासीद्वसुन्धरा ॥ ११
बद्धचूडामणिवरैश् शिरोभिश्चारुकुण्डलैः ।
उज्झितैर्वृषभाक्षणां भ्राजते स्म वसुन्धरा ॥ १२
शशशोणितदिग्धेव शातकुम्भमयीव च ।
[2]भूर्बभौ भरतश्रेष्ठ शान्तार्चिर्भिरिवानलः ॥ १३
छिन्नानामुत्तमाङ्गानां बाहूनां चोरुभिस्सह ।
कुण्डलानां पिनद्धानां भूषणानां च भारत ॥ १४
निष्काणां हेमसूत्राणां शरीराणां च धन्विनाम् ।
वर्मणां सपताकानां तूणीराणां तथैव च ॥ १५
अगम्यकल्पा पृथिवी सर्वतो भृशदुर्गमा ॥ १५॥
गजा गजान् समासाद्य विषाणैरर्दयन् भृशम् ।

1. अ—नास्तीदमर्धम् 2. अ—नास्तीदमर्धम्

[1]विषाणाग्रहतास्तत्र भ्राजन्ते स्म गजोत्तमाः ॥ १६॥

[2]रुधिरेणावसिक्ताङ्गा गैरिकप्रस्रवा इव ।
स्यन्दमाना यथा भान्ति पर्वता धातुमण्डिताः ॥ १७॥

तथा रेजू रणे नागा रुधिरेण समाप्लुताः ॥ १८

तोमरान् सादिभिर्मुक्तान् प्रतिमानस्थितान् बहून् ।
हस्तैरुद्धृत्य तान् नागा बभञ्जुश्च परे रणे ॥ १९

नाराचैश्छिन्नवर्माणो भ्राजन्ते स्म गजोत्तमाः ।
प्रावृट्काले महाराज मेघा इव सविद्युतः ॥ २०

शरैः कनकपुङ्खैश्च चिता रेजुर्गजोत्तमाः ।
उल्काभिस्सम्प्रदीप्ताभिः पर्वता इव मारिष ॥ २१

केचिदभ्याहता नागैर् नागा नगवरोपमैः ।
न चेलुस्समरात् तस्माच् छिन्नपक्षा इवाद्रयः ॥ २२

अपरे प्राद्रवन् नागाश् शरार्ता व्रणतापिताः ।
प्रतिमानैश्च कुम्भैश्च पेतुरुर्व्यां महाहवे ॥ २३

[3]निषेदुस्सिंहवच्चान्ये नदन्तो भैरवान् रवान् ।
मम्लुश्च बहवो राजंश् चुक्रुशुश्चापरे तथा ॥ २४

---

1. अ--नास्तीदमर्धम्
2. ख—प्रावृट्काले यथा राजा मेघा इव सविद्युतः । [अधिकः पाठः]
3. अ—नास्तीदमर्धम्

हयाश्च निहता बाणैस् स्वर्णभाण्डपरिच्छदाः ।
निषेदुश्चैव पेतुश्च बभ्रमुश्च दिशो दश ॥ २५

अपरे छिद्यमानाश्च व्यवेष्टन्त महीतले ।
भावान् बहुविधांश्चक्रुस् ताडिताश्शरतोमरैः ॥ २६

नराश्च निहता भूमौ कूजन्तस्तत्र मारिष ॥ २६॥

दृष्ट्वा च बान्धवानन्ये पितॄनन्ये पितामहान् ।
धावमानान् परांश्चापि दृष्ट्वाऽन्ये तत्र भारत ॥ २७॥

ख्यातानि नामगोत्राणि शशंसुरितरेतरम् ॥ २८

तेषां छिन्ना महाराज भुजाः कनकभूषणाः ।
उद्वेष्टन्ते विवेष्टन्ते भ्रमयन्त्युत्पतन्ति च ॥ २९

निपतन्ति तथा भूमौ स्फुरन्ति च सहस्रशः ।
वेगांश्चान्ये रणे चक्रुः पञ्चास्या इव पन्नगाः ॥ ३०

ते भुजा भोगिभोगाभाश् चन्दनाक्ता विशां पते ।
[1]लोहितार्द्रा भृशं रेजुस् तापनीया इव ध्वजाः ॥ ३१

वर्तमाने तथा घोरे सङ्ग्रामे सर्वतो दिशम् ।
अविज्ञातास्स्म युध्यन्ते विनिघ्नन्तः परस्परम् ॥ ३२

भौमेन रजसा कीर्णे शस्त्रसम्पातसङ्कुले ।
न च स्वे न परे राजन् विज्ञायन्ते तमोन्विताः ॥ ३३

1. ख—इदमर्धं नास्ति

तथा प्रवर्तमाने तु घोररूपे भयानके ।
शोणितौघा महानद्यः प्रस्रुतास्तत्र चासकृत् ॥ ३४
शीर्षपाषाणसञ्छन्नाः केशशैवलशाद्वलाः ।
हस्तिसङ्घाटसङ्कीर्णा धनुःकाशा गजोडुपाः ॥ ३५
मांसशोणितपङ्किन्यो हस्तिग्राहास्सुदारुणाः ।
नदीः प्रवर्तयामासुर् यमराष्ट्रविवर्धिनीः ॥ ३६
[1]भीरुवित्रासकारिण्यश् शूराणां हर्षवर्धनाः ।
ता नदीर्घोररूपास्तु नयन्तीर्यमसादनम् ॥ ३७
अवगाह्य न्यमज्जन्त क्षत्रिया जयगर्धिनः ॥ ३७॥
क्रव्यादानां महाराज नर्दतां च समन्ततः ।
घोरमायोधनं जज्ञे प्रेतराजपुरं यथा ॥ ३८॥
उत्थितान्यगणेयानि कबन्धानि समन्ततः ।
नृत्यन्ति वै भूतगणा वितृप्ता मांसशोणितैः ॥ ३९॥
पीत्वा च शोणितं तत्र वसां भुक्त्वा च भारत ।
मेदोमज्जावसामत्तास् तृप्ता मांसस्य चैव ह ॥ ४०॥
धावमानाश्च दृश्यन्ते काककङ्कबलास्तथा ॥ ४१
ते शूरास्समरे राजन् भयं त्यक्त्वा सुदुस्त्यजम् ।
सम्प्रहृष्टा महाराज चक्रुः कर्माण्यभीतवत् ॥ ४२

1. ख—इदमर्धं नास्ति

शरशक्तिगदाकीर्णे क्रव्यादगणसङ्कुले ।
विचेरुस्समरे शूराः ख्यापयन्तस्स्वपौरुषम् ॥ ४३

अन्योन्यं ख्यापयन्ति स्म नामगोत्राणि चैव हि ।
पितृनामानि च रणे मातृगोत्राणि चापरे ॥ ४४

इतश्चेतश्च बहवस् तत्र योधा विशां पते ।
अन्योन्यमवमृद्नन्ति शक्तितोमरपट्टसैः ॥ ४५

वर्तमाने तथा युद्धे घोररूपे सुदारुणे ।
व्यषीदत् कौरवी सेना भिन्ना नौरिव सागरे ॥ ४६

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि पञ्चाशोऽध्यायः ॥ ५० ॥
॥ ७३ ॥ कर्णपर्वणि पञ्चाशोऽध्यायः ॥ ५० ॥
[अस्मिन्नध्याये ४६ श्लोकाः]

॥ एकपञ्चाशोऽध्यायः ॥

अर्जुनस्य संशप्तकैर्युद्धम् ॥

सञ्जयः—

वर्तमाने तथा युद्धे क्षत्रियाणां निमज्जने ।
गाण्डीवस्य महाघोषश् शुश्रुवे युधि मारिष ॥ १

संशप्तकानां कदनम् अकरोद्यत्र पाण्डवः ।
कोसलानां तथा राजन् नारायणबलस्य च ॥ २

संशप्तकास्तु समरे शरवृष्टिं समन्ततः ।
अपातयन् पार्थमूर्ध्नि जयगृध्राः प्रमन्यवः ॥ ३

तां शस्त्रवृष्टिमायान्तीम् उरसा धारयन् प्रभुः ।
व्यगाहत परान् पार्थो विनिघ्नन् रथिनां वरान् ॥ ४

विक्षोभ्य तु रथानीकं कङ्कपत्रैश्शिलाशितैः ।
आससाद ततः पार्थस् सुशर्माणं महारथम् ॥ ५

स तस्य शरवर्षाणि ववर्ष रथिनां वरः ।
तथा संशप्तकाश्चैव पार्थस्य समरे स्थिताः ॥ ६

सुशर्मा तु ततः पार्थं विद्ध्वा नवभिरायसैः ।
जनार्दनं त्रिभिर्बाणैर् अभ्यघ्नद्दक्षिणे भुजे ॥ ७

ततोऽपरेण भल्लेन केतुं पार्थस्य मारिष ।
विव्याध समरे राजन् सुशर्मा क्रोधमूर्च्छितः ॥ ८

स वानरवरो राजन् विश्वकर्मकृतो महान् ।
ननाद सुमहानादं नृत्यन्निव विभीषयन् ॥ ९

कपेस्तु निनदं श्रुत्वा सन्त्रस्ता तव वाहिनी ।
भयं विपुलमासाद्य निश्चेष्टा समपद्यत ॥ १०

[1]ततस्सा शुशुभे सेना निश्चेष्टाऽवस्थिता नृप ।
नानापुष्पसमाकीर्णं यथा चित्रीकृतं वनम् ॥ ११

प्रतिलभ्य ततस्संज्ञां योधास्ते कुरुसत्तम ।
अर्जुनं सिषिचुर्बाणैः पर्वतं जलदा इव ॥ १२

सञ्छाद्य समरे पार्थं परिवव्रुस्समन्ततः ॥ १२॥

ते हयान् रथचक्रे च रथेषां चापि मारिष ।
निग्रहीतुं प्रचक्रुश्च क्रोधाविष्टास्समन्ततः ॥ १३॥

निगृह्य तु रथं तस्य योधास्ते तु सहस्रशः ।
रथबन्धं प्रचक्रुर्हि पाण्डवस्यामितौजसः ॥ १४॥

रथमारुरुहुः केचित् कृष्णपार्थौ जिघृक्षवः ।
संशप्तकानां योधास्ते सिंहनादांश्च नेदिरे ॥ १५॥

अपरे जगृहुश्चैव केशवस्य महाभुजौ ।
पार्थमेके महाराज रथस्थं जगृहुर्मुदा ॥ १६॥

अच्युतस्तु ततो बाहू विधून्वन् रणमूर्धनि ।
पातयामास तान् सर्वान् दुष्टहस्तीव हस्तिपान् ॥ १७॥

सरथस्तैर्गृहीतस्तु पाण्डवस्सुमहाबलः ।
स्पन्दितुं नाशकद्राजंस् तदद्भुतमिवाभवत् ॥ १८॥

ततः पार्थो महाबाहुस् संवृतस्तैर्महारथैः ।

---

1. ख—इदमर्धं नास्ति

निगृहीतं रथं दृष्ट्वा तांश्चाप्याद्रवतो बहून् ॥ १९॥
रथारूढांश्च सुबहून् पदाऽऽक्षिप्य न्यपातयत् ॥ २०
अपातयदसम्भ्रान्तश् शरैरासन्नयोधिनः ॥ २०॥
तांस्तापयित्वा समरे पार्थः परपुरञ्जयः ।
स्मयन्निव महाबाहुः केशवं वाक्यमब्रवीत् ॥ २१॥

अर्जुनः—

पश्य कृष्ण महाबाहो संशप्तकगणान् बहून् ।
कुर्वतोऽसुकरं कर्म मुमूर्षून् कालचोदितान् ॥ २२॥
रथबन्धमिमं प्राप्य पृथिव्यां नास्ति कश्चन ।
यस्सहेत पुमाँल्लोके मदन्यः क्षत्रियर्षभः ॥ २३॥
पश्यैतानद्य समरे मत्प्रयुक्तैस्सुतेजनैः ।
पात्यमानान् रणे कृष्ण शरैराशीविषोपमैः ॥ २४॥

सञ्जयः—

इत्येवमुक्त्वा बीभत्सुश् शङ्खप्रवरमुत्तमम् ।
व्यनादयदमेयात्मा देवदत्तं महामृधे ॥ २५॥
देवदत्तस्वनं श्रुत्वा केशवोऽपि महायशाः ।
पाञ्चजन्यस्वनं चक्रे पूरयन्निव रोदसी ॥ २६॥
[1]तयोश्शङ्खस्वनं श्रुत्वा संशप्तकवरूथिनी ।

1. ख—अर्धमेतं नास्ति

सञ्चचाल महाराज वित्रस्ता चाभवद्भृशम् ॥ २७॥

नागमस्त्रं ततः पार्थः प्रादुश्चक्रे हसन्निव ।
पादबन्धं स तेषां वै चक्रे तेन महास्त्रवित् ॥ २८॥

यानुद्दिश्य रणे पार्थः पादबन्धं चकार ह ।
ते बद्धाः पादबन्धेन योधास्संशप्तकास्तदा ॥ २९॥

निर्विचेष्टास्तदाऽभूवन् पाण्डवस्यास्त्रतेजसा ॥ ३०
[1]निर्विचेष्टांस्तदा योधान् अवधीत् पाण्डुनन्दनः ।

यथेन्द्रस्समरे दैत्यांस् तारकस्य वधे पुरा ॥ ३१

ते वध्यमानास्समरे मुमुचुस्तं रथोत्तमम् ।
आयुधानि च सर्वाणि विस्रष्टुमुपचक्रमुः ॥ ३२

ततस्सुशर्मा राजेन्द्र गृहीतां वीक्ष्य वाहिनीम् ।
सौपर्णमस्त्रं त्वरितः प्रादुश्चक्रे महारथः ॥ ३३

ततस्सुपर्णास्सम्पेतुर् भक्षयन्तो भुजङ्गमान् ।
ततो विदुद्रुवुर्नागास् तान् दृष्ट्वा खेचरान् नृप ॥ ३४

तद्विमुक्तं बलं रेजे पादबन्धाद्दिशां पते ।
मेघबृन्दाद्यथा मुक्तो भास्करस्तापयन् प्रजाः ॥ ३५

विप्रमुक्तास्ततो योधाः फल्गुनस्य रथं प्रति ।

---

1. ख—अर्धमर्धं नास्ति

ससृजुर्बाणसङ्घांश्च शस्त्रसङ्घांश्च मारिष ॥ ३६

तां महास्त्रमयीं वृष्टिं शरैस्सञ्छिद्य मरिष ।
अवधीत् स ततो योधान् वासविः परवीरहा ॥ ३७

[1]सुशर्मा तु ततो राजन् बाणेन नतपर्वणा ।
अर्जुनं हृदये विद्ध्वा विव्याधान्यैस्त्रिसप्तभिः ॥ ३८

स गाढविद्धो व्यथितो रथोपस्थ उपाविशत् ॥
तत उच्चुक्रुशुस्सर्वे हतः पार्थ इति ब्रुवन् ॥ ३९

ततश्शङ्खनिनादाश्च भेरीशब्दाश्च पुष्कलाः ।
नानावादित्रनिनदास् सिंहनादाश्च जज्ञिरे ॥ ४०

प्रतिलभ्य ततस्संज्ञां श्वेताश्वः कृष्णसारथिः ।
सोऽतिविद्धो महेष्वासश् शरैराशीविषोपमैः ॥ ४१

सुशर्माणं महाराज क्रोधाविष्टो महारथः ।
ततश्शरशतैः पार्थस् सञ्छाद्यैनं क्षणाद्रणे ॥ ४२

दिश आवारयामास बाणैस्तत्र महास्त्रवित् ॥ ४२॥

[2]विमुखीकृत्य समरे सुशर्माणं धनञ्जयः ।

---

1. ख—निश्चेष्टांस्तु ततो योधानवधीत्पाण्डुनन्दनः ।
यथेन्द्रस्समरे दैत्यांस्तारकस्य वधे पुरा ।
ते वध्यमानास्समरे मुमुचुस्तं रथोत्तमम् ॥ [अधिकः पाठः]

2. अ—सप्तार्धानि न सन्ति

ऐन्द्रमस्त्रममेयात्मा प्रादुश्चक्रे हसन्निव ॥ ४३॥

ततो बाणसहस्राणि तदुत्सृष्टानि भारत ।
सर्वदिक्ष्वभ्यदृश्यन्त सूदयन्तो रथद्विपान् ॥ ४४॥

हयान् पत्तींश्च समरे शस्त्रवृष्ट्या व्यपातयत् ।
रराज समरे राजञ् शक्रो निघ्नन्निवासुरान् ॥ ४५॥

वध्यमाने ततस्सैन्ये भयं सुमहदाविशत् ।
संशप्तकगणानां च गोपालानां च सर्वशः ॥ ४६॥

न हि तत्र पुमान् कश्चिद् योऽर्जुनं प्रत्ययुध्यत ।
पश्यतां तत्र वीराणाम् अहन्यत बलं महत् ॥ ४७॥

हन्यमानं च तदभून्निश्चेष्टं वै पराक्रमे ॥ ४८

अयुतं तत्र योधानां हत्वा पाण्डुसुतो रणे ।
व्यभ्राजत महाराज विधूमोऽग्निरिव ज्वलन् ॥ ४९

चतुर्दशसहस्राणि यानि शिष्टानि भारत ।
रथानामयुतं चैव त्रिसहस्रांश्च दन्तिनः ॥ ५०

ततस्संशप्तका भूयः परिवव्रुर्धनञ्जयम् ।
मर्तव्यमिति निश्चित्य जये चापि निवर्तनम् ॥ ५१

महदासीत् ततो युद्धं तावकानां विशां पते ।

शूरेण बलिना सार्धं पाण्डवेन किरीटिना ॥ ५२

जित्वा तान् न्यहनत् पार्थश् शत्रूञ् शक्र इवासुरान् ॥ ५२॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि एकपञ्चाशोऽध्यायः ॥ ५१ ॥
॥ ७३ ॥ कर्णपर्वणि एकपञ्चाशोऽध्यायः ॥ ५१ ॥
[अस्मिन्नध्याये ५२॥ श्लोकाः]

॥ द्विपञ्चाशोऽध्यायः ॥

सङ्कुलयुद्धम् ॥

सञ्जयः—

कृतवर्मा कृपो द्रौणिस् सूर्यवर्मा महारथः ।
उलूकस्सौबलश्चैव राजा च सह सोदरैः ॥ १

सीदमानां चमूं दृष्ट्वा पाण्डुपुत्रभयार्दिताम् ।
समुज्जिहीर्षवस्सर्वे भिन्नां नावमिवाम्भसि ॥ २

अभ्यद्रवन्त समरे पाण्डवानामनीकिनीम् ॥ २॥

[1]ततो युद्धमतीवासीन्मुहूर्तमिव भारत ॥ ३

कृपेण शरवर्षाणि सुप्रमुक्तानि संयुगे ।
सृञ्जयांश्छादयामासुश् शलभानामिव व्रजाः ॥ ४

1. अ—अर्धद्वयं नास्ति

शिखण्डी तु ततः क्रुद्धो गौतमं त्वरितो ययौ ।
वारयञ् शरवर्षेण समन्ताद्ब्राह्मणं कृपम् ॥ ५

महदासीत् तयोर्युद्धं मुहूर्तमिव दारुणम् ।
क्रुद्धयोस्समरे राजन् रामरावणयोरिव ॥ ६

कृपस्तु शरवर्षं तद् विनिहत्य महास्त्रवित् ।
शिखण्डिनं रणे क्रुद्धो विव्याध दशभिश्शरैः ॥ ७

ततश्शिखण्डी कुपितश् शरैस्सप्तभिराहवे ।
कृपं विव्याध हृदये कङ्कपत्रैरजिह्मगैः ॥ ८

ततः कृपो दृढं क्रुद्धस् सोऽतिविद्धो महारथः ।
ततस्सुनिशितैस्तीक्ष्णैः क्षुरप्रैर्हेमभूषितैः ॥ ९

व्यश्वसूतरथं चक्रे शिखण्डिनमथो द्विजः ॥ ९॥

हताश्वात्तु ततो यानाद् अवप्लुत्य महारथः ।
खड्गं चर्म च सङ्गृह्य सत्वरं ब्राह्मणं ययौ ॥ १०॥

तमापतन्तं सहसा शरैस्सन्नतपर्वभिः ।
वारयामास समरे तदद्भुतमिवाभवत् ॥ ११॥

तदद्भुतमपश्याम शिलानामिव सर्पणम् ।
स निश्चेष्टोऽभवद्राजञ् छिखण्डी विष्ठितो बली ॥ १२॥

कृपेण वारितं दृष्ट्वा शिखण्डिनमतो नृप ।
प्रत्युद्ययौ कृपं तूर्णं धृष्टद्युम्नो महारथः ॥ १३॥

[1]धृष्टद्युम्नं ततो यान्तं शारद्वतरथं प्रति ।
प्रतिजग्राह वेगेन कृतवर्मा महारथः ॥ १४॥

युधिष्ठिरमथायान्तं शारद्वतरथं प्रति ।
सपुत्रं सहसैन्यं च दोणपुत्रो न्यवारयत् ॥ १५॥

नकुलं सहदेवं च त्वरमाणौ महारथौ ।
प्रतिजग्राह ते पुत्रश्[illegible] शरवर्षेण वारयन् ॥ १६॥

भीमसेनं करूशांश्च केकयान् सृञ्जयांस्तथा ।
कर्णो वैकर्तनो वीरो वारयामास तेजसा ॥ १७॥

शिखण्डिने ततो बाणान् कृपश्शारद्वतो युधि ।
प्रैषयत् त्वरया युक्तो बीभत्सोरथ सन्निधौ ॥ १८॥

ताञ् छरान् प्रेषितांस्तेन सुपुङ्खान् रुक्मभूषितान् ।
चिच्छेद खड्गमाविध्य भ्रामयंश्च पुनः पुनः ॥ १९॥

शतचन्द्रं तदा चर्म ब्राह्मणस्तस्य मारिष ।
व्यधमत् सायकैस्तूर्णं तत उच्चुक्रुशुर्जनाः ॥ २०॥

[2]स विचर्मा महाराज खड्गपाणिरभिद्रवत् ।
कृपस्तं शरसङ्घातैर् आद्रवन्तमपीडयत् ॥ २१॥

शारद्वतशरैर्भ्रस्तं क्षिश्यमानं महारणे ।
चित्रकेतुसुतो दृष्ट्वा सुकेतुस्त्वरितो ययौ ॥ २२॥

1. अ—पञ्चार्धानि न सन्ति 2. क—अर्धत्रयं नास्ति

स किरन् ब्राह्मणं युद्धे बहुभिर्निशितैश्शरैः ।
अभ्यगच्छदमेयात्मा शारद्वतरथं रणे ॥ २३॥

दृष्ट्वा विषक्तं तं युद्धे ब्राह्मणं च निवारितम् ।
अपयातस्ततस्तूर्णं शिखण्डी राजसत्तम ॥ २४॥

सुकेतुस्त्वथ राजेन्द्र गौतमं निशितैश्शरैः ।
विद्ध्वा विव्याध विंशत्या पुनश्चैनं त्रिभिश्शरैः ॥ २५॥

अथास्य सशरं चापं पुनश्चिच्छेद मारिष ।
सारथिं वाहनान् राजंस् तस्य मर्माण्यताडयत् ॥ २६॥

[1]गौतमस्तु ततः क्रुद्धो धनुर्गृह्यापरं दृढम् ।
सुकेतुं त्रिंशता बाणैस् सर्वमर्मस्वताडयत् ॥ २७॥

स विह्वलितसर्वाङ्गः प्रचचाल रथोत्तमे ।
भूमिकम्पे यथा वृक्षश् चचालाकम्पितो भृशम् ॥ २८॥

चलतस्तस्य कायात् तु शिरो ज्वलितकुण्डलम् ।
सोष्णीषं सशिरस्त्राणं क्षुरप्रेण न्यपातयत् ॥ २९॥

तच्छिरः प्रापतद्भूमौ श्येनाहृतमिवामिषम् ।
ततोऽस्य कायो वसुधां पश्चात् प्रापतदच्युत ॥ ३०॥

तस्मिन् हते महाराज पुत्रास्तस्य पदानुगाः ।

---

1. क-ङ—दृष्ट्वा तु वारितां युद्धे शस्त्रवृष्टिं दुरासदाम् ।
कृतवर्माणमभ्येत्य वारयामास पार्षतः ॥ [अधिकः पाठः]

गौतमं समरे त्यक्त्वा दिशस्ते विप्रदुद्रुवुः ॥ ३१

धृष्टद्युम्नं तु समरे सन्निवार्य महारथः ।
कृतवर्मा नदन् हृष्टस् तिष्ठ तिष्ठेति चाब्रवीत् ॥ ३२

तदभूत् तुमुलं युद्धं वृष्णिपार्षतयोस्ततः ।
आमिषार्थे यथा युद्धं श्येनयोः क्रुद्धयोर्नृप ॥ ३३

धृष्टद्युम्नस्तु समरे हार्दिक्यं नवभिश्शरैः ।
आजघानोरसि क्रुद्धः पीडयन्निव सात्वतम् ॥ ३४

कृतवर्मा तु समरे पार्षतेन दृढाहतः ।
पार्षतं सरथं साश्वं छादयामास सायकैः ॥ ३५

सरथं छादितो राजन् धृष्टद्युम्नो न दृश्यते ।
[1]मेघैरिव परिच्छन्नो भास्करो जलधारिभिः ॥ ३६

विधूय तान् बाणगणाञ् शरैः कनकभूषणैः ।
व्यरोचत रणे राजन् धृष्टद्युम्नः कृतव्रणः ॥ ३७

ततस्तु पार्षतः क्रुद्धश् शस्त्रवृष्टिं सुदारुणाम् ।
कृतवर्माणमासाद्य व्यसृजत् पृतनापतिः ॥ ३८

तामापतन्तीं सहसा शस्त्रवृष्टिं सुदारुणाम् ।
शरैरनेकसाहस्रैस् सात्वतोऽवारयद्युधि ॥ ३९

यथा रुक्मरथेनाजौ वाहान् वाहैरमिश्रयत् ।

---

1. ख—अदृश्यत नास्ति

[1]तथैव सात्वतरथे वाहान् व्राहैरमिश्रयत् ॥ ४०॥

गृहीत्वा चर्म खड्गं च रथं तस्यावपुप्लुवे ॥ ४१

मिश्रितेष्वथ वाहेषु प्रत्यासन्ने च पार्षते ।
दृष्ट्वाऽपदानं तस्याशु गदां जग्राह सात्वतः ॥ ४२

गदापाणिस्ततो राजन् रथात् तूर्णमवप्लुतः ।
तमदृष्ट्वा रथोपस्थे सारथिं समताडयत् ॥ ४३

खड्गेन शितधारेण स हतः प्रापतद्रथात् ॥ ४३॥

[2]कृतवर्मा ततो हृष्टस् तलशब्दं चकार ह ।
पार्षतं चाब्रवीद्राजन्नेहीहीति पुनः पुनः ॥ ४४॥

स तं न ममृषे युद्धे तलशब्दं समीरितम् ।
यथा नागस्सदा मत्तस् तलशब्दं समीरितम् ॥ ४५॥

अवप्लुत्य रथात् तस्मात् स्वरथं पुनरास्थितः ।
अभ्ययात् सात्वतं तूर्णं तिष्ठ तिष्ठेति चाब्रवीत् ॥ ४६॥

कृतवर्मा तु सङ्क्रुद्धो दिधक्षुरिव पावकः ।
धृष्टद्युम्नमुखान् सर्वान् पाण्डवान् पर्यवारयत् ॥ ४७॥

ततो राजन् महेष्वासं कृतवर्माणमाशु वै ।
[3]गदां गृह्य पुनर्वेगात् कृतवर्माणमाहनत् ॥ ४८॥

---

1. ख—इदमर्धं नास्ति 2. अ-ख-घ—अर्धद्वयं नास्ति
3. अ-ख—अर्धद्वयं नास्ति

सोऽतिविद्धो बलवता न्यपतन्मूर्च्छया हतः ।
श्रुतर्वा रथमारेप्य अपोवाह रणाजिरात् ॥ ४९॥

धृष्टद्युम्नस्तु समरे जित्वा शत्रून् महारथः ।
कौरवान् समरे तूर्णं कालयामास सायकैः ॥ ५०॥

ततस्तु तावका योधा धृष्टद्युम्नमभिद्रवन् ।
सिंहनादरवांश्चक्रुस् ततो युद्धमवर्तत ॥ ५१॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि द्विपञ्चाशोऽध्यायः ॥ ५२ ॥
॥ ७३ ॥ कर्णपर्वणि द्विपञ्चाशोऽध्यायः ॥ ५२ ॥
[अस्मिन्नध्याये ५१॥ श्लोकाः]

॥ त्रिपञ्चाशोऽध्यायः ॥

सङ्कुलयुद्धम् ॥ १ ॥ अश्वत्थाम्ना युधिष्ठिरपराजयः ॥ २ ॥

सञ्जयः—

द्रौणिर्युधिष्ठिरं दृष्ट्वा युयुधानेन रक्षितम् ।
द्रौपदेयैस्तथा शूरैर् अभ्यवर्तत हृष्टवत् ॥ १

किरन्निषुगणान् घोरान् हेमपुङ्खान् शिलाशितान् ।
दर्शयन् विविधान् मार्गान् शिक्षया लघुहस्तवत् ॥ २

खं पूरयञ्छरैस्तीक्ष्णैर् वेगवद्भिस्समन्ततः ।

युधिष्ठिरस्य समरे दिशस्सर्वास्समावृणोत् ॥ ३

भारद्वाजशरैश्छन्नं न प्राज्ञायत किञ्चन ।
बाणभूतमभूत् सर्वम् आयोधनशिरो महत् ॥ ४

बाणजालं दिविष्ठं तत् स्वर्णपुङ्खैर्विभूषितम् ।
शुशुभे भरतश्रेष्ठ विमानमिव विष्ठितम् ॥ ५

तेन च्छन्ने रणे राजन् बाणजालेन भास्वता ।
अभ्रच्छायेव सञ्जज्ञे हृतरश्मिर्दिवाकरः ॥ ६

तदद्भुतमपश्याम बाणभूते नभस्स्थले ।
न स्म सम्पतते भूतं द्रौणेर्दृष्ट्वा पराक्रमम् ॥ ७

सात्यकिर्यतमानस्तु धर्मराजश्च पाण्डवः ।
तथेतराणि सैन्यानि न स्म चक्रुः पराक्रमम् ॥ ८

लाघवं द्रोणपुत्रस्य दृष्ट्वा तत्र महारथाः ।
व्यस्मयन्त महाराज न चैनं प्रत्युदीक्षितुम् ॥ ९

शेकुस्ते सर्वराजानस् तपन्तमिव भास्करम् ॥ ९॥

वध्यमाने महासैन्ये द्रौपदेया महारथाः ।
सात्यकिर्धर्मराजश्च पाञ्चालाश्चापि सङ्गताः ॥ १०॥

त्यक्त्वा मृत्युभयं घोरं द्रौणायनिमुपाद्रवन् ॥ ११

सात्यकिः पञ्चविंशत्या द्रौणिं विद्ध्वा शिलीमुखैः ।
पुनर्विव्याध नाराचैस् सप्तभिस्स्वर्णभूषणैः ॥ १२

युधिष्ठिरस्त्रिसप्तत्या प्रतिविन्ध्यश्च सप्तभिः ।
सुतसोमस्तु नवभिश् शतानीकस्तथाऽष्टभिः ॥ १३

श्रुतकर्मा त्रिभिर्बाणैश् [1]श्रुतकीर्तिश्च सप्तभिः ।
अन्ये च बहवश्शूरा विव्यधुस्तं समन्ततः ॥ १४

स तु क्रुद्धस्ततो राजन्नाशीविष इव श्वसन् ।
सात्यकिं पञ्चविंशत्या प्रत्यविध्यच्छिलाशितैः ॥ १५

श्रुतकीर्तिं च नवभिस् सुतसोमं च पञ्चभिः ।
अष्टभिश्श्रुतकर्माणं प्रतिविन्ध्यं त्रिभिस्तथा ॥ १६

शतानीकं च नवभिर् धर्मपुत्रं च सप्तभिः ।
अथेतरान् महेष्वासान् द्वाभ्यां द्वाभ्यां समर्पयत् ॥ १७

श्रुतकीर्तेस्तदा चापं मुष्टौ चिच्छेद मारिष ॥ १७॥
अथान्यद्धनुरादाय श्रुतकीर्तिर्महारथः ।
द्रौणायनिं त्रिभिर्विद्ध्वा विव्याधान्यैश्शितैश्शरैः ॥ १८॥

ततो द्रौणिर्महाराज शरवर्षेण सर्वतः ।
छादयामास तत् सैन्यं समन्ताद्युद्धदुर्मदः ॥ १९॥

ततः पुनरमेयात्मा धर्मराजस्य कार्मुकम् ।
द्विधा च्छित्त्वा प्रहस्याथ तं विव्याध त्रिभिश्शरैः ॥ २०॥

---

1. ख—श्रुतसेनस्तथाऽष्टभिः सप्तत्या सायकानां च
[अधिकः पाठः]

ततो धर्मसुतो राजा प्रगृह्यान्यन्महद्धनुः ।
द्रोणपुत्रं त्रिषष्ट्या तु बाह्वोरुरसि चार्पयत् ॥ २१॥

शैनेयस्तु ततः क्रुद्धो द्रौणेः प्रहरतो रणे ।
अर्धचन्द्रेण तीक्ष्णेन धनुश्चिच्छेदाऽनदद्भृशम् ॥ २२॥

छिन्नधन्वा ततो द्रौणिश्शक्त्या शक्तिमतां वरः ।
सारथिं पातयामास शैनेयस्य द्रुतं रथात् ॥ २३॥

अथान्यद्धनुरादाय द्रोणपुत्रः प्रतापवान् ।
शैनेयं शरवर्षेण छादयामास भारत ॥ २४॥

तस्याश्वाः प्रद्रुतास्सङ्ख्ये पतिते रथसारथौ ।
तत्र तत्रैव धावन्तस्समदृश्यन्त मारिष ॥ २५॥

युधिष्ठिरपुरोगास्तु द्रौणिं शस्त्रभृतां वरम् ।
अभ्यवर्तन्त वेगेन विसृजन्तश्शिताञ्छरान् ॥ २६॥

सहसाऽऽपतत्स्तान् वै क्रुद्धरूपान् समन्ततः ।
प्रहसन् प्रतिजग्राह द्रोणपुत्रो महारणे ॥ २७॥

ततश्शरशतज्वालस्सेनाकक्षं महारणे ।
द्रौणिर्ददाह समरे कक्षमग्निरिवोत्थितः ॥ २८॥

तद्बलं पाण्डवेयस्य द्रोणपुत्रशराहतम् ।
चुक्षुभे भरतश्रेष्ठ तस्मिन्नेव चमूमुखे ॥ २९॥

[1]तद्बलं पाण्डवेयस्य द्रोणपुत्रश्शरार्चिषा ।
तापयन् भरतश्रेष्ठ गभस्तिभिरिवांशुमान् ॥ ३०॥

भज्यमानममर्षेण ब्राह्मणस्य च सायकैः ।
क्षुभ्यते पाण्डवं सैन्यं तिमिनेव नदीमुखम् ॥ ३१॥

दृष्ट्वा तत्र महाराज द्रोणपुत्रपराक्रमम् ।
सर्वान् दुर्योधनः पार्थान् हतान् युद्धे ह्यमन्यत ॥ ३२॥

युधिष्ठिरस्तु त्वरितो द्रौणिं पीड्य महारथम् ।
अब्रवीद्द्रोणपुत्रं स रोषामर्षसमन्वितः ॥ ३३॥

युधिष्ठिरः—

जानामि त्वां युधि श्रेष्ठं वीर्यवन्तं महाबलम् ।
कृतास्त्रं कृतिनं चैव तथा लघुपराक्रमम् ॥ ३४॥

बलमेतद्भवान् सर्वं पार्षते यदि दर्शयेत् ।
ततस्त्वां बलवन्तं च कृतविद्यं च विद्महे ॥ ३५॥

न हि वै पार्षतं दृष्ट्वा समरे शत्रुसूदनम् ।
भवेत् तव बलं किञ्चिद् ब्रवीमि त्वा न तु द्विजम् ॥ ३६॥

नैव नाम तव प्रीतिर् नैव नाम कृतज्ञता ।
ततस्त्वं पुरुषव्याघ्र मामेवाद्य जिघांससि ॥ ३७॥

ब्राह्मणेन तपः कार्यं शमश्च दम एव च ।

---

1. अ—अर्धचतुर्थं नास्ति

क्षत्रियेण धनुर्नाम्यं स भवान् ब्राह्मणब्रुवः ॥ ३८॥

कुरुष्व समरे कर्म ब्रह्मबन्धो यथेष्टतः ।
मिषतस्तेऽद्य समरे ध्रुवं जेष्यामि कौरवान् ॥ ३९॥

सञ्जयः—

एवमुक्तो महाराज द्रोणपुत्रस्स्मयन्निव ।
युक्तं तथ्यं च सञ्चिन्त्य नोत्तरं किञ्चिदब्रवीत् ॥ ४०॥

अनुक्त्वा च ततः किञ्चिच् छरवर्षेण पाण्डवम् ।
छादयामास समरे क्रुद्धोऽन्तक इव प्रजाः ॥ ४१॥

स च्छाद्यमानस्समरे द्रोणपुत्रेण मारिष ।
व्यपायासीद्रणे पार्थं प्रगृह्य महतीं चमूम् ॥ ४२॥

प्रयाते तु ततस्तस्मिन् धर्मपुत्रे युधिष्ठिरे ।
द्रोणपुत्रस्स्थितो राजन् प्रत्यादेशान्महात्मनः ॥ ४३॥

ततो युधिष्ठिरं त्यक्त्वा राजानं द्रौणिराहवे ।
प्रययौ तावकं सैन्यं युक्तः क्रूराय कर्मणे ॥ ४४॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि त्रिपञ्चाशोऽध्यायः ॥ ५३ ॥
॥ ७३ ॥ कर्णपर्वणि त्रिपञ्चाशोऽध्यायः ॥ ५३ ॥
[अस्मिन्नध्याये ४४॥ श्लोकाः]

॥ चतुःपञ्चाशोऽध्यायः ॥

सङ्कुलयुद्धम् ॥ १ ॥ धृष्टद्युम्नेन दुर्योधनपराजयः ॥ २ ॥

सञ्जयः—

भीमसेनं सपाञ्चालं चेदिकेकयसंवृतम् ।
सेनापतिस्स्वयं क्रुद्धो वारयामास सायकैः ॥ १

ततस्तु चेदिकारूशान् सृञ्जयांश्च महारथान् ।
कर्णो जघान सङ्क्रुद्धो भीमसेनस्य पश्यतः ॥ २

भीमसेनस्ततः कर्णं विहाय रथसत्तमम् ।
प्रययौ कौरवं सैन्यं कक्षमग्निरिव ज्वलन् ॥ ३

सूतपुत्रोऽपि समरे पाञ्चालान् केकयांस्तथा ।
सृञ्जयांश्च महेष्वासान् सञ्जघान सहस्रशः ॥ ४

संशप्तकेषु पार्थस्तु कौरवेषु वृकोदरः ।
पाञ्चालेषु तथा कर्णः क्षयं चक्रुर्महारथाः ॥ ५

ते क्षत्रिया दह्यमानास् त्रिभिस्तैः पावकोपमैः ।
विनाशमगमंस्तीव्रं राजन् दुर्मन्त्रिते तव ॥ ६

ततो दुर्योधनः क्रुद्धो नकुलं नवभिश्शरैः ।
विव्याध भरतश्रेष्ठ चतुर्भिश्चास्य वाजिनः ॥ ७

ततः परममेयात्मा तव पुत्रो जनाधिप ।
क्षुरेण सहदेवस्य ध्वजं चिच्छेद काञ्चनम् ॥ ८

नकुलस्तु ततः क्रुद्धस् तव पुत्रं त्रिसप्तभिः ।
आजघान भृशं राजन् सहदेवश्च पञ्चभिः ॥ ९

तावुभौ भरतश्रेष्ठौ श्रेष्ठौ सर्वधनुष्मताम् ।
विव्याधोरसि सङ्क्रुद्धः पञ्चभिः पञ्चभिश्शरैः ॥ १०

ततोऽपराभ्यां भल्लाभ्यां धनुषी समकृन्तत ।
यमयोः प्रसभं वीरो विव्याधाशु त्रिभिस्त्रिभिः ॥ ११

तावन्ये धनुषी मृष्टे शक्रचापनिभे तथा ।
प्रगृह्य रेजतुश्शूरौ देवपुत्रसमौ युधि ॥ १२

ततस्तौ रभसौ युद्धे भ्रातरौ भ्रातरं नृपम् ।
शरैर्ववर्षतुर्घोरैस् तोयदाविव पर्वतम् ॥ १३

ततः क्रुद्धो महाराज तव पुत्रो महारथः ।
पाण्डुपुत्रौ महेष्वासौ वारयामास पत्रिभिः ॥ १४

धनुर्मण्डलमेवास्य ददृशे युधि भारत ।
सायकाश्चाप्यदृश्यन्त निस्सरन्तस्समन्ततः ॥ १५

तस्य सायकसञ्छन्नौ माद्रेयौ न विरेजतुः ।
मेघच्छन्नौ यथा व्योम्नि चन्द्रसूर्यौ गतप्रभौ ॥ १६

ते तु बाणा महाराज स्वर्णपुङ्खाशिशलाशिताः ।

आच्छादयन् दिशस्सर्वास् सूर्यस्येव मरीचयः ॥ १७

बाणभूते ततस्तस्मिन् सञ्छन्ने च नभस्स्थले ।
राज्ञस्तु ददृशे रूपं कालान्तकयमोपमम् ॥ १८

पराक्रमं तु तं दृष्ट्वा तव सूनोर्महारथाः ।
मृत्योरिवान्तिकं प्राप्तौ पाण्डुपुत्रौ हि मेनिरे ॥ १९

ततस्सेनापती राजन् पाण्डवानां महारथः ।
पार्षतः प्रययौ राजन् यत्र राजा सुयोधनः ॥ २०

माद्रीपुत्रौ ततश्शूरावतिक्रम्य महारथौ ।
धृष्टद्युम्नस्तव सुतं पीडयामास सायकैः ॥ २१

तमविध्यदमेयात्मा तव पुत्रोऽत्यमर्षणः ।
पाञ्चाल्यं पञ्चविंशत्या प्रहस्य पुरुषोत्तमः ॥ २२

ततः पुनरमेयात्मा पुत्रस्ते पृथिवीपते ।
विद्ध्वा ननाद पाञ्चाल्यं षष्ठ्या पञ्चभिरेव च ॥ २३

अथास्य सशरं चापं मुष्टिदेशे विशां पते ।
क्षुरप्रेण सुतीक्ष्णेन राजा चिच्छेद संयुगे ॥ २४

तदपास्य धनुश्छिन्नं पाञ्चाल्यश्शत्रुकर्शनः ।
अन्यदादत्त वेगेन धनुर्भारसहं नवम् ॥ २५

क्रोधाद्रुधिररक्ताक्षस् संरम्भात् प्रज्वलन्निव ।
अशोभत महेष्वासो धृष्टद्युम्नः कृतव्रणः ॥ २६

स पञ्चदश नाराचान् श्वसतः पन्नगानिव ।
जिघांसुर्भरतश्रेष्ठं धृष्टद्युम्नो व्यपासृजत् ॥ २७

ते वर्म हेमविकृतं भित्त्वा राज्ञश्शिलीमुखाः ।
विविशुर्धरणीं वेगात् कङ्कबर्हिणवाससः ॥ २८

सोऽतिविद्धो महाराज पुत्रस्तव विराजते ।
वसन्ते पुष्पशबलो यथा स्यात् किंशुको महान् ॥ २९

स च्छिन्नमर्मा नाराचैः प्रहारैर्झर्झरीकृतः ।
धृष्टद्युम्नस्य भल्लेन क्रुद्धश्चिच्छेद कार्मुकम् ॥ ३०

अथैनं छिन्नधन्वानं त्वरमाणो महीपतिः ।
सायकैर्दशभी राजन् भ्रुवोर्मध्ये समर्पयत् ॥ ३१

तस्य तेऽशोभयन् वक्त्रं कर्मारपरिमार्जिताः ।
प्रफुल्लपङ्कजं यद्वद् भ्रमरा मधुलिप्सवः ॥ ३२

तदपास्य धनुश्छिन्नं धृष्टद्युम्नो महामनाः ।
अन्यदादत्त वेगेन धनुर्भल्लांश्च षोडश ॥ ३३

ततो दुर्योधनस्याश्वान् हत्वा सूतं च पञ्चभिः ।
धनुश्चिच्छेद भल्लेन जातरूपपरिष्कृतम् ॥ ३४

रथं सोपस्करं छत्रं शाक्तिं खड्गं गदां ध्वजम् ।
भल्लैश्चिच्छेद दशभिः पुत्रस्य तव पार्षतः ॥ ३५

तपनीयाङ्गदं चित्रं नागं मणिमयं शुभम् ।

ध्वजं कुरुपतेश्चिच्छिन्नं ददृशुस्सर्वपार्थिवाः ॥ ३६

दुर्योधनं तु विरथं छिन्नवर्मायुधं रणे ।
भ्रातरं समुदैक्षन्त सोदरा भरतर्षभ ॥ ३७

समारोप्य रथे राजन् कुण्डधारो नराधिपम् ।
अपोवाह रणादाशु धृष्टद्युम्नस्य पश्यतः ॥ ३८

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि चतुःपञ्चाशोऽध्यायः ॥ ५४ ॥
॥ ७३ ॥ कर्णपर्वणि चतुःपञ्चाशोऽध्यायः ॥ ५४ ॥
[अस्मिन्नध्याये ३८ श्लोकाः]

॥ पञ्चपञ्चाशोऽध्यायः ॥

कर्णपराक्रमवर्णनम् ॥ १ ॥ भीमपराक्रमवर्णनम् ॥ २ ॥

सञ्जयः—

कर्णस्तु सात्यकिं हित्वा राजगृध्नुरमर्षणः ।
द्रोणहन्तारमुग्रेषुं ससाराभिमुखो बली ॥ १

तं पृष्ठतोऽन्वयात् क्रुद्धश् शैनेयोऽभिहतश्शरैः ।
वारणं जघने निघ्नन् विषाणाभ्यामिव द्विपः ॥ २

स भारत महानासीद् योधानां सुमहात्मनाम् ।

कर्णपार्षतयोर्युद्धे सङ्क्रुद्धानां महारणः ॥ ३

न पाण्डवानां नास्माकं कश्चिदासीत् पराङ्मुखः ।
प्रत्यदृश्यत यत् कर्णः पाञ्चालांस्त्वरितो ययौ ॥ ४

तस्मिन् क्षणे नरश्रेष्ठ नरवाजिरथक्षयः ।
प्रादुरासीदुभयतो राजन् मध्यगतेऽहनि ॥ ५

पाञ्चालास्तु महाराज त्वरिता विजिगीषवः ।
सर्वतोऽभ्यद्रवन् कर्णं पतत्त्रिण इव द्रुमम् ॥ ६

तेषामातिरथिः क्रुद्धः प्रधानान् वै तरस्विनः ।
विचिन्वन्निव बाणाग्रैस् समासादयदग्रतः ॥ ७

व्याघ्रकेतुस्सुशर्मा च शुक्रश्चित्रायुधः क्रतुः ।
दुर्जयो रोचमानश्च सिंहसेनस्तथाऽष्टमः ॥ ८

महता रथवंशेन परिवव्रुर्नरोत्तमम् ॥ ८॥

सृजन्तस्सायकांस्तूर्णं कर्णमाहवशोभिनम् ।
यतमानांस्तु ताञ् शूरान् मनुजेन्द्राशिशतैश्शरैः ॥ ९॥

अष्टाभिरष्टौ राधेयः पाञ्चालान् न्यहनद्रणे ॥ १०

अथापरान् महाराज सूतपुत्रः प्रतापवान् ।
जघान बहुसाहस्रान् योधान् युद्धविशारदान् ॥ ११

विष्णुं च विष्णुवर्माणं देवापिं भद्रमेव च ।

दण्डधारं च समरे चित्रं चित्रायुधं हरिम् ॥ १२

सिंहकेतुं रोचमानं शलभं च महारथम् ।
निजघान सुसङ्क्रुद्धश् चेदिकानां महारथान् ॥ १३

तेषामाददतः प्राणान् आसीदातिरथेर्वपुः ।
शोणिताभ्युक्षिताङ्गस्य रुद्रस्येवातिभैरवम् ॥ १४

तत्र भारत कर्णेन मातङ्गास्ताडिताश्शरैः ।
सर्वतोऽभ्यद्रवन् भीताः कुर्वन्तो महदाकुलम् ॥ १५

निपेतुरुर्व्यामपरे कर्णसायकताडिताः ।
कुर्वन्तो विविधान् नादान् वज्ररुग्णा इवाचलाः ॥ १६

गजवाजिमनुष्यैश्च निपतद्भिस्सहस्रशः ।
रथैर्भग्नैर्ध्वजैश्चैव समास्तीर्यत मेदिनी ॥ १७

नैवं भीष्मो न च द्रोणो नाप्यन्ये युधि तावकाः ।
चक्रुर्हि तादृशं कर्म यादृशं कृतवान् रणे ॥ १८

मृगमध्ये यथा सिंहो निर्भयो दृश्यते परान् ।
पाञ्चालानां तथा मध्ये चरन् कर्णो ह्यभीतवत् ॥ १९

सूतपुत्रोऽथ नागेषु हयेषु च रथेषु च ।
नरेषु च नरव्याघ्रश् चकार कदनं महत् ॥ २०

यथा मृगगणांस्त्रस्तान् सिंहो द्रावयते दिशः ।

पाञ्चालानां रथव्रातान् कर्णो द्रावयते तथा ॥ २१

सिंहं स्म हि यथा प्राप्य न जीवन्ति मृगाः क्वचित् ।
तथा कर्णमनुप्राप्य न जीवन्ति स्म सृञ्जयाः ॥ २२

वैश्वानरमुखं प्राप्य दह्यन्ते शलभा यथा ।
कर्णाग्निं समरे प्राप्य दग्धा भारत सृञ्जयाः ॥ २३

चेदिष्वेकेन कर्णेन पाञ्चालेषु च भारत ।
विश्राव्य नाम निहता बहवश्शूरसम्मताः ॥ २४

मतिर्ममासीद्राजेन्द्र दृष्ट्वा कर्णस्य विक्रमम् ।
नैकोऽप्यातिरथेर्जीवेत् पाञ्चालानां महारणे ॥ २५

सङ्क्रन्दे विमथ्य पाञ्चालान् सूतपुत्रः पुनः पुनः ।
अभ्यधावत् सुसङ्क्रुद्धः कुन्तीपुत्रं युधिष्ठिरम् ॥ २६

धृष्टद्युम्नश्च राजानं द्रौपदेयाश्च धन्विनः ।
परिवव्रुरमित्रघ्नं शतशश्चापरे जनाः ॥ २७

शिखण्डी सहदेवश्च नकुलोऽन्ये च भूमिपाः ।
जनमेजयश्शिनेर्नप्ता बहवश्च प्रभद्रकाः ॥ २८

एते पुरोगमा भूत्वा धृष्टद्युम्नश्च संयुगे ।
कर्णमस्यन्तमिष्वस्त्रैस् ततक्षुरमितौजसम् ॥ २९

तांस्तानतिरथिस्सङ्क्रन्दे चेदिपाञ्चालपाण्डवान् ।

[1]एकी बहूनभ्यपतद् गरुत्मानिव पन्नगान् ॥ ३०

भीमसेनस्तु कौन्तेयः कुरून् मद्रान् सकेकयान् ।
एकस्सङ्गम्य महेष्वासश् चालयामास सायकैः ॥ ३१

तत्र मर्मसु भीमेन नाराचैस्ताडिता गजाः ।
प्रपतन्तो हतारोहाः कम्पयन्ति स्म मेदिनीम् ॥ ३२

वाजिनश्च हतारोहाः पादाताश्च गतासवः ।
अशेरत महाराज [2]वमन्तो रुधिरं बहु ॥ ३३

ताडितास्सहसा नागा भीमसेनेन मारिष ।
निपतन्ति स्म वेगेन वज्ररुग्णा इवाचलाः ॥ ३४

निहतैस्तैर्महाराज वेगवद्भिर्महागजैः ।
शुशुभे वसुधा राजन् विकीर्णैरिव पर्वतैः ॥ ३५

सहस्रशश्च रथिनः पत्तयः पतितायुधाः ।
विक्षतास्समदृश्यन्त भीमाद्भीता गतासवः ॥ ३६

रथिभिस्सादिभिसूतैर् पादातैर्वाजिभिर्गजैः ।
भीमसेनशरैश्छिन्नैर् आस्तीर्णा वसुधाऽभवत् ॥ ३७

संस्तम्भितमिवातिष्ठद् भीमसेनभयार्दितम् ।
दुर्योधनबलं राजन् निरुत्साहं कृतं रणे ॥ ३८

---

1. ख—सात्यकिं च महाराज नाभ्यवर्तत संयुगे । [अधिकः पाठः]
2. ख—हतष्वद् पादा न सन्ति

निश्चेष्टं तु बलं दीनं बभौ तस्मिन् रणाजिरे ॥ ३८॥

प्रसन्नसलिले काले यथा स्यात् सागरो नृप ।
[1]तद्वत् तव बलं तद्वै निश्चलं समवस्थितम् ॥ ३९॥

मन्युवीर्यबलोपेतं दर्पात् पर्यवरोपितम् ।
अभवत् तव पुत्रस्य तत् सैन्यं निष्प्रभं तदा ॥ ४०॥

ते बले भरतश्रेष्ठ वध्यमाने परस्परम् ।
रुधिरौघपरिक्लिन्ने रुधिरार्द्रे बभूवतुः ॥ ४१॥

सूतपुत्रोऽवधीत् क्रुद्धस् सृञ्जयानामनीकिनीम् ।
भीमसेनः कुरूणां च त्रिगर्तानां धनञ्जयः ॥ ४२॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि पञ्चपञ्चाशोऽध्यायः ॥ ५५ ॥
॥ ७३ ॥ कर्णपर्वणि पञ्चपञ्चाशोऽध्यायः ॥ ५५ ॥
[अस्मिन्नध्याये ४२॥ श्लोकाः]

---

1. क—इदमर्धं नास्ति

॥ षट्पञ्चाशोऽध्यायः ॥

अर्जुनपराक्रमवर्णनम् ॥ १ ॥ अर्जुनेन सुदक्षिणानुजस्य काम्भोजस्य वधः ॥ २ ॥

सञ्जयः—

वर्तमाने तथा रौद्रे सङ्ग्रामेऽद्भुतदर्शने ।
निहत्य पृतनामध्ये संशप्तकगणान् बहून् ॥ १
अर्जुनो जयतां श्रेष्ठो वासुदेवमथाब्रवीत् ॥ १॥

अर्जुनः—

प्रभग्नं बलमेतद्धि योत्स्यमानं मया सह ॥ २
एते धावन्ति सगणास् संशप्तकमहारथाः ।
दुर्जया ह्येव समरे देवैरपि सवासवैः ॥ ३
अपारयन्तो मद्बाणान् सिंहशब्दान् मृगा इव ।
कुरवश्चाभिधावन्ति भीमसेनभयार्दिताः ॥ ४
दीर्यते च महत् सैन्यं सृञ्जयानां महारणे ॥ ४॥
हस्तिकक्ष्यो ह्यसौ कृष्ण केतुः कर्णस्य धीमतः ।
दृश्यते राजसैन्यस्य मध्ये विचरतो मुहुः ॥ ५॥
न च कर्णं रणे शक्ता जेतुमेते महारथाः ।
दुर्जयो ह्येष समरे देवदानवराक्षसैः ॥ ६॥

जानीते हि भवान् कर्णं वीर्यवन्तं पराक्रमे ॥ ७
तत्र याहि यतः कर्णो द्रावयत्येष नो बलम् ।
त्रिगर्तान् वर्जयन् याहि सूतपुत्रं महाबलम् ॥ ८
वासुदेव महाबाहो यथा च तव रोचते ॥ ८॥

सञ्जयः—

तच्छ्रुत्वा वचनं तस्य गोविन्दः प्रहसन्निव ।
अब्रवीदर्जुनं तूर्णं कौरवान् याहि भारत ॥ ९॥
ततस्तव महत् सैन्यं गोविन्द प्रेषिता हयाः ।
हंसवर्णा विशंस्तूर्णं वहन्तोऽर्जुनमाहवे ॥ १०॥
केशवप्रेषितैरश्वैस् तैः काञ्चनविभूषितैः ।
आविशद्भिस्तव बलं चतुर्दिशमदीर्यत ॥ ११॥
तौ विदार्य महासेनां प्रविष्टौ केशवार्जुनौ ।
क्रुद्धौ संरम्भरक्ताक्षौ व्यभ्राजेतां महाद्युती ॥ १२॥
युद्धशौण्डौ समाहूतावागतौ तौ रणाध्वरे ।
यज्वभिर्विधिनाऽऽहूतौ मखे देवाविवाश्विनौ ॥ १३॥
क्रोधताम्रेक्षणौ वीरौ शुशुभाते महाबलौ ।
मदोत्कटौ यथा नागौ दृष्टिसञ्चारचारिणौ ॥ १४॥
क्रुद्धौ तौ तु महात्मानौ वेगवन्तौ बभूवतुः ।
तलशब्देन रुषितौ महानागाविवोत्कटौ ॥ १५॥

विगाह्य च रथानीकम् अश्वसङ्घांश्च फल्गुनः ।
व्यचरत् पृतनामध्ये पाशहस्त इवान्तकः ॥ १६॥

तं दृष्ट्वा युधि विक्रान्तं सेनायां तव भारत ।
संशप्तकगणान् भूयः पुत्रस्ते समचूचुदत् ॥ १७॥

ततो रथसहस्रे द्वे द्विरदानां शतत्रयम् ।
चतुर्दश सहस्राणि वाजिनां च महाहवे ॥ १८॥

पूर्णे शतसहस्रे द्वे पादातीनां च धन्विनाम् ॥ १९

राजन् पुरुषवीराणां कौरवाणां समन्ततः ।
अभ्यवर्तन्त कौन्तेयं छादयन्तो महारथाः ॥ २०

सञ्छाद्यमानस्समरे परैः परबलार्दनः ।
दर्शयन् रौद्रमात्मानं पाशहस्त इवान्तकः ॥ २१

निघ्नन् संशप्तकान् पार्थः प्रेक्षणीयतरोऽभवत् ॥ २१॥

ततो विद्युत्प्रभैर्बाणैः कार्तस्वरविभूषितैः ।
निरन्तरमिवाकाशम् आसीन्नूनं किरीटिना ॥ २२॥

किरीटिचापनिर्मुक्तैस् सम्पतद्भिर्महाशरैः ।
समाच्छन्नं बभौ व्योम काद्रवेयैरिव प्रभो ॥ २३॥

रुक्मपुङ्खान् शरान् घोरान् प्रसन्नान नतपर्वणः ।
अदर्शयदमेयात्मा दिक्षु सर्वासु पाण्डवः ॥ २४॥

मही वियद्दिशस्सर्वास् ससमुद्रास्सपर्वताः ।
फलन्तीति जना जज्ञुः पार्थस्य तलनिस्स्वनैः ॥ २५॥

हत्वा दश सहस्राणि क्षत्रियाणां महारथान् ।
संशप्तकानां कौन्तेयः प्रपक्षं त्वरितो ययौ ॥ २६॥

प्रपक्षं तं समासाद्य पार्थः काम्भोजरक्षितम् ।
प्रममाथ बलं भल्लैर् दानवानिव वासवः ॥ २७॥

प्रचिच्छेदाशु भल्लैश्च द्विषतामाततायिनाम् ।
शस्त्रपाणींस्तथा बाहूंस् तथैव च शिरांस्युत ॥ २८॥

अङ्गाङ्गावयवैश्छिन्नैर् व्यायुधास्तेऽपतन् भुवि ।
विष्वग्वाताभिसम्भग्ना बहुशाखा इव द्रुमाः ॥ २९॥

हस्त्यश्वरथपत्तीनां व्रातान् निघ्नन्तमर्जुनम् ।
सुदक्षिणादवरजश् शरवृष्ट्याऽभ्यवीवृषत् ॥ ३०॥

तस्यास्यतोऽर्धचन्द्राभ्यां स बाहू परिघोपमौ ।
पूर्णचन्द्राभवक्त्रं च क्षुरेणापाहरच्छिरः ॥ ३१॥

तत् पपात ततो वेगात् कुण्डलाभ्यां परिष्कृतम् ।
मनश्शिलागिरेश्शृङ्गं वज्रेणेव विदारितम् ॥ ३२॥

सुदक्षिणादवरजं काम्भोजं दद्दशुर्हतम् ।
प्रांशुं कमलगर्भाभम् अत्यर्थं प्रियदर्शनम् ॥ ३३॥

काञ्चनस्तम्भसङ्काशं भिन्नं हेमगिरिं यथा ॥ ३४

ततोऽभवत् पुनर्युद्धं घोरमत्यर्थमद्भुतम् ॥ ३४॥

नानावस्थाश्च योधानां बभूवुस्तत्र युध्यताम् ॥ ३५

पार्थेषु निहतैरन्यैः काम्भोजैर्यवनैश्शकैः ।
शोणितार्क्तैस्तदा रक्तं सर्वमासीद्दिशां पते ॥ ३६

रथैर्हताश्वसूतैश्च हतारोहैश्च वाजिभिः ।
द्विरदैश्च हतारोहैर् महामात्रैर्हतद्विपैः ॥ ३७

अन्योन्येन महाराज कृतो घोरो जनक्षयः ।
[1]आसीत् क्रुद्धेऽर्जुने कर्णे भीमसेने च दारुणम् ॥ ३८

तस्मिन् प्रपक्षे पक्षे च वध्यमाने महात्मना ।
अर्जुनं जयतां श्रेष्ठं त्वरितो द्रौणिरभ्ययात् ॥ ३९

विधून्वानो महच्चापं कार्तस्वरविभूषितम् ।
आददानश्शरान् घोरान् स्वरश्मीनिव भास्करः ॥ ४०

तयोरासीन्महद्युद्धं धर्मभ्रात्रोरनौष्ठिकम् ।
विस्मापयिषतोर्लोकं यशश्चोत्तममिच्छतोः ॥ ४१

संशप्तकांश्च कौन्तेयः कुरूंश्चापि वृकोदरः ।
सूतपुत्रस्तु पाञ्चालान् भूयोऽभ्रंस्त्वरितश्शरैः ॥ ४२

एवमेव महाराज विनाशः पृथिवीक्षिताम् ।

---

1. अ-क-ब-ङ—नासीदमर्षम्

आसीत् क्रुद्धेऽर्जुने कर्णे भीमसेने महाबले ॥ ४३
युद्धं घोरतरं चासीत् तथाभूते चमूमुखे ॥ ४३॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि षट्पञ्चाशोऽध्यायः ॥ ५६ ॥
॥ ७३ ॥ कर्णपर्वणि षट्पञ्चाशोऽध्यायः ॥ ५६ ॥
[अस्मिन्नध्याये ४३॥ श्लोकाः]

॥ सप्तपञ्चाशोऽध्यायः ॥

संशप्तकैर्युध्यमानस्य पार्थस्याश्वत्थाम्नाऽऽह्वानम् ॥ १ ॥ तयोर्युद्धम् ॥ २ ॥

धृतराष्ट्रः—

कथं संशप्तकैस्सार्धम् अर्जुनस्याभवद्रणः ।
सूतपुत्रस्य पाञ्चालैः कथं युद्धं प्रवर्तितम् ॥ १
अश्वत्थाम्नश्च यद्युद्धम् अर्जुनस्य च सञ्जय ।
अन्येषां च मदीयानां सह पार्थैर्ब्रवीहि मे ॥ २

सञ्जयः—

शृणु राजन् यथावृत्तं सङ्ग्रामं ब्रुवतो मम ।
वीराणां शत्रुभिस्सार्धं देहपाप्मविनाशनम् ॥ ३
पार्थस्संशप्तकबलं प्रविश्यार्णवसन्निभम् ।
व्यक्षोभयदमित्रघ्नो महावात इवार्णवम् ॥ ४

पूर्णचन्द्राभवक्त्राणि स्वक्षिभ्रूदशनानि च ।
शिरांस्युन्मथ्य वीराणां शितैर्भल्लैर्धनञ्जयः ॥ ५

संतस्तार क्षितिं क्षिप्रं विनालैर्नलिनैरिव ॥ ५॥

सुवृत्तानायतान् पुष्टांश् चन्दनागरुरूषितान् ।
सायुधान् सतलत्राणान् पञ्चास्यानिव पन्नगान् ॥ ६॥

बाहून् [1]पादानमित्राणां उच्चकर्ताऽर्जुनो रणे ॥ ७

धुर्यान् धुर्येतरान् सूतान् ध्वजांश्चापानि सायकान् ।
पाणीनूरूंश्च निशितैर् भल्लैश्चिच्छेद पाण्डवः ॥ ८

द्विपान् रथान् हयांश्चैव सारोहानर्जुनो युधि ।
शरैरनेकसाहस्रैर् निन्ये राजन् यमक्षयम् ॥ ९

ते प्रवीरास्सुसंरब्धा नर्दमाना इवर्षभाः ।
वाशितार्थमभिक्रुद्धा अभिद्रुत्य मदोत्कटाः ॥ १०

निघ्नन्तमभिजघ्नुस्ते शरैश्शृङ्गैरिवर्षभाः ॥ १०॥

तस्य तेषां च तद्युद्धम् अभवद्रोमहर्षणम् ।
त्रैलोक्यविजये यद्वद् दैत्यानां सह वज्रिणा ॥ ११॥

अस्त्रैरस्त्राणि संवार्य द्विषतां सर्वतोऽर्जुनः ।
इषुभिर्बहुभिस्तूर्णं विद्ध्वा प्राणान् निरासदत् ॥ १२॥

---

1. क-ख-घ—क्षुरैरमित्राणां

छिन्नत्रिवेणुचक्राक्षान् हतयोधाश्वसारथीन् ।
विध्वस्तायुधतूणीरान् समुन्मथितकेतनान् ॥ १३॥

सञ्छिन्नयोक्त्ररश्मीषांस् वित्रिवेणून् विकूबरान् ।
विशम्याबन्धुरयुगान् विजङ्घाजानुमण्डलान् ॥ १४॥

रथान् विशकलीकुर्वन् महाभ्राणीव मारुतः ।
[1]विस्मापयन् प्रेक्षकाणां द्विषतां भयवर्धनम् ॥ १५॥

महारथसहस्रस्य समं कर्मार्जुनोऽकरोत् ॥ १६

सिद्धदेवर्षिसङ्घाश्च चारणाश्चापि तुष्टुवुः ॥ १६॥

देवदुन्दुभयो नेदुः पुष्पवर्षाणि चापतन् ।
केशवार्जुनयोर्मूर्ध्नि प्राह वाक् चाशरीरिणी ॥ १७॥

अशरीरिणी वाक्—

चन्द्रार्कानिलवह्नीनां कान्तिदीप्तिबलद्युतीः ।
यौ सदा बिभ्रतो वीराविमौ तौ केशवार्जुनौ ॥ १८॥

ब्रह्मेशानाविव पुरा वीरावेकरथे स्थितौ ।
सर्वभूतवरौ वीरौ नरनारायणाविमौ ॥ १९॥

सञ्जयः—

इत्येतन्महदाश्चर्यं दृष्ट्वा श्रुत्वा च भारत ।
अश्वत्थामा सुसङ्क्रुद्धः कृष्णावभ्यद्रवद्रणे ॥ २०॥

1. क—अश्लेयं नास्ति

अथ पाण्डवमस्यन्तम् अमित्रान्तकराञ् छरान् ।
सेषुणा पाणिनाऽऽहूय प्रहसन् द्रौणिरब्रवीत् ॥ २१॥

अश्वत्थामा—

यदि मां मन्यसे वीर प्राप्तमार्यमिवातिथिम् ।
ततस्सर्वात्मनाऽद्य त्वं युद्धातिथ्यं प्रयच्छ मे ॥ २२॥

सञ्जयः—

एवमाचार्यपुत्रेण समाहूतो युयुत्सया ।
बहुमेनेऽर्जुनो त्मानम् इदं चाह जनार्दनम् ॥ २३॥

अर्जुनः—

संशप्तकाश्च मे वध्या द्रौणिराह्वयते च माम् ।
यदत्रानन्तरं प्राप्तं तत् प्रशाधि महाभुज ॥ २४॥

सञ्जयः—

एवमुक्तोऽवहत् पार्थं कृष्णो द्रोणात्मजान्तिके ।
शैक्षेण विधिनाऽऽहूतं वायुरिन्द्रमिवाध्वरे ॥ २५॥
तमामन्त्र्यैकमनसं केशवो द्रौणिमब्रवीत् ॥ २६

श्रीभगवान्—

अश्वत्थामन् स्थिरो भूत्वा प्रहराशु सहस्व च ।
निर्वेष्टुं भर्तृपिण्डं हि कालोऽयमुपजीविनाम् ॥ २७
सूक्ष्मौ विवादौ विप्राणां सूक्ष्मौ क्षात्रौ जयाजयौ ॥ २७॥
न हि संक्षमसे मोहाद् दिव्यां पार्थस्य सत्क्रियाम् ।

समासिमिच्छन् युध्यस्व स्थिरो भूत्वाऽद्य पाण्डवम् ॥ २८॥

सञ्जयः—

इत्युक्तो वासुदेवेन तथेत्युक्त्वा द्विजोत्तमः ।
विव्याध केशवं षष्ट्या नाराचैरर्जुनं त्रिभिः ॥ २९॥

तस्यार्जुनस्सुसङ्क्रुद्धस् त्रिभिर्भल्लैश्शरासनम् ।
चिच्छेदाथान्यदादत्त द्रौणिर्घोरतरं धनुः ॥ ३०॥

सज्यं कृत्वा निमेषात्तु विव्याधार्जुनकेशवौ ।
त्रिभिश्शतैर्वासुदेवं सहस्रेण च पाण्डवम् ॥ ३१॥

ततश्शतसहस्राणि प्रयुतान्यर्बुदानि च ।
ससृजे द्रौणिरायत्तस् स्तम्भयामास चार्जुनम् ॥ ३२॥

इषुधेर्धनुषो ज्यायास् त्वङ्गुलिभ्यश्च मारिष ।
बाह्वोः कराभ्यामुरसो वदनाद् घ्राणनेत्रतः ॥ ३३॥

कर्णाभ्यां शिरसोऽङ्गेभ्यो लोमचर्मभ्य एव च ।
रथध्वजाभ्यां च शरा निष्पेतुर्ब्रह्मवादिनः ॥ ३४॥

शरजालेन महता बद्ध्वा केशवपाण्डवौ ।
ननाद मुदितो द्रौणिर् महामेघौघनिस्स्वनः ॥ ३५॥

तैः पतद्भिर्महाराज द्रौणिमुक्तैस्समन्ततः ।
सञ्छादितो रथस्थौ तावुभौ कृष्णधनञ्जयौ ॥ ३६॥

ततश्शरशतैस्तीक्ष्णैर् भारद्वाजः प्रतापवान् ।

निश्चेष्टौ तावुभौ चक्रे रणे माधवपाण्डवौ ॥ ३७॥

हाहाकृतमभूत् सर्वं स्थावरं जङ्गमं तथा ।
चराचरस्य गोप्तारौ दृष्ट्वा सञ्छादितौ शरैः ॥ ३८॥

सिद्धचारणसङ्घाश्च सम्पेतुर्वै समन्ततः ।
अपि स्वस्ति भवेदद्य लोकानामिति चाब्रुवन् ॥ ३९॥

न मया तादृशो राजन् दृष्टपूर्वः पराक्रमः ।
सञ्जज्ञे यादृशो द्रौणेः कृष्णौ च्छादयतो रणे ॥ ४०॥

द्रौणेस्तु धनुषश्शब्दं रथानां त्रासनं रणे ।
अश्रौषं बहुशो राजन् सिंहस्य नदतो यथा ॥ ४१॥

ज्या चास्य चरतो युद्धे सव्यं दक्षिणमस्यतः ।
[1]विद्युदम्भोधरस्येव भ्राजमाना व्यदृश्यत ॥ ४२॥

स तदा क्षिप्रकारी च दृढहस्तश्च पाण्डवः ।
प्रमोहं परमं गत्वा प्रेक्षन्नास्ते धनञ्जयः ॥ ४३॥

विक्रमं च हृतं मेने आत्मनस्तेन संयुगे ॥ ४४

तदाऽस्य समरे राजन् वपुरासीत् सुदुर्दृशम् ।
द्रौणेस्तत् कुर्वतः कर्म यादृग्रूपं पिनाकिनः ॥ ४५

वर्धमाने ततस्तत्र द्रोणपुत्रे विशां पते ।

---

1. ख—विद्युदम्भोदितां मेने आत्मनस्तेन संयुगे ।
मध्ये अर्धश्लोकं नास्ति

हीयमाने च कौन्तेये कृष्णं रोषस्समाविशत् ॥ ४६

स रोषान्निश्वसन् राजन् निर्दहन्निव चक्षुषा ।
द्रौणिं ददर्श सङ्ग्रामे फल्गुनं च मुहुर्मुहुः ॥ ४७

ततः क्रुद्धोऽब्रवीत् कृष्णः पार्थं सप्रणयं वचः ॥ ४७॥

श्रीभगवान्—

अत्यद्भुतमहं पार्थ त्वयि पश्यामि संयुगे ।
यत् त्वां विशेषयत्याजौ द्रोणपुत्रोऽद्य भारत ॥ ४८॥

कच्चित्ते गाण्डिवं हस्ते मुष्टिर्वा न व्यशीर्यत ।
कच्चिद्वीर्यं यथापूर्वं भुजयोर्वा बलं तव ॥ ४९॥

उदीर्यमाणं हि रणे पश्यामि द्रौणिमाहवे ॥ ५०

गुरुपुत्र इति ह्येनं मानयन् पाण्डवर्षभ ।
उपेक्षां मा कृथाः पार्थ नायं कालो ह्युपेक्षितुम् ॥ ५१

अर्जुनः—

पश्य माधव दौरात्म्यं गुरुपुत्रस्य मां प्रति ।
वधं प्राप्तौ मन्यते नौ प्रावृत्य शरवेश्मनि ॥ ५२

एषोऽस्य हन्मि सङ्कल्पं शिक्षया च बलेन च ॥ ५२॥

सञ्जयः—

एवमुक्त्वाऽस्य चिच्छेद भल्लैः कर्मारमार्जितैः ।
धनुश्छत्रं पताकां च रथशक्तिं गदां वराम् ॥ ५३॥

अश्वत्थाम्नश्शरानस्ताञ् छित्त्वैकैकं त्रिभिस्त्रिभिः ।
व्यधमद्भरतश्रेष्ठो नीहारमिव मारुतः ॥ ५४॥

ततस्संशप्तकान् भूयस् साश्वसूतरथद्विपान् ।
सपदातिगणानुग्रैर् बाणैर्विव्याध पाण्डवः ॥ ५५॥

ये ये ददृशिरे तत्र यद्यद्रूपं तदा जनाः ।
ते ते तत्तच्छरैर्व्याप्तं मेनिरे मानमेव च ॥ ५६॥

गाण्डीवप्रच्युतास्ते वै नानारूपाः पतत्रिणः ।
क्रोशे साग्रे स्थिताञ्जघ्नुर् द्विपांश्च पुरुषान् रणे ॥ ५७॥

भल्लैश्छिन्नाः कराः पेतुर् द्विपानां मदवर्षिणाम् ।
तथा यथा परशुभिः प्रकृत्ताश्शाल्मलिद्रुमाः ॥ ५८॥

पश्चात्तु शैलवत् पेतुस् ते गजास्सह सादिभिः ।
वज्रिवज्रप्रमथिता यथा शैलचयास्तथा ॥ ५९॥

गन्धर्वनगराकारान् विधिवत् कल्पितान् रथान् ।
विनीतैर्जवनैर्युक्तान् आस्थितान् युद्धदुर्मदैः ॥ ६०॥

शरैर्विशकलीकुर्वन्नमित्रानभ्यवीवृषत् ।
स्खलद्भूतानश्वसादीन् पत्तीन् निघ्नन् रणाजिरे ॥ ६१॥

धनञ्जययुगान्ताग्निस् संशप्तकमहार्णवम् ।
व्यशोषयत दुश्शाम्यं तिग्मैश्शरगभस्तिभिः ॥ ६२॥

तं च द्रौणिमहाशैलं नाराचैस्सूर्यसन्निभैः ।

निर्बिभेद महावेगैस् त्वरन् वज्रीव पर्वतम् ॥ ६३॥

तमाचार्यसुतः क्रुद्धस् साश्वयन्तारमाशुगैः ।
बीभत्सुंनाशकद्योद्धुं पार्थस्तानन्तराऽछिनत् ॥ ६४॥

ततः परमसङ्क्रुद्धः काण्डकोशमवासृजत् ।
अश्वत्थामाभिरूपाय गृहानतिथये यथा ॥ ६५॥

अथ संशप्तकांस्त्यक्त्वा पाण्डवो द्रौणिमभ्ययात् ।
अपाङ्क्तेयानिव त्यक्त्वा यथा पाङ्क्तेयमर्थिनम् ॥ ६६॥

स्थितास्संशप्तका राजन् दृष्ट्वा युद्धं महात्मनोः ॥ ६७

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि सप्तपञ्चाशोऽध्यायः ॥ ५७ ॥
॥ ७३ ॥ कर्णपर्वणि सप्तपञ्चाशोऽध्यायः ॥ ५७ ॥
[अस्मिन्नध्याये ६७ श्लोकाः]

॥ अष्टपञ्चाशोऽध्यायः ॥

अर्जुनेनाश्वत्थामपराजयः ॥

सञ्जयः—

ततस्समभवद्युद्धं शुक्राङ्गिरसवर्चसोः ।
नक्षत्रमभितो व्योम्नि शुक्राङ्गिरसयोरिव ॥ १

सन्तापयन्तावन्योन्यं तौ दीप्तैश्शररश्मिभिः ।
लोकत्रासकरावास्तां विमार्गस्थाविव ग्रहौ ॥ २

ततोऽविध्यद्भुवोर्मध्ये नाराचेनार्जुनो भृशम् ।
[1]स तेन विबभौ द्रौणिर् ऊर्ध्वरश्मिर्यथा रविः ॥ ३

अथ कृष्णौ शरशतैर् अश्वत्थाम्नाऽर्पितौ भृशम् ।
स्वरश्मिजालविकचौ युगान्तार्काविवासतुः ॥ ४

ततोऽर्जुनस्सर्वतोधारमस्त्रम्
अवासृजद्वासुदेवेऽभिभूते ।
द्रौणायनिश्चाप्यहनत् पृषत्कैर्
वज्राग्निवैवस्वतदण्डकल्पैः ॥ ५

स केशवं चार्जुनं चातितेजा
विव्याध मर्मस्वतितीव्रकर्मा ।
बाणैस्सुमुक्तैरतितीव्रवेगैर्
यैराहतो मृत्युरपि व्यथेत ॥ ६

द्रौणेरिषूनर्जुनस्सन्निवार्य
व्यायच्छतस्तद्द्विगुणैस्सुपुङ्खैः ।
तं साश्वसूतध्वजमेकवीरम्
आवृत्य संशप्तकसैन्यमार्च्छत् ॥ ७

---

1. ख—इदमर्धं नास्ति

धनूंषि बाणानिषुधीर्धनुर्ज्याः
पाणींस्तथा पाणिगतं च शस्त्रम् ।
छत्राणि केतूंस्तुरगान् रथेषां
वस्त्राणि माल्यान्यथ भूषणानि ॥ ८

चर्माणि वर्माणि मनोहराणि
प्रसह्य तेषां स शिरांसि चैव ।
चिच्छेद पार्थो द्विषतां सुमुक्तैर्
बाणैस्स्थितानामपराङ्मुखानाम् ॥ ९

सुकल्पितास्स्यन्दनवाजिनागास्
समास्थिताः कृतयत्नैर्नृवीरैः ।
पार्थेरितैर्बाणगणैर्निरस्तास्
तैरेव सार्धं नृवरैर्विनेशुः ॥ १०

पद्मार्कपूर्णेन्दुसमाननानि
किरीटमाली मकुटोत्कटानि ।
भल्लार्धचन्द्रक्षुरसन्निकृतान
न्यपातयच्छत्रुशिरांस्यजस्रम् ॥ ११

अथ द्विपैर्दैत्यरिपुद्विपाभैर्
देवारिकल्पा बलमन्युदर्पाः ।

कलिङ्गवङ्गाङ्गनिषादवीरा
जिघांसवः पाण्डवमभ्यधावन् ॥ १२

तेषां द्विपानां निचकर्त पार्थश्
चर्माणि वर्माणि करान् नियन्तॄन् ।
ध्वजाः पताकाश्च ततः प्रपेतुर्
वज्राहतानीव गिरेस्तटानि ॥ १३

तेषु प्रभग्नेषु गुरोस्तनूजं
बाणैः किरीटी नवसूर्यवर्णैः ।
प्रच्छादयामास महाभ्रजालैर्
वायुस्समुद्यन्तमिवांशुमन्तम् ॥ १४

ततोऽर्जुनेषूनिषुभिर्निरस्य
द्रौणिश्शरैरर्जुनवासुदेवौ ।
प्रच्छादयित्वा दिवि चन्द्रसूर्यौ
ननाद सोऽम्भोद इवातपान्ते ॥ १५

तमर्जुनस्तांश्च पुनस्त्वदीयान्
अभ्यर्दितस्तैरभिसृत्य शत्रैः ।
बाणान्धकारं सहसैव कृत्वा
विव्याध पार्थो वरहेमपुङ्खैः ॥ १६

नाप्याददत् सन्दधन्नैव मुञ्चन्
बाणान् रणेऽदृश्यत सव्यसाची ।
रथान् स नागांस्तुरगान् पदातीन्
संस्यूतदेहान् ददृशुर्हतांश्च ॥ १७

सन्धाय नाराचवरान् दशाशु
द्रौणिस्त्वरन्नेकमिवोत्ससर्ज ।
तेषां च पञ्चार्जुनमभ्यविध्यन्
पञ्चाच्युतं निर्बिभिदुस्सुपुङ्खाः ॥ १८

तैराहतौ सर्वमनुष्यमुख्या-
वसृक्क्षरौ वैश्रवणेन्द्रकल्पौ ।
समाप्तविद्येन तथाऽभिभूतौ
हतौ स्विदेताविति मेनिरेऽन्ये ॥ १९

ततोऽर्जुनं प्राह दशार्हनाथः
प्रमाद्यसे किं जहि योधमेनम् ।
कुर्याद्धि दोषं समुपेक्षितोऽसौ
कष्टो महान् व्याधिरिवाक्रियावान् ॥ २०

तथेति चोक्त्वाऽच्युतमप्रमादी
द्रौणेः प्रहस्याशु किरीटमाली ।

भुजौ वरौ चन्दनसारदिग्धौ
वक्षश्शिरोऽथाप्रतिमं तथोरू ॥ २१

गाण्डीवमुक्तैः कुपिताहिकल्पैर्
द्रौणिं शरैस्संयति निर्बिभेद ॥ २१॥

छित्त्वा च रश्मींस्तुरगानविध्यत्
ते तं रणाद्दूरतीव दूरम् ॥ २२

स तैर्हतो वातजवैस्तुरङ्गैर्
द्रौणिर्दृढं पार्थशराभिभूतः ।
आवृत्य नेयेष पुनस्स योद्धुं
पार्थेन सार्धं मतिमान् विमृश्य ॥ २३

जानञ्जयं नियतं वृष्णिवीरे
धनञ्जये चाङ्गिरसां वरिष्ठः ।
[1]विवेश कर्णस्य बलं तरस्वी
क्षीणोत्साहः क्षीणबाणास्त्रयोगः ॥ २४

नियम्य तु हयान् द्रौणिस् समाश्वास्य पुनः पुनः ।
गजाश्वरथसम्बाधं कर्णस्य प्राविशद्बलम् ॥ २५

[2]प्रतीपकामे तु रणाद् अश्वत्थाम्नि हृते हयैः ।
मन्त्रौषधिक्रियायोगैर् व्याधौ देहादिवाद्भृते ॥ २६

1. अ-क-ङ—नासीदमर्षम् 2. अ—अर्धहृयं नास्ति

संशप्तकानभिमुखौ प्रयातौ केशवार्जुनौ ।
वातोद्धूतपताकेन स्यन्दनेनौघनादिना ॥ २७

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि अष्टपञ्चाशोऽध्यायः ॥ ५८ ॥
॥ ७३ ॥ कर्णपर्वणि अष्टपञ्चाशोऽध्यायः ॥ ५८ ॥
[अस्मिन्नध्याये २७ श्लोकाः]

॥ एकोनषष्टितमोऽध्यायः ॥

अर्जुनेन दण्डदण्डधारयोर्वधः ॥

सञ्जयः—

अथोत्तरेण पाण्डूनां सेनायां ध्वनिरुत्थितः ।
रथनागाश्वपत्तीनां दण्डधारेण वध्यताम् ॥ १

निवर्तयित्वा तु रथं केशवोऽर्जुनमब्रवीत् ।
वाहयन्नेव तुरगान् गरुडानिलरंहसः ॥ २

मागधोऽसावतिक्रान्तो द्विरदेन प्रमाथिना ।
भगदत्तादनवमश् शिक्षया च बलेन च ॥ ३

एनं हत्वा निहन्तासि पुनस्संशप्तकानिति ।
वाक्यान्ते प्रापयत् पार्थं दण्डधारगजं प्रति ॥ ४

स मागधानां प्रवरोऽङ्कुशग्रहे
महाबलश्शौर्यगुणैस्समन्वितः ।
सपत्नसेनां प्रममाथ दारुणो
महीं समग्रां बलवानिव ग्रहः ॥ ५

सुकल्पितं दानवनागसन्निभं
महाभ्रनिर्ह्रादसमस्वनं रणे ।
समास्थितो नागवरं नरेश्वरो
रथाश्वमातङ्गनरप्रमाथिनम् ॥ ६

स नागयन्तॄन् समरे महारथान्
सपत्तिसङ्घांस्तुरगान् ससादिनः ।
द्विपांश्च बाणैर्निजघान वीर्यवान्
समन्ततो घ्नन्निव कालचक्रवत् ॥ ७

[1]नरांश्च कांस्यायसवर्मभूषणान्
निपात्य पत्तीनपि वाजिभिस्सह ।
व्यपोथयद्दन्तिवरेण शुष्मिणा
सशब्दवत् स्थूलनलान् यथा तथा ॥ ८

अथार्जुनो ज्यातलनेमिनिस्वने
मृदङ्गभेरीबहुशङ्खनादिते ।

1. ख—पादपञ्चकं नास्ति "मृदङ्गभेरीबहुशङ्खनादिते" इत्येतन्मात्रं वर्तते

[1]रथाश्वमातङ्गसहस्रनादिते
रथोत्तमेनाभ्यपतद्द्विपोत्तमम् ॥ ९

ततोऽर्जुनं द्वादशभिश्शरोत्तमैर्
जनार्दनं षोडशभिस्समार्पयत् ।
स दण्डधारस्तुरगांस्त्रिभिस्त्रिभिस्
ततो ननाद प्रजहास चासकृत् ॥ १०

ततोऽस्य पार्थस्सगुणेषुकार्मुकं
चकर्त भल्लैर्ध्वजमप्यलङ्कृतम् ।
पुनर्नियन्तॄन् सहसाऽथ गोप्तृभिस्
ततस्स चुक्रोध गिरिव्रजेश्वरः ॥ ११

ततोऽर्जुनं भिन्नकटेन दन्तिना
घनाघनेनानिलतुल्यरंहसा ।
अतीत्य चुक्षोभयिपुर्जनार्दनं
धनञ्जयं चापि जघान तोमरैः ॥ १२

अथास्य बाहू द्विपहस्तसन्निभौ
शिरश्च पूर्णेन्दुनिभाननं त्रिभिः ।
क्षुरैः प्रचिच्छेद सहैव पाण्डवस्
ततो द्विपं बाणशतैस्समार्पयत् ॥ १३

1. ख—अर्धं पादो नास्ति

स पार्थबाणैस्तपनीयभूषणैस्
समावृतः काञ्चनवर्ममृद्विपः ।
भृशं चकाशे निशि पर्वतो यथा
दवाग्निना प्रज्वलितौषधिर्द्रुमः ॥ १४

स वेदनार्तोऽम्बुदनिस्वनो नदन्
भ्रमंश्चलन् प्रस्खलदातुरोऽद्रवत् ।
पपात रुग्णस्सनियन्तृकस्तथा
यथा गिरिर्वज्रविघूर्णितः पुरा ॥ १५

हिमावदातेन सुवर्णमालिना
हिमाद्रिकूटप्रतिमेन दन्तिना ।
हते रणे भ्रातरि दण्ड आव्रजज्
जिघांसुरिन्द्रावरजं सहार्जुनम् ॥ १६

[1]सतोमरैरर्ककरप्रभैस्त्रिभिर्
जनार्दनं पञ्चभिरेव चार्जुनम् ।
समर्पयित्वा विननाद चार्दयंस्
ततोऽस्य बाहू विचकर्त पाण्डवः ॥ १७

क्षुरप्रकृत्तौ तु भृशं सतोमरौ
शुभाङ्गदौ चन्दनरूषितौ भुजौ ।

1. ख—इदं पादद्वयं नास्ति

गजात् पतन्तौ युगपद्विरेजतुर्
यथोरगौ पर्वतशृङ्गतो महीम् ॥ १८

अथार्धचन्द्रेण हतं किरीटिना
पपात दण्डस्य शिरः क्षितिं द्विपात् ।
स्वशोणिताद्रैं निपतद्वराज तद्
दिवाकरोऽस्तादिव पश्चिमां दिशम् ॥ १९

अथ द्विपं श्वेतनगाग्रसन्निभं
दिवाकरांशुप्रतिमैश्शरोत्तमैः ।
बिभेद पार्थस्स पपात नानदन्
हिमाद्रिकूटं कुलिशाहतं यथा ॥ २०

ततोऽपरे तत्प्रतिमा गजोत्तमा
जिगीषवस्संयति सव्यसाचिनम् ।
तथा हतास्तेऽपि यथैव तौ द्विपौ
ततः प्रभग्नं सुमहद्विपोर्बलम् ॥ २१

गजा रथाश्वाः पुरुषाश्च सङ्गशः
परस्परघ्नाः परिपेतुराहवे ।
परस्परं प्रस्खलितास्समाहता
भृशं च तत्तद्बहु भाषिणो हताः ॥ २२

अथार्जुनं स्वे परिवार्य सैनिकाः
पुरन्दरं देवगणा इवाब्रुवन् ॥ २२॥

पाण्डवसैनिकाः—

अभैष्म यस्मान्मरणादिव प्रजास्
स वीर दिष्ट्या निहतस्त्वया रिपुः ॥ २३

न चेत् परित्रास्यदिमाञ्जनान् भयाद्
द्विषद्भिरेवं बलिभिः प्रपीडितान् ।
तथाऽभविष्यद्विपतां प्रमोदनं
यथा [1]हतास्माकमिहारयस्त्वया ॥ २४

सञ्जयः—

इतीव भूयश्च सुहृद्भिरीरिता
निशम्य वाचस्सुमनास्तदाऽर्जुनः ।
यथानुरूपं प्रतिपूज्य तं जनं
जगाम संशप्तकसङ्घहा पुनः ॥ २५

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि एकोनषष्टितमोऽध्यायः ॥ ५९ ॥
॥ ७३ ॥ कर्णपर्वणि एकोनषष्टितमोऽध्यायः ॥ ५९ ॥
[अस्मिन्नध्याये २५ श्लोकाः]

---

1. हृताः अस्माकमिति पदच्छेदः सन्धिरार्षः

॥ षष्टितमोऽध्यायः ॥

अर्जुनेन संशप्तकानां वधः ॥

सञ्जयः—

प्रत्येत्याथ पुनर्जिष्णुर् हत्वा संशप्तकान् बभौ ।
वक्रानुवक्रगमनाद् अङ्गारक इव ग्रहः ॥ १

पार्थबाणैर्हतास्तेऽथ नराश्वरथकुञ्जराः ।
विचेलुर्बभ्रमुर्नेदुः पेतुर्मम्लुश्च भारत ॥ २

धुर्यान् धुर्येतरान् सूतान् ध्वजांश्चापासिसायकान् ।
पाणीन् पाणिगतं शस्त्रं बाहूनपि शिरांसि च ॥ ३

भल्लैः क्षुरैरर्धचन्द्रैर् वत्सदन्तैश्च पाण्डवः ।
चिच्छेदामित्रवीराणां समरे प्रतियुध्यताम् ॥ ४

तं प्रवीरास्त्वदीयानां नर्दमाना हि दुद्रुवुः ।
[1]वाशितार्थे युध्यमाना वृषाणां वृषभं यथा ॥ ५

तेषां तस्यापि तद्युद्धम् अभवद्रोमहर्षणम् ।
त्रैलोक्यविजये यादृग् दैत्यानां सह वज्रिणा ॥ ६

अथाविध्यत् त्रिभिर्बाणैर् दन्दशूकैरिवाहिभिः ।
उग्रायुधोऽस्य तज्जिष्णुश् शिरः कायादपाहरत् ॥ ७

1. ख—इदमर्धं नास्ति

ततस्ते सर्वतः पार्थं नानाशस्त्रैरवीवृषन् ।
मरुद्भिः प्रेरिता मेघा हिमवन्तमिवोष्णगे ॥ ८

अस्त्रैरस्त्राणि संवार्य द्विषतां सर्वतोऽर्जुनः ।
सम्यगस्त्रैश्शरैस्सर्वान् अहितानहनद्बहून् ॥ ९

छिन्नत्रिवेणुजङ्घेषान् हताश्वान् हतसारथीन् ।
सञ्छिन्नरश्मियोक्त्राक्षान् सानुकर्षायुधान् रथान् ॥ १०

विध्वस्तसर्वसन्नाहान् बाणैश्चक्रेऽर्जुनस्त्वरन् ॥ १०॥

ते रथास्तत्र विध्वस्ताः पराद्धर्या भान्त्यनेकशः ।
धनिनामिव वेश्मानि हतान्यग्न्यनिलाम्बुभिः ॥ ११॥

द्विपास्सम्भिन्नमर्माणो वज्राशनिनिभैश्शरैः ।
पेतुर्गिर्यग्रवेश्मानि वज्रवाताग्निभिर्यथा ॥ १२॥

अनेकैश्च शिलाधौतैर् वज्रानलविषोपमैः ।
शरैर्निजघ्निवान् पार्थो महेन्द्र इव दानवान् ॥ १३॥

सारोहास्तुरगाः पेतुर् बहवोऽर्जुनपीडिताः ।
निर्यज्जिह्वाः क्षितौ क्षीणा रुधिरार्द्रास्सुदुर्दृशः ॥ १४॥

नराश्वनागा नाराचैस् संस्यूतास्सव्यसाचिना ।
बभ्रमुश्चस्खलुर्नेदुः पेतुर्मुमुश्च मारिष[1] ॥ १५॥

1. अ-घ—अनेकैश्च शिलाधौतैर् वज्रानलविषोपमैः ।
शरैर्निजघ्निवान् पार्थो महेन्द्र इव दानवान् ॥
[अधिकः पाठः]

महार्हवर्माभरणा नानावर्णाम्बरायुधाः ।
सरथाश्वद्विपा वीरा हताः पार्थेन शेरते ॥ १६॥

निर्भयाः पुण्यकर्माणो विशिष्टाभिजनश्रुताः ।
गताश्शरीरैर्वसुधाम् ऊर्जितैः कर्मभिर्दिवम् ॥ १७॥

अथार्जुनरथं वीरास् त्वदीयास्समभिद्रवन् ।
नानाजनपदाध्यक्षास् सगणा जातमन्यवः ॥ १८॥

ऊह्यमना रथाश्वेभैः पत्तयश्च जिघांसवः ।
समभ्यधावन्नस्यन्तो विविधं क्षिप्रमायुधम् ॥ १९॥

तदायुधमहावर्षं क्षिप्तं योधमहाम्बुदैः ।
व्यधमन्निशितैर्बाणैः क्षिप्रमर्जुनमारुतः ॥ २०॥

साश्वपत्तिद्विपरथं महाशस्त्रौघविप्लवम् ।
सहसा सन्तितीर्षन्तं पार्थं शस्त्रास्त्रसेतुना ॥ २१॥

अथाब्रवीद्वासुदेवः पार्थ किं क्रीडसेऽनघ[1] ।
संशप्तकान् प्रमथ्यैनान् अथ कर्णवधे त्वर ॥ २२॥

तथेत्युक्त्वाऽर्जुनः कृष्णं शिष्टान् संशप्तकानथ ।
क्षपयिष्यंस्तदाऽस्त्रेण दैत्यानिन्द्र इवावधीत् ॥ २३॥

---

1. क—एते बलाधिका व्याप्ताः पार्थ किं क्रीडसेऽनघ ।
[अधिकः पाठः]

[1]नाददत् सन्दधच्चैव दृष्टः कैश्चिद्रणेऽर्जुनः ।
विमुञ्चन् वा शरान् घोरान् दृश्यन्ते वै नरा हताः ॥ २४॥

आश्चर्यमिति गोविन्दो ब्रुवन्नश्वानचोदयत् ।
हंसाङ्गगौरास्ते सेनां हंसास्सर इवाविशन् ॥ २५॥

ततस्सङ्ग्रामभूमिं तां वर्तमाने जनक्षये ।
अवेक्षमाणो गोविन्दस् सव्यसाचिनमब्रवीत् ॥ २६॥

श्रीभगवान्—

एष पार्थ महारौद्रो वर्तते भरतक्षयः ।
पृथिव्यां पार्थिवानां च दुर्योधनकृते महान् ॥ २७॥

पश्य भारत चापानि रुक्मपृष्ठानि धन्विनाम् ।
हतानामपविद्धानि कलापानिषुधींस्तथा ॥ २८॥

[2]जातरूपमयैः पुङ्खैश् शरांश्च नतपर्वणः ।
तैलधौतांश्च नाराचान् निर्मुक्तानिव पन्नगान् ॥ २९॥

[3]आकीर्णास्तोमरावापांश् चित्रान् हेमविभूषितान् ।
दण्डान् कनकचित्रांश्च रणभूमिं च संवृतान् ॥ ३०॥

हस्तिदन्तत्सरून् खड्गान् जातरूपपरिष्कृतान् ।
वर्माणि चापविद्धानि तोमरांश्च बहून् रणे ॥ ३१॥

---

1. ख-घ—अदंयन् सहसा शत्रूञ्छिन्नन् कांश्चिद्रणेऽर्जुनः । [अधिकः पाठः]
2. अ—नास्त्यर्धद्वयम् 3. अ-घ—अर्धद्वयं नास्ति

सुवर्णविकृतान् प्रासाञ् शक्तीः कनकभूषिताः ।
जाम्बूनदमयैः पट्टैर् बद्धाश्च विविधा गदाः ॥ ३२॥

जातरूपमयांश्चोग्रान् पट्टसान् हेमभूषितान् ।
दण्डैः कनकचित्रैश्च विप्रविद्धान् परश्वथान् ॥ ३३॥

परिघान् भिण्डिपालांश्च मुसुण्ठीः क्रकचानपि ।
अयस्कन्धांश्च पतितान् मुसलानि गुरूणि च ॥ ३४॥

शतघ्नीः पश्य चित्राश्च [1]विपुलान् परिघांस्तथा ।
चक्राणि चापविद्धानि खड्गांश्चापि महारथान् ॥ ३५॥

नानाविधानि शस्त्राणि प्रगृह्य जयगृद्धिनः ।
जीवन्त इव दृश्यन्ते गतसत्त्वास्तरस्विनः ॥ ३६॥

गदाविमथितैर्गात्रैर् मुसलैर्भिन्नमस्तकान् ।
गजवाजिरथक्षुण्णान् पश्य योधान् सहस्रशः ॥ ३७॥

गजवाजिमनुष्याणां शरशक्त्यृष्टितोमरैः ।
निस्त्रिंशैः पट्टसैः प्रासैर् नखरैर्लगुडैरपि ॥ ३८॥

शरीरैर्बहुधा च्छिन्नैश् शोणितौघपरिप्लुतैः ।
गतासुभिरमित्रघ्न संवृता रणभूमयः ॥ ३९॥

बाहुभिश्चन्दनादिग्धैस् साङ्गदैर्लेढ्यभूषणैः ।
सतलत्रैस्सकेयूरैर् भाति भारत मेदिनी ॥ ४०॥

---

1. ख—इतः अर्धा पादा न सन्ति

साङ्गुलित्रैर्भुजाग्रैश्च विप्रविद्धैरलङ्कृतैः ।
हस्तिहस्तोपमैश्छिन्नैर् ऊरुभिश्च तरस्विनाम् ॥ ४१॥

बद्धचूडामणिवरैश् शिरोभिश्चारुकुण्डलैः ।
निकृत्तैर्वृषभाक्षाणां विराजति वसुन्धरा ॥ ४२॥

गजबाजिमनुष्याणां शरशक्त्यृष्टितोमरैः ।
कबन्धैश्शोणितादिग्धैश् छिन्नगात्रशिरोधरैः ॥ ४३॥

भूर्भाति भरतश्रेष्ठ शान्तार्चिर्भिरिवाग्निभिः ॥ ४४

रथांश्च बहुधा च्छिन्नान् हेमकिङ्किणिभूषितान् ।
वाजिनश्च हतान् पश्य निष्कीर्णान्त्राञ् शराचितान् ॥ ४५

अनुकर्षानुपासङ्गान् पताका विविधान् ध्वजान् ।
रथिनां च महाशङ्खान् पाण्डरांश्च प्रकीर्णकान् ॥ ४६

निरस्तजिह्वान् मातङ्गाञ् शयानान् पर्वतोपमान् ।
वैजयन्तीर्विचित्राश्च हताश्च गजयोधिनाम् ॥ ४७

वारणानां परिस्तोमान् संयुक्तान् रक्तकम्बलान् ।
विपाटितविचित्राश्च रौप्यचित्राः कुथास्तथा ॥ ४८

भिन्नाश्च बहुधा घण्टाः पतद्भिस्ताडिता गजैः ।
वैडूर्यमणिदण्डांश्च पतितानङ्कुशांस्तथा ॥ ४९

अश्वानां च युगानीषान् रत्नचित्रपरिच्छदान् ।
पश्य सादिभुजाग्रेषु सुवर्णविकृताः कशाः ॥ ५०

विचित्रान् मणिचित्रांश्च जातरूपपरिष्कृतान् ।
अश्वास्तरपरिस्तोमान् राङ्कवान् पतितान् भुवि ॥ ५१

चूडामणीन् नरेन्द्राणां विचित्राः काञ्चनस्रजः ।
छत्राणि चापविद्धानि चामरव्यजनानि च ॥ ५२

चन्द्रनक्षत्रभासैश्च वदनैश्चारुकुण्डलैः ।
कृष्णश्मश्रुभिरत्यर्थं वीराणां समलङ्कृतैः ॥ ५३

वदनैः पश्य सञ्छन्नां महीं शोणितकर्दमाम् ॥ ५३॥

सजीवांश्च नरान् पश्य कूजमानान् समन्ततः ।
उपास्यमानांश्च बहून् न्यस्तशस्त्रैर्विशां पते ॥ ५४॥

ज्ञातिभिश्च जलस्निग्धान् रोदमानैर्मुहुर्मुहुः ।
उत्क्रान्तानपरान् योधांश् छादयित्वा तरस्विनः ॥ ५५॥

पुनर्युद्धाय गच्छन्ति जये लुब्धाः प्रमन्यवः ॥ ५६

अपरे तत्र तत्रैव परिधावन्ति मानवाः ।
ज्ञातिभिः पतितैश्शूरा याच्यमाना जलं तदा ॥ ५७

जलार्थं च गताः केचिन्मृता वै बहवो जनाः ।
सन्निवृत्ताश्च ते शूरा दृष्ट्वा चैनान् विचेतसः ॥ ५८

जलं त्यक्त्वा प्रधावन्ति क्रोशमानाः परस्परम् ॥ ५८॥

जलं पीत्वा मृतान् पश्य पिबन्त्यन्ये च भारत ॥ ५९

[1]परिष्वज्य प्रियानन्ये बान्धवान् बन्धुवत्सलाः ।
विसंज्ञास्समरे योधास् तत्र तत्र महारणे ॥ ६०

पश्यापरान् नरश्रेष्ठ सन्दष्टोष्ठपुटान् पुनः ।
भ्रुकुटीकुटिलैर्वक्त्रैः प्रेक्षमाणान् महारणम् ॥ ६१

एतत्तवैवानुरूपं कर्मार्जुन महाहवे ।
दिवि वा देवराजस्य त्वया यत् कृतमद्य वै ॥ ६२

सञ्जयः—

एवं तां दर्शयन् कृष्णो रणभूमिं किरीटिने ।
गच्छन्नेवाशृणोच्छब्दं दुर्योधनबले महत् ॥ ६३

शङ्खदुन्दुभिनिर्घोषं भेरीपणवमिश्रितम् ।
रथाश्वनरनागानां पादशब्दांश्च दारुणान् ॥ ६४

प्रविश्य तद्बलं कृष्णस् तुरगैर्वातवेगितैः ।
[2]पाण्ड्येनाभ्यर्दितां सेनां त्वदीयां वीक्ष्य विष्ठितः ॥ ६५

स हि नानाविधैश्शस्त्रैर् इष्वस्त्रप्रवरो युधि ।
न्यहनद् द्विषतां भ्रातान् गतासूनन्तको यथा ॥ ६६

गजवाजिमनुष्याणां शरीराणि शितैश्शरैः ।
हत्वा प्रहरतां श्रेष्ठो विदेहासूनथाकरोत् ॥ ६७

1. ख—ये गच्छन्ति जये लुब्धाः प्रधावन्ति प्रमूर्षवः । [अधिकः पाठः]
2. अ—षडधीमि न सन्ति

शत्रुप्रवीरैरस्तानि नानाशस्त्राणि सायकैः ।
छित्त्वा तानवधीत् पाण्ड्यश् शत्रूष् शक्र इवासुरान् ॥ ६८

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि षष्टितमोऽध्यायः ॥ ६० ॥
॥ ७३ ॥ कर्णपर्वणि षष्टितमोऽध्यायः ॥ ६० ॥
[अस्मिन्नध्याये ६८ श्लोकाः]

॥ एकषष्टितमोऽध्यायः ॥

अश्वत्थाम्ना पाण्ड्यवधः ॥

धृतराष्ट्रः—

प्रोक्तस्त्वया पूर्वमेव प्रवीरो लोकविश्रुतः ।
न त्वस्य कर्म सङ्ग्रामे त्वया सञ्जय कीर्तितम् ॥ १

तस्य विस्तरतो ब्रूहि प्रवीरस्यास्य विक्रमम् ।
शिक्षां वीर्यं च मानं च प्रभावं दर्पमेव च ॥ २

सञ्जयः—

द्रोणभीष्मकृपद्रौणिकर्णार्जुनजनार्दनान् ।
समाप्तविद्यान् धनुषि श्रेष्ठान् यान् मन्यसे रथान् ॥ ३

तुल्यतां द्रोणभीष्माभ्याम् आत्मनो यो न मृष्यते ।

वासुदेवार्जुनाभ्यां च न्यूनतां [1]चापि नेच्छति ॥ ४

स पाण्ड्यो नृपतिश्रेष्ठस् सर्वशस्त्रभृतां वरः ।
कर्णस्यानीकमहनत् पाशहस्त इवान्तकः ॥ ५

तदुदीर्णरथाश्वेभपत्तिप्रवरसङ्कुलम् ।
कुलालचक्रवद्भ्रान्तं पाण्ड्येनाभ्यर्दितं बलम् ॥ ६

व्यश्वसूतध्वजरथान् विप्रविद्धायुधान् रथान् ।
सम्यगस्तैश्शरैः पाण्ड्यो वायुर्मेघानिवाक्षिपत् ॥ ७

द्विरदान् प्रवरारोहान् विपताकायुधध्वजान् ।
सपादरक्षान् न्यहनद् वज्रेणाद्रीनिवाद्रिहा ॥ ८

सशक्तिप्रासयष्टींश्च हयारोहान् हयानपि ।
पुलिन्दकषबाह्लीकान् निषादान्ध्रकतङ्कणान् ॥ ९

दाक्षिणात्यांश्च भोजांश्च क्रूरान् सङ्ग्रामकर्कशान् ।
विशस्त्रकवचान् बाणैः कृत्वा पाण्ड्योऽकरोद्यमसून् ॥ १०

चतुरङ्गं बलं राजन् निघ्नन्तं पाण्ड्यमाहवे ।
दृष्ट्वा द्रौणिरसम्भ्रान्तम् असम्भ्रान्ततरो ययौ ॥ ११

आभाष्य चैनं मधुरम् अनुसृत्य ह्यभीतवत् ।
प्राह प्रहरतां श्रेष्ठस् स्मितपूर्वं समाह्वयत् ॥ १२

---

1. क-ब-ङ—नैच्छदात्मनि

अश्वत्थामा—

राजन् कमलपत्राक्ष प्रधानायुधवाहन ।
वज्रसंहननाचिन्त्य प्रख्यातबलपौरुष ॥ १३

मुष्टिश्लिष्टाङ्गुलिभ्यां च व्यायताभ्यां महद्धनुः ।
दोर्भ्यां विष्फारयन् भासि महाजलदवद्वृशम् ॥ १४

शरवर्षैर्महावेगैर् अमित्रानभिवर्षसि ।
मदन्यं नानुपश्यामि प्रतिवीरं तवाहवे ॥ १५

रथद्विरदपत्त्यश्वान् एकः प्रमथसे बहून् ।
मृगसङ्घानिवारण्ये नखैर्भीमबलो हरिः ॥ १६

महता रथघोषेण दिवं भूमिं च नादयन् ।
वर्षान्ते सस्यगां सूर्यो भाभिरादीपयन्निव ॥ १७

संस्पृशानश्शरैः पूर्णौ तूणी चाशीविषोपमैः ।
मयैवैकेन युध्यस्व त्र्यम्बकेन यथाऽन्तकः ॥ १८

सञ्जयः—

एवमुक्तस्तथेत्युक्त्वा प्रहस्यैनं स पार्थिवः ।
कर्णिना द्रोणतनयं विव्याध मलयध्वजः ॥ १९

मर्मभेदिभिरत्युग्रैर् बाणैरग्निशिखोपमैः ।
मर्मस्वभ्यहनद्द्रौणिः पाण्ड्यमाचार्यनन्दनः ॥ २०

ततोऽपरान् न वांस्तूर्णं नाराचान् कङ्कवाससः ।

गत्या दशम्या संयुक्तान् अश्वत्थामाऽप्यवासृजत् ॥ २१

तानच्छिनत् तदा पाण्ड्यश् [1]चतुर्भिरपरैश्शरैः ।
चतुरोऽभ्याहनच्चाश्वान् आशु ते व्यसवोऽभवन् ॥ २२

अथ द्रोणसुतस्येषूञ् छित्वा छित्वा शितैश्शरैः ।
धनुर्ज्यौ विततां पाण्ड्यश् चिच्छेदादित्यतेजसः ॥ २३

अथाधिज्यं महत् कृत्वा धनुर्द्रौणिरमित्रहा ।
[2]प्रेक्ष्य चाशु रथे युक्तान् नरैरन्यान् हयोत्तमान् ॥ २४

ततश्शरसहस्राणि प्रेषयामास स द्विजः ।
इषुसम्बाधमाकाशम् अकरोद्दिश एव च ॥ २५

ततस्तानस्यतस्सर्वान् द्रौणेर्बाणान् महात्मनः ।
जानन्नप्यक्षयान् पाण्ड्योऽशातयत् पुरुषर्षभः ॥ २६

प्रततांस्तान् प्रयत्नेन छित्त्वा द्रौणेरिषूनरिः ।
चक्ररक्षौ ततस्तस्य प्राणुदन्निशितैश्शरैः ॥ २७

अथ तल्लाघवं दृष्ट्वा मण्डलीकृतकार्मुकः ।
प्रास्यद्द्रोणसुतो बाणान् वर्षं पूषानुजो यथा ॥ २८

अष्टावष्टशतान्यूहुश् शकटानि यदायुधम् ।
अह्नस्तदष्टभागेन द्रौणिश्चिक्षेप मारिष ॥ २९

तमन्तकमिव क्रुद्धम् अन्तकालान्तकोपमम् ।

---

1. क—इतः षट् पादा न सन्ति 2. क—इदमर्धं नास्ति

ये ये ददृशिरे रूपं विसंज्ञाः प्रायशोऽभवन् ॥ ३०

आचार्यपुत्रस्तां सेनां बाणवृष्ट्या ह्यवीवृषत् ।
पर्जन्य इव घर्मान्ते वृष्ट्या साद्रिद्रुमां महीम् ॥ ३१

द्रौणिपर्जन्यसृष्टां तां बाणवृष्टिं दुरासदाम् ।
वायव्यास्त्रेण स क्षिप्रं विद्ध्वा पाण्ड्यानिलोऽनदत् ॥ ३२

तस्य नानदतः केतुं चन्दनागुरुरूषितम् ।
मलयप्रतिमं द्रौणिश् छित्त्वा बाणैरपातयत् ॥ ३३

सूतमेकेषुणा हत्वा महाजलदनिस्स्वनम् ।
धनुश्छित्त्वाऽर्धचन्द्रेण व्यधमत् तिलशो रथम् ॥ ३४

अस्त्रैरस्त्राणि संवार्य च्छित्त्वा सर्वायुधानि च ।
प्राप्तमप्यहितं द्रौणिर् नावधीद्युद्धतृष्णया ॥ ३५

हतेश्वरं द्विरदवरं सुकल्पितं
शराभिमृष्टः प्रतिशब्दगो बली ।
तदाऽध्यतिष्ठन्मलयध्वजस्त्वरन्
यथाऽद्रिशृङ्गं हरिरुन्नदंस्तथा ॥ ३६

स तोमरं भास्कररश्मिवर्चसं
बलास्त्रसर्गोत्तमयत्नमन्युभिः ।
ससर्ज शीघ्रं प्रतिपीडयन् गजं
गुरोस्सुताय द्रमिलेश्वरो नदन् ॥ ३७

मणिप्रवेकोत्तमवज्रहाटकैर्
अलङ्कृतं चांशुकमाल्यमौक्तिकैः ।
हतो मयाऽसीत्यसकृन्मुदा नदन्
पराभिनद्भौणिवराङ्गभूषणम् ॥ ३८

तदर्कचन्द्रग्रहवैद्युतत्विषं
भृशाभिघातात् पतितं विघूर्णितम् ।
महेन्द्रवज्राभिहतं महास्वनं
यथाऽद्रिशृङ्गं धरणीतले तथा ॥ ३९

ततः प्रजज्वाल परेण मन्युना
पदाहतो नागपतिर्यथा तथा ।
समाददे चान्तकदण्डसन्निभान्
इषूनमित्रान्तकरांश्चतुर्दश ॥ ४०

द्विपस्य पादाग्रकरान् स पञ्चभिर्
नृपस्य बाहुं च शिरोऽथ पत्रिभिः ।
जघान षड्भिष्षडृतूपमत्विषस्
स पाण्ड्यराजानुचरान् महारथान् ॥ ४१

सुदीर्घवृत्तौ वरचन्दनोक्षितौ
सुवर्णमुक्तामणिवज्रभूषितौ ।

भुजौ धरायां पतितौ नृपस्य तौ
विचेष्टतुस्ताक्ष्यंहताविवोरगौ ॥ ४२

शिरश्च तत् पूर्णशशिप्रभाननं
सरोषताम्रायतनेत्रमुन्नसम् ।
क्षितौ विबभ्राज सुदीप्तकुण्डलं
विशाखयोर्मध्यगतो यथा शशी ॥ ४३

समाप्तविद्यं तु गुरोस्सुतं नृपस्
समाप्तकर्माणमुपेत्य ते सुतः ।
सुहृद्वृतोऽत्यर्थमपूजयन्मुदा
जिते बलौ विष्णुमिवामरेश्वरः ॥ ४४

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि एकषष्टितमोऽध्यायः ॥ ६१ ॥
॥ ७३ ॥ कर्णपर्वणि एकषष्टितमोऽध्यायः ॥ ६१ ॥
[अस्मिन्नध्याये ४४ श्लोकाः]

॥ द्विषष्टितमोऽध्यायः ॥

सङ्कुलयुद्धम् ॥

धृतराष्ट्रः—

पाण्ड्ये हते किमकरोद् अर्जुनो युधि सञ्जय ।
एकवीरेण कर्णेन द्राविते च युधिष्ठिरे ॥ १

समाप्तविद्यो बलवान् युक्तो वीरश्च पाण्डवः ।
सर्वभूतेष्वनुज्ञातश् शङ्करेण च धीमता ॥ २

तस्मान्मम भयं तीव्रम् अमित्रघ्नाद्धनञ्जयात् ।
स यत् तत्राकरोत् पार्थस् तन्ममाचक्ष्व सञ्जय ॥ ३

सञ्जयः—

हते पाण्ड्येऽर्जुनं कृष्णस् त्वरन्नाह वचस्तदा ॥ ३॥

श्रीभगवान्—

हतं पश्यस्व राजानम् अपयातांश्च पाण्डवान् ।
कर्णं पश्य महारङ्गे ज्वलन्तमिव पावकम् ॥ ४॥

असौ भीमो महेष्वासः प्रतिवृत्तो रणं प्रति ।
तमन्येऽप्यनुवर्तन्ते धृष्टद्युम्नपुरोगमाः ॥ ५॥

पाञ्चालास्सृञ्जयश्चैव पाण्डवानां च ये मुखम् ॥ ६

निवृत्ते च पुनः पार्थे भग्नं शत्रुबलं महत् ।

कौरवान् द्रवतो ह्येष कर्णो वारयतेऽर्जुन ॥ ७

अन्तकप्रतिमो वेगे शक्रतुल्यपराक्रमः ।
असौ गच्छति कौन्तेय द्रौणिश्शस्त्रभृतां वरः ॥ ८

तमेष प्रद्रुतस्सङ्ख्ये धृष्टद्युम्नो महारथः ॥ ८॥

[1]अश्वत्थाम्ना हतास्सङ्ख्ये सर्वे कौन्तेय सृञ्जयाः ।
रथाश्वनरनागानां कृतं च कदनं महत् ॥ ९॥

सञ्जयः—

इत्येतत् सर्वमाचष्ट वासुदेवः किरीटिने ॥ १०

एतच्छ्रुत्वा च दृष्ट्वा च भ्रातॄणां व्यसनं महत् ।
वाहयाश्वान् हृषीकेश क्षिप्रमित्याह पाण्डवः ॥ ११

ततः प्रायाद्धृषीकेशो रथेनाप्रतिमो युधि ।
तदा रेणुस्समभवत् पुनस्तत्र महारणे ॥ १२

[2]ततो राजन् महानासीत् सङ्ग्रामो रोमहर्षणः ।
[3]सिंहनादरवाश्चात्र प्रादुरासन् समागमे ॥ १३

उभयोस्सेनयो राजन् मृत्युं कृत्वा निवर्तनम् ॥ १३॥

ततः पुनस्समाजग्मुर् अभीताः कुरुसृञ्जयाः ।
युधिष्ठिरमुखाः पार्था वैकर्तनमुखा वयम् ॥ १४॥

---

1. अ—अर्धद्वयं नास्ति 2. अ-घ—नास्तीदमर्धम्
3. ख—इदमर्धं नास्ति

ततः प्रववृते युद्धं घोररूपं विशां पते ।
कर्णस्य पाण्डवानां च यमराष्ट्रविवर्धनम् ॥ १५॥

तस्मिन् प्रवृत्ते सङ्ग्रामे तुमुले रोमहर्षणे ।
संशप्तकेषु वीरेषु किञ्चिच्छिष्टेषु भारत ॥ १६॥

धृष्टद्युम्नो महाराज सहितस्सर्वराजभिः ।
कर्णमेवाभिदुद्राव पाण्डवाश्च महारथाः ॥ १७॥

आगच्छमानांस्तान् दृष्ट्वा सङ्ग्रामे विजयैषिणः ।
दधारैको रणे कर्णो जलौघानिव पर्वतः ॥ १८॥

तमासाद्य रणे कर्णं व्यशीर्यन्त महारथाः ।
यथाऽचलं समासाद्य वार्योघास्सर्वतोदिशम् ॥ १९॥

तयोरासीन्महाराज सङ्ग्रामो घोरदर्शनः ।
प्रयुध्यतोर्महाराज्ञे बलिनोर्विजिगीषतोः ॥ २०॥

धृष्टद्युम्नस्तु राधेयं शरेण नतपर्वणा ।
भित्त्वा च तत्र वै कर्णं तिष्ठ तिष्ठेति चाब्रवीत् ॥ २१॥

विजयं तु धनुश्श्रेष्ठं विधून्वानो महारथः ।
ववर्ष शरवर्षाणि तोयवर्षमिवाम्बुदः ॥ २२॥

पार्षतस्य धनुश्छित्त्वा शरांश्चाशीविषोपमान् ।
ताडयामास सङ्क्रुद्धः पार्षतं नवभिश्शरैः ॥ २३॥

ते हेमविकृतं वर्म भित्त्वा तस्य महात्मनः ।

शोणितार्क्ता व्यराजन्त शक्रगोपा इवानघ ॥ २४॥
तदपास्य धनुश्छिन्नं धृष्टद्युम्नो महामनाः ।
ततोऽन्यद्धनुरादाय सारवद्भारसाधनम् ॥ २५॥
कर्णं विव्याध सप्तत्या शरैस्सन्नतपर्वभिः ॥ २६
तथैव राजन् कर्णोऽपि पार्षतं शत्रुतापनम् ।
द्रोणशत्रुं महेष्वासो विव्याध नवभिश्शरैः ॥ २७
पुनरन्यं महाराज शरं कनकभूषितम् ।
प्रेषयामास सङ्क्रुद्धो मृत्युदण्डमिवापरम् ॥ २८
तमापतन्तं सहसा घोररूपं विशां पते ।
चिच्छेद शतधा राजन् पार्षतः कृतहस्तवत् ॥ २९
दृष्ट्वा निपतितं भूमौ शरं कर्णो विशां पते ।
पार्षतं शरवर्षेण समन्तात् पर्यवारयत् ॥ ३०
विव्याध चैनं त्वरितो नाराचैस्तत्र सप्तभिः ।
तं प्रत्यविध्यद्दशभिश् शरैर्हेमविभूषितैः ॥ ३१
तयोर्युद्धं समभवद् दृष्टिश्रोत्रमनोहरम् ।
आसीद्घोरं च चित्रं च प्रेक्षणीयं च सर्वशः ॥ ३२
सर्वेषां तत्र भूतानां रोमहर्षो व्यजायत ।
दृष्ट्वा तत् समरे कर्म कर्णपार्षतयोर्नृप ॥ ३३
एतस्मिन्नन्तरे द्रौणिर् अभ्ययात् तं महारथम् ।

पार्षतं शत्रुदमनं शत्रुवीर्यासुनाशनम् ॥ ३४

स दृष्ट्वा समरे कर्णं पार्षतं च महारथम् ।
अभ्यभाषत सङ्क्रुद्धः पार्षतं शत्रुतापनम् ॥ ३५

रथं रथेन सम्पीड्य पार्षतस्य तु ब्राह्मणः ॥ ३५॥

अश्वत्थामा—

तिष्ठ तिष्ठेति ब्रह्मघ्न न मे जीवन् विमोक्ष्यसे ॥ ३६

सञ्जयः—

इत्युक्त्वा समरे वीर शीघ्रकृन्निशितैश्शरैः ।
छादयामास समरे यतमानो महारथः ॥ ३७

यत्नतः परया शक्त्या धृष्टद्युम्नं महारणे ।
योधयामास समरे क्रुद्धरूपो विशां पते ॥ ३८

यथा हि समरे द्रौणिः पार्षतं दृश्य मारिष ।
नातिहृष्टमना भूत्वा मेने तं मृत्युमात्मनः ॥ ३९

तथा द्रौणिं रणे दृष्ट्वा पार्षतश्शत्रुपूगहा ।
[1]नातिहृष्टमना ह्यासीन्मन्वानो मृत्युमात्मनः ॥ ४०

स ज्ञात्वा समरेऽत्मानं शस्त्रावध्यं महाबलः ।
जवेनाभिययौ द्रौणिं कालः कालक्षये यथा ॥ ४१

द्रौणिस्तु दृष्ट्वा राजेन्द्र धृष्टद्युम्नं रणार्थिनम् ।

---

1. क—नासीदमर्षद्वयम्

क्रोधेन निश्श्वसन् वीरः पार्षतं समभिद्रवत् ॥ ४२

तावन्योन्यं तु दृष्ट्वैव संरम्भं जग्मतुः परम् ।
प्रगृह्य महती चापे शरासनविराजिते ॥ ४३

अथाब्रवीन्महाराज द्रोणपुत्रः प्रतापवान् ।
धृष्टद्युम्नं समीपस्थं त्वरमाणो विशां पते ॥ ४४

अश्वत्थामा—

पाञ्चालापशदाद्य त्वां प्रेषयामि यमक्षयम् ।
पापं हि यत्त्वया कर्म कृतं तातं घ्नता रणे ॥ ४५

अद्य त्वं प्राप्स्यसे तद्वै यथा ह्यकुशलस्तथा ।
अरक्ष्यमाणः पार्थेन यदि तिष्ठसि संयुगे ॥ ४६

नापक्रामसि वा मोहात् सत्यमेतद्ब्रवीमि ते ॥ ४६॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि द्विषष्टितमोऽध्यायः ॥ ६२ ॥
॥ ७३ ॥ कर्णपर्वणि द्विषष्टितमोऽध्यायः ॥ ६२ ॥
[अस्मिन्नध्याये ४६॥ श्लोकाः]

॥ त्रिषष्टितमोऽध्यायः ॥

अर्जुनस्य द्रौणिप्रस्तधृष्टद्युम्नरक्षणपूर्वकं द्रौणिं निर्जित्य संशप्तकान् प्रति गमनम् ॥

सञ्जयः—

एवमुक्तः प्रत्युवाच धृष्टद्युम्नः प्रतापवान् ॥ ॥

धृष्टद्युम्नः—

[1]आशिषं तां प्रवक्तव्यां मामको दास्यते तव ।
येनैव ते पितुर्दत्ता यतमानस्य संयुगे ॥ १॥

एष ते प्रतिवाक्यं वै असिर्दास्यति मामकः ।
येन कृत्तं तव पितुर् यतमानस्य तच्छिरः ॥ २॥

यदि तावन्मया द्रोणो निहतो ब्राह्मणव्रुवः ।
त्वामिदानीं कथं युद्धे न हनिष्यामि किल्बिषम् ॥ ३॥

सञ्जयः—

एवमुक्त्वा महाराज सेनापतिररिन्दमः ।
सुतीक्ष्णेनाथ भल्लेन द्रौणिं विव्याध पार्षतः ॥ ४॥

ततो द्रोणसुतः क्रुद्धश् शरैस्सन्नतपर्वभिः ।
प्राच्छादयद्दिशो राजन् धृष्टद्युम्नस्य संयुगे ॥ ५॥

---

1. अ—अर्धद्वयं नास्ति

नैवान्तरिक्षं न दिशो नापि योधास्सहस्रशः ।
दृश्यन्ते तैर्महाराज शरैश्छन्नास्समन्ततः ॥ ६॥

[1]एकस्सन् वारयामास प्रेक्षणीयस्समन्ततः ॥ ७

तथैव पार्षतो राजन् द्रौणिमाहवशोभिनम् ।
शरैस्सञ्छादयामास सूतपुत्रस्य पश्यतः ॥ ८

राधेयोऽपि महाराज पाञ्चालान् पाण्डवैस्सह ।
द्रौपदेयान् युधामन्युम् उत्तमौजसमेव च ॥ ९

सात्यकिं च महाराज योधांश्चान्यान् सहस्रशः ।
एकस्तान् वारयामास प्रेक्षणीयस्समन्ततः ॥ १०

धृष्टद्युम्नोऽपि समरे द्रौणेश्चिच्छेद कार्मुकम् ।
क्षुरप्रेण सुतीक्ष्णेन पश्यतां सर्वयोधिनाम् ॥ ११

तदपास्य धनुश्छिन्नम् अन्यदादत्त कार्मुकम् ।
वेगवत् समरे घोरं शरांश्चाशीविषोपमान् ॥ १२

स पार्षतस्य राजेन्द्र धनुश्शक्तिं ध्वजं गदाम् ।
हयान् सूतं रथं चैव निमेषाद्व्यधमच्छरैः ॥ १३

स च्छिन्नधन्वा विरथो हताश्वो हतसारथिः ।
खड्गमादत्त विपुलं शतचन्द्रं च भानुमत् ॥ १४

द्रौणिस्तदपि राजेन्द्र भल्लैः क्षिप्रं महारथः ।

---

1. क—इदमर्धं नास्ति

चिच्छेद समरे वीरः क्षिप्रहस्तो दृढायुधः ॥ १५

रथादनवरूढस्य धन्विनो बाहुशालिनः ।
पश्यतां सर्वसैन्यानां तदद्भुतमिवाभवत् ॥ १६

धृष्टद्युम्नं तु विरथं हताश्वं हतसारथिम् ।
शस्त्रैश्च बहुधा विद्धम् अस्त्रैश्च शकलीकृतम् ॥ १७

नातरद्भरतश्रेष्ठ यतमानो महारथः ॥ १७॥

तस्यान्तमिषुभी राजन् यदा द्रौणिर्न गच्छति ।
अथ त्यक्त्वा रथं वीरः पार्षतं त्वरितोऽन्वगात् ॥ १८॥

प्रगृह्य विपुलं खड्गं जातरूपपरिष्कृतम् ॥ १९

तस्य सम्पततो राजन् वपुरासीन्महात्मनः ।
गरुडस्येव पततो जिघृक्षोः पन्नगोत्तमम् ॥ २०

एतस्मिन्नेव काले तु [1]केशवः परवीरहा ।
अब्रवीद्भरतश्रेष्ठम् अर्जुनं जयतां वरम् ॥ २१

श्रीभगवान्—

पश्य द्रौणिं पार्षतस्य यतमानं वधं प्रति ।
यत्नं करोति विपुलं हन्याच्चैनं न संशयः ॥ २२

त्रायस्वैनं महाबाहो पार्षतं युद्धदुर्मदम् ।
द्रौणेरास्यगतं वीर मृत्योरास्यगतं यथा ॥ २३

---

1. ख—माधवोऽर्जुनमब्रवीत्-मध्ये अर्धं नास्ति

सञ्जयः—

एवमुक्त्वा महाराज वासुदेवः प्रतापवान् ।
प्रैषयत् तुरगांस्तत्र यत्र द्रौणिर्व्यवस्थितः ॥ २४

ते हयाश्चन्द्रसङ्काशाः केशवेन प्रचोदिताः ।
पिबन्त इव चाकाशं जग्मुर्द्रौणेर्महारथम् ॥ २५

दृष्ट्वा यान्तौ महाराज वासुदेवधनञ्जयौ ।
धृष्टद्युम्नवधे राजंश् चक्रे यत्नं महाबलः ॥ २६

विकृष्यमाणं दृष्ट्वैव धृष्टद्युम्नं जनेश्वर ।
शरांश्चिक्षेप वै पार्थो द्रौणिं प्रति महारथः ॥ २७

ते शरा हेमविकृता गाण्डीवप्रेरिता भृशम् ।
द्रौणिमासाद्य विविशुर् वल्मीकमिव पन्नगाः ॥ २८

विद्धस्तु तैश्शरैर्घोरैर् द्रोणपुत्रः प्रतापवान् ।
उत्सृज्य समरे राजन् पाञ्चालममितौजसम् ॥ २९

आरुरोह रथं वीरो धनञ्जयशरार्दितः ॥ २९॥

प्रगृह्य च धनुश्श्रेष्ठं पार्थं विव्याध सायकैः ॥ ३०

एतस्मिन्नन्तरे शूरस् सहदेवो जनाधिप ।
अपोवाह रथेनाजौ पार्षतं शत्रुतापनम् ॥ ३१

अर्जुनोऽपि महाराज द्रौणिं विव्याध पत्रिभिः ।
तं द्रोणपुत्रस्संरब्धो बाह्वोरुरसि चार्पयत् ॥ ३२

क्रोधितस्तु रणे पार्थो नाराचं कालसन्निभम् ।
द्रोणपुत्राय चिक्षेप यमदण्डमिवापरम् ॥ ३३

स ब्राह्मणस्यांसदेशे निपपात महाद्युतेः ॥ ३३॥

स विह्वलो महाराज शरवेगेन संयुगे ।
निषसाद रथोपस्थे वैक्लव्यं परमं ययौ ॥ ३४॥

तं तु मत्वा हतं वीरं सारथिरशत्रुकर्शनम् ।
अपोवाह रथेनाजौ त्वरमाणो रणाजिरात् ॥ ३५॥

अथोद्वृष्टं महाराज पाञ्चालैर्जितकाशिभिः ।
मोक्षितं पार्षतं दृष्ट्वा द्रोणपुत्रं च पीडितम् ॥ ३६॥

वादित्राणि च सर्वाणि प्रावाद्यन्त सहस्रशः ।
सिंहनादश्च सञ्जज्ञे दृष्ट्वा युद्धं तदद्भुतम् ॥ ३७॥

ततः कर्णो महाराज व्याक्षिपद्विजयं धनुः ।
दृष्ट्वाऽर्जुनं रणे क्रुद्धः प्रेक्षते च मुहुर्मुहुः ॥ ३८॥

द्वैरथं चापि पार्थेन गन्तुकामो महाद्युतिः ॥ ३९

एवं कृत्वाऽब्रवीत् पार्थो वासुदेवं धनञ्जयः ॥ ३९॥

अर्जुनः—

याहि संशप्तकान् कृष्ण कार्यमेतत् परं मतम् ॥ ४०

सञ्जयः—

ततः प्रयातो दाशार्हश् श्रुत्वा पाण्डवभाषितम् ।

रथेनातिपताकेन मनोमारुतरंहसा ॥ ४१

एवमेष क्षयो वृत्तः पृथिव्यां पृथिवीपते ।
तावकानां परेषां च राजन् दुर्मन्त्रिते तव ॥ ४२

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि त्रिषष्टितमोऽध्यायः ॥ ६३ ॥
॥ ७३ ॥ कर्णपर्वणि त्रिषष्टितमोऽध्यायः ॥ ६३ ॥
[अस्मिन्नध्याये ४२ श्लोकाः]

॥ चतुष्षष्टितमोऽध्यायः ॥

सङ्कुलयुद्धम् ॥

सञ्जयः—

ततः प्रववृते भूयस् सङ्ग्रामो राजसत्तम ।
कर्णस्य पाण्डवानां च यमराष्ट्रविवर्धनः ॥ १

धनूंषि बाणपरिघान् असितोमरपट्टसान् ।
मुसलानि मुसुण्ठीश्च शक्तियष्टिपरश्वधान् ॥ २

गदाः प्रासाञ् शितान् कुन्तान् भिण्डिपालान् महाङ्कुशान् ।
प्रगृह्य क्षिप्रमापेतुः परस्परजिघांसया ॥ ३

धनुर्ज्यातलशब्देन दिशश्च प्रदिशो वियत् ।
पृथिवीं नेमिघोषेण नादयन्तोऽभ्ययुः परान् ॥ ४

तेन शब्देन बहवस् संहृष्टाश्चक्रुराहवम् ।
वीरा वीरैर्महाघोरं कलहान्तमभीप्सवः ॥ ५

ज्यातलत्रधनुश्शब्दाञ् शस्त्राणां च निपात्यताम् ।
ताडितानां च पततां निनादांश्चैव दन्तिनाम् ॥ ६

बाणशब्दांश्च विविधाञ् शूराणां चैव गर्जताम् ।
श्रुत्वा शब्दान् भृशं नेदुः पेतुर्मम्रुश्च भारत ॥ ७

तेषामाददतां बाणान् शस्त्रवर्षं च वर्षताम् ।
बहूनातिरथिः कर्णः प्रममाथ तथेषुभिः ॥ ८

पञ्च पाञ्चालवीराणां रथानां दश सप्त च ।
साश्वसूतरथान् कर्णश् शरैर्निन्ये यमक्षयम् ॥ ९

योधमुख्या महावेगाः पाण्डूनां कर्णमभ्ययुः ।
शिक्षितास्तमभिद्रुत्य परिवव्रुस्समन्ततः ॥ १०

[1]दीर्घमम्बरमावृत्य वाताः पूर्वापरा इव ॥ १०॥

ततः कर्णो द्विषत्सेनां बाणवृष्ट्या विलोलयन् ।
विजगाहेऽण्डजाकीर्णां पद्मिनीमिव यूथपः ॥ ११॥

द्विषत्सैन्यमवस्कन्द्य राधेयो धनुरुत्तमम् ।
विदुधाव शितैर्बाणैश् शिरांस्युन्मथ्य पातयत् ॥ १२॥

हस्तिनस्समहामात्रान् साश्वारोहान् हयानपि ।

1. अ-ख—नास्तीदमर्धम्

रथिनोऽप्येकबाणेन भ्रमतश्चाप्यपातयत् ॥ १३॥

चर्म वा वर्म वाऽऽश्रित्य निपातमपि देहिनः ।
विषेहुर्नास्य संस्पर्शं द्वितीयस्य पतत्रिणः ॥ १४॥

वर्मयुक्तेषु देहेषु धनुषाऽस्यञ्शिताञ्शरान् ।
मौर्व्या तलत्रे व्यहनत् कशया वाजिनो यथा ॥ १५॥

पाण्डुसृञ्जयपाञ्चालाञ् शरगोचरमागतान् ।
ममर्द तरसा कर्णस् सिंहो मृगगणानिव ॥ १६॥

ततः पाञ्चालपुत्रश्च द्रौपदेयाश्च मारिष ।
यमौ च युयुधानश्च त्वरिताः कर्णमभ्ययुः ॥ १७॥

तेषु व्यायच्छमानेषु कुरुपाञ्चालपाण्डवाः ।
प्रियानसून् परित्यज्य योधा जग्मुः परस्परम् ॥ १८॥

सुसन्नद्धाः कवचिनश् शिरस्त्राणविभूषिताः ।
गदाभिर्मुसलैश्चान्यैः परिघैश्च महारथाः ॥ १९॥

समभ्यधावंस्त्वन्योन्यं देवदण्डैरिवोद्यतैः ।
नर्दन्तश्चाह्वयन्तश्च प्रवल्गन्तश्च मारिष ॥ २०॥

ततो निजघ्नुरन्योन्यं पेतुरन्योन्यपातिताः ।
वमन्तो रुधिरं वक्त्रैर् विमस्तिष्केक्षणायुधाः ॥ २१॥

पूर्णैर्दन्तैस्सरुधिरैर् आस्यैर्दाडिमसन्निभैः ।
जीवन्त इव चान्ये तु तस्थुश्शस्त्रौघबृंहिताः ॥ २२॥

परश्वधैरपि शरैः पट्टसैरसिभिस्तथा ।
शक्तिभिर्भिण्डिपालैश्च नखरप्रासतोमरैः ॥ २३॥

ततक्षुर्विभिदुश्चैव चिक्षिपुश्चिच्छिदुस्तथा ।
सञ्चकर्तुश्च जघ्नुश्च क्रुद्धा राजन् महारणे ॥ २४॥

पेतुरन्योन्यनिहता व्यसवो रुधिरोक्षिताः ।
क्षरन्तस्स्वरसं रक्तं प्रकृत्ताश्चन्दना इव ॥ २५॥

रथा रथैर्विनिहता हस्तिनश्चापि हस्तिभिः ।
नरा नरैर्हताः पेतुर् अश्वैरश्वास्सहस्रशः ॥ २६॥

ध्वजाश्शिरांसि च्छत्राणि द्विपहस्ता नृणां भुजाः ।
क्षुरैर्भल्लार्धचन्द्रैश्च च्छिन्नाश्शोभां न तत्यजुः ॥ २७॥

वध्यतां दारुणश्शब्दस् स्तनतां पततामभूत् ।
नराश्वेभरथानां हि नराश्वेभरथैस्तथा ॥ २८॥

नराश्वनागांश्च रथाःपत्तीन् ममृदुराहवे ॥ २९

नरानश्वा नरान् नागा विषाणैर्जघ्नुरञ्जसा ।
तथा रथा हताः पेतुर् अश्वारोहैस्सहस्रशः ॥ ३०

अश्वारोहैर्हतारोहाश् छिन्नगात्राश्च दन्तिनः ।
सपताकाध्वजाः पेतुर् निकृत्ता इव शाखिनः ॥ ३१

सादिभिः पत्तिसङ्घाश्च प्रहता युधि शेरते ।
पत्तिभिश्च समाप्लुत्य द्विरदास्स्यन्दनास्तथा ॥ ३२

हस्त्यारोहाश्च रथिनो हताः प्रासासितोमरैः ।
अश्वारोहास्समासाद्य सहसा पत्तिभिर्हताः ॥ ३३

मृदितानीव पद्मानि प्रम्लाना इव च स्रजः ।
हतानां वदनान्यासन् गात्राणि च नृणां रणे ॥ ३४

रूपाण्यत्यर्थकान्तीनि द्विरदानां रणे नृप ।
विशीर्णानीव रोधांसि नदीनां भरतर्षभ ॥ ३५

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि चतुष्षष्टितमोऽध्यायः ॥ ६४ ॥
॥ ७३ ॥ कर्णपर्वणि चतुष्षष्टितमोऽध्यायः ॥ ६४ ॥
[अस्मिन्नध्याये ३५ श्लोकाः]

॥ पञ्चषष्टितमोऽध्यायः ॥

गजयुद्धम् ॥ १ ॥ सङ्कुलयुद्धम् ॥ २ ॥

सञ्जयः—

हस्तिनस्तु महामात्रास् तव पुत्रेण चोदिताः ।
धृष्टद्युम्नं व्रतेत्याशु क्रुद्धाः पार्षतमभ्ययुः ॥ १

प्राच्याश्च दाक्षिणात्याश्च प्रवरा गजयोधिनः ।
अङ्गा वङ्गाश्च पुण्ड्राश्च मागधास्ताम्रलिप्तकाः ॥ २

कोसला मेखलास्सुह्मा दशार्णा निषधास्तथा ।
गजयुद्धेषु कुशलाः कलिङ्गैस्सह भारत ॥ ३

शरतोमरनाराचैर् वृष्टिमन्त इवाम्बुदाः ।
सिषिचुस्ते ततस्सर्वे पाञ्चालाचलमाहवे ॥ ४

तानभिद्रवतो नागान् सपक्षानिव पर्वतान् ।
विपाठक्षुरनाराचैर् धृष्टद्युम्नोऽप्यवीवृषत् ॥ ५

एकैकं दशभिष्षड्भिर् अष्टाभिरपि पार्षतः ।
द्विरदानभिविव्याध क्षिप्रं गिरिनिभान् शरैः ॥ ६

प्रच्छाद्यमानं द्विरदैर् मेघैरिव दिवाकरम् ।
पर्ययुः पाण्डुपाञ्चाला नर्दन्तो ह्यात्तकार्मुकाः ॥ ७

तान् नागानभिवर्षन्तो ज्यातलत्रनिनादिताः ।
[1]वीरनृत्यं प्रनृत्यन्तश् शूरतालप्रचोदितैः ॥ ८

नकुलस्सहदेवश्च द्रौपदेयाः प्रभद्रकाः ।
सात्यकिश्च शिखण्डी च चेकितानश्च वीर्यवान् ॥ ९

[2]समन्तात् सिषिचुर्वीरा मेघास्तोयैरिवाचलान् ॥ ९॥

ते म्लेच्छैः प्रेषिता नागा नरानश्वान् रथानपि ।
हस्तैराक्षिप्य ममृदुः पद्भिस्तूर्णं मदोत्कटाः ॥ १०॥

बिभिदुश्च विषाणाग्रैस् समुत्क्षिप्य च चिक्षिपुः ।

1. ख—इदमर्धं नास्ति 2. ख—इदमर्धं नास्ति

विषाणभिन्नाश्चाप्यन्ये परिपेतुर्विभीषणाः ॥ ११॥

प्रमुखे वर्तमानं तु द्विपं वङ्गस्य सात्यकिः ।
नाराचेनोग्रवेगेन भित्त्वा मर्माण्यताडयत् ॥ १२॥

तस्यावर्जितनागस्य द्विरदादुत्पतिष्यतः ।
नाराचेनाभिनद्वक्षस् सात्यकिस्सोऽपतद्भुवि ॥ १३॥

पौण्ड्रस्यापततो नागं चलन्तमिव पर्वतम् ।
सहदेवः प्रसन्नाग्रैर् नाराचैः प्राहरत् त्रिभिः ॥ १४॥

विपताकं वियन्तारं विवर्मध्वजजीवितम् ।
तं कृत्वा द्विरदं भूयस् सहदेवोऽङ्गमभ्ययात् ॥ १५॥

सहदेवं तु नकुलो वारयित्वाऽङ्गमर्दयत् ।
नाराचैर्यमदण्डाभैर् त्रिभिर्नागं शतेन च ॥ १६॥

दिवाकरकरप्रख्यान् अङ्गश्चिक्षेप तोमरान् ।
नकुलस्तु ततो हृष्टस् त्रिधैकैकमथाच्छिनत् ॥ १७॥

अथार्धचन्द्रेण शिरस् तस्य चिच्छेद पाण्डवः ।
स पपात हतो म्लेच्छस् तेनैव सह दन्तिना ॥ १८॥

आचार्यपुत्रे सर्वेषां हस्तिशिक्षाविदा हते ।
अन्ये क्रुद्धा महामात्रा नागैर्नकुलमभ्ययुः ॥ १९॥

चलत्पताकैः प्रमुखैर् हेमकक्ष्यातनुच्छदैः ।
विमर्दिषन्तस्त्वरिताः प्रदीप्तैरिव पर्वतैः ॥ २०॥

मेखलोत्कलकालिङ्गा नैषधास्ताम्रलिप्तकाः ।
शरतोमरवर्षाणि प्रमुञ्चन्तो जिघांसवः ॥ २१॥

तैश्छाद्यमानं नकुलं निशाकरमिवाम्बुदैः ।
परिपेतुस्सुसंरब्धाः पाण्डुपाञ्चालसात्यकाः ॥ २२॥

ततस्तदभवद्युद्धं रथिनां हस्तियोधिभिः ।
सृजतां शरवर्षाणि क्षिपतां तोमराणि च ॥ २३॥

नागानां प्रास्फुटन् कुम्भा मर्माणि च नखानि च ।
विषाणाश्चापविद्धाश्च नाराचैर्हेमभूषितैः ॥ २४॥

तेषामष्टौ महानागांश् चतुष्षष्ट्या सुतेजनैः ।
नाराचैस्सहदेवस्तान् पातयामास सादिभिः ॥ २५॥

अञ्जोगतिभिरायम्य प्रयत्नाद्धनुरुत्तमम् ।
नाराचैरवधीन्नागान् न कुलः कुलनन्दनः ॥ २६॥

ततश्शैनेयपाञ्चाल्यौ द्रौपदेयाः प्रभद्रकाः ।
शिखण्डी च महानागान् सिषिचुश्शरवृष्टिभिः ॥ २७॥

ते पाण्डुयोधाम्बुधरैश् शत्रुद्विरदपर्वताः ।
बाणवर्षैर्हताः पेतुर् वज्रवर्षैरिवाद्रयः ॥ २८॥

एवं हत्वा तव गजांस् ते पाण्डुनरकुञ्जराः ।
द्रुतां सेनां च वर्षन्तो भिन्नरोधामिवापगाम् ॥ २९॥

तां ते संलोलयन्ति स्म द्विरदा नड्वलानिव ।
विक्षोभयित्वा च पुनः कर्णं समभिदुद्रुवुः ॥ ३०॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि पञ्चषष्टितमोऽध्यायः ॥ ६५ ॥
॥ ७३ ॥ कर्णपर्वणि पञ्चषष्टितमोऽध्यायः ॥ ६५ ॥
[अस्मिन्नध्याये ३०॥ श्लोकाः]

॥ षट्षष्टितमोऽध्यायः ॥

कृष्णेनार्जुनं प्रति कुरूणां युधिष्ठिरग्रहणोद्यमकथनम् ॥

सञ्जयः—

तेषां प्रवृत्ते सङ्ग्रामे विपुले शोणितोदके ।
रराज लोहितेनोर्वी संसिक्ता बहुधा भृशम् ॥ १
ततो रजसि संशान्ते प्रकाशस्सर्वतोऽभवत् ॥ १॥
एतस्मिन्नन्तरे पार्थं कृष्णो वचनमब्रवीत् ।
दर्शयन्निव कौन्तेयं धर्मराजं युधिष्ठिरम् ॥ २॥

श्रीभगवान्—

एष पाण्डव ते भ्राता धार्तराष्ट्रैर्महाबलैः ।
जिघांसुभिरमित्रघ्नश् शीघ्रं पार्थोऽनुसार्यते ॥ ३॥
तमन्वधावन् पाञ्चालाश् चेदिमत्स्याश्च भारत ।

[1]अनुयान्ति महात्मानं परीप्सन्तो महाजवाः ॥ ४॥

एष दुर्योधनः पार्थं गजानीकेन दंशितः ।
राजा सर्वस्य लोकस्य राजानमनुधावति ॥ ५॥

जिघांसुः पुरुषव्याघ्रं भ्रातृभिस्सहितो बली ॥ ६

आशीविषसमस्पर्शैस् सर्वायुधविशारदैः ।
नदद्भिर्सिंहनादांश्च धमद्भिश्चापि वारिजान् ॥ ७
बलवद्भिर्महेष्वासैर् विधून्वानैर्धनूंषि च ॥ ७॥

एते जिघृक्षवो यान्ति द्विपाश्वरथपत्तयः ।
युधिष्ठिरं धार्तराष्ट्रो रत्नोत्तममिवार्थिनः ॥ ८॥

पश्य सात्वतभीमाभ्यां निरुद्धान् विष्ठितान् पुनः ।
जिघृक्षतोऽमृतं दैत्याच् छक्राग्निभ्यामिवाहवे ॥ ९॥

एते बहुत्वात् त्वरिताः पुनर्गच्छन्ति पाण्डवम् ।
समुद्रमिव वार्योघाः प्रावृट्काले महारथाः ॥ १०॥

मृत्योरास्यगतं मन्ये कुन्तीपुत्रं युधिष्ठिरम् ।
हुतमग्नौ च कौन्तेय दुर्योधनवशं गतम् ॥ ११॥

[2]यथायुक्तमनीकं हि धार्तराष्ट्रस्य पाण्डव ।
नास्य शक्रो विमुच्येत सम्प्राप्तो बाणगोचरम् ॥ १२॥

दुर्योधनस्य शूरस्य शरौघाञ्शीघ्रमस्यतः ।

1. ख—इदमर्धं नास्ति 2. ख—इदमर्धं नास्ति

[1]अन्तकस्येव क्रुद्धस्य [2]रूपमस्य हि दृश्यते ॥ १३॥

रसतस्तस्य वीरस्य द्रौणेश्शारद्वतस्य च ।
कर्णस्य चेषुवेगो वै पर्वतानपि दारयेत् ॥ १४॥

कर्णेन च कृतो राजा विमुखोऽद्य तु दृश्यते ॥ १५

बलवान्शीघ्रहस्तश्च कृती युद्धविशारदः ।
राधेयः पाण्डवश्रेष्ठं शक्तः पीडयितुं रणे ॥ १६
सहितो धृतराष्ट्रस्य शूरैः पुत्रैर्महारथैः ॥ १६॥

तस्यैवं युध्यमानस्य सङ्ग्रामे संशितात्मनः ।
अन्यैरपि च पार्थस्य हृतं वर्म महारथैः ॥ १७॥

उपवासकृशो राजा दृढं भरतसत्तमः ।
ब्राह्मे बले स्थितो राजा न क्षत्रे च बले स्थितः ॥ १८॥

[3]कर्णेन चाभियुक्तोऽयं भूपतिश्शत्रुतापनः ।
संशयं समनुप्राप्तः पाण्डवो वै युधिष्ठिरः ॥ १९॥

न जीवति महाराजो मन्ये पार्थ युधिष्ठिरः ।
यद्भीमसेनस्सहते सिंहनादममर्षणः ॥ २०॥

नदतां धार्तराष्ट्राणां पुनः पुनररिन्दमः ।
धमतां च महाशङ्खान् सङ्ग्रामे जितकाशिनाम् ॥ २१॥

---

1. अ-ब—अर्धद्वयं नास्ति 2. ख—अयंपादोऽनन्तरश्च न स्तः
3. क-ख—इदमर्धद्वयं नास्ति

[1]युधिष्ठिरं पाण्डवेयं ब्रूतेति पुरुषर्षभ ।
सञ्चोदयत्ययं कर्णो धार्तराष्ट्रान् महाबलान् ॥ २२॥
स्थूणाकर्णास्त्रजालेन पार्थं पाशुपतेन च ।
प्रच्छादयन्तो राजानम् अनुयान्ति महारथाः ॥ २३॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि षट्षष्टितमोऽध्यायः ॥ ६६ ॥
॥ ७३ ॥ कर्णपर्वणि षट्षष्टितमोऽध्यायः ॥ ६६ ॥
[अस्मिन्नध्याये २३॥ श्लोकाः]

॥ सप्तषष्टितमोऽध्यायः ॥

कृष्णेनार्जुनं प्रति युधिष्ठिरस्य कर्णेन पराभवकथनपूर्वकं कर्णयुद्ध-प्रदर्शनम् ॥ १ ॥ तथा भीमसेनयुद्धप्रदर्शनम् ॥ २ ॥

श्रीभगवान्—

आतुरो मे मतो राजा अविषह्यश्च भारत ।
अथैनमनुधावन्ति पाञ्चालास्सह सृञ्जयैः ॥ १
त्वरमाणास्त्वराकाले सर्वशस्त्रभृतां वराः ।
मज्जन्तमिव पाताले बलिनो विजिगीषवः ॥ २
न केतुर्दृश्यते राज्ञः कर्णस्य पिहितश्शरैः ।

1. ख—अर्जुनं नास्ति

पश्यतोर्यमयोः पार्थ सात्यकेश्च शिखण्डिनः ॥ ३

धृष्टद्युम्नस्य भीमस्य शतानीकस्य चाभि भो ।
पाञ्चालानां च सर्वेषां चेदिकानां च भारत ॥ ४

एष पार्थ रणे कर्णः पाण्डवानामनीकिनीम् ।
शरैर्विध्वंसयामास नलिनीमिव कुञ्जरः ॥ ५

एते द्रवन्ति रथिनस् त्वदीयाः पाण्डुनन्दन ।
पश्य पश्य यथा पार्थ गच्छन्त्येते महारथाः ॥ ६

एते भारत मातङ्गाः कर्णेनाभ्याहता रणे ।
आर्तनादान् विकुर्वाणा विद्रवन्ति दिशो दश ॥ ७

रथानां द्रवते बृन्दम् एतच्चैव समन्ततः ।
द्राव्यमाणं रणे पार्थ कर्णेनामिततेजसा ॥ ८

हस्तिकक्ष्यां रणे पश्य चरन्तीं तत्र तत्र तु ।
रथस्थं सूतपुत्रस्य केतुं केतुमतां वर ॥ ९

असौ द्रवति राधेयो भीमसेनरथं प्रति ।
किरञ् शरशतान्येव विनिघ्नंस्तव वाहिनीम् ॥ १०

एते नश्यन्ति पाञ्चाला द्राव्यमाणा महात्मना ।
शक्रेण च यथा दैत्या द्राव्यमाणा महाहवे ॥ ११

एष कर्णो रणे जित्वा पाञ्चालान् पाण्डुसृञ्जयान् ।
दिशो विप्रेक्षते सर्वास् त्वदर्थमिति मे मतिः ॥ १२

एष कर्णो धनुश्श्रेष्ठं विधून्वन् बहु शोभते ।
शत्रून् जित्वा यथा शक्रो देवसङ्घैस्समावृतः ॥ १३

एते नर्दन्ति कौरव्या दृष्ट्वा कर्णस्य विक्रमम् ॥ १३॥

एष सर्वात्मना पाण्डून् सृञ्जयांश्च समन्ततः ।
त्रासयित्वा रणे पार्थ राधेयो रथिनां वरः ॥ १४॥

अभ्यभाषत हृष्टात्मा सर्वसैन्यानि मानद ॥ १५

कर्णः—

अभिद्रवत गच्छध्वं द्रुतं द्रवत पाण्डवान् ।
यथा जीवन् नवः कश्चिन्मुच्यते युधि सृञ्जयः ॥ १६

तथा कुरुत संयत्ता वयं यास्याम पृष्ठतः ॥ १६॥

श्रीभगवान्—

एवमुक्त्वाऽनुयात्येष पृष्ठतो विकिरञ्छरान् ॥ १७

पश्य कर्णं रणे पार्थ श्वेतच्छत्रविराजितम् ।
उदयं पर्वतं यद्वच् छशाङ्केन विराजितम् ॥ १८

पूर्णचन्द्रनिकाशेन मूर्ध्नि च्छत्रेण भारत ।
ध्रियमाणेन समरे तथा शतशलाकिना ॥ १९

एष त्वां प्रेक्षते कर्णस् सकटाक्षं धनञ्जय ।
उत्तमं यत्नमास्थाय ध्रुवमेष्यति संयुगे ॥ २०

पश्य चैनं महाबाहो विधून्वानं महद्धनुः ।

शरांश्चाशीविषाकारान विसृजन्तं महाबलम् ॥ २१

असौ निवृत्तो राधेयो दृष्ट्वा ते वानरध्वजम् ।
प्रार्थयन समरं पार्थ त्वया सह परन्तप ॥ २२

वधाय चात्मनोऽभ्येति पावकं शलभो यथा ॥ २२॥

एष ह्यमर्षी शूरश्च धार्तराष्ट्रहिते·रतः ।
त्वां न मर्षयते पार्थ नित्यमेव सुमन्दधीः ॥ २३॥

एकाकिनं च दृष्ट्वैनं धार्तराष्ट्रो रणाजिरे ।
त्वां च पार्थाभिसंरब्धं कर्णं प्रति महारथम् ॥ २४॥

कृतागसं च राधेयं धर्मात्मनि युधिष्ठिरे ।
[1]आत्मानं तु कृतार्थं च समीक्ष्य भरतर्षभ ॥ २५॥

असौ दुर्योधनः क्रुद्धो रथानीकेन दंशितः ।
रिरक्षिषुस्सूतपुत्रं धार्तराष्ट्रो निवर्तते ॥ २६॥

सर्वैस्सहैभिर्दुष्टात्मा वध्य एष प्रयत्नतः ।
त्वया यशश्च राज्यं च सुखं चोत्तममिच्छता ॥ २७॥

प्रतिपद्यस्व राधेयं प्राप्तकालमरिन्दम ।
आर्यां युद्धे मतिं कृत्वा प्रत्येहि रथयूथपम् ॥ २८॥

पञ्च ह्येतानि मुख्यानां रथानां रथसत्तम ।
शतान्यायान्ति वेगेन बलिनां तिग्मतेजसाम् ॥ २९॥

---

1. ख—अर्धतयं नास्ति

पञ्चहस्ति सहस्राणि त्रिगुणा वाजिनस्तथा ।
अभिसंहत्य सहिताः पदाताः प्रयुतानि च ॥ ३०॥
अन्योन्यरक्षितं वीर बलं त्वामभिवर्तते ॥ ३१
[1]द्रोणपुत्रं पुरस्कृत्य तं शीघ्रं सन्निधूदय ।
निकृत्यैतद्रथानीकं बलिनं लोकविश्रुतम् ॥ ३२
नृसिंहयोर्विश्रुतयोर् युवयोर्योत्स्यमानयोः ।
देवासुरे पार्थ मृधे देवदानवयोरिव ॥ ३३
पश्यन्तु कौरवास्सर्वे तव पार्थ पराक्रमम् ॥ ३३॥
सूतपुत्रे महेष्वासे दर्शयात्मानमात्मना ।
उत्तमं यत्नमास्थाय प्रत्येहि भरतर्षभ ॥ ३४॥
असौ कर्णस्सुसङ्क्रुद्धः पाञ्चालानभिधावति ।
[2]केतुमस्याभिपश्यामि धृष्टद्युम्नरथं प्रति ॥ ३५॥
समुच्छेत्स्यति पाञ्चालान् इति मन्ये परन्तप ॥ ३६
आचक्षे त्वत्प्रियं पार्थ तवेदं भरतर्षभ ।
राजैष कुशली धीरो धर्मपुत्रो युधिष्ठिरः ॥ ३७
असौ भीमो महाबाहुस् सन्निवृत्तश्चमूमुखे ।
वृतस्सृञ्जयसैन्येन सात्यकेन च भारत ॥ ३८
एते युधि विहिंस्यन्ते कौरवा निशितैश्शरैः ।

1. अ—अर्धद्वयं नास्ति 2. ख—इदमर्धं नास्ति

क्रुद्धेन भीमसेनेन पाञ्चालैश्च महारथैः ॥ ३९

सेना हि धार्तराष्ट्रस्य विमुखा व्यद्रवद्रणात् ।
वेगेन भीमसेनस्य निहता विविधैश्शरैः ॥ ४०

विपन्नसस्येव मही रुधिरेण समुक्षिता ।
भारती भरतश्रेष्ठ सेना कृपणदर्शना ॥ ४१

निवृत्तं पश्य कौन्तेयं भीमसेनं युधां पतिम् ।
आशीविषमिव क्रुद्धं तस्माद्भवति भारती ॥ ४२

पीतरक्तासितसिताः ताराचन्द्रार्कमण्डिताः ।
पताका विप्रकीर्यन्ते छत्राण्येतानि चार्जुन ॥ ४३

सौवर्णा राजताश्चैव तैजसाश्च पृथग्विधाः ।
केतवोऽपि निपात्यन्ते हस्त्यश्वं विप्रकीर्यते ॥ ४४

रथेभ्यः प्रपतन्त्यन्ये रथिनो विगतासवः ।
नानारूपैर्हता बाणैः पाञ्चालैरपलायिभिः ॥ ४५

निर्मनुष्यान् रथानश्वान् गजांश्चैव धनञ्जय ।
समापद्यन्ते पाञ्चाला धार्तराष्ट्रांस्तरस्विनः ॥ ४६

मृद्नन्ति च नरव्याघ्र भीमसेनस्य संश्रयात् ।
बलं यदेषां दुर्धर्षं त्यक्त्वा प्राणानरिन्दम ॥ ४७

एते नर्दन्ति पाञ्चाला ध्मापयन्ति च वारिजान् ।
अभिद्रवन्ति च रणे निघ्नन्तस्सायकैः परान् ॥ ४८

पश्य स्वर्गस्य माहात्म्यं पाञ्चाला हि परन्तपाः ।
धार्तराष्ट्रान् विनिघ्नन्तो विशन्त्येते रथोत्तमान् ॥ ४९

[1]सर्वतश्चाभिपन्नैषा धार्तराष्ट्री महाचमूः ।
[2]त्यक्त्वा प्राणान् महेष्वासैः पाञ्चालैरभिपात्यते ॥ ५०

सुभृशं च पराक्रान्ताः कृपकर्णादयो विभो ।
निवारणे महेष्वासाः पाञ्चालानां परन्तप ॥ ५१

अनिवृत्तांश्च भीतांस्तान् धार्तराष्ट्रान् परन्तप ।
धृष्टद्युम्नमुखा वीरा घ्नन्ति शत्रून् सहस्रशः ॥ ५२

रथाश्च विमुखास्सर्वे निवृत्ते भरतर्षभे ।
विवर्णमुखभूयिष्ठा धार्तराष्ट्री महाचमूः ॥ ५३

पश्य भीमेन नाराचैर् भिन्ना नागाः पतन्त्यमी ।
वज्रिवज्रहतानीव शिखराणि धराभृताम् ॥ ५४

भीमसेनेन निर्विद्धा बाणैस्सन्नतपर्वभिः ।
स्वान्यनीकानि मृद्नन्तो द्रवन्त्येते महागजाः ॥ ५५

एते द्रवन्ति कुरवो भीमसेनभयार्दिताः ।

---

1. अ—शस्त्रमाच्छिद्य शत्रूणां सायुधानां निरायुधाः ।
तेनैवैतानमोघास्त्रा निघ्नन्ति च नदन्ति च ॥
शिरांस्येतानि पात्यन्ते शत्रूणां बाहवोऽपि च ।
रथनागहया वीरा यशस्यास्सर्व एव च ॥ [अधिकः पाठः]

2. अ—अर्धसप्तकं नास्ति

त्यक्त्वा गजान् हयांश्चैव रथांश्चैव सहस्रशः ॥ ५६

हस्त्यश्वरथपत्तीनां द्रवतां निस्स्वनं शृणु ।
भीमसेनस्य निनदं द्रावयानस्य कौरवान् ॥ ५७

अभिजानामि भीमस्य सिंहनादं पुनः पुनः ।
नदतः पाण्डवेयस्य सङ्ग्रामे जितकाशिनः ॥ ५८

एष नैषादिरभ्येति द्विपमुख्येन पाण्डवम् ।
विसृजंस्तोमरान् क्रुद्धो दण्डपाणिरिवोन्नदन् ॥ ५९

तस्य चैव भुजौ च्छिन्नौ भीमसेनेन गर्जतः ।
नागश्च ककरप्रख्यैर् नाराचैर्दशभिर्हतः ॥ ६०

हन्तैते पुनरायान्ति नागा ह्यन्ये प्रमाथिनः ।
नीलाञ्जनचयप्रख्या महामात्रवरास्थिताः ॥ ६१

शक्तितोमरनाराचैर् विनिघ्नन्तो वृकोदरम् ॥ ६१॥

सप्त सप्त च नागस्था वैजयन्त्यश्च सध्वजाः ।
नवत्या निशितैर्बाणैश् छिन्नाः पार्थाग्रजेन ते ॥ ६२॥

दशभिर्दशभिश्चैको नाराचैर्निहतो गजः ॥ ६३

न चासौ धार्तराष्ट्राणां श्रूयते निनदस्तथा ।
पुरन्दरसमे क्रुद्धे निवृत्ते भरतर्षभे ॥ ६४

अक्षौहिण्यस्तथा तिस्रो धार्तराष्ट्रस्य सङ्गताः ।
क्रुद्धेन नरसिंहेन भीमसेनेन पातिताः ॥ ६५

नहि शक्ता रणे भीमं पार्थिवास्समुदीक्षितुम् ।
मध्यन्दिनगतं सूर्यं यथा दुर्बलदृष्टयः ॥ ६६
एते भीमस्य सन्त्रस्तास् सिंहस्येवेतरे मृगाः ।
शरैस्सन्ताडितास्सङ्ख्ये न लभन्ते सुखं क्वचित् ॥ ६७
[1]राजानं च महाबाहुं पीडयन्त्यात्तमन्यवः ॥ ६७॥
राधेयो बहुभिस्सार्धम् असौ गच्छति वेगितः ।
वर्जयित्वा तु भीमं तं पार्श्वतो ह्यानयद्धनुः ॥ ६८॥
तं पालयन् महाराजं धार्तराष्ट्रं बलान्वितः ॥ ६९

सञ्जयः—

एतच्छ्रुत्वा महाबाहुर् वासुदेवाद्धनञ्जयः ।
भीमसेनेन तत् कर्म कृतं दृष्ट्वा सुदुष्करम् ॥ ७०
अर्जुनो व्यधमच्छिष्टान् संशप्तकगणान् बहून् ॥ ७०॥
ते वध्यमानाः पार्थेन संशप्तकगणाः प्रभो ।
[2]शक्रस्यातिथितां प्राप्तास् समपद्यन्त विज्वराः ॥ ७१॥
नारायणांस्तु गोपालान् व्यधमत् पाण्डुनन्दनः ।
उत्तमं जवमास्थाय महावातो घनानिव ॥ ७२॥

---

1. अ-ख—अर्धचतुष्टयं नास्ति
2. ख—इदमर्धं नास्ति

ते भीता ह्यवकीर्यन्त तत्र तत्रैव भारत ।
लुलितांश्च ततश्शूरान् अहनत् पुरुषोत्तमः ॥ ७३॥

पुनश्च पुरुषव्याघ्रश् शरैस्सन्नतपर्वभिः ।
जघान धार्तराष्ट्रस्य चतुर्विधबलां चमूम् ॥ ७४॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि सप्तषष्टितमोऽध्यायः ॥ ६७ ॥
॥ ७३ ॥ कर्णपर्वणि सप्तषष्टितमोऽध्यायः ॥ ६७ ॥
[अस्मिन्नध्याये ७४॥ श्लोकाः]

॥ अष्टषष्टितमोऽध्यायः ॥

रणाय राज्ञां द्वन्द्वीभावः ॥ १ ॥ कर्णेन शिखण्डिपराजयः ॥ २ ॥
धृष्टद्युम्नदुश्शासनयोर्युद्धम् ॥ ३ ॥

धृतराष्ट्रः—

निवृत्ते भीमसेने च पाण्डवे च युधिष्ठिरे ।
वध्यमाने बले चापि मामके पाण्डुसृञ्जयैः ॥ १

द्रवमाणे बलौघे च निराक्रन्दे मुहुर्मुहुः ।
[1]अवशेषं न पश्यामि मम सैन्येषु सञ्जय ॥ २

अहो बत दशां प्राप्तो न हि शक्ष्यामि जीवितुम् ।

1. अ-ख-घ—पञ्चार्धानि न सन्ति

जयकाङ्क्षी कथं सूत पुत्राणामनिवर्तिनाम् ॥ ३

कथं जीवामि निहताञ् श्रुत्वा च मम सैनिकान् ॥ ३॥

बहुनाऽद्य किमुक्तेन दैवं तेषां परायणम् ।
मामकाः किमकुर्वन्त तन्ममाचक्ष्व सञ्जय ॥ ४॥

सञ्जयः—

[1]क्षयस्तेषां महाञ्जातो राजन् दुर्मन्त्रिते तव ॥ ५

दृष्ट्वा भीमं महेष्वासं तव पुत्रः प्रतापवान् ।
क्रोधरक्तेक्षणः क्रुद्धो भीमसेनमभिद्रवत् ॥ ६

दुर्योधनः—

[2]तिष्ठ तिष्ठ पृथापुत्र पश्य मेऽद्य पराक्रमम् ।
अद्य त्वां प्रेषयिष्यामि यमस्य सदनं प्रति ॥ ७

सञ्जयः—

इत्युक्त्वा प्रययौ तूर्णं यत्र भीमो व्यवस्थितः ।
तावकं च बलं दृष्ट्वा भीमसेनात् पराङ्मुखम् ॥ ८

यत्नेन महता कर्णो व्यवस्थापयते बलम् ॥ ८॥

व्यवस्थाप्य महाबाहुस् तव पुत्रस्य वाहिनीम् ।
प्रत्युद्ययौ रणे कर्णः पाण्डवान् युद्धदुर्मदः ॥ ९॥

प्रत्युद्ययुश्च राधेयं पाण्डवानां महारथाः ।

---

1. अ-ख—नास्तीदमधैम् 2. अ-घ—अधैतयं नास्ति

धून्वाना विविधांश्चापान् विक्षिपन्तश्च सायकान् ॥ १०॥

भीमसेनश्शिनेर्नप्ता शिखण्डी जनमेजयः ।
धृष्टद्युम्नश्च बलवान् सर्वे चापि प्रभद्रकाः ॥ ११॥

पाञ्चालानां नरव्याघ्रास् समन्तात् तव वाहिनीम् ।
अभ्यद्रवन् सुसङ्क्रुद्धास् समरे जितकाशिनः ॥ १२॥

तथैव तावका राजन् पाण्डवानां महाचमूम् ।
अभ्यद्रवन्त त्वरिता जिघांसन्तो महारथान् ॥ १३॥

रथनागाश्वकलिलं पत्तिध्वजसमाकुलम् ।
बभूव पुरुषव्याघ्र सैन्यमद्भुतदर्शनम् ॥ १४॥

शिखण्डी तु ययौ कर्णं धृष्टद्युम्नस्सुतं तव ।
दुश्शासनं महाराज महासेनस्समभ्ययात् ॥ १५॥

नकुलो वृषसेनं तु चित्रसेनं युधिष्ठिरः ।
उलूकं समरे राजन् सहदेवस्समभ्ययात् ॥ १६॥

सात्यकिश्शकुनिं चापि भीमसेनस्तु कौरवान् ।
अर्जुनं च रणे यान्तं द्रोणपुत्रो महारथः ॥ १७॥

युधामन्युं कृपो राजन्नुत्तमौजास्तु कौरव ।
संयुगे कृतवर्माणम् आयान्तं पर्यवारयत् ॥ १८॥

भीमसेनः कुरून् सर्वान् पुत्रांश्च तव भारत ।

[1]सहानीकान् महाराज एक एवाभ्यवारयत् ॥ १९॥

शिखण्डी तु ततः कर्णं विचरन्तमभीतवत् ।
भीष्महन्ता महाराज वारयामास पत्रिभिः ॥ २०॥

प्रतिरुद्धस्ततः कर्णो रोषात् प्रचलकुण्डलः ।
शिखण्डिनं त्रिभिर्बाणैर् भ्रुवोर्मध्ये ह्यविध्यत ॥ २१॥

धारयन् स शितान् बाणाञ् शिखण्डी बह्वशोभत ।
राजतः पर्वतो यद्वत् त्रिभिश्शृङ्गैस्समन्वितः ॥ २२॥

सोऽतिविद्धो महेष्वासस् सूतपुत्रेण संयुगे ।
कर्णं विव्याध समरे नवत्या निशितैश्शरैः ॥ २३॥

तस्य कर्णो हयान् हत्वा सारथिं च त्रिभिश्शरैः ।
उन्ममाथ ध्वजं क्षिप्रं क्षुरप्रेण महारथः ॥ २४॥

हताश्वात्तु ततो यानाद् अवप्लुत्य महारथः ।
[2]सञ्छिन्नकार्मुको राजन् सूतपुत्रेण संयुगे ॥ २५॥

शक्तिं चिक्षेप कर्णाय सङ्क्रुद्धश्शत्रुतापनः ॥ २६

तां छित्त्वा समरे कर्णस् त्रिभिर्भारत सायकैः ।
शिखण्डिनमथाविध्यन्नवभिर्निशितैश्शरैः ॥ २७

कर्णचापच्युतान् बाणान् वर्जयंस्तु नरोत्तमः ।
अपयातस्ततस्तूर्णं शिखण्डी भृशविक्षतः ॥ २८

---

1. ख—इदमर्धं नास्ति 2. ख—इदमर्धं नास्ति

ततः कर्णो महाराज पाण्डुसैन्यान्यशातयत् ।
तूलराशिं समासाद्य यथा वायुर्महाजवः ॥ २९

धृष्टद्युम्नो महाराज तव पुत्रेण पीडितः ।
दुश्शासनं त्रिभिर्बाणैर् अभ्यविध्यत् स्तनान्तरे ॥ ३०

तस्य दुश्शासनो बाहुं सव्यं विव्याध मारिष ।
शितेन रुक्मपुङ्खेन भल्लेन नतपर्वणा ॥ ३१

धृष्टद्युम्नस्तु निर्विद्धश् शरं घोरममर्षणः ।
दुश्शासनस्य सङ्क्रुद्धः प्रैषयत् तनयस्य ते ॥ ३२

[1]आशीविषसमं बाणम् आशु मारुतरंहसम् ।
आपतन्तं महावेगं धृष्टद्युम्नसमीरितम् ॥ ३३

शरैश्चिच्छेद पुत्रस्ते त्रिभिरेव विशां पते ॥ ३३॥

अथापरैष्षोडशभिर् भल्लैः कनकभूषणैः ।
धृष्टद्युम्नं समासाद्य बाह्वोरुरसि चार्पयत् ॥ ३४॥

तस्य सेनापतिः क्रुद्धो धनुश्चिच्छेद मारिष ।
क्षुरप्रेण सुतीक्ष्णेन तत उच्चुक्रुशुर्जनाः ॥ ३५॥

अथान्यद्धनुरादाय पुत्रस्ते प्रहसन्निव ।
धृष्टद्युम्नं शरव्रातैस् समन्तात् पर्यवारयत् ॥ ३६॥

तव पुत्रस्य ते दृष्ट्वा विक्रमं तं महात्मनः ।

---

1. अ-ख-घ—नासीदमर्षम्

व्यस्मयन्त रणे योधास् सिद्धाश्चाप्सरसस्तथा ॥ ३७॥

धृष्टद्युम्नमपश्याम घटमानं महाबलम् ।
दुश्शासनेन संरुद्धं सिंहेनेव महाद्विपम् ॥ ३८॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि अष्टषष्टितमोऽध्यायः ॥ ६८ ॥
॥ ७३ ॥ कर्णपर्वणि अष्टषष्टितमोऽध्यायः ॥ ६८ ॥
[अस्मिन्नध्याये ३८॥ श्लोकाः]

॥ एकोनसप्ततितमोऽध्यायः ॥

सङ्कुलयुद्धम् ॥

सञ्जयः—

ततस्सरथनागाश्वा पाञ्चालाः पाण्डुसृञ्जयाः ।
सेनापतिं परीप्सन्तो रुरुधुस्तनयं तव ॥ १

ततः प्रववृते युद्धं तावकानां परैस्सह ।
घोरं घोरप्रभं काले भीमरूपं परन्तप ॥ २

नकुलो वृषसेनं तु विद्ध्वा पञ्चभिरायसैः ।
पितुस्समीपे तिष्ठन्तं त्रिभिर्भूयोऽप्यविध्यत ॥ ३

नकुलं तु ततश्शूरो वृषसेनस्स्मयन्निव ।
नाराचेन सुतीक्ष्णेन हृदये प्रत्यविध्यत ॥ ४

सोऽतिविद्धो बलवता शत्रुणा शत्रुतापनः ।
शत्रुं विव्याध सप्तत्या सूतं चैवास्य सप्तभिः ॥ ५

ततश्शरसहस्रैस्तु तावुभौ पुरुषर्षभौ ।
प्रच्छादयेतामन्योन्यं तवाभज्यत वाहिनी ॥ ६

दृष्ट्वा विप्रद्रुतां सेनां धार्तराष्ट्रस्य सूतजः ।
निवारयामास बलाद् अनुपत्य विशां पते ॥ ७

[1]एतस्मिन्नन्तरे युद्धं कष्टमासीद्विशां पते ।
निवृत्ते तु ततस्सैन्ये नकुलः कौरवान् ययौ ॥ ८

[2]वृषसेनस्तु पाञ्चालान् पित्रा सार्धं विशां पते ।
कर्णपुत्रस्तु समरे हित्वा राजन् युधिष्ठिरम् ॥ ९

जुगोप चक्रं त्वरितो राधेयस्यैव मारिष ॥ ९॥

उलूकस्तु रणे क्रुद्धस् सहदेवेन मारिष ।
निवारितश्शरशतैः क्रुद्धेन रणमूर्धनि ॥ १०॥

तस्याश्वांश्चतुरो हत्वा सहदेवः प्रतापवान् ।
[3]छादयामास समरे मेघो वृष्ट्येव पर्वतम् ॥ ११॥

तद्युद्धं सुमहच्चासीत् घोररूपं परन्तप ।

---

1. ख—इदमर्धं नास्ति
2. अ-ङ—नास्तीदमर्धम्
3. क-ख—इदमर्धद्वयं नास्ति

[1]सारथिं प्रेषयामास यमस्य सदनं प्रति ॥ १२॥

उलूकस्तु ततो यानाद् अवप्लुत्य विशां पते ।
[2]अपयातस्ततस्तूर्णम् उलूको रणमूर्धनि ॥ १३॥

त्रिगर्तानां बलं तूर्णं जगाम पितृनन्दनः ॥ १४

सात्यकिश्शकुनिं विद्ध्वा विंशत्या निशितैश्शरैः ।
ध्वजं चिच्छेद भल्लेन सौबलस्य हसन्निव ॥ १५

सौबलस्तस्य समरे क्रुद्धो राजन् प्रतापवान् ।
विदार्य कवचं वीरो ध्वजं चिच्छेद काञ्चनम् ॥ १६

अथैनं निशितैर्बाणैस् सात्यकिः प्रत्यविध्यत ।
सारथिं च महाराज त्रिभिरेव समार्पयत् ॥ १७

अथास्य वाहांस्त्वरितश् शरैर्निन्ये यमक्षयम् ॥ १७॥

ततोऽवप्लुत्य सहसा शकुनिर्भरतर्षभ ।
आरुरोह रथं तूर्णम् उलूकस्य महात्मनः ॥ १८॥

अपोवाह रथस्थं तं सात्यकस्याजिसागरात् ॥ १९

शैनेयस्तु रणे राजंस् तावकानामनीकिनीम् ।
अभिदुद्राव वेगेन ततोऽनीकमभज्यत ॥ २०

शैनेयशरनुन्नं तु तव सैन्यं विशां पते ।

---

1. अ—अष्टार्धानि न सन्ति 2. ख—इदमर्धं नास्ति

भेजे दश दिशस्तूर्णं न्यपतच्च गतासुवत् ॥ २१

भीमसेनं तव सुतो वारयामास संयुगे ॥ २१॥

तं तु भीमो मुहूर्तेन व्यश्वसूतरथध्वजम् ।
चक्रे लोकेश्वरं तत्र तेनातुष्यन्त क्षत्रियाः ॥ २२॥

ततोऽपायान्नृपस्तस्माद् भीमसेनभयार्दितः ।
कुरुसैन्यं ततस्सर्वं भीमसेनमुपाद्रवत् ॥ २३॥

तत्र रावो महानासीद् भीमसेनं जिघांसताम् ।
युधामन्युः कृपं विद्ध्वा धनुरस्याशु चिच्छदे ॥ २४॥

अथान्यद्धनुरादाय कृपश्शस्त्रभृतां वरः ।
युधामन्योर्ध्वजं सूतं छत्रं चापातयत् क्षितौ ॥ २५॥

ततोऽपायाद्रथेनैव युधामन्युस्सुबुद्धिमान् ॥ २६

उत्तमौजास्तु वार्ष्णेयं कृतवर्माणमाहवे ।
छादयामास समरे मेघो वृष्ट्येव पर्वतम् ॥ २७

तद्युद्धं सुमहच्चासीद् घोररूपं परन्तप ।
तादृशं न मया युद्धं दृष्टपूर्वं विशां पते ॥ २८

कृतवर्मा ततो राज[1]न्नुत्तमौजसमाहवे ।
हृदि विव्याध सहसा रथोपस्थ उपाविशत् ॥ २९

---

1. ख—इतः अर्धत्रयं नास्ति

तं सारथिरपोवाह रथेन रथिनां वरम् ।
ततस्तु सात्वतो राजन पाण्डुसैन्यमभिद्रवत् ॥ ३०

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि एकोनसप्ततितमोऽध्यायः ॥ ६९ ॥
॥ ७३ ॥ कर्णपर्वणि एकोनसप्ततितमोऽध्यायः ॥ ६९ ॥
[अस्मिन्नध्याये ३० श्लोकाः]

॥ सप्ततितमोऽध्यायः ॥

सङ्कुलयुद्धम् ॥

सञ्जयः—

युधिष्ठिरश्चित्रसेनं शरवर्षैरवाकिरत् ।
[1]चित्रसेनोऽपि कौन्तेयं सङ्क्रुद्धस्समवारयत् ॥ १

मुहूर्ताद्विमुखीकृत्य चित्रसेनं स धर्मराट् ।
तावकं सैन्यमभ्यघ्नत् समन्तान्निशितैश्शरैः ॥ २

तावका हि महाबाहो दुर्योधनपुरोगमाः ।
युधिष्ठिरं जिघृक्षन्तस् सर्वसैन्यमवाक्षिपन् ॥ ३

दुष्टभावांस्तु तान् मत्वा समवेतान् महारथान् ।
आजग्मुस्सम्परीप्सन्तः पाण्डवेयं युधिष्ठिरम् ॥ ४

1. क—इदमर्धं नास्ति

नकुलस्सहदेवश्च धृष्टद्युम्नश्च पार्षतः ।
अक्षौहिण्या परिवृतास् त्वभ्यधावन् युधिष्ठिरम् ॥ ५

भीमसेनश्च नाराचैर् मृद्नंस्तव महारथान् ।
अभ्यधावत् परिप्रेप्सू राजानं शत्रुभिर्वृतम् ॥ ६

तांस्तु सर्वान् महेष्वासान् कर्णो वैकर्तनो वृषा ।
महता शरवर्षेण प्रत्यवारयदागतान् ॥ ७

शरौघान् विसृजन्तस्ते प्रेरयन्तश्च कुञ्जरान् ।
न शेकुर्यत्नवन्तोऽपि राधेयं प्रतिवीक्षितुम् ॥ ८

[1]तान् हि सर्वान् महेष्वासान् सर्वशस्त्रविशारदान् ।
महता शरवर्षेण राधेयः प्रत्यवारयत् ॥ ९

दुर्योधनं तु विंशत्या नाराचानां कृती बली ।
अविध्यत् तूर्णमभ्येत्य सहदेवो जनाधिपम् ॥ १०

सोऽतिविद्धो बलवता रराज बलसन्निधौ ।
प्रभिन्न इव मातङ्गो रुधिरौघपरिप्लुतः ॥ ११

दृष्ट्वा तव तथा पुत्रं गाढविद्धं सुतेजनैः ।
अभ्यधावद्दृढं क्रुद्धो राधेयो रथिनां वरः ॥ १२

दुर्योधनं तथा दृष्ट्वा शीघ्रमस्त्रमुदीर्य सः ।
पाञ्चालांश्चावधीद्वीरो राजानीकं च भारत ॥ १३

1. अ—नास्त्यर्धद्वयम्

ततो यौधिष्ठिरं सैन्यं वध्यमानं महात्मना ।
सहसा प्राद्रवद्राजन् सूतपुत्रभयार्दितम् ॥ १

विविधा विशिखास्तत्र सम्पतन्तः परस्परम् ।
भल्लाः पुङ्खसमाश्लिष्टास् सूतपुत्रधनुश्च्युताः ॥ १

अन्तरिक्षे शरौघाणां पततां च परस्परम् ।
सङ्घर्षेणैव महता पावकस्समजायत ॥ १

ततो दश दिशश्शीघ्रैश् शलभैरिव घोषिभिः ।
अभ्यघ्नत् तरसा कर्णश् [1]शरैः परशरीरगैः ॥ १

रक्तचन्दनसम्पृक्तौ मणिहेमविभूषितौ ।
बाहू च व्याक्षिपत् कर्णः परमास्त्रं विदर्शयन् ॥ १

ततस्सर्वा दिशो राजन् सायकैर्विप्रमोहयन् ।
अपीडयद्भृशं कर्णो कुन्तीपुत्रं युधिष्ठिरम् ॥ १

[2]ततः क्रुद्धो महाराज पाण्डुपुत्रो युधिष्ठिरः ।
निशितैरिषुभिः कर्णं बाह्वोरुरसि चार्पयत् ॥ २

प्रहसन्निव तं कर्णः कङ्कपत्रैश्शरैश्शितैः ।
उरस्यविध्यद्राजानं कुन्तीपुत्रं युधिष्ठिरम् ॥ २

स पीडितो भृशं तेन धर्मराजो युधिष्ठिरः ।

---

1. अ-घ—इतः षोडश पादा न सन्ति
2. अ—[illegible]

उपविश्य रथोपस्थे सूतं याहीत्यचोदयत् ॥ २२

प्राक्रोशन्त ततस्सर्वे धार्तराष्ट्रास्सराजकाः ।
गृह्णीध्वमिति राजानम् अभ्यधावंश्च सर्वशः ॥ २३

ततश्शरशतै राजन् केकयानां महारथाः ।
पाञ्चालसहिता राजन् धार्तराष्ट्रानवारयन् ॥ २४

तस्मिन् सुतुमुले युद्धे वर्तमाने भयानके ।
दुर्योधनश्च भीमश्च समेयातां महाबलौ ॥ २५

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि सप्ततितमोऽध्यायः ॥ ७० ॥
॥ ७३ ॥ कर्णपर्वणि सप्ततितमोऽध्यायः ॥ ७० ॥
[अस्मिन्नध्याये २५ श्लोकाः]

॥ एकसप्ततितमोऽध्यायः ॥

कर्णबाणपीडितस्य युधिष्ठिरस्य विश्रमाय स्वशिबिरप्रवेशः ॥

सञ्जयः—

कर्णोऽथ शरजालेन केकयानां पदानुगान् ।
व्यधमत् परमेष्वासान् अग्रानीके व्यवस्थितान् ॥ १

तेषां प्रयतमानानां राधेयस्य निवारणे ।
रथान् पञ्चशतं कर्णः प्राहिणोद्यमसादनम् ॥ २

अविषह्यमतो दृष्ट्वा राधेयं युधि योधिनः ।
भीमसेनमुपागच्छन् कर्णबाणप्रपीडिताः ॥ ३

रथानीकं विदार्यैवं शरै राजन्ननेकधा ।
कर्ण एकरथेनैव युधिष्ठिरमुपाद्रवत् ॥ ४

सेनानिवेशं गच्छन्तं मार्गणैर्भृशविक्षतम् ।
यमयोर्मध्यगं वीरं शनैर्यान्तं विचेतसम् ॥ ५

स समासाद्य राजानं तथा यान्तं युधिष्ठिरम् ।
सूतपुत्रस्त्रिभिस्तीक्ष्णैर् विव्याध परमेषुभिः ॥ ६

तथैव राजा राधेयं प्रत्यविध्यत् स्तनान्तरे ।
शरैस्त्रिभिस्तु यन्तारं चतुर्भिश्चतुरो हयान् ॥ ७

चक्ररक्षौ नृपसुतौ माद्रीपुत्रौ परन्तपौ ।
तावभ्यधावतां कर्णं राजानं मा वधीदिति ॥ ८

तौ पृथक् शरवर्षाभ्यां राधेयं समवर्षताम् ।
नकुलस्सहदेवश्च परं यत्नं समास्थितौ ॥ ९

तथैव तौ प्रत्यविध्यत् सूतपुत्रः प्रतापवान् ।
भल्लाभ्यां भृशतीक्ष्णाभ्यां महात्मानावरिन्दमौ ॥ १०

दन्तवर्णास्तु राधेयो निजघान महाजवान् ।
युधिष्ठिरस्य सङ्ग्रामे कालवालान् हयोत्तमान् ॥ ११

[1]ततोऽपरेण भल्लेन शिरस्त्राणमपातयत् ।
कौन्तेयस्य महेष्वासः प्रहसन्निव सूतजः ॥ १२

[2]तथैव नकुलस्यापि हयान् हत्वा महारथः ।
ततोऽपरेण भल्लेन भृशं तीक्ष्णेन भारत ॥ १३

[3]ईषां धनुश्च चिच्छेद माद्रीपुत्रस्य धीमतः ॥ १३॥

तौ हताश्वौ हतरथौ पाण्डवौ भृशविक्षतौ ।
भ्रातरावारुरुहतुस् सहदेवरथं तदा ॥ १४॥

तौ दृष्ट्वा विरथौ तत्र मातुलः परवीरहा ।
अभ्यभाषत राधेयं मद्रराजोऽनुकम्पया ॥ १५॥

शल्यः—

मार्गितव्यस्त्वया कर्ण कुन्तीपुत्रो धनञ्जयः ।
अतस्त्वं धर्मराजेन किमर्थमिह युध्यसे ॥ १६॥

सञ्जयः—

तथाऽपि कर्णस्संरब्धो युधिष्ठिरमपीडयत् ।
शरैस्तीक्ष्णैर्भृशं तीक्ष्णो माद्रीपुत्रौ च पाण्डवौ ॥ १७॥

ततः कर्णं प्रहस्यैनं शल्यः पुनरुवाच ह ।
रथस्थमभिसंरब्धं युधिष्ठिरवधे स्थितम् ॥ १८॥

---

1. ङ—कोशे इदमर्धद्वयं वर्तते
2. क—इदमर्धं नास्ति
3. क-घ-ङ—धनुश्चिच्छेद वीरस्य

शल्यः—

यदर्थं धार्तराष्ट्रेण सततं मानितो भवान् ।
तं पार्थं जहि राधेय किं ते हत्वा युधिष्ठिरम् ॥ १९॥

[1]हते ह्यस्मिन् ध्रुवं पार्थस् सर्वाञ्जेष्यति नो रथान् ।
तस्मिन् हि धार्तराष्ट्रस्य निहते तु ध्रुवो जयः ॥ २०॥

ध्वजोऽसौ दृश्यते तस्य रोचमानोंऽशुमानिव ।
साधुर्ह्येष महाबाहो किं ते हत्वा युधिष्ठिरम् ॥ २१॥

शङ्खयोर्ध्मातयोश्शब्दस् सुमहानेष कृष्णयोः ।
श्रूयते चापघोषश्च मेघस्येव महास्वनः ॥ २२॥

असौ निघ्नन् रथोदारान् अर्जुनश्शरवृष्टिभिः ।
सर्वा ग्रसति ते सेनां कर्ण पश्यैनमाहवे ॥ २३॥

पृष्ठगोपौ हि शूरस्य युधामन्यूत्तमौजसौ ।
उत्तरं चास्य शैनेयश् चक्रं रक्षति सात्यकिः ॥ २४॥

[2]धृष्टद्युम्नस्तु पार्थस्य चक्रं रक्षति दक्षिणम् ।
भीमसेनस्तु राज्ञा वै धार्तराष्ट्रेण युध्यति ॥ २५॥

यथा न हन्यात्तं भीमस् सर्वेषां नोऽद्य पश्यताम् ।
कुरु राधेय वै राजा यथा मुच्येत तत्तथा ॥ २६॥

पश्यैनं भीमसेनेन ग्रस्तमाहवशोभिना ।

---

1. अ—अर्धचतुर्थं नास्ति 2. क—इदमर्धं नास्ति

यदि नामाद्य मुच्येत विस्मयस्सुमहान् भवेत् ॥ २७॥

परित्राह्येनमभ्येत्य संशयं परमं गतम् ।
किं ते माद्रीसुतौ हत्वा धर्मराजं युधिष्ठिरम् ॥ २८॥

सञ्जयः—

इति शल्यवचश्शुत्वा राधेयः पृथिवीपते ।
दृष्ट्वा दुर्योधनं चैव भीमप्रस्तं महाहवे ॥ २९॥

राजगृध्नुर्भृशं चैव शल्यवाक्यप्रचोदितः ।
अजातशत्रुमुत्सृज्य माद्रीपुत्रौ च पाण्डवौ ॥ ३०॥

तव पुत्रं परित्रातुम् अभ्यधावत वीर्यवान् ।
मद्रराजप्रचुदितैर् अश्वैराकाशगैरिव ॥ ३१॥

गते कर्णे तु कौन्तेयः पाण्डुपुत्रो युधिष्ठिरः ।
अपायाज्जवनैरश्वैस् सहदेवस्य मारिष ॥ ३२॥

[1]ताभ्यां स सहितस्तूर्णं व्रीडन्निव नरेश्वरः ।
प्राप्य सेनानिवेशं स्वं मार्गणैर्भृशविक्षतः ॥ ३३॥

अवतीर्य रथात्तूर्णम् आविशच्छयनं शुभम् ॥ ३४

अपनीय तु तं शल्यं हृच्छल्येनाभिपीडितः ।
सोऽब्रवीद् भ्रातरौ राजा माद्रीपुत्रौ परन्तपौ ॥ ३५

---

1. क-ख—इदमर्धं नास्ति

युधिष्ठिरः—

गच्छतं त्वरितौ वीरौ यत्र भीमो व्यवस्थितः ॥ ३५॥

सञ्जयः—

ततस्ते पाण्डवास्सर्वे समाभाष्य परस्परम् ।
कौरवाणां च सङ्ग्रामे कर्णस्य च महात्मनः ॥ ३६॥

समीपं भीमसेनस्य पाण्डवावन्वगच्छताम् ॥ ३७

जीमूत इव गर्जन् वै युध्यतेऽसौ वृकोदरः ॥ ३७॥

ततोऽन्यं रथमास्थाय नकुलो रथपुङ्गवः ।
सहदेवश्च तेजस्वी भ्रातरौ शत्रुकर्शनौ ॥ ३८॥

तुरगैर्वातरंहोभिर् यत्र भीमस्तरस्विनौ ।
अनीकसहितौ तत्र भ्रातरौ समवस्थितौ ॥ ३९॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि एकसप्ततितमोऽध्यायः ॥ ७१ ॥
॥ ७३ ॥ कर्णपर्वणि एकसप्ततितमोऽध्यायः ॥ ७१ ॥
[अस्मिन्नध्याये ३९॥ श्लोकाः]

॥ द्विसप्ततितमोऽध्यायः ॥

पार्थेनाश्वत्थाम्नि पराजिते कर्णेन भार्गवास्त्रप्रयोगात्पाण्डवसेनापीडनम् ॥

सञ्जयः—

द्रौणिस्तु रथवंशेन महता परिवारितः ।
आपतत् सहसा राजन् यत्र पार्थो व्यवस्थितः ॥ १

तमापतन्तं सहसा शूरश्शौरिसहायवान् ।
दधार समरे पार्थो वेलेव मकरालयम् ॥ २

ततः क्रुद्धो महाराज द्रोणपुत्रो महामनाः ।
अर्जुनं वासुदेवं च च्छादयामास सायकैः ॥ ३

अवच्छन्नौ ततः कृष्णौ दृष्ट्वा तत्र महारथौ ।
विस्मयं परमं गत्वा प्रेक्षन्ते कुरवस्तदा ॥ ४

अर्जुनस्तु ततो दिव्यम् अस्त्रं चक्रे हसन्निव ।
तदस्त्रं ब्राह्मणो युद्धे वारयामास मारिष ॥ ५

यद्यद्विक्षिपते युद्धे फल्गुनोऽस्त्रं जिघांसया ।
तत्तदस्त्रैर्महेष्वासो द्रोणपुत्रो जघान ह ॥ ६

अस्त्रयुद्धे महाराज वर्तमाने महाभये ।
अपश्याम रणे द्रौणिं व्यात्ताननमिवान्तकम् ॥ ७

स दिशः प्रदिशश्चैव च्छादयित्वा शिलीमुखैः ।
वासुदेवं त्रिभिर्बाणैर् अविध्यद्दक्षिणे भुजे ॥ ८

ततोऽर्जुनो रथान् सर्वान् हत्वा तस्य पदानुगान् ।
स चकार महीं घोरां शोणितौघतरङ्गिणीम् ॥ ९

सरथा रथिनः पेतुः पार्थचापच्युतैश्शरैः ।
हयाश्च पर्यधावन्त मुक्तयोक्त्रास्ततस्ततः ॥ १०

तद्दृष्ट्वा कर्म पार्थस्य द्रौणिराहवशोभिनः ।
अवाकिरद्रणे कृष्णौ समन्तान्निशितैश्शरैः ॥ ११

ततोऽर्जुनो रणे राजन् द्रौणिमायम्य पत्रिणा ।
वक्षोदेशं समासाद्य ताडयामास संयुगे ॥ १२

[1]सोऽतिविद्धो रणे तेन द्रोणपुत्रः प्रतापवान् ।
आदत्त परिघं घोरं पार्थायैनमथाक्षिपत् ॥ १३

[2]तमापतन्तं परिघं कार्तस्वरविभूषितम् ।
पार्थश्चिच्छेद सहसा तत उच्चुक्रुशुर्जनाः ॥ १४

सोऽतिविद्धोऽपतद् भूमौ रणे पार्थस्य सायकैः ।
विशीर्णः पर्वतो राजन् यथा स्याद्वज्रताडितः ॥ १५

ततोऽर्जुनो रणे द्रौणिं विव्याध निशितैश्शरैः ।
सारथिं चास्य भल्लेन रथनीडादपातयत् ॥ १६

---

1. ख—इदमर्धं नास्ति 2. अ-ख—नास्तीदमर्धम्

स सङ्गृह्य स्वयं वाहान् कृष्णौ प्राच्छादयच्छरैः ॥ १६॥
तत्राद्भुतमपश्याम द्रौणेराशु पराक्रमम् ।
संयच्छंस्तुरगान् यच्च फल्गुनं चाप्ययोधयत् ॥ १७॥
तदस्य समरे राजन् सर्वभूतान्यपूजयन् ।
तेनास्य समरे राजंस् तुष्टुवुस्सर्वसैनिकाः ॥ १८॥
यदा तु गृह्यते पार्थो द्रोणपुत्रेण धन्विना ।
तदा रश्मीन् रथाश्वानां क्षुरप्रेणाशु चिच्छिदे ॥ १९॥
दुद्रुवुस्तुरगास्तस्य शरवेगप्रपीडिताः ।
ततोऽभून्निनदो घोरस् तव सैन्यस्य मारिष ॥ २०॥
पाण्डवास्तु जयं लब्ध्वा तव सैन्यमभिद्रवन् ।
समन्तान्निशितान् बाणान् पातयन्तो जयैषिणः ॥ २१॥
तावकी चतुरङ्गैषा पाण्डवैस्तु महाचमूः ।
पुनः पुनरथो वीरैः प्रभग्ना जितकाशिभिः ॥ २२॥
पश्यतां ते महाराज पुत्राणां चित्रयोधिनाम् ।
शकुनेस्सौबलेयस्य कर्णस्य च विशां पते ॥ २३॥
वार्यमाणा महासेना पुत्रैस्तव जनेश्वर ।
नावतिष्ठति सङ्ग्रामे ताड्यमाना शितैश्शरैः ॥ २४॥
ततो योधैर्महाराज पलायद्भिस्समन्ततः ।
अभवद्व्याकुलं भीतं पुत्राणां ते महद्बलम् ॥ २५॥

तिष्ठ तिष्ठेति सततं [1]सूतपुत्रस्य जल्पतः ।
नावातिष्ठत सा सेना वध्यमाना महात्मभिः ॥ २६॥

अथोत्कृष्टं महाराज पाण्डवैर्जितकाशिभिः ।
धार्तराष्ट्रबलं दृष्ट्वा विद्रुतं सर्वतो दिशम् ॥ २७॥

ततो दुर्योधनः कर्णम् अब्रवीत् प्रणयादिव ॥ २८

दुर्योधनः—

पश्य कर्ण महासेनां पाण्डवैरर्दितां भृशम् ।
त्वयि तिष्ठति सन्त्रासात् समन्तात् प्रपलायते ॥ २९

[2]एतज्ज्ञात्वा महाराज कुरु प्राप्तमरिन्दम ॥ २९॥

सहस्राणि च योधानां त्वामेव पुरुषोत्तम ।
क्रोशन्ते समरे वीरा वध्यमानास्समन्ततः ॥ ३०॥

सञ्जयः—

एतच्छ्रुत्वा तु राधेयो दुर्योधनवचो महत् ।
मद्रराजमिदं वाक्यम् अब्रवीत् सूतनन्दनः ॥ ३१॥

कर्णः—

पश्य मे भुजयोर्वीर्यम् अस्त्राणां च जनेश्वर ।
अद्य हन्मि रणे पार्थान् पाञ्चालान् केकयैस्सह ॥ ३२॥

वाहयाश्वान् नरव्याघ्र मद्राधीश न संशयः ॥ ३३

1. ख—हतः अष्टौ पादा न सन्ति 2. अ—अर्धत्रयं नास्ति

सञ्जयः—

एवमुक्त्वा महाराज सूतपुत्रः प्रतापवान् ।
प्रगृह्य विजयं वीरो धनुश्श्रेष्ठं पुरातनम् ॥ ३४

सज्यं कृत्वा महाराज प्रमृज्य च पुनः पुनः ।
सन्निवार्य तु तान् योधान् सत्येन शपथेन च ॥ ३५

प्रायोजयदमेयात्मा भार्गवास्त्रं महाबलः ॥ ३५॥

तस्माद्राजन् सहस्राणि प्रयुतान्यर्बुदानि च ।
कोटिशश्च शरा घोरा निर्गच्छन्ति महामृधे ॥ ३६॥

ज्वलितैस्तैश्शरैर्घोरैः कङ्कबर्हिणवाजितैः ।
सञ्छन्ना पाण्डवी सेना न प्राज्ञायत किञ्चन ॥ ३७॥

हाहाकारो महानासीत् पाण्डवानां विशां पते ।
पीडितानां बलवता भार्गवास्त्रेण संयुगे ॥ ३८॥

निपतद्भिर्गजै राजन् नरैश्चापि सहस्रशः ।
रथैश्चापि नरश्रेष्ठ हयैश्चापि समन्ततः ॥ ३९॥

प्राकम्पत मही राजन् निपतद्भिर्गतासुभिः ।
व्याकुलं सर्वमभवत् पाण्डवानां बलं महत् ॥ ४०॥

कर्णस्त्वेको युधां श्रेष्ठो विधूम इव पावकः ।
दहञ् शत्रून् नरव्याघ्रश् शुशुभे स परन्तपः ॥ ४१॥

ते वध्यमानाः कर्णेन पाञ्चालाश्चेदिभिस्सह ।

तत्र तत्रै व मुह्यन्ते दावदाहे गजा इव ॥ ४२॥

क्रोशन्तीव महाराज यथाप्राणं नरोत्तमाः ॥ ४३

तेषां तु क्रोशतां दीनं भीतानां रणमूर्धनि ।
धावतां च दिशो राजन् वित्रस्तानां समन्ततः ॥ ४४

आर्तनादो महानासीत् प्रेतानामिव सम्प्लवे ॥ ४४॥

वध्यमानांस्तु तान् दृष्ट्वा सूतपुत्रेण मारिष ।
वित्रेसुस्सर्वभूतानि तिर्यग्योनिगतान्यपि ॥ ४५॥

ते वध्यमानास्समरे सूतपुत्रेण सृञ्जयाः ।
अर्जुनं वासुदेवं च विक्रोशन्ति मुहुर्मुहुः ॥ ४६॥

प्रेतराजपुरे यद्वत् प्रेतानां वै विचेतसाम् ॥ ४७

श्रुत्वा तु निनदं तेषां वध्यतां कर्णसायकैः ।
अथाब्रवीद्वासुदेवं कुन्तीपुत्रो धनञ्जयः ॥ ४८

भार्गवास्त्रं महाघोरं दृष्ट्वा तत्र समीरितम् ॥ ४८॥

अर्जुनः—

पश्य कृष्ण महाबाहो भार्गवास्त्रस्य विक्रमम् ।
नैतदस्त्रं तु समरे शक्यं हन्तुं कथञ्चन ॥ ४९॥

सूतपुत्रं च संरब्धं पश्य कृष्ण महारथम् ।
अन्तकप्रतिमं वीर्ये कुर्वाणं कर्म दुष्करम् ॥ ५०॥

अभीक्ष्णं चोदयंश्चाश्वान् प्रेक्षते मां मुहुर्मुहुः ।

न च शक्ष्यामि कर्णस्य संयुगे वै पलायितुम् ॥ ५१॥

जीवन् प्राप्नोति पुरुषस् सङ्ग्रामे जयपराजयौ ।
मृतस्य हि हृषीकेश वध एव जयः कुतः ॥ ५२॥

एष कर्णो रणे भाति मध्याह्न इव भास्करः ।
निवर्तय रथं कृष्ण जीवन् भद्राणि पश्यति ॥ ५३॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि द्विसप्ततितमोऽध्यायः ॥ ७२ ॥
॥ ७३ ॥ कर्णपर्वणि द्विसप्ततितमोऽध्यायः ॥ ७२ ॥
[अस्मिन्नध्याये ५३॥ श्लोकाः]

॥ त्रिसप्ततितमोऽध्यायः ॥

कर्णबाणव्यथापनोदनाय युधिष्ठिरं शिबिरगतं विज्ञाय शत्रुनिग्रहे भीमनियोजनपूर्वकमर्जुनेन सह श्रीकृष्णस्य तत्समीपं प्रति गमनम् ॥

सञ्जयः—

ततो जनार्दनश्श्रुत्वा तस्य वाक्यं विशां पते ।
रथेनापययौ क्षिप्रं सङ्ग्रामादिति भारत ॥ १

प्रत्यनीकमवस्थाप्य भीमं भीमपराक्रमम् ।
अलं विषहितुं ह्येष कुरूणां सम्प्रपद्यताम् ॥ २

कर्णं च समरे राजन् प्राहयिष्यञ् श्रमं प्रति ।

विश्रमार्थं च कौरव्य पाण्डवस्य महात्मनः ॥ ३

अपयातो रणाद्वीरो राजानं द्रष्टुमेव च ॥ ३॥

अर्जुनं चाब्रवीत् कृष्णो भृशं राजा परिक्षतः ।
तमाश्वास्य कुरुश्रेष्ठ ततः कर्णं हनिष्यसि ॥ ४॥

ततो धनञ्जयश्श्रुत्वा राजानं शल्यपीडितम् ।
याहि याहीति बहुशो वासुदेवमचोदयत् ॥ ५॥

अर्जुनः—

राजानं प्रति वार्ष्णेय दूयते मे दृढं मनः ॥ ६

सञ्जयः—

स चोद्यमानः पार्थेन केशिघ्नो वृष्णिनन्दनः ।
रथेनापययौ क्षिप्रं सङ्ग्रामाद्घोरदर्शनात् ॥ ७

गच्छन्नेव तु कौन्तेयो [1]धर्मराजदिदृक्षया ।
सैन्यमालोकयामास नापश्यत् तत्र चाग्रजम् ॥ ८

युद्धं कृत्वा तु कौन्तेयो द्रोणपुत्रेण भारत ।
दुस्सहं मन्त्रिणं सङ्ख्ये पराजित्य गुरोस्सुतम् ॥ ९

द्रौणिं पराजित्य तदोग्रधन्वा
कृत्वा महद्दुष्करमार्यकर्म ।
आलोकयामास ततस्स्वसैन्यं
धनञ्जयश्शत्रुभिरप्रधृष्यः ॥ १०

1. क—इतः पादचतुष्टयं नास्ति

संयुध्यमानान् पृतनामुखस्थांस्
तान् वै शूरान् हर्षयन् सव्यसाची ।
पूर्वापदानैः प्रथितैः प्रशंसन्
स्थिरांश्चकारात्मरथाननीके ॥ ११

अपश्यमानस्तु ततः किरीटी
युद्धे स्थितं भ्रातरमाजमीढम् ।
उवाच भीमं तरसाऽभ्युपेत्य
राज्ञः प्रवृत्तिस्त्विह कुत्र चेति ॥ १२

भीमः—

अपयात इतो राजा धर्मपुत्रो युधिष्ठिरः ।
कर्णबाणविभिन्नाङ्गो यदि जीवेत् कथञ्चन ॥ १३

अर्जुनः—

तस्माद्भवान् शीघ्रमितः प्रयातु
ज्ञातुं प्रवृत्तिं पुरुषर्षभस्य ।
नूनं स विद्धोऽतिभृशं पृषत्कैः
कर्णेन राजा शिबिरं गतोऽसौ ॥ १४

यस्सम्प्रहारे युधि सम्प्रवृत्ते
द्रोणेन विद्धोऽतिभृशं तरस्वी ।
तस्थौ च तत्रापि जयं प्रतीक्षन्
द्रोणेन यावन्न हतः किलासीत् ॥ १५

स संशयं गमितः पाण्डवाग्र्यस्
सङ्ख्येऽद्य कर्णेन महानुभावः ।
ज्ञातुं प्रयाह्याशु तमद्य भीम
स्थास्याम्यहं शत्रुगणान् निरुध्य ॥ १६

भीमः—

त्वमेव जानीहि महानुभाव
राज्ञः प्रवृत्तिं पुरुषर्षभस्य ।
अहं हि यद्यर्जुन यामि तत्र
वक्ष्यन्ति मां भीत इति प्रवीराः ॥ १७

सञ्जयः—

[1]ततोऽब्रवीदर्जुनो भीमसेनं
संशप्तकाः प्रत्यनीके स्थिता मे ।
एतानहत्वाऽद्य मया न शक्यम्
इतोऽपयातुं रिपुसङ्घमध्यात् ॥ १८

अथाब्रवीदर्जुनं भीमसेनस्
स्ववीर्यमासाद्य कुरुप्रवीर ।
संशप्तकान् प्रतियोत्स्यामि सङ्ख्ये
सर्वानहं याहि धनञ्जयेति ॥ १९

---

1. ख—संशप्तकान् प्रतियोत्स्यामि संख्ये सर्वानहं याहि धनञ्जयेति । [अधिकः पाठः]

इदमर्धं पुनरप्युपरि च वर्तते

तद्भीमसेनस्य वचो निशम्य
जिष्णुस्तदा भ्रातुरमित्रमध्ये ।
द्रष्टुं कुरुश्रेष्ठमितः प्रयातः
प्रोवाच वृष्णिप्रवरं तदानीम् ॥ २०

अर्जुनः—

राजानं प्रति वार्ष्णेय दूयते मे दृढं मनः ।
चोदयाश्वान् हृषीकेश विहायैनं रणार्णवम् ॥ २१
अजातशत्रुं राजानं द्रष्टुमिच्छामि केशव ॥ २१॥

सञ्जयः—

तं रथं चोदयामास बीभत्सोर्वचनाद्धरिः ॥ २२
ततो हयाग्र्यान् स दशार्हमुख्यः
प्रचोदयन् भीममुवाच चेदम् ॥ २२॥

श्रीभगवान्—

नैतच्चित्रं तव कर्माद्य भीम
याह्याहवे जय पार्थारिसङ्घान् ॥ २३

सञ्जयः—

ततो ययौ हृषीकेशो यत्र राजा युधिष्ठिरः ।
शीघ्राच्छीघ्रतरै राजन् वाजिभिर्गरुडोपमैः ॥ २४
प्रत्यनीकमवस्थाप्य भीमसेनमरिन्दमम् ।
सन्दिश्य चैव राजेन्द्र युद्धं प्रति वृकोदरम् ॥ २५

ततस्तु गत्वा पुरुषप्रवीरौ
राजानमासाद्य शयानमेकम् ।
रथादुभौ प्रत्यवरुह्य तस्माद्
ववन्दतुर्धर्मराजस्य पादौ ॥ २६
इत्येवमभिसङ्गृह्य तावुभौ प्राञ्जली स्थितौ ।
शस्त्रक्षतौ महाराज रुधिरेण समुक्षितौ ॥ २७
निहत्य वाहिनीं तुभ्यं त्वपयातौ रणाजिरात् ॥ २७॥
तं दृष्ट्वा पुरुषव्याघ्रं क्षेमिणं पुरुषर्षभौ ।
मुदा ननन्दतुः कृष्णावश्विनाविव वासवम् ॥ २८॥
तावभ्यनन्दद्राजाऽपि विवस्वानश्विनाविव ।
हते महासुरे जम्भे शक्रविष्णू यथा गुरुः ॥ २९॥
मन्यमानो हतं कर्णं प्रीतः परपुरञ्जयः ॥ ३०
स भूत्वा पुरुषव्याघ्रो राजा तत्र युधिष्ठिरः ।
हर्षगद्गदया वाचा प्रीतः प्राह परन्तपः[1] ॥ ३१

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां कर्णपर्वणि त्रिसप्ततितमोऽध्यायः ॥ ७३ ॥
॥ ७३ ॥ कर्णपर्वणि त्रिसप्ततितमोऽध्यायः ॥ ७३ ॥
[अस्मिन्नध्याये ३१ श्लोकाः]

---

1. क—सञ्जयः—अथोपयातौ पृथुलोहिताक्षौ
शराचिताङ्गौ रुधिरप्रदिग्धौ ।
समीक्ष्य सेनाप्रवरप्रवीरौ
युधिष्ठिरो वाक्यमिदं बभाषे ॥ [अधिकः पाठः]

॥ चतुस्सप्ततितमोऽध्यायः ॥

युधिष्ठिरेण कर्णशरविक्षतस्वात्मनो दिदृक्षया स्वशिबिरमुपागतौ कृष्णार्जुनौ दृष्ट्वा पार्थेन राधेयस्य वधप्रमेण पार्थस्य प्रशंसनम् ॥

सञ्जयः—

ततो युधिष्ठिरो दृष्ट्वा सहितौ केशवार्जुनौ ।
हतमातिरथिं मेने युद्धे गाण्डीवधन्वना ॥ १

[1]तावभ्यनन्दत् कौन्तेयस् साम्ना परमवल्गुना ।
स्मितपूर्वमभित्रघ्नं पूजयन् भरतर्षभ ॥ २

[2]उवाच राजा कौन्तेयम् उपेन्द्रमिव वासवः ॥ २॥

युधिष्ठिरः—

स्वागतं देवकीपुत्र स्वागतं ते धनञ्जय ।
प्रियं मे दर्शनं बाढं युवयोर्नरसिंहयोः ॥ ३॥

अरिष्टयोरक्षतयोः कर्णं हत्वा महारथम् ।
आशीविषसमं युद्धे सर्वशस्त्रविशारदम् ॥ ४॥

अग्रगं धार्तराष्ट्राणां सर्वेषां शर्म वर्म च ।
रक्षितं वृषसेनेन सुषेणेन च संयुगे ॥ ५॥

रामेण जामदग्न्येन त्वनुज्ञातं यशस्विना ।

1. अ—नास्तीदमर्धम्
2. क-ख-घ-ङ—नास्तीदमर्धम्

त्रातारं धार्तराष्ट्राणां गन्तारं वाहिनीमुखे ॥ ६॥

हन्तारमरिसैन्यानाम् अमित्रगणमर्दनम् ।
अनलानिलयोस्तुल्यं तेजसा च बलेन च ॥ ७॥

पातालमिव गम्भीरं सुहृदानन्दवर्धनम् ।
दुर्योधनहिते युक्तम् अस्मद्दुःखाय चोद्यतम् ॥ ८॥

अप्रधृष्यं महारङ्गे देवैरपि सवासवैः ।
अन्तकाभममित्राणां कर्णं हत्वा महाहवे ॥ ९॥

दिष्ट्या युवामिह प्राप्तौ हत्वा [1]वृत्रमिवामरौ ।
तेन युद्धमभीतेन मयाऽद्याप्यच्युतार्जुनौ ॥ १०॥

कृतं घोरं महाबाहू धृष्टद्युम्नस्य पश्यतः ॥ ११

अन्तकेनेव क्रुद्धेन प्रजास्सर्वा जिघांसता ।
तेन केतुश्च मे च्छिन्नो हतौ च पार्ष्णिसारथी ॥ १२

हतवाहः कृतश्चास्मि युयुधानस्य पश्यतः ।
वीरयोर्यमयोश्चैव धृष्टद्युम्नशिखण्डिनोः ॥ १३

पश्यतां द्रौपदेयानां शतद्रोश्च महात्मनः ॥ १३॥

एताञ्छित्वा महाबाहुः कर्णश्शत्रुगणान् बहून् ।
जितवान् मां महाबाहो यतमानं महारणे ॥ १४॥

अनुसृत्य च मां युद्धे परुषाण्युक्तवान् बहु ॥ १५

1. क—मृत्युमिवापरम् ङ—वृत्तमिवापरम्

तत्र तत्र युधां श्रेष्ठः परिभूय धनञ्जय ॥ १५॥
बहुनाऽत्र किमुक्तेन नाहं तं सोढुमुत्सहे ।
त्रयोदशाहं वर्षाणि यस्माद्भीतो धनञ्जय ॥ १६॥
न स्म निद्रां लभे रात्रौ न चाहनि सुखं क्वचित् ।
तस्य द्वेषेण संयुक्तः परिदह्ये धनञ्जय ॥ १७॥
आत्मनो मरणं जानन् वार्ध्राणस इव द्विजैः ॥ १८
यस्य सोऽयं गतः कालश् चिन्तयानस्य भारत ।
कथं कर्णो मया शक्यो युद्धे क्षपयितुं भवेत् ॥ १९
जाग्रत् स्वपंश्च कौन्तेय कर्णमेव स्मराम्यहम् ।
पश्यामि तत्र तत्रैव कर्णभूतमिदं जगत् ॥ २०
यत्र यत्र हि गच्छामि कर्णाद्भीतो धनञ्जय ।
तत्र तत्र हि पश्यामि कर्णमेवाग्रतस्स्थितम् ॥ २१
सोऽहं तेनैव वीरेण संयुगेष्वपलायिना ।
सरथस्सहयः पार्थ सर्वतश्शकलीकृतः ॥ २२
को हि मे जीवितेनार्थो राज्येनार्थेन वा पुनः ।
ममैवं निकृतस्येह कर्णेनाहवशोभिना ॥ २३
तत्र तत्र हि पश्यामि कर्णमेवाग्रतस्स्थितम् ॥ २३॥
सोऽहं तेनैव वीरेण संयुगेष्वपलायिना ।
सहयस्सरथः पार्थ जित्वा जीवन् विसर्जितः ॥ २४॥

भीमसेनप्रभावात्तु यज्जीवामि धनञ्जय ॥ २५

न प्राप्तपूर्वं यद्भीष्मात् कृपाद्द्रोणाच्च संयुगे ।
तत् प्राप्तमद्य मे युद्धे सूतपुत्रान्महारथात् ॥ २६

स त्वां पृच्छामि बीभत्सो यथा नः कुशलं तथा ।
तन्ममाचक्ष्व कौन्तेय यथा कर्णस्त्वया हतः ॥ २७

शक्रतुल्यबलो युद्धे यमतुल्यपराक्रमः ।
रामतुल्यस्तथाऽस्त्रेषु स कथं ते निषूदितः ॥ २८

महारथसमाख्यातस् सर्वशस्त्रविशारदः ।
धनुर्धरेषु प्रवरस् सर्वेष्वेव सदाऽर्जुन ॥ २९

पूजितो धृतराष्ट्रेण सपुत्रेण महारथः ।
त्वदर्थमेव राधेयस् स कथं निहतो युधि ॥ ३०

धार्तराष्ट्रस्य योद्धारस् सर्व एव सदाऽर्जुन ।
तव मृत्युं रणे कर्णं मन्यन्ते पुरुषोत्तम ॥ ३१

त्वया स पुरुषव्याघ्रः कथं युद्धे निषूदितः ।
तन्ममाचक्ष्व कौन्तेय यथा कर्णो हतो युधि ॥ ३२

सोत्सेधमस्य तु शिरः पश्यतां सुहृदां हृतम् ।
त्वया पुरुषशार्दूल शार्दूलेन रुरोर्यथा[1] ॥ ३३

1. ख—यथा स पुरुषव्याघ्र सङ्कुलेन यथा कुरु । [अधिकः पाठः]

सर्वा दिशः पर्यपतत् त्वदर्थं
त्वां सूतपुत्रस्समरे परीप्सन् ।
दित्सन् नृणां शकटं रत्नपूर्णं
कथं त्वयाऽसौ निहतोऽद्य कर्णः ॥ ३४

त्वया रणे निहतस्सूतपुत्रः
कच्चिच्छेते भूमितले दुरात्मा ।
कच्चित् प्रियं मे परमं त्वयाऽद्य
कृतं रणे सूतपुत्रं निहत्य ॥ ३५

सर्वा दिशः पर्यचरत् त्वदर्थं
मुदान्वितो गर्वितस्सूतपुत्रः ।
स शूरमानी समरे समेत्य
कच्चित् त्वया निहतः पापबुद्धिः ॥ ३६

रौक्मं परं हस्तिगवाश्वयुक्तं
रथं दित्सन् यः परेभ्यस्त्वदर्थे ।
त्वया रणे स्पर्धते यस्स पापः
कच्चित् त्वया निहतः पापबुद्धिः ॥ ३७

योऽसौ नित्यं शौर्यमदेन मत्तो
विकत्थते संसदि कौरवाणाम् ।

सम्प्रीत्यर्थं तात दुर्योधनस्य
कच्चित् स कर्णो निहतस्त्वयाऽद्य ॥ ३८

कच्चित् समागम्य धनुःप्रमुक्तैस्
त्वत्प्रेषितैर्लोहमयैर्विहङ्गैः ।
शेते भिन्नः पांसुषु सूतपुत्रः
कच्चिद्भ्रमौ धार्तराष्ट्रस्य बाहू ॥ ३९

यश्श्लाघते राजमध्ये सदा हि
दुर्योधनं हर्षयन् दर्पपूर्णः ।
हन्तास्मि सर्वानिति पाण्डुपुत्रान्
अहं हन्ता फल्गुनस्येति मोहात् ॥ ४०

कच्चिद्वचोऽस्य वितथं कृतं त्वया
यत्तत् प्रियामवदत् तात कर्णः ।
सभामध्ये रूक्षमनेकरूपं
धिक् पाण्डवानपतिस्त्वं हि कृष्णे ॥ ४१

कच्चिद्ध्रुवं शत्रुमथावधीस्त्वम्
अधारयद्द्वादश यस्समास्तु ।
कर्णो व्रतं घोरमित्रसाहो
दुर्योधनस्यार्थनिविष्टबुद्धिः ॥ ४२

पादौ न धावे यावदहं न हन्मि
धनञ्जयं समरेषूग्रवेगम् ।
इत्युक्तवान् यस्समरे निहत्य
कच्चिद्धृतं तस्य भग्नं त्वयाऽद्य ॥ ४३

योऽसौ कृष्णामब्रवीद्दुष्टबुद्धिः
कर्णस्सभायां कुरुमध्ये दुरात्मा ।
किं पाण्डवांस्त्वं न जहासि कृष्णे
सुदुर्बलान् पतितान् हीनसत्त्वान् ॥ ४४

यत्तत् कर्णः प्रत्यजानात् त्वदर्थं
[1]नाहं हत्वा सह कृष्णेन पार्थम् ।
इहोपयातेति स पापबुद्धिः
कच्चिच्छेते शरसञ्छिन्नगात्रः ॥ ४५

कच्चित् सङ्ग्रामे विजितो वा त्वयाऽयं
महाहवे पाण्डवसृञ्जयानाम् ।
येनावस्थामीदृशीं प्रापितोऽहं
कच्चित् त्वया सोऽद्य हतस्समेत्य ॥ ४६

कच्चित् त्वया तस्य सुमन्दबुद्धेर्
गाण्डीवमुक्तैर्विशिखैर्ज्वलद्भिः ।

---

1. क-ङ—महाबलस्संयुगे शत्रुहन्ता एकः पादोऽधिकः

सकुण्डलं भानुमदुत्तमाङ्गं
कायात् प्रविद्धं वद सव्यसाचिन् ॥ ४७

यत् त्वं मया बाणसमर्पितेन
ध्यातोऽसि कर्णस्य वधाय वीर ।
तन्मे त्वया कच्चिदमोघमद्य
[1]ध्यानं कृतं कर्णनिपातनेन ॥ ४८

यद्दर्पपूर्णस्तु सुयोधनोऽस्मान्
दिधक्षते कर्णसमाश्रयेण ।
कच्चित् त्वया सोऽस्य समाश्रयोऽद्य
भग्नः पराक्रम्य सुयोधनस्य ॥ ४९

यो नः पराशंसति लोभदोषात्
सभामध्ये कौरवाणां समक्षम् ।
स दुर्मतिः कच्चिदुपेत्य सङ्ख्ये
त्वया हतस्सूतपुत्रोऽत्यमर्षी ॥ ५०

यः प्राहिणोत् सूतपुत्रो दुरात्मा
कृष्णां जितां सौबलेहानयेति ।
स मन्दबुद्धिर्निहतः प्रसह्य
वैकर्तनस्त्वद्य कच्चिन्महात्मन् ॥ ५१

1. ख—अर्धं पादो नास्ति

[1]अनवाप्यं प्राप्तुमिच्छन्नचिन्त्यं
शिशुर्यथा बालचन्द्रमसंग्रहीतुम् ।
स पापात्मा स तु नो विद्विषाणः
कच्चित् कर्णो निहतो वा त्वयाऽऽसीत् ॥ ५२

अस्मिन् सङ्ग्रामे भीमरूपे त्वयाऽद्य
व्रतं भग्नं सूतपुत्रस्य पार्थ ॥ ५२॥

कच्चित् पापं वचनं द्यूतकाले
यच्चाप्यसौ सग्तिौ वासुदेवम् ।
तथोक्तवान् परुषं सोऽतिकामं
हितं चरन् यस्सततं कुरूणाम् ॥ ५३॥

कच्चित् स कर्णो निहतोऽद्य सङ्ख्ये
यो धार्तराष्ट्रं परिपालयन् रणे ॥ ५४

एकस्सदा शोषयन् मामकं बलं
सपाञ्चालान् केकयांश्चैव सर्वान् ।
श्रियं दित्सन् धार्तराष्ट्रस्य कर्णः
कच्चिद्वेगं प्रत्यवधीस्त्वमद्य ॥ ५५

अप्येतस्य श्वसृगालाश्च गृध्रा
हृतस्य मांसान्युद्धरन्ति स्म कायात् ॥ ५५॥

---

1. अ—नवार्धानि न सन्ति

यश्शत्रुजिच्छ्रेष्ठतमः पृथिव्यां
पितामहं चाक्षिपदल्पचेताः ।
सङ्क्रन्दायमानोऽर्धरथस्स कश्चित्
त्वया हतोऽद्यातिरथिर्दुरात्मा ॥ ५६॥

यत्तत् त्वया संश्रुतं मे किरीटिन्
सभामध्ये द्वैरथेनेह भूयः ।
अहं कर्णं सूदयिष्ये सपुत्रं
तत् कर्म कृत्वा ह्यनृणोऽसि कश्चित् ॥ ५७॥

अमर्षाग्निं निकृतिसमीरणेरितं
हृदा धृतं शूलमिदं सदा मम ।
हतो मया सोऽद्य समेत्य मन्दधीर्
इति ब्रुवन् प्रशमय मेऽद्य फल्गुन ॥ ५८॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि चतुस्सप्ततितमोऽध्यायः ॥ ७४ ॥
॥ ७३ ॥ कर्णपर्वणि चतुस्सप्ततितमोऽध्यायः ॥ ७४ ॥
[अस्मिन्नध्याये ५८॥ श्लोकाः]

॥ पञ्चसप्ततितमोऽध्यायः ॥

अर्जुनेन स्वयुद्धानुवादपूर्वकं युधिष्ठिरं प्रति कर्णवधप्रतिज्ञानम् ॥

सञ्जयः—

तद्धर्मशीलस्य वचो निशम्य
राज्ञः क्रुद्धस्यातिरथेर्महात्मा ।
उवाच दुर्धर्षमदीनसत्त्वो
युधिष्ठिरं जिष्णुरनन्तवीर्यः ॥ १

अर्जुनः—

द्रोणं हतं पार्थ कर्णो विदित्वा
भिन्नां नावमिवात्यगाधे कुरूणाम् ।
सम्मुह्यमानान् धार्तराष्ट्रान् विदित्वा
निरुत्साहांश्च विजये परेषाम् ॥ २

सोदर्यवत् त्वरितोऽथामितौजा
उत्तारयिष्यन् धृतराष्ट्रस्य पुत्रान् ।
रणे रथेनातिरथिर्महात्मा
ततो हि मां त्वरितस्सोऽभ्यधावत् ॥ ३

संशप्तकैर्युद्ध्यमानस्य मेऽद्य
सेनाप्रयायी कुरुसैन्यस्य राजन् ।

आशीविषाभान् खगमान् विमुञ्चन्
द्रौणिः पुरस्तात् सहसाऽध्यतिष्ठत् ॥ ४

स मे दृष्ट्वा शूरतमो ध्वजाग्रं
समादिशद्रथसङ्घाननेकान् ।
तेषामहं पञ्चशतं निहत्य
आसादयं द्रोणपुत्रं नदन्तम् ॥ ५

स द्रोणपुत्रस्सदृशं महात्मा
मामप्यरौत्सीत् तदनीकमध्ये ।
किरञ्शरौघान् बहुरूपान् विचित्रान्
स्वातीगतश्शुक्र इवाभिवर्षन् ॥ ६

स मे शरान् सर्वतः कङ्कपत्रान्
अवासृजद्वै पृथिवीप्रकाशान् ।
निवार्य तूर्णं परमाजिमध्ये
ततो हि मां बाणगणैस्समार्पयत् ॥ ७

आकर्षणं वाऽपि विकर्षणं वा
न दृश्यते तस्य महारथस्य ।
न सन्दधानः कुत आददानो
न व्याक्षिपन् न विकर्षन् न मुञ्चन् ॥ ८

सव्येन वा यदि वा दक्षिणेन
न ज्ञायते कतरेणास्यतीति ।
आचार्यवत् समरे पर्यवर्त-
न्महच्चित्रं दर्शयन् सर्वतस्स्म ॥ ९

दृष्टीविषं चासुहरं परेषां
सर्वा दिशः पूरयानं शरौघैः ।
अलातचक्रप्रतिमं महात्मनस्
सदा नतं कार्मुकं ब्रह्मबन्धोः ॥ १०

ततोऽपरान् बाणगणाननेकान्
आकर्णपूर्णायतविप्रमुक्तान् ।
ससर्ज शीघ्रास्त्रबलेन वीरस्
तथा यथा विस्रवत्युग्रमेघः ॥ ११

अविध्यन्मां पञ्चभिर्द्रोणपुत्रश्
शितैश्शरैः पञ्चभिर्वासुदेवम् ।
अभ्यघ्नं बाणैस्तमहं सुधारैर्
निमेषमात्रेण सुवर्णपुङ्खैः ॥ १२

स निर्विद्धो विरथो द्रोणपुत्रो
रथानीकं चातिरथैर्विवेश ।

मयाऽभिभूतान् स्वरथप्रबर्हान्
अस्रं च पश्यन् रुधिरप्रदिग्धः ॥ १३

ततोऽभिभूतं युधि वीक्ष्य सैन्यं
विध्वस्तयोधं द्रुतनागयूथम् ।
पञ्चाशता रथमुख्यैस्समेतः
कर्णस्त्वरन् माऽभ्यपतत् प्रमाथी ॥ १४

तान् सूदयित्वाऽहमपास्य कर्णं
द्रष्टुं भवन्तं त्वरयोपयातः ।
सर्वे पाञ्चाला ह्युद्विजन्ते स्म कर्णाद्
गन्धेन गावः केसरिणो यथैव ॥ १५

मृत्योरास्यं व्यात्तमिवानुपद्य
प्रभद्रकाः कर्णमासाद्य सर्वे ।
योत्स्यामि तांस्तारयिष्यन् बलौघान्
दिष्ट्या भवान् स्वस्तिमान् पार्थ दृष्टः ॥ १६

हनिष्येऽहं भारत सूतपुत्रम्
अस्मिन् सङ्ग्रामे यदि दृश्यतेऽद्य ।
आयाहि पश्याद्य युयुत्समानौ
मां सूतपुत्रं च धृतौ रणाय ॥ १७

महाझषस्येव मुखं प्रपन्नाः
प्रभद्रकाः कर्णमुखं प्रपन्नाः ।
षट्साहस्रा भारत राजपुत्रास्
स्वर्गाय लोकाय रणे निमग्नाः ॥ १८

तानद्य यास्यामि रणाद्विमोक्तुं
सर्वात्मना सूतपुत्रं निहन्तुम् ।
[1]रथप्रवीरेण महानुभाव
द्विषत्सैन्यं निर्दहभ् विस्तरेण ॥ १९

समेष्येऽहं सूतपुत्रेण सङ्ख्ये
वज्रीव वृत्रेण नरेन्द्रमुख्य ।
एवं गते किञ्च मयाऽद्य शक्यं
कार्यं कर्तुं निग्रहे सूतजस्य ॥ २०

तथैव राज्ञश्च सुयोधनस्य
ये चापि मां योद्धुकामास्समेताः ॥ २०॥
कर्णं न चेदद्य निहन्मि राजन्
सबान्धवं युध्यमानं प्रसह्य ।
प्रतिश्रुत्याकुर्वतां या गतिर्वै
कष्टां यायां तामहं राजसिंह ॥ २१॥

1. अ—अधैतयं नास्ति

आमन्त्रये त्वां ब्रूहि रणे जयं मे
पुरा भीमं धार्तराष्ट्रा ग्रसन्ति ॥ २२

ततो हनिष्यामि नरेन्द्रसिंह
सैन्यं यथा शत्रुगणांश्च सर्वान् ॥ २२॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि पञ्चसप्ततितमोऽध्यायः ॥ ७५ ॥
॥ ७३ ॥ कर्णपर्वणि पञ्चसप्ततितमोऽध्यायः ॥ ७५ ॥
[अस्मिन्नध्याये २२॥ श्लोकाः]

॥ षट्सप्ततितमोऽध्यायः ॥

कर्णस्यामारणज्ञानाद्दुष्टेन युधिष्ठिरेण अर्जुनं प्रति गर्हणपूर्वकं कृष्णकरे गाण्डीवदानचोदना ॥

सञ्जयः—

[1]वैकर्तनं कुशलिनं निशम्य
क्रुद्धः पार्थः फल्गुनस्यामितौजाः ।
धनञ्जयं वाक्यमुवाच राजा
युधिष्ठिरः कर्णशराभितप्तः ॥ १

1. ख—इदमर्धं नास्ति

युधिष्ठिरः—

इमां च वसतिं प्राप्तो भवान् कर्णेन बाधितः ॥ १॥
अहं त्वं भीमसेनश्च माद्रीपुत्रौ च पाण्डवौ ।
वासुदेवेन सहिता वयं कर्णेन निर्जिताः ॥ २॥
पुनरेव वनं प्राप्य तपश्चर्यां च कुर्महे ।
अथवा धार्तराष्ट्राणां परिचर्यां चरामहे ॥ ३॥

सञ्जयः—

इत्येवमुक्त्वा बीभत्सुं रोषात् संरक्तलोचनः ।
अब्रवीत् पुनरेवात्र धर्मराजो युधिष्ठिरः ॥ ४॥

युधिष्ठिरः—

एवं यदि द्वैतवने तु सूक्तं
कर्णेन योद्धुं न सहे नृपेति ।
वयं ततः प्राप्तकालं यथावत्
कृत्वाऽभ्युपेक्षाम तथैव राज्यम् ॥ ५॥
मयि प्रतिश्रुत्य वधं हि तस्य
बलस्य चार्धस्य तथैव युद्धे ।
आनीय मां शत्रुमध्ये स कस्मात्
समुन्नाम्य स्थण्डिले प्रत्यपिङ्क्षः ॥ ६॥
अन्वास्य सत्येन यदात्थ पार्थ
सत्यं शपन् वासुदेवेन सार्धम् ।

तन्नस्सत्यं विफलं ह्यकार्षीः
फलस्य काले वाच्छिन्नः पुष्पवृक्षः ॥ ७॥

प्रच्छादितस्त्वं बालिश दुर्यशोभिर्
अनर्थवाक्योऽस्यर्जुन नैव साधुः ।
त्यक्त्वा भीमं सर्वभीमेषु भीमं
त्वं योजितस्सूतपुत्रं निहन्तुम् ॥ ८॥

यत्तत् पृथां वागुवाचान्तरिक्षे
सप्ताह्नि जाते त्वयि मन्दबुद्धौ ।
अपापीयान् वासवात् कुन्ति जातो
बहून् सङ्ग्रामानयमेको विजेता ॥ ९॥

अयं जेता पाण्डवो देवसङ्घान्
सर्वाणि भूतान्यपि चोत्तमौजाः ।
अयं जेता मद्रकलिङ्गजातान्
दैत्यांश्च रक्षांसि समागतानि ॥ १०॥

भूमिं च सर्वां निखिलेन जेता
कुरूंश्च सर्वान् सगणांश्च जेता ।
अस्मात् परो नो भविता धनुर्धरो
नैष्यन्न भूतः कश्चिदेनं विजेता ॥ ११॥

इच्छन्नयं सर्वभूतानि हन्यात्
कुर्याद्वशे सर्वसमाप्तविद्यः ॥ १२

कान्त्या शशाङ्कस्य जवेन वायोस्
स्थैर्येण मेरोः क्षमया पृथिव्याः ।
अग्नेश्च तापाद् धनदस्य लक्ष्म्या
शौर्येण शक्रस्य जयेन विष्णोः ॥ १३

तुल्यो महात्मा तव कुन्ति पुत्रो
जातोऽदितेर्विष्णुरिवामितौजाः ॥ १३॥

स्वेषां जयाय द्विषतां वधाय
ख्यातो महात्मा तव नन्दकर्ता ॥ १४

इत्यन्तरिक्षे शतशृङ्गमूर्ध्नि
तपस्विनां शृण्वतां वागुवाच ।
एवंविधस्त्वं न च भूतस्तथाऽद्य
देवाश्च नूनमनृतं वदन्ति ॥ १५

तथा परेषामृषिसत्तमानां
श्रुत्वा गिरः पूजयतां सदा त्वाम् ।
न सन्नतिं यामि सुयोधनस्य
न त्वां जानाम्यतिरथेभयार्तम् ॥ १६

त्वष्ट्रा कृतं वाहमकूजनाक्षं
शुभं समास्थाय कपिध्वजं तम् ।
खड्गं गृहीत्वा हेमचित्रावनद्धं
धनुर्वरं गाण्डिवं तालमात्रम् ॥ १७

वासुदेवेनोह्यमानः कथं नु
कर्णाद्भीतो ह्यपयातोऽसि पार्थ ॥ १७॥

पूर्वं यदुक्तं हि सुयोधनेन
न फल्गुनः प्रमुखे स्थास्यतीति ।
कर्णस्य युद्धे हि महाबलस्य
मौर्ख्यात् तु तन्नावबुद्धं मयाऽऽसीत् ॥ १८॥

तेनाद्य तप्ये भृशमप्रमेयो
यन्मित्रवर्गो नरकं प्रविष्टः ।
तदैव वाच्योऽस्मि ननु त्वयाऽहं
न योत्स्ये ऽहं सूतपुत्रं कथञ्चित् ॥ १९॥

ततो नाहं केकयान् सृञ्जयांश्च
समानयेयं सुहृदो रणाय ।
एवं गते किं नु मयाऽद्य शक्यं
कार्यं कर्तुं निग्रहे सूतजस्य ॥ २०॥

तथैव राज्ञश्च सुयोधनस्य
ये चापि मां योद्धुकामास्समेताः ।
धिगस्तु मे जीवितमद्य कृष्ण
योऽहं वशं सूतपुत्रस्य यातः ॥ २१॥

मध्ये कुरूणां ससुयोधनानां
ये चाप्यन्ये योद्धुकामास्समेताः ॥ २२

एकस्तु मे भीमसेनोऽद्य नाथो
येनाभिपन्नोऽस्मि रणे महाभये ।
विमोच्य मां चापि रुषाऽन्वितस्ततश्
शरेण तीक्ष्णेन बिभेद कर्णम् ॥ २३

त्यक्त्वा प्राणान् समरे भीमसेनश्
चक्रे युद्धं कुरुभिस्समेतैः ।
[1]गदाग्रहस्तो रुधिरोक्षिताङ्गश्
चरन् रणे काल इवान्तकाले ॥ २४

असौ हि भीमस्य महान् निनादो
मुहुर्मुहुश्श्रूयते धार्तराष्ट्रैः ॥ २४॥

यदि स्म जीवेत् समरे निहन्ता
महारथानां प्रवरो नरोत्तमः ।

---

1. अ—नास्तीदमर्धम्

तवाभिन्युस्तनयोऽद्य पार्थ
न चास्मि गन्ता समरे पराभवम् ॥ २५॥

अथापि जीवेत् समरे घटोत्कचस्
तथाऽपि नाहं समरे पराङ्मुखः ।
[1]भीमस्य पुत्रस्समराप्रयायी
महास्त्रविच्चापि तवानुरूपः ॥ २६॥

यत्नं समासाद्य रिपोर्बलं नो
निमीलिताक्षं भयविप्लुतं भवेत् ।
चकार योऽसौ निशि युद्धमेकस्
त्यक्त्वा रणं यस्य भयाद्द्रवन्ते ॥ २७॥

स चेत् समासाद्य महानुभावः
कर्णं रणे बाणगणैः प्रमोह्य ।
धैर्ये स्थितेनापि च सूतजेन
शक्त्या हतो वासवदत्तया तया ॥ २८॥

ममैव भोग्यानि पुरा कृतानि
पापानि नूनं फलवन्ति युद्धे ॥ २९

तृणं च कृत्वा समरे भवन्तं
ततोऽहमेवं निकृतो दुरात्मना ।

1. अ—पञ्चार्धानि न सन्ति

वैकर्तनेनेह तथा कृतोऽहं
यथा ह्यशक्तः क्रियते ह्यबान्धवः ॥ ३०

आपद्गतं यश्च नरं विमोक्ष्येत्
स बान्धवस्नेहयुक्तस्सुहृच्च ।
एवं पुराणा ऋषयो वदन्ति
धर्मस्सदा सद्भिरनुष्ठितश्च ॥ ३१

खड्गं बिभ्रज्जातरूपत्सरुं च
धनुश्चेदं गाण्डिवं तालमात्रम् ।
स केशवेनोह्यमानः कथं नु
कर्णात् पार्थ त्वमपैतुं समैषीः ॥ ३२

स गाण्डीवं केशवाय प्रदाय
यन्ता भवेस्त्वं यदि केशवस्य ।
ततस्तरेत् केशवः कर्णमुग्रं
मरुत्सखो वृत्रमिवाप्तवज्रः ॥ ३३

मासेऽपतिष्यो यदि पञ्चमे त्वं
न वा गर्भो यद्यभवः पृथायाः ।

मत्तश्श्रेयान् राजपुत्रोऽभविष्य-
न्न ते यशः फल्गुन इत्यपेयात् ॥ ३४

इति श्रीमद्भाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि षट्सप्ततितमोऽध्यायः ॥ ७६ ॥
॥ ७३ ॥ कर्णपर्वणि षट्सप्ततितमोऽध्यायः ॥ ७६ ॥
[अस्मिन्नध्याये ३४ श्लोकाः]

॥ सप्तसप्ततितमोऽध्यायः ॥

युधिष्ठिरवधोद्यतमर्जुनं प्रति तत्कारणप्रश्ने तेन तन्निवेदनम् ॥ १ ॥
कृष्णेन वधप्रतिनिधित्वेन युधिष्ठिराधिक्षेपविधानम् ॥ २ ॥

सञ्जयः—

युधिष्ठिरेणैवमुक्तः कौन्तेयश्श्वेतवाहनः ।
असिं जग्राह सङ्क्रुद्धो जिघांसुर्भरतर्षभम् ॥ १

तस्य कोपं समाज्ञाय चित्तज्ञः केशवस्तदा ।
उवाच किमिदं खड्गं गृह्णास्यर्जुन शंस मे ॥ २

नेह पश्यामि योद्धव्यं त्वया किञ्चिद् धनञ्जय ।
नेहागता धार्तराष्ट्रास् सर्वे भीमेन वारिताः ॥ ३

उपागतोऽसि कौन्तेय राजा द्रष्टव्य इत्यसौ ।
स राजा भवता दृष्टः कुशली च युधिष्ठिरः ॥ ४

तं दृष्ट्वा नृपशार्दूलं शार्दूलसमविक्रमम् ।
हर्षकाले तु सम्प्राप्ते कस्मात्त्वां मन्युराविशत् ॥ ५

न तं पश्यामि कौन्तेय यस्ते वध्यो भवेदिह ।
कस्माद्भवान् महाखड्गं परिगृह्णात्यकारणात् ॥ ६

तस्मात् पृच्छामि कौन्तेय [1]किमिदं भरतर्षभ ।
परामृशसि संरब्धः खड्गमद्भुतदर्शनम् ॥ ७

एवमुक्तः कटाक्षेण प्रेक्षमाणो युधिष्ठिरम् ।
अर्जुनः प्राह गोविन्दं क्रुद्धस्सर्प इव श्वसन् ॥ ८

अर्जुनः—

अन्यस्मै देहि गाण्डीवम् इति मां यः प्रचोदयेत् ।
भिन्द्यामहं शिरस्तस्य इत्युपांशु व्रतं मम ॥ ९

[2]युधिष्ठिरेण तेनाहम् उक्तश्चास्मि जनार्दन ॥ ९॥

यदुक्तोऽहमदीनार्थे राज्ञाऽनेन यशस्विना ।
समक्षं तव गोविन्द तन्न क्षन्तुमिहोत्सहे ॥ १०॥

तस्मादेनं वधिष्यामि राजानं धर्मचारिणम् ।
प्रतिज्ञां पालयिष्यामि हत्वैनं नरसत्तमम् ॥ ११॥

एतदर्थं मया खड्गो गृहीतो यदुनन्दन ।
सोऽहं युधिष्ठिरं हत्वा सत्यस्यानृण्यतां गतः ॥ १२॥

1. क-ङ—काङ्क्षितम् 2. ख—इदमर्धं नास्ति

विशोको विज्वरश्चैव भविष्यामि जनार्दन ॥ १३

किं च त्वं मन्यसे प्राप्तम् अस्मिन् कार्ये समुत्थिते ।
त्वमस्य जगतस्तात वेत्थ सर्वं गतागतम् ॥ १४

जातस्त्वत्तो हि धर्मश्चाधर्मश्चेति परा श्रुतिः ।
तत्तथाऽद्य करिष्यामि यथा मां वक्ष्यते भवान् ॥ १५

सञ्जयः—

धिग्धिगित्येव गोविन्दः पार्थमुक्त्वाऽब्रवीत् पुनः ॥ १५॥

श्रीभगवान्—

इदानीं पार्थ जानामि न वृद्धास्सेवितास्त्वया ।
अकाले पुरुषव्याघ्र संरम्भक्रिययाऽनया ॥ १६॥

न हि धर्मविभागज्ञैर् एवं कार्यं धनञ्जय ॥ १७

योऽकार्याणां क्रियायाश्च संयोगं नावबुध्यते ।
कार्याणामक्रियायाश्च स पार्थ पुरुषाधमः ॥ १८

अनुसृत्य तु ये धर्मं कवयस्समुपस्थिताः ।
समासविस्तरविदां न तेषां वेत्सि निश्चयम् ॥ १९

अनिश्चयज्ञो हि नरः कार्याकार्यविनिश्चये ।
एवं स मृत्यवशो यथा त्वं पार्थ मुह्यसि ॥ २०

न हि कार्यमकार्यं वा सुखं ज्ञातुं कथञ्चन ।
श्रुतेन ज्ञायते सर्वं तच्च त्वं नावबुध्यसे ॥ २१

अविज्ञानादिह भवान् सत्यं रक्षति धर्मवित् ।
प्राणिनां त्वं वधं पार्थ धार्मिको नावबुध्यसे ॥ २२

प्राणिनां हि वधात् तात मृतो धर्मो मतो मम ।
अनृतं तु भवेद्वाच्यं न तु हिंसा कदाचन ॥ २३

स कथं भ्रातरं [1]श्रेष्ठं राजानं धर्मकोविदम् ।
हन्याद्भवान् नरश्रेष्ठ प्राकृतोऽन्यः पुमानिव ॥ २४

अयुध्यमानस्य गुरोस् तथाऽशस्त्रस्य भारत ।
पराङ्मुखस्य द्रवतश् शरणं वाऽपि गच्छतः ॥ २५

कृताञ्जलेः प्रपन्नस्य न वधः पूज्यते बुधैः ॥ २५॥

त्वया चैतद्व्रतं पार्थ बालेनैव कृतं पुरा ।
तस्मादधर्मसंयुक्तं मौर्ख्यादेवं व्यवस्यसि ॥ २६॥

स्वगुरुं पार्थ कस्मात् त्वं हन्तुकामोऽभिधावसि ।
असम्प्रधार्य धर्माणां गतिं सूक्ष्मां दुरन्वयाम् ॥ २७॥

इदं धर्मरहस्यं तु तव वक्ष्यामि भारत ।
यद्ब्रूयात् तव भीष्मो वा राजा वाऽपि युधिष्ठिरः ॥ २८॥

विदुरो वा पुनः क्षत्ता गान्धारी वा यशस्विनी ।
[2]कुन्ती वा भरतश्रेष्ठ द्रौपदी वा यशस्विनी ॥ २९॥

तत्ते वक्ष्यामि कौन्तेय तन्निबोध धनञ्जय ॥ ३०

---

1. क-ख-घ—ज्येष्ठं 2. अ—नास्तीदमर्धम्

सत्यस्य वचनं साधु न सत्याद्विद्यते परम् ।
सुदुर्विदं हि तत्त्वेन तत् सत्यमिति मे मतिः ॥ ३१

भवेत् सत्यमवक्तव्यं वक्तव्यमनृतं भवेत् ।
तत्रानृतं भवेत् सत्यं सत्यं यत्रानृतं भवेत् ॥ ३२

[1]प्राणात्यये विवाहे वा वक्तव्यमनृतं भवेत् ।
तत्रानृतं भवेत् सत्यं सत्यमत्रानृतं भवेत् ॥ ३३

सर्वस्वहरणे वाऽपि वक्तव्यमनृतं भवेत् ।
तत्रानृतं भवेत् सत्यं सत्यमत्रानृतं भवेत् ॥ ३४

त्वादृशो हन्यते बालो यस्य सत्यमनिश्चितम् ।
सत्यानृते विनिश्चित्य ततो भवति धर्मवित् ॥ ३५

किमाश्चर्यं महाप्राज्ञः पुरुषोऽपि सुदारुणः ।
सुमहत् प्राप्नुयात् पुण्यं बलाकोऽण्डवधादिव ॥ ३६

अनाश्चर्यं पुनर्मोहाद् धर्मकामो ह्यपण्डितः ।
सुमहत् प्राप्नुयात् पापम् आपगास्विव कौशिकः ॥ ३७

अर्जुनः—

आचक्ष्व भगवन्नेतद् यथा विद्यामहं तथा ।
बलाकाण्डाभिसम्बन्धं नदीनां कौशिकस्य च ॥ ३८

श्रीभगवान्—

मृगव्याधोऽभवत् कश्चिद् बलाको नाम नामतः ।

---

1. ख—अर्धत्रयं नास्ति घ—अर्धचतुष्टयं नास्ति

यात्रार्थं पुत्रदाराणां मृगान् हन्ति न कामतः ॥ ३९

सोऽन्धौ च मातापितरौ बभारान्यांश्च संश्रितान् ।
स्वधर्मनिरतो नित्यं संविभज्यानसूयकः ॥ ४०

स कदाचिन्मृगान् लिप्सुर् नान्वविन्दच्च यत्नवान् ।
अथापश्यत् सुपीवानं श्वापदं घ्राणचक्षुषम् ॥ ४१

अदृष्टपूर्वमपि तत् सत्त्वं तेन हतं तदा ।
अन्वगेव पुनर्व्योम्नः पुष्पवर्षं पपात ह ॥ ४२

अप्सरोगीतवादित्रैर् नादितं च मनोरमम् ।
विमानमागतं स्वर्गान्मृगव्याधनिनीषया ॥ ४३

तद्भूतं सर्वभूतानाम् अभावाय किलार्जुन ।
तपस्तप्त्वा वरं प्राप्य कृतमन्यत् स्वयम्भुवा ॥ ४४

तद्धत्वा सर्वभूतानाम् अभावे कृतनिश्चयम् ।
बलाकोऽगात् स्वर्गलोकं तस्माद् धर्मस्सुदुर्विदः ॥ ४५

कौशिकश्चाभवद्विप्रस् तपस्वी सुबहुश्रुतः ।
नदीनां सङ्गमे ग्रामाद् अदूरे स किलावसत् ॥ ४६

सत्यं मया सदा वाच्यम् इति तस्याभवद्व्रतम् ।
सत्यवादीति विख्यातस् तपस्वी च धनञ्जय ॥ ४७

ततो दस्युभयात् केचित् कदाचित्तत्र संश्रिताः ।
ततस्ते दस्यवः क्रूरास् तान् स्म मार्गन्ति यत्नतः ॥ ४८

अथ कौशिकमभ्येत्य प्रोचुस्ते सत्यवादिनम् । ४८॥

दस्यवः--

कतरेण पथा याता भगवन्निह वै जनाः ।
सत्येन पृष्टः प्रब्रूहि यदि तद्वेत्सि शंस नः ॥ ४९॥

श्रीभगवान्—

सत्यस्य त्वविभागज्ञस् सत्यं तेभ्यश्शशंस सः ॥ ५०

कौशिकः—

बहुवृक्षलतागुल्मम् एतद् गहनमाश्रिताः ॥ ५०॥

श्रीभगवान्—

ततस्ते तान् समासाद्य समाजघ्नुरिति श्रुतिः ॥ ५१

तेनाधर्मेण महतां वाग्दुरुक्तेन कौशिकः ।
गतस्सुकष्टं निरयं धर्मसूक्ष्मेष्वतत्त्ववित् ॥ ५२

[1]दृढपूर्वश्रुतो मूर्खो धर्माणामविशारदः ।
वृद्धानपृच्छन् सन्देहान् अन्धश्चान्धमिवर्च्छति ॥ ५३

तत्र ते लक्षणोद्देशः कश्चिदेव भविष्यति ॥ ५३॥

दुष्करं प्रतिसङ्ख्यानं कार्त्स्न्येनात्र व्यवस्यति ।
सत्यं धर्म इति ह्येके वदन्ति बहवो जनाः ॥ ५४॥

न च पार्थाभ्यसूयामि नैतत् सर्वत्र शिष्यते ।
श्रुतिस्तु धर्म इत्येके वदन्ति बहवो जनाः ॥ ५५॥

1. अ-ड—नास्तीदमर्थम्

न त्वेतत् प्रत्यसूयामि नात्र सर्वं विधीयते ।
यस्यादहिंसासंयुक्तस् स धर्म इति निश्चयः ॥ ५६॥

अहिंसार्थं च भूतानां धर्मप्रवचनं कृतम् ।
प्रभवार्थं च भूतानां धर्मप्रवचनं कृतम् ॥ ५७॥

यस्यात् प्रभवसंयुक्तस् स धर्म इति निश्चयः ॥ ५८

धारणाद्धर्म इत्याहुर् धर्मो धारयते प्रजाः ।
यस्याद्धारणसंयुक्तस् स धर्म इति निश्चयः ॥ ५९

येऽन्यायेन जिगीषन्तो धर्मं पृच्छन्ति मानवाः ।
अकूजनेन चेन्मोक्षो नात्र कूजेत् कथञ्चन ॥ ६०

अवश्यं कूजितव्ये हि शङ्केरन् वाऽप्यकूजनात् ॥ ६०॥

[1]येऽन्यायेन जिहीर्षन्तो धनं पृच्छन्ति कस्यचित् ।
श्रेयस्तत्रानृतं वक्तुं सत्यादिति विनिश्चितम् ॥ ६१॥

प्राणात्यये विवाहे वा सर्वजात्या महाभये ।
सर्वस्वस्य च लोपे वा वक्तव्यमनृतं भवेत् ॥ ६२॥

[2]अधर्मं हि न पश्यन्ति मृषोद्यं तत्र पण्डिताः ।
सर्वदाऽपि वदेत्तत्तु नानृतं स्याद्विचक्षण ॥ ६३॥

यस्तेनैस्सह सम्बन्धो मुच्येत शपथादपि ।
भवेत्तत्रानृतं श्रेयस् सत्यादिति विचारितम् ॥ ६४॥

---

1. अ—नास्तीदमर्धम्
1. अ-ब—षडर्धानि न सन्ति

न च तेभ्यो धनं देयं सत्यादिति कथञ्चन ।
पापेभ्यो हि धनं दत्तं दातारमपि पीडयेत् ॥ ६५॥

तस्माद्धर्मार्थमनृतम् उक्त्वा नानृतवाग्भवेत् ॥ ६६

एष ते लक्षणोद्देशस् समुद्दिष्टो यथाविधि ।
एवं ज्ञात्वा ब्रूहि पार्थ यदि वध्यो युधिष्ठिरः ॥ ६७

अर्जुनः—

यथा ब्रूयान्महाप्राज्ञो यथा ब्रूयान्महायशाः ।
सुहृद्ब्रूयाद्यथाऽस्माकं तथोक्तं वचनं त्वया ॥ ६८

भवान् पितृसमो मह्यं भवान् मातृसमोऽपि च ।
गतिश्च परमा त्वं हि त्वमेव च परायणम् ॥ ६९

न हि ते त्रिषु लोकेषु अज्ञातं विद्यते क्वचित् ।
तस्माद्ब्रूवान् परं धर्मं वेद सर्वं यथातथम् ॥ ७०

अवध्यं पाण्डवं मन्ये धर्मराजं युधिष्ठिरम् ।
अस्मिन् समयसंयोगे ब्रूहि किञ्चिदनुग्रहम् ॥ ७१

इदं चापरमत्रैव ब्रूहि तत्त्वं विवक्षितम् ॥ ७१॥

जानासि दाशार्ह मम व्रतं त्वं
यो मां ब्रूयात् कश्चन मानुषेषु ।
अन्यस्मै त्वं गाण्डिवं देहि पार्थ
यो मत्तोऽस्त्रे वीर्यतो वा विशिष्टः ॥ ७२॥

हन्यामहं केशव तं प्रसह्य
भीमो हन्यात्तूबरकेति चोक्तः ।
तन्मां राजा ह्युक्तवांस्ते समक्षं
धनुर्देहीत्यसकृद्वृष्णिसिंह ॥ ७३॥

न तं हन्यां चेत् केशव जीवलोके
स्थाता नाहं कालमप्यल्पमात्रम् ।
सा च प्रतिज्ञा मम लोकेषु नित्या
यथा सत्या धर्मभृतां वरिष्ठ ॥ ७४॥

यथा जीवेत् पाण्डवेयो हि कृष्ण
तथा बुद्धिं दातुमर्हार्हसि त्वम् ॥ ७५

श्रीभगवान्—

राजा श्रान्तस्ताडितो विक्षतश्च
कर्णेन सङ्ख्ये निशितैर्बाणसङ्घैः ।
तस्मात् पार्थ त्वां परुषाण्यवोचत्
कर्णे द्यूतं ह्यद्य रणे निबद्धम् ॥ ७६

तस्मिन् हते कुरवो निर्जितास्स्युर्
एवं बुद्धिः पार्थिवो धर्मबुद्धिः ॥ ७६॥

[1]ततो वधं नार्हति धर्मपुत्रस्
त्वया प्रतिज्ञाऽर्जुन पालनीया ।

1. ङ—कोशप्वेदमर्धद्वयं वर्तते

जीवन्नयं येन मृतो भवेद्धि
तन्मे निबोधेह तवानुरूपम् ॥ ७७॥

यदा मानं लभते माननार्हस्
तदा स वै जीवति जीवलोके ।
यदा ऽवमानं लभते महान्तं
तदा जातो मृत इत्युच्यते सः ॥ ७८॥

सम्मानितः पार्थिवोऽयं सदैव
तथैव भीमेन तथा यमाभ्याम् ।
वृद्धैश्च लोके पुरुषैश्च सद्भिस्
तस्यावमानं कलया प्रयुङ्क्ष्व ॥ ७९॥

[1]शृणु पार्थ यया वृत्त्या हतस्याद्भवता गुरुः ।
हतो भवत्येवमुक्तो गुरुश्शस्त्रभृतां वरः ॥ ८०॥

[2]त्वमित्यत्रभवन्तं त्वं ब्रूहि पार्थ युधिष्ठिरम् ।
[3]यदिदं धर्मशास्त्रार्थं वेदेषु च निदर्शनम् ॥ ८१॥
त्वमित्येवं हि वचनं ब्रूहि पार्थ युधिष्ठिरम् ।
त्वमित्युक्तो हि निहतो गुरुर्भवति भारत ॥ ८२॥
एवमाचर कौन्तेय धर्मराजे युधिष्ठिरे ।

---

1. अ-ख-घ—अर्धद्वयं नास्ति
2. अ—नास्तीदमर्धम्
3. घ—नास्तीदमर्धम्
क-ख—अर्धद्वयं नास्ति

अधर्मयुक्तं संयोगं कुरुष्वैनं कुरूद्वह ॥ ८३॥

अथर्वाङ्गिरसी ह्येषा श्रुतीनामुत्तमा श्रुतिः ।
अविचार्या च कार्या च श्रेयस्कामैर्नरैस्सदा ॥ ८४॥

[1]अवधेन वधः प्रोक्तो यद्ग्रहस्यमिति प्रभो ।
[2]हतो भव त्वमित्युक्तो हतो भवति भारत ॥ ८५॥

एकमाचक्ष्व कौन्तेय धर्मराजं युधिष्ठिरम् ॥ ८६

यदा ह्ययं पाण्डव धर्मराजस्
त्वत्तोऽयुक्तं लप्स्यते चैव साधु ।
ततोऽस्य पादावभिवाद्य पश्चाच्
छमं ब्रूयास्सान्त्वपूर्वं च पार्थ ॥ ८७

भ्राता प्राज्ञस्तव कोपं न जातु
कुर्याद्राजा धर्ममार्गानुसारी ।
मुक्तोऽनृताद्भ्रातृवधाच्च पापा-
द्दृष्टः कर्णं त्वं जहि पार्थ पश्चात् ॥ ८८

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि सप्तसप्ततितमोऽध्यायः ॥ ७७ ॥
॥ ७३ ॥ कर्णपर्वणि सप्तसप्ततितमोऽध्यायः ॥ ७७ ॥
[अस्मिन्नध्याये ८८ श्लोकाः]

---

1. क-ख—इदमर्धं नास्ति 2. क-ख-ङ—इदमर्धद्वयं नास्ति

॥ अष्टसप्ततितमोऽध्यायः ॥

अर्जुनेन युधिष्ठिराधिक्षेपः ॥ १ ॥ युधिष्ठिराधिक्षेपादात्मवधोद्यतं पार्थं प्रति कृष्णेन तत्प्रतिनिधितया आत्मप्रशंसनचोदना ॥ २ ॥ अर्जुनेनात्मप्रशंसनानन्तरं युधिष्ठिरक्षमापनम् ॥ ३ ॥

सञ्जयः—

इत्येवमुक्तस्तु जनार्दनेन
पार्थः प्रशस्याथ सुहृद्वचस्तत् ।
ततोऽब्रवीदर्जुनो धर्मराजम्
अनुक्तपूर्वं परुषं प्रसह्य ॥ १

अर्जुनः—

मा त्वं राजन् व्याहरस्वाद्य वाक्यं
त्वं तिष्ठसे क्रोशमात्रादपेत्य ।
भीमस्तु मामर्हति गर्हणाय
यो युध्यते सर्वलोकप्रवीरैः ॥ २

काले हि शत्रूनतिपीड्य वीरो
हत्वा प्रवीरान् वसुधाधिपानाम् ।
रथप्रधानोत्तमनागमुख्यान्
सादिप्रवीरानहितांश्च शूरान् ॥ ३

सुदुष्करं कर्म करोति भीमः
कर्तुं यथा नार्हति कश्चिदन्यः ।
रथादवस्कन्द्य गदां परामृशंस्
[1]ततो रणे चापि निहन्ति वारणान् ॥ ४

स कुञ्जराणामधिकं सहस्रं
हत्वाऽनदत्तुमुलं सिंहनादम् ।
[2]काम्भोजवानायुजपार्वतीयान्
ईहामृगाभान् विनिहत्य वाजिनः ॥ ५

[3]महाबलान् द्विरदान् भीमवेगान्
सहेत कः कुञ्जरान् युध्यमानः ।
असौ भीमो धार्तराष्ट्रेषु मग्नस्
स मामुपालब्धुमरिन्दमोऽर्हति ॥ ६

वरासिना चाथ रथाश्वकुञ्जरांस्
तथा रथाङ्गैर्धनुषा च हन्त्यरीन् ।
प्रमृद्य पद्भ्यामहितान् निहन्ति
पुनश्च दोर्भ्यां शतमन्युविक्रमः ॥ ७

महाबलो वैश्रवणान्तकोपमः
प्रसह्य हर्ता द्विषतां शिरांसि ।

---

1. अ—अर्धं पादो नास्ति 2. अ—अयं पादो नास्ति
3. अ—नास्तीदमर्धम्

[1]सन्त्रासयानस्समरे शत्रुसङ्घान्
काम्भोजवानायुजपार्वतीयान् ॥ ८
स भीमसेनोऽर्हति गर्हणाय
न त्वं नित्यं रक्ष्यमाणस्सुहृद्भिः ॥ ८॥

कलिङ्गवङ्गाङ्गनिषादमागधान्
सदा महाशैलबलाहकोपमान् ।
निहन्ति यश्शत्रुगणाननेकशस्
स मां हि वक्तुं प्रभवत्यनागसम् ॥ ९॥

सुयुक्तमास्थाय रथं हि काले
धनुर्विधून्वञ् छरपूर्णमुष्टिभिः ।
सृजेच्च यो बाणसङ्घान् परेषु
महाबलो मेघ इवाम्बुधाराः ॥ १०॥

शतान्यष्टौ वारणानामशातयद्
विशातितैः कुम्भकटाग्रहस्तैः ।
यो भीमसेनो निहतारिसङ्घस्
स मामुपालब्धुमरिन्दमोऽर्हति ॥ ११॥

[2]रथाश्च नागाश्च हयाश्च राजन्
भीमेनाजौ निहतास्सङ्घशोऽद्य ।

1. क-ख—न दृश्यत इदमर्धम् 2. अ-ख-घ—अर्धद्वयं नास्ति

राजानश्च बहवो महाबलास्
स मामुपालब्धुमरिन्दमोऽर्हति ॥ १२॥

[1]धृतराष्ट्रपुत्रा बलिना च येन
महाबला निहताः प्रायशो वै ।
शूरो युद्धेष्वप्रतिवार्यवीर्यस्
स मामुपालब्धुमरिन्दमोऽर्हति ॥ १३॥

प्रतापयंस्तद्बलमुग्ररूपं
योऽसौ रणे धार्तराष्ट्रस्य वीरः ।
एकस्सहेताप्रतिसृष्टपौरुषस्
तेनास्मि वाच्यो न त्वया वै कदाचित् ॥ १४॥

महारथा यत्र यत्रैव युद्धे
भिन्दन्ति सैन्यं तव कामतोऽद्य ।
स तत्र तत्रैव रणे महात्मा
दृढं भीमः परसङ्घानमृद्नात् ॥ १५॥

तेनास्मि वाच्यो न त्वयाऽहं कदाचि-
न्मा मा वोचः क्रूरमिहाद्य पार्थ ।
नास्मद्विधो वै भवता तु वाच्यो
यथा भवान् सर्वलोकस्य वाच्यः ॥ १६॥

---

1. ख-घ—अयं श्लोको नास्ति

एवं हि मां ते ब्रुवतो नरेन्द्र
कथं न [1]शीर्येच्छतधाऽद्य जिह्वा ।
अहो बतेदं सुनृशंसरूपं
कामादवोचस्त्वमिहाद्य यद्वै ॥ १७॥

बलं तु वाचि द्विजसत्तमानां
यत् क्षत्रियाणां बाहुबलं वदन्ति ।
त्वं चाबलो भारत निष्ठुरोऽसि
त्वमेव मां वेत्सि यथाविधोऽहम् ॥ १८॥

नकुलेन राजन् गजवाजियोधा
हताश्च शूरास्सहसा समेत्य ।
त्यक्त्वा प्राणान् समरे युद्धकाङ्क्षी
स मामुपालब्धुमरिन्दमोऽर्हति ॥ १९॥

कृतं कर्म सहदेवेन दुष्करं
यो युध्यते परसैन्यावमर्दी ।
न चाब्रवीत् किञ्चिदिहागतो बली
पश्यान्तरं तस्य चैवात्मनश्च ॥ २०॥

धृष्टद्युम्नस्सात्यकिर्द्रौपदेया
युधामन्युश्चोत्तमौजाशिखण्डी ।

1. क-ङ—दीर्ये

एते च सर्वे युधि सम्प्रपीडितास्
ते मामुपालब्धुमर्हन्ति न त्वम् ॥ २१॥

त्वन्मूलमस्माभिरिदं हि वैरं
प्राप्तं तथा व्यसनं चातिघोरम् ।
द्यूतप्रमत्तेन कृतं त्वयाऽसकृत्
कस्मादुपालब्धुमिहार्हसि त्वम् ॥ २२॥

त्वमेव राजन् सततं प्रमत्तस्
त्वमेव मूढो भारतानामसाधुः ।
त्वां प्राप्य राज्यं च विनष्टमेतत्
प्राप्ता महत् पाण्डवाश्चापि दास्यम् ॥ २३॥

त्वत्तः कृतेऽस्मद्वनवासदुःखं
राज्यस्य नाशो ह्यभिमन्योश्च घोरः ।
आत्मानमेवं सुनृशंसरूपं
ज्ञात्वा किमर्थं गर्हसे माऽद्य वीरम् ॥ २४॥

लज्जस्व राजन् यदि तेऽस्ति लज्जा
तूष्णीम्भूतः पश्य सर्वं कृतं नः ।
भीमो नित्यं समरस्य कर्ता
दर्पस्य भेत्ता पुनरेव नित्यम् ॥ २५॥

स्वयं ह्यशक्तेन नरेन्द्र युद्धे
नरेण कार्या सततं क्षमैव ।
[1]बलं हि वाचि द्विजसत्तमानां
क्षत्रं द्विजा बाहुबलं वदन्ति ॥ २६॥

त्वं वाग्बलो भारत निष्ठुरोऽसि
त्वमेव मां वेत्सि यथाविधोऽहम् ।
[2]घटामि नित्यं तव कर्तुमिष्टं
दारैस्सुतैर्जीवितेनात्मना च ॥ २७॥

एवं च मां वाक्छलाकैर्भिनत्सि
त्वत्तस्सुखं न वयं विद्म किञ्चित् ।
मा वमंस्था द्रौपदीतल्पसंस्थो
महारथान् प्रतिहन्मि त्वदर्थे ॥ २८॥

सर्वातिशङ्की भारत निष्ठुरोऽसि
त्वत्तस्सुखं नाभिजानामि किञ्चित् ।
प्रोक्तस्स्वयं सत्यसन्धेन मृत्युस्
तव प्रियार्थं नरदेव युद्धे ॥ २९॥

शिखण्डिनाग्रा प्रधने तवार्थे
मयाऽभिगुप्तेन हतश्च भीष्मः ।

---

1. अ—नास्त्ययं पादः 2. अ—अर्धमर्धं नास्ति

द्रोणो हतो यस्सततोपकारी
धृष्टद्युम्नेन स्यन्दनाद्विप्रकृष्य ॥ ३०॥

द्रौणिश्च रुद्रस्सगणो महात्मा
तथाऽपि ते वै वचनं नृशंसवत् ।
दुःखं प्रियं ते नरदेव कर्तुं
यस्य प्रियं ते न करोम्यहं वै ॥ ३१॥

न मुच्यते वै दिवि चेह वा पुमान्
यस्ते मदन्योऽप्रियमारभेत ।
न चाभिनन्दामि तवाधिराज्यं
यतस्त्वमक्षेषु दृढं प्रसक्तः ॥ ३२॥

स्वयं कृत्वा पापमनार्यजुष्टम्
अस्माभिराजौ व्यसनं तितीर्षसि ।
अक्षेषु दोषा बहवो विधर्माश्
श्रुतास्त्वया सहदेवोऽब्रवीद्यान् ॥ ३३॥

तान् नैच्छसि त्यक्तुमनार्यजुष्टां
स्तेन स्म सर्वे निरये त्वयाऽस्ताः ।
स्वं देविता त्वत्कृते राज्यनाशस्
त्वत्सम्भवं व्यसनं नो नरेन्द्र ॥ ३४॥

माऽस्मान् क्रूरैर्वाक्प्रतोदैस्तुदंस्त्वं
भूयो राजन् कोपयस्यल्पबुद्ध्या ॥ ३५॥

सञ्जयः—

एता वाचः परुषास्सव्यसाची
स्थिरप्रतिज्ञश्श्रावयित्वा नरेन्द्रम् ।
[1]बभूवासौ विमना धर्मभीरुः
कृत्वा प्राज्ञः पातकं किञ्चिदेवम् ॥ ३६॥

विनिश्श्वसन्तुयेष्ठमनिष्टमुक्त्वा
ततस्तु कोशादसिमुद्बबर्ह ॥ ३७

[2]तमाह कृष्णः किमिदं पुनर्भवान्
विकोशमाकाशनिभं करोत्यसिम् ।
प्रब्रूहि सत्यं पुनरुत्तरं विधेर्
वचः प्रवक्ष्यामि तवार्थसिद्धये ॥ ३८

इतीव पृष्टः पुरुषोत्तमेन
सुदुःखितः केशवमाह पार्थः ॥ ३८॥

---

1. क—कोश एकस्मिन्नेवेदमर्धं वर्तते
2. अ—ततोऽनुतप्यन् भृशमार्तरूपो
विनिश्वसंश्चापि स राजपुत्रः ।
समुद्बबर्हासिवरं महात्मा
निहन्तुमात्मानममित्रघाती ॥ [अधिकः पाठः]

अर्जुनः—

अहं हनिष्ये स्वशरीरमेतत्
प्रसह्य येनाहितमुक्तवान् गुरुम् ॥ ३९

सञ्जयः—

निशम्य तत् पार्थवचोऽब्रवीदिदं
जनार्दनो धर्मभृतां वरिष्ठः ॥ ३९॥

श्रीभगवान्—

[1]प्रब्रूहि पार्थ स्वगुणानिहात्मनस्
ततो हतात्मा भवसीति निश्चयः ॥ ४०

सञ्जयः—

तथा तु कृष्णस्य वचो निशम्य
ततोऽर्जुनः प्राह धनुः प्रगृह्य ।

---

1. अ-क-ङ—राजानमेनं त्वमिति प्रयुक्ते
तत् कश्मलं प्राविशत् पार्थ घोरम् ।
त्वं चात्मानं हन्तुमिच्छस्यरिघ्न
बहुष्वपायेषु ततः किरीटिन् ॥
धर्मात्मानं भ्रातरं तत्त्वमद्य
खड्गेनामुं परिहन्या नृवीर ।
धर्माद्भीरुस्तत् कथमद्य मन्यसे
किं चोत्तरं नाम करिष्यसि त्वम् ॥
सूक्ष्मो धर्मो दुर्विदश्चापि पार्थ
विशेषतः प्राप्यमाने नृलोके ।
हत्वाऽऽत्मानं प्राप्नुयाद्वै यथा ?
भ्रातुर्नरकं घोररूपम् ? ॥ [अधिकः पाठः]

युधिष्ठिरं धर्मभृतां वरिष्ठं
श्रृणुष्व राजन्निति दुर्वचस्स्वयम् ॥ ४१

अर्जुनः—

न मादृशोऽन्यो नरदेव विद्यते
धनुर्धरो देवमृते पिनाकिनम् ।
अहं हि तेनानुमतो महौजसा
क्षणेन हन्यां सचराचरं जगत् ॥ ४२

मया हि राजन् सदिगीश्वरा दिशो
विजित्य सर्वा भवतः कृता वशे ।
स राजसूयश्च समाप्तदक्षिणस्
सभा च दिव्या भवतो महौजसा ॥ ४३

पाणी पृषत्कालिखितावमौ पुनर्
धनुश्च सव्ये विततं सबाणम् ।
पादौ च मे लक्षणतः प्रशस्तौ
न मादृशं युद्धगतं जयन्ति ॥ ४४

हता उदीच्या निहताः प्रतीच्याः
प्राच्या हता दाक्षिणात्या निरस्ताः ।
संशप्तकानां किञ्चिदेवावशिष्टं
सर्वस्य लोकस्य हतं मयाऽर्धम् ॥ ४५

शेते मया निहता शत्रुसेना
छिन्नैर्गात्रैर्भूमितले स्खलन्ती ।
येऽनस्त्रज्ञास्तान् न निहन्मि चास्त्रैस्
तस्मान्न भस्मैव करोमि लोकान् ॥ ४६

सञ्जयः—

इत्येवमुक्त्वा पुनरेव पार्थो
युधिष्ठिरं धर्मभृतां वरिष्ठम् ।

अर्जुनः—

प्रसीद राजन् क्षम यन्मयोक्तं
काले भवान् वेत्स्यति तन्नमस्ते ॥ ४७

सञ्जयः—

ततस्तु पादावुपगृह्य पार्थस्
समुत्थितो दीप्ततेजाः किरीटी ।
प्रसाद्य राजानममित्रसाहं
स्थितोऽब्रवीच्चैनमभिप्रतप्तम् ॥ ४८

अर्जुनः—

याम्येष भीमं समराद्विमोक्तुं
सर्वात्मना सूतपुत्रं च हन्तुम् ।
भवत्प्रियार्थं मम जीवितं हि
ब्रवीमि सत्यं तदवैहि राजन् ॥ ४९

नेदं चिरात् क्षिप्रमिदं भविष्यद्
आवर्ततेऽसावभियामि चैनम् ।
अद्याप्यपुत्रा तेन हतेन राधा
कुन्ती मया वा तदिदं विद्धि राजन् [1]॥ ५०

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां कर्णपर्वणि अष्टसप्ततितमोऽध्यायः ॥ ७८ ॥
॥ ७३ ॥ कर्णपर्वणि अष्टसप्ततितमोऽध्यायः ॥ ७८ ॥*
[अस्मिन्नध्याये ५० श्लोकाः]

॥ एकोनाशीतितमोऽध्यायः ॥

अर्जुनकृतावमानाद्धनं यियासोर्युधिष्ठिरस्य कृष्णेन परिसान्त्वनम् ॥

सञ्जयः—

एतच्छ्रुत्वा पाण्डवो धर्मराजो
भ्रातुर्वाक्यं परुषं चार्जुनस्य ।
उत्थाय तस्माच्छयनादुवाच
पार्थं ततो दुःखपरीतचेताः ॥ १

1. अ—जैत्रं रथं भीममास्थाय कृष्ण
प्रयाति शीघ्रं सूतपुत्रं निहन्तुं ।
इत्येवमुक्त्वा गन्तुमिच्छन् रणाय
समुत्थितो दीप्ततेजाः किरीटी ॥ [अधिकः पाठः]

* अ—कोशे नाष्टाध्यायसमाप्तिर्दृश्यते

युधिष्ठिरः—

कृतं मया पार्थ न साधु कर्म
येन प्राप्तं व्यसनं वस्सुघोरम् ।
तस्माच्छिरश्छिन्धि ममैतदद्य
कुलान्तकस्याधमपूरुषस्य ॥ २

पापस्य पापव्यसनान्वितस्य
विमूढबुद्धेरलसस्य भीरोः ।
वृद्धावमन्तुः परुषस्य चैव
किं ते चिरं मामनुसृत्य रूक्षम् ॥ ३

गच्छाम्यहं वनमद्यैव पापस्
सुखं भवान् वर्ततां मद्विहीनः ।
योग्यो राजा भीमसेनो महात्मा
क्लीबस्य वा किं मम राज्यकृत्यम् ॥ ४

न चास्मि शक्तः परुषाणि सोढुं
पुनस्तवेमानि रुषाऽन्वितस्य ।
भीमोऽस्तु राजा मम जीवितेन
न कार्यमस्यत्र महानुभाव ॥ ५

सञ्जयः—

इत्येवमुक्त्वा सहसोत्पपात
रुषाऽन्वितस्तच्छयनं विहाय ।

इयेष निर्गन्तुमितो वनाय
तं वासुदेवः प्रणतोऽभ्युवाच ॥ ६

श्रीभगवान्—

राजन्नविदितं तत्ते यथा गाण्डीवधन्वनः ।
प्रतिज्ञा सत्यसन्धस्य गाण्डीवं प्रति विश्रुता ॥ ७

ब्रूयाद्य एनं गाण्डीवं देह्यन्यस्मै त्वमित्युत ।
स वध्यस्स्यात् पुमाँल्लोके त्वया ह्युक्तोऽयमीदृशम् ॥ ८

ततस्सत्यां प्रतिज्ञां तां पार्थेन परिरक्षता ।
मच्छन्दादवमानोऽयं कृतस्तव महीपते ॥ ९

गुरूणामवमानो हि वध इत्यभिधीयते ।
तस्मात् क्षम महासत्त्व मम पार्थस्य चोभयोः ॥ १०

व्यतिक्रममिमं राजन् सत्यसंरक्षणं प्रति ।
शरणं त्वां महाराज प्रपन्नौ स्व उभावपि ॥ ११

क्षन्तुमर्हसि मे राजन् प्रणतस्याभियाचतः ।
राधेयस्याद्य पापस्य भूमिः पास्यति शोणितम् ॥ १२

सत्यं ते प्रतिजानामि हतं विद्ध्यद्य सूतजम् ।
यस्येच्छसि वधं तस्य गतमेवाद्य जीवितम् ॥ १३

सञ्जयः—

इति कृष्णवचश्श्रुत्वा धर्मराजो युधिष्ठिरः ।
ससम्भ्रमं हृषीकेशम् उत्थाप्य प्रणतं तदा ॥ १४

कृताञ्जलिमुवाचेदं वाक्यं यत् समनन्तरम् ॥ १४॥

युधिष्ठिरः—

एवमेतद्यथाऽऽत्थ त्वम् अस्त्वेषोऽतिक्रमो मम ।
अनुनीतोऽस्मि गोविन्द तारितश्चास्मि माधव ॥ १५॥

मोक्षिता आपदो घोराद् वयमद्य त्वयाऽच्युत ॥ १६

[1]भवन्तं नावमासाद्य ह्यावां व्यसनसागरात् ।
घोरादद्य समुत्तीर्णावुभावज्ञानमोहितौ ॥ १७

त्वद्बुद्धिप्लवमासाद्य दुःखशोकार्णवाद्वयम् ।
समुत्तीर्णास्सहामात्यास् सनाथास्स्म त्वयाऽच्युत ॥ १८

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि एकोनाशीतितमोऽध्यायः ॥ ७९ ॥
॥ ७३ ॥ कर्णपर्वणि एकोनाशीतितमोऽध्यायः ॥ ७९ ॥
[अस्मिन्नध्याये १८ श्लोकाः]

॥ अशीतितमोऽध्यायः ॥

अर्जुनेन स्वावमानितस्य युधिष्ठिरस्य प्रसादनम् ॥ १ ॥
अर्जुनेन युधिष्ठिराग्रे कर्णवधप्रतिज्ञानम् ॥ २ ॥

सञ्जयः—

इति स्म कृष्णवचनात् प्रत्युच्चार्य युधिष्ठिरम् ।
बभूव विमनाः पार्थः किञ्चित् कृत्वेव पातकम् ॥ १

1. अ—नास्तीदमर्धम्

ततोऽब्रवीद्वासुदेवः प्रहसन्निव पाण्डवम् ॥ १॥

श्रीभगवान्—

कथं नाम भवेदेतद् यदि त्वं पार्थ धर्मजम् ।
असिना तीक्ष्णधारेण हन्या धर्मे व्यवस्थितम् ॥ २॥

त्वमित्युक्त्वा तु राजानम् एवं कश्मलमाविशः ।
हत्वा तु नृपतिं पार्थ करिष्यसि किमुत्तरम् ॥ ३॥
एवं हि दुर्विदो धर्मो मन्दप्रज्ञैर्विशेषतः ॥ ४

स भवान् धर्मभीरुत्वाद् ध्रुवं यायान्महत्तमः ।
नरकं घोररूपं च भ्रातुर्ज्येष्ठस्य वै वधात् ॥ ५

स त्वं धर्मभृतां श्रेष्ठं राजानं संशितव्रतम् ।
प्रसादय कुरुश्रेष्ठम् एतदत्र मतं मम ॥ ६

[1]प्रसाद्य भक्त्या राजानं प्रीते चैव युधिष्ठिरे ।
प्रयावस्त्वरया योद्धुं सूतपुत्रवधं प्रति ॥ ७

हत्वाऽद्य समरे कर्णं त्वं पार्थ निशितैश्शरैः ।
विपुलां प्रीतिमाधत्स्व धर्मपुत्राय मानद ॥ ८

एतदत्र महाबाहो प्राप्तकालं मतं मम ।
एवं कृते कृतं चैव तव कार्यं भविष्यति ॥ ९

---

1. ङ—एवं कृते कृतं चैव तव कार्यं भविष्यति ।

[अधिकः पाठः]

सञ्जयः—

ततोऽर्जुनो महाराज लज्जया वै समन्वितः ।
धर्मराजस्य चरणौ प्रपीड्य शिरसाऽनघः ॥ १०

उवाच भरतश्रेष्ठं प्रसीदेति पुनः पुनः ॥ १०॥

अर्जुनः—

क्षमस्व राजन् यत् प्रोक्तस् त्वं मया धर्मभीरुणा ॥ ११

सञ्जयः—

पादयोः पतितं दृष्ट्वा धर्मराजो युधिष्ठिरः ।
धनञ्जयमभित्रघ्नं रुदन्तं भरतर्षभः ॥ १२

उत्थाप्य भ्रातरं राजा धर्मराजो धनञ्जयम् ।
समाश्लिष्य च सस्नेहं प्ररुरोद महीपतिः ॥ १३

रुदित्वा सुचिरं कालं भ्रातरौ तौ महाद्युती ।
कृतशौचौ नरव्याघ्रौ प्रीतिमन्तौ बभूवतुः ॥ १४

समाश्लिष्य च बाहुभ्यां मूर्ध्न्युपाघ्राय पाण्डवम् ।
प्रीत्या परमया युक्तः प्रस्मयंश्चाब्रवीद्वचः ॥ १५

युधिष्ठिरः—

कर्णेन मे महाबाहो सर्वसैन्यस्य पश्यतः ।
हतस्सूतो धनुश्चैव रथश्शक्तिश्शरा ध्वजः ॥ १६

शरैः कृत्ता महेष्वास यतमानस्य संयुगे ॥ १६॥

सोऽहं दृष्ट्वा रणे तस्य कर्म कर्णस्य फल्गुन ।
व्यवसीदामि दुःखेन न तु मे जीवितं प्रियम् ॥ १७॥

त्वमद्य यदि वै वीरं न हनिष्यसि संयुगे ।
प्राणानेव परित्यक्ष्ये जीवितार्थो हि को मम ॥ १८॥

सञ्जयः—

एवमुक्तः प्रत्युवाच विजयो भरतर्षभम् ॥ १९

अर्जुनः—

सत्येन ते शपे राजंस् त्वत्पादेन तथैव च ।
भीमेन च नरव्याघ्र यमाभ्यां च महीपते ॥ २०

[1]अहमेनं नरश्रेष्ठ सामात्यं च महीपते ॥ २०॥

यथाऽद्य समरे कर्णं हनिष्यामि हतोऽपि वा ।
महीतले पतिष्यामि सत्येनैव च ते शपे ॥ २१॥

सञ्जयः—

एवमाभाष्य राजानम् अब्रवीन्माधवं वचः ॥ २२

अर्जुनः—

अद्य कर्णं रणे कृष्ण सूदयिष्ये न संशयः ।
त्वमनुध्याहि भद्रं ते वधं तस्य दुरात्मनः ॥ २३

सञ्जयः—

एवमुक्तोऽब्रवीत् पार्थं केशवो राजसत्तम ॥ २३॥

---

1. अ—नास्तीदमर्धम्

श्रीभगवान्—

शक्तोऽसि भरतश्रेष्ठ यत्नं कर्तुं यदात्थ माम् ॥ २४

एष चापि हि मे कामो नित्यमेव महाबल ।
कथं भवान् रणे कर्णं निहन्यादिति फल्गुन ॥ २५

सञ्जयः—

एवमुक्तस्ततो राजन पार्थो वचनमब्रवीत् ॥ २५॥

अर्जुनः—

हन्यते द्वैरथे भूयो युज्यन्तां वै हयोत्तमाः ।
उपावृत्ताश्च तुरगाश् शिक्षिताश्चैव सादिभिः ॥ २६॥

आयुधानि च सर्वाणि सज्जय त्वं महारथे ।
रथोपकरणैस्सर्वैस् सत्वरं यातु मे रथः ॥ २७॥

सञ्जयः—

एवमुक्तो महाराज फल्गुनेन महात्मना ।
[1]उवाच दारुकं कृष्णः कुरु सर्वं यदब्रवीत् ॥ २८॥

अर्जुनो भरतश्रेष्ठश् श्रेष्ठस्सर्वधनुष्मताम् ॥ २९

आज्ञप्तस्त्वथ कृष्णेन दारुको राजसत्तम ।
योजयामास च रथं वैयाघ्रं शत्रुतापनम् ॥ ३०

युक्तं तु रथमास्थाय दारुकेण महात्मना ।
उपस्थितं रथं दृष्ट्वा पद्मनाभो रणान्तकृत् ॥ ३१

1. अ—पञ्चार्धानि नसन्ति

भूयश्चोवाच मतिमान् माधवो धर्मनन्दनम् ॥ ३१॥

श्रीभगवान्—

[1]युधिष्ठिरेह बीभत्सुं त्वं सान्त्वयितुमर्हसि ।
अनुज्ञातुं च कर्णस्य वधायाशु दुरात्मनः ॥ ३२॥

श्रुत्वा ह्यावां महासङ्ख्ये त्वां कर्णशरपीडितम् ।
प्रवृत्तिं ज्ञातुमायाताविह पाण्डवनन्दन ॥ ३३॥

दिष्ट्या ऽसि राजन् विरुजो दिष्ट्या न ग्रहणं गतः ।
परिसान्त्वय बीभत्सुं जयमाशास्व चानघ ॥ ३४॥

युधिष्ठिरः—

एह्येहि वीर बीभत्सो मां परिष्वज पाण्डव ।
वक्तव्यमुक्तोऽस्म्यहितं त्वया क्षान्तं च तन्मया ॥ ३५॥

अहं त्वामनुजानामि जहि कर्णं धनञ्जय ।
मन्युं च मा कृथाः पार्थ यन्मयोक्तोऽसि दारुणम् ॥ ३६॥

सञ्जयः—

ततो धनञ्जयो राजञ् शिरसा प्रणतः पुनः ।
पादौ जग्राह पाणिभ्यां भ्रातुर्ज्येष्ठस्य मारिष ॥ ३७॥

तमुत्थाप्य ततो राजा परिष्वज्य च पीडितम् ।
मूर्ध्न्युपाघ्राय चैवैनम् इदं पुनरुवाच ह ॥ ३८॥

---

1. ख—नासीदमर्षम्

युधिष्ठिरः—

धनञ्जय महाबाहो मानितोऽस्मि दृढं त्वया ।
माहात्म्यं विजयं चापि भूयः प्राप्नुहि शाश्वतम् ॥ ३९॥

अर्जुनः—

अद्य तं पापकर्माणं सानुबन्धं रणे शरैः ।
नयाम्यन्तं समासाद्य राधेयं बलगर्वितम् ॥ ४०॥

येन त्वं पीडितो बाणैर् दृढमायम्य कार्मुकम् ।
तस्याद्य कर्मणः कर्णः फलं प्राप्स्यति दारुणम् ॥ ४१॥

अद्य त्वामुपयास्यामि कर्णं हत्वा महीपते ।
सभाजये त्वामाक्रन्दाद् इति सत्यं ब्रवीमि ते ॥ ४२॥

नाहत्वा विनिवर्तिष्ये कर्णमद्य रणाजिरात् ।
इति सत्येन ते पादौ स्पृशामि जगतीपते ॥ ४३॥

सञ्जयः—

इति ब्रुवाणं सुमनाः किरीटिनं
युधिष्ठिरः प्राह वचो बृहत्तदा ॥ ४४

युधिष्ठिरः—

यशोऽक्षयं जीवितमीप्सितं जयं
सदाबलं वीर्यमरिक्षयं सुखम् ।
प्रयाहि वृद्धिं च दिशन्तु देवता
यथाऽहमिच्छामि तथाऽतु तच्च ते ॥ ४५

प्रयाहि कर्णं जहि शीघ्रमाहवे
पुरन्दरो वृत्रमिवात्मवृद्धये ॥ ४५॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि अशीतितमोऽध्यायः ॥ ८० ॥
॥ ७३ ॥ कर्णपर्वणि अशीतितमोऽध्यायः ॥ ८० ॥
[अस्मिन्नध्याये ४५॥ श्लोकाः]

॥ एकाशीतितमोऽध्यायः ॥

कर्णेन योद्धुं निर्गच्छतोऽर्जुनस्य शुभनिमित्तप्रादुर्भावः ॥ १ ॥
श्रीकृष्णेनार्जुनस्य प्रोत्साहनम् ॥ २ ॥

सञ्जयः—

प्रसाद्य धर्मराजानं प्रहृष्टेनान्तरात्मना ।
सम्पूज्य देवतास्सर्वा ब्राह्मणान् स्वस्ति वाच्य च ॥ १
कृतमङ्गलकल्याण आरुरोह रथोत्तमम् ॥ १॥
तस्य राजा महाप्राज्ञो धर्मराजो युधिष्ठिरः ।
आशिषः परमा युङ्क्त युक्तः कर्णवधं प्रति ॥ २॥
प्रयान्तं तं महेष्वासं दृष्ट्वा भूतानि भारत ।
निहतं मेनिरे कर्णं पाण्डवेन महात्मना ॥ ३॥
बभूवुर्विमला राजन् दिशस्सर्वास्समन्ततः ॥ ४

चाषाश्च शतपत्राश्च क्रौञ्चाश्चैव जनेश्वर ।
प्रदक्षिणमकुर्वन्त पाण्डवं पाण्डुपूर्वज ॥ ५

बहवः पक्षिणो राजन् पुन्नामानश्शिवाश्शुभाः ।
त्वरयन्तोऽर्जुनं सङ्ख्ये सम्प्रहृष्टा ववाशिरे ॥ ६

कङ्का गृध्रा वलाश्चैव वायसाश्च विशां पते ।
अगच्छन्नग्रतस्तस्य भक्ष्यहेतोर्भयानकाः ॥ ७

धन्यानि च निमित्तानि पाण्डवस्य शशंसिरे ।
विनाशमरिसेनायाः कर्णस्य च वधं तथा ॥ ८

[1]निमित्तानि च शुभ्राणि रुतं च मृगपक्षिणाम् ॥ ८॥

प्रयातस्य हि पार्थस्य महान् स्वेदोऽभ्यजायत ।
चिन्ता च विपुला तीव्रा कथमेतद् भविष्यति ॥ ९॥

विषण्णं तु ततो ज्ञात्वा सव्यसाचिनमच्युतः ।
सञ्चोदयति तेजस्वी मधुहा वानरध्वजम् ॥ १०॥

ततो गाण्डीवधन्वानम् अब्रवीन्मधुसूदनः ।
दृष्ट्वा पार्थं तथा यान्तं चिन्तापरिगतं तदा ॥ ११॥

श्रीभगवान्—

गाण्डीवधन्वन् सङ्ग्रामे ये त्वया धनुषा जिताः ।
न तेषां मानुषो जेता त्वदन्य इह विद्यते ॥ १२॥

---

1. अ-ख—नास्तीदमधैम्

एते हि बहवश्शूराश् शक्रतुल्यपराक्रमाः ।
त्वां प्राप्य समरे पार्थ प्रयाताः परमां गतिम् ॥ १३॥

को हि द्रोणं तथा भीष्मं भगदत्तं जयद्रथम् ।
बिन्दानुविन्दावावन्त्यौ काम्भोजं च सुदक्षिणम् ॥ १४॥

श्रुतायुं चाश्रुतायुं च शतायुं च महारथम् ।
प्रत्युद्गम्य भवेत् क्षेमी यो न स्यात् त्वद्विधः प्रभुः ॥ १५॥

अस्त्राणि तव दिव्यानि लाघवं बलमेव च ।
वेधः पातश्च लक्ष्यस्य लघुता च तवार्जुन ॥ १६॥

असम्मोहस्तथा युद्धे धनुषोऽस्य च सन्नतिः ।
भवान् देवान् सगन्धर्वान् हन्यात् सर्वांश्च राक्षसान् ॥ १७॥

पृथिव्यां हि रणे पार्थ त्वत्समो नास्ति विक्रमे ॥ १८

धनुर्गृह्णन्ति ये केचित् क्षत्रिया भुवि भारत ।
आत्मनस्तु समं तेषां न पश्यामि शृणोमि वा ॥ १९

ब्रह्मणा हि प्रजास्सृष्ट्वा गाण्डीवं च धनुर्वरम् ।
तेन त्वं युध्यसे सेनां तस्मान्नास्ति समस्त्वया ॥ २०

न च प्रमुखतो वाच्यो भवानेतद्वचो मया ।
मानितस्य महादर्पो भविष्यति रणेऽर्जुन ॥ २१

अवश्यमेतद्वाच्यं मे तेन त्वां प्रब्रवीम्यहम् ॥ २१॥

अतिमानाच्च ते नात्मा मन्तव्यो वै कथञ्चन ।

जीवमाने रणे कर्णे सूतपुत्रे महारथे[1] ॥ २२॥

त्वत्समं त्वद्विशिष्टं वा कर्णं मन्ये परन्तप ।
अवश्यं यत्नमास्थाय त्वया वध्यो महाहवे ॥ २३॥

तेजसा ह्यग्निसदृशो वायुवेगसमो जवे ।
अन्तकप्रतिमः कोपे वज्रसंहननो बले ॥ २४॥

अष्टारत्निर्महाबाहुर् व्यूढोरस्कस्सुदुर्जयः ।
अभिमानी च शूरश्च प्रवीरः प्रियदर्शनः ॥ २५॥

सर्वैर्योधगुणैर्युक्तो मित्राणामभयङ्करः ।
सततं पाण्डवद्वेष्टा धार्तराष्ट्रहिते रतः ॥ २६॥

सर्वैरवध्यो राधेयो देवैरपि सवासवैः ।
ऋते त्वयेति मे बुद्धिस् तमद्य जहि भारत ॥ २७॥

कर्णो हि बलवान् धृष्टः कृतास्त्रश्च महाबलः ।
कृती च चित्रयोधी च देशकालस्य कोविदः ॥ २८॥

न हि कर्णं समासाद्य शक्तो हि स्यात् पुरन्दरः ।
क्षेमी प्रत्यागमेत् पार्थ तादृशोऽस्य पराक्रमः ॥ २९॥

त्वां तु प्राप्य महारङ्गे यत्नवानपि भारत ।
निवर्तेत रणात् कर्ण इति मे धीयते मतिः ॥ ३०॥

---

1. घ—धनुर्गृह्णन्ति ये केचित् क्षत्रिया भुवि भारत ।
आत्मनस्तु समं तेषां न पश्यामि शृणोमि वा ॥ [अधिकः पाठः]

देवैरपि हि संरब्धैस् सर्वलोकेश्वरैरपि ।
अशक्यं तं रणे मन्ये जेतुं प्रतियुयुत्सुभिः ॥ ३१॥

दुरात्मानं पापवृत्तं नृशंसं
दुष्टात्मानं पाण्डवेयेषु नित्यम् ।
सुयोधनार्थं पाण्डवेयैर्विरुद्धं
हत्वा कर्णं निष्ठितार्थो भवाद्य ॥ ३२॥

अधिकं मन्यते त्मानं येन पापस्सुयोधनः।
तमद्य मूलं पापानां जहि कर्णमरिन्दम ॥ ३३॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि एकाशीतितमोऽध्यायः ॥ ८१ ॥
॥ ७३ ॥ कर्णपर्वणि एकाशीतितमोऽध्यायः ॥ ८१ ॥
[अस्मिन्नध्याये ३३॥ श्लोकाः]

॥ द्व्यशीतितमोऽध्यायः ॥

कृष्णेनार्जुनं प्रति भीष्मादियुद्धनिधनप्रकारानुवादपूर्वकं तेषां वधे तस्यैव मुख्यकारणत्वकथनम् ॥ १ ॥ बाल्यात्प्रभृति दुर्योधनापनयानुस्मारणपूर्वकं सर्वत्र कर्णस्यैव मूलतया महापराधित्वद्योतनेन तस्यावश्यं हननविधानम् ॥ २ ॥

सञ्जयः—

ततः पुनरमेयात्मा केशवोऽर्जुनमब्रवीत् ।
कृतसङ्कल्पमायान्तं वधे कर्णस्य भारत ॥ १

श्रीभगवान्—

अद्य सप्तदशाहानि वर्तमानस्य नित्यशः ।
विनाशस्यास्य घोरस्य नरवारणवाजिनाम् ॥ २

भूत्वा च विपुला सेना तावकानां परैस्सह ।
अन्योन्यं समरे प्राप्य किञ्चिच्छेषा महाहवे ॥ ३

भूत्वा हि कौरवाः पार्थ प्रभूतगजवाजिनः ।
विनष्टास्त्वां समासाद्य विक्षिपन्तं महद्धनुः ॥ ४

एते वै पृथिवीपालास् सृञ्जयाश्च सहान्वयाः ।
त्वां समासाद्य वर्धन्ते पाण्डवाश्च व्यवस्थिताः ॥ ५

पाञ्चालैः पाण्डवैर्मात्स्यैः करूशैश्चेदिकाशिभिः ।
मगधैः पार्वतीयैश्च दाक्षिणात्यैस्सकेरलैः ॥ ६

त्वया गुप्तैरमित्रघ्न कृतश्शत्रुगणक्षयः ॥ ६॥

को हि शक्तो रणे जेतुं कौरवान् पार्थ सङ्गतान् ।
अन्यत्र पाण्डवाद्युद्धे श्वेताश्वाद्वानरध्वजात् ॥ ७॥

त्वं हि शक्तो रणे जेतुं ससुरासुरमानुषम् ।
लोकत्रयं समुद्युक्तं किं पुनः कौरवं बलम् ॥ ८॥

भगदत्तं हि राजानं कोऽन्यश्शक्तस्त्वया विना ।
जेतुं भरतशार्दूल योऽपि स्याद्वासवोपमः ॥ ९॥

तथेमां विपुलां सेनां गुप्तां पार्थ त्वयाऽनघ ।
न शक्ताः पार्थिवास्सर्वे चक्षुर्भ्यामपि वीक्षितुम् ॥ १०॥

तथैव सततं पार्थ रक्षिताभ्यां त्वया रणे ।
धृष्टद्युम्नाशिखण्डिभ्यां द्रोणभीष्मौ निपातितौ ॥ ११॥

को हि शक्तो रणे पार्थ पाञ्चालानां महात्मनाम् ।
भीष्मद्रोणौ रणे जेतुं शक्रतुल्यपराक्रमौ ॥ १२॥

को हि शान्तनवं भीष्मं द्रोणं वैकर्तनं कृपम् ।
द्रौणिं च सौमदत्तिं च कृतवर्माणमेव च ॥ १३॥

सैन्धवं मद्रराजं च राजानं च सुयोधनम् ।
[1]वीरान् कृतास्त्रान् समरे सर्वानेवानिवर्तिनः ॥ १४॥

अक्षौहिणीपतीन् सर्वान् संरब्धान् युद्धदुर्मदान् ॥ १५

1. क—अर्धचतुर्थं नास्ति

श्रेण्यश्च बहुला राजन्नुदीर्णाश्वरथद्विपाः ।
नानाजानपदाश्चोग्राः क्षत्रियाणाममर्षिणाम् ॥ १६
गणाश्च दाशमीयानां वसातीनां च भारत ।
[1]नानादेशसमुत्थाश्च नानादेशसमुद्भवाः ॥ १७
त्वां समासाद्य बीभत्सो हता नागाश्च संयुगे ॥ १७॥
प्राच्यानां मागधानां च भोजानामनिवर्तिनाम् ॥ १८
उदीर्णाश्वगजा सेना सर्वक्षत्रस्य भारत ।
त्वां समासाद्य विलयं गता साश्वरथद्विपा ॥ १९
उग्राश्च बहुलाः क्रूरा [2]स्तुषारा यवनाश्शकाः ।
दर्पाभिसारा दरदाः खषा परमतक्कणाः ॥ २०
[3]आन्ध्रजाश्च कुणिन्दाश्च किराताश्चोग्रविक्रमाः ।
म्लेच्छाश्च पार्वतीयाश्च सागरानूपवासिनः ॥ २१
संरम्भिणो युद्धशौण्डा बलिनोऽथास्त्रपाणयः ॥ २१॥
एते सुयोधनस्यार्थे संरब्धाः कुरुभिस्सह ।
न शक्या युधि निर्जेतुं त्वदन्येन परन्तप ॥ २२॥
धार्तराष्ट्रमुदग्रं हि दृष्ट्वा व्यूढं महद्बलम् ।
यस्य त्वं न भवेत्त्राता कः प्रतीपमभिव्रजेत् ॥ २३॥

---

1. अ—अर्धचतुष्टयं नास्ति
2. क-ख-घ—गान्धारा
3. क—अन्धकाश्च ख—अत्यन्तकाश्च तूर्णन्ता घ—आहुकाश्च

तं सागरमिवोद्भूतं सैन्यसागरमक्षयम् ।
विदार्य पाण्डवैर्युद्धे त्वया गुप्तैर्हताः परे ॥ २४॥
मागधानामधिपतिर् जयत्सेनो महाबलः ।
अद्य सप्त दिने नष्टस् स च सङ्ख्येऽभिमन्युना ॥ २५॥
ततो दश सहस्राणि गजानां भीमकर्मणाम् ।
जघान गदया भीमस् तस्य राज्ञः परिच्छदम् ॥ २६॥
तथाऽन्ये निहता नागा योधाश्च शतशो हताः ।
भीमेन सहसा पार्थ वर्तमाने महाहवे ॥ २७॥
भीमसेनं समासाद्य त्वां च पाण्डव कौरवाः ।
सवाजिनरनागाश्च मृत्युलोकमितो गताः ॥ २८॥
ततस्सेनामुखे तस्मिन् निहते तत्र पाण्डवैः ।
भीष्मः प्रासृजदुग्राणि शरजालानि सङ्गशः ॥ २९॥
सचेदिकान् सपाञ्चालान् करूशान् मत्स्यकेकयान् ।
शरैः प्रच्छादयाञ्चक्रे प्रवरस्सर्वधन्विनाम् ॥ ३०॥
तस्य चापाच्युतैर्बाणैः परदेहविदारणैः ।
पूर्णमाकाशमभवद् रुक्मपुङ्खैरजिह्मगैः ॥ ३१॥
गत्वा दशम्या ते तत्र जघ्नुर्वाजिनरद्विपान् ।
[1]हित्वा भवद्गतिं दुष्टां स बाणैर्वा यतोऽचरन् ॥ ३२॥

1. क-ङ—भित्त्वा तव गतिं घृष्टः सबाणैर्व्यायते चरत्
ब—हित्वा नवगतीरुष्टः

दिनानि दश भीष्मेण हतं यौधिष्ठिरं बलम् ।
शून्याः कृता रथोपस्था हताश्च गजवाजिनः ॥ ३३॥

दशमेऽहनि सम्प्राप्ते कृत्वा घोरं पराक्रमम् ।
दर्शयित्वाऽऽत्मनो वीर्यं रुद्रोपेन्द्रसमं भुवि ॥ ३४॥

पाण्डवानामनीकानि प्रविगाह्य विशां पते ।
विनिघ्नन् पृथिवीपालांश् चेदिपाञ्चालकेकयान् ॥ ३५॥

अहनत् पाण्डवीं सेनां गजाश्वरथसङ्कुलाम् ।
मज्जन्तमप्लवे मन्दम् उज्जिहीर्षुस्सुयोधनम् ॥ ३६॥

तथा चरन्तं सङ्ग्रामे तपन्तमिव भास्करम् ।
[1]पदातिकोटिसाहस्राः प्रवरायुधपाणयः ॥ ३७॥

न शेकुस्सृञ्जया द्रष्टुं तथैवान्ये महीक्षितः ॥ ३८

विचरन्तं तथा तं तु सङ्ग्रामे जितसाध्वसम् ।
सर्वोद्योगेन सहसा पाण्डवास्समभिद्रवन् ॥ ३९

स तु विद्राव्य समरे पाण्डवान् सृञ्जयानपि ।
एक एव रणे भीष्म एकवीरत्वमागतः ॥ ४०

तं शिखण्डी समासाद्य त्वया गुप्तो महाव्रतम् ।
मृत्युर्जातोऽवधीद्भीष्मं शरौघैः पातयन् रथात् ॥ ४१

स एष पतितश्शेते शरतल्पे पितामहः ।

---

1. क-ख-घ—नास्तीदमर्धम्

त्वां प्राप्य पुरुषव्याघ्रं वृत्रः प्राप्येव वज्रिणम् ॥ ४२

द्रोणः पञ्च दिनान्युग्रो विधम्य रिपुवाहिनीम् ।
कृत्वा व्यूहं महायुद्धे पातयित्वा महारथान् ॥ ४३

जयद्रथस्य समरे कृत्वा रक्षां महारथः ।
अन्तकप्रतिमश्चोग्रो रात्रियुद्धेऽदहत् प्रजाः ॥ ४४

पञ्चमे दिवसे वीरो भारद्वाजः प्रतापवान् ।
धृष्टद्युम्नं समासाद्य गतस्स परमां गतिम् ॥ ४५

यदि चैव भवान् युद्धे सूतपुत्रमुखान् रथान् ।
न वारयति सङ्ग्रामे कस्माद्द्रोणमसौ जयेत् ॥ ४६

भवता तद्बलं सर्वं धार्तराष्ट्रस्य वारितम् ।
ततो द्रोणो हतो युद्धे पार्षतेन धनञ्जय ॥ ४७

कश्च शक्तो रणे कर्तुं त्वदन्यः पुरुषर्षभ ।
यादृशं ते कृतं पार्थ जयद्रथवधं प्रति ॥ ४८

विदार्य सेनां महतीं हत्वा शूरांश्च पार्थिवान् ।
निहतस्सैन्धवो राजा त्वयाऽस्त्रबलतेजसा ॥ ४९

आश्चर्यं सिन्धुराजस्य मन्यन्ते क्षत्रिया वधम् ।
अनाश्चर्यं [1]महं मन्ये त्वं तु पार्थ महारथः ॥ ५०

---

1. क—ऋते त्वत्स्थमस्त्रं ख—महत्त्वेतदस्त्रं पार्थ महारथ
घ—मम त्वेतत् त्वत्स्थं

त्वां हि प्राप्य रणे क्षत्रम् एकाह्ना पुरुषोत्तम ।
नश्यमानमिदं युद्धे मन्ये जानन् बलं तव ॥ ५१

सेयं पार्थ चमूर्घोरा धार्तराष्ट्रस्य संयुगे ।
हतसर्वस्वभूयिष्ठा भीष्मद्रोणौ यदा हतौ ॥ ५२

शीर्णप्रवरयोधाढ्या हतवाजिरथद्विपा ।
हीना सूर्येन्दुनक्षत्रैर् द्यौरिवाभाति भारती ॥ ५३

विध्वस्ता हि रणे पार्थ सेनेयं भीमविक्रमैः ।
आसुरीव महासेना देवराजपराक्रमैः ॥ ५४

तेषां हतावशिष्टास्तु सन्ति पञ्च महारथाः ।
द्रौणिश्च कृतवर्मा च कर्णो मद्राधिपः कृपः ॥ ५५

तांस्त्वमद्य नरव्याघ्र हत्वा पञ्च महारथान् ।
हतामित्रां प्रयच्छोर्वीं राज्ञे सद्वीपपत्तनाम् ॥ ५६

द्रोणपुत्रं कृपं शल्यं भोजमातिरथिं तथा ।
एतांस्तु वै नरव्याघ्र हत्वा वीरान् महारथान् ॥ ५७

साकाशजलपातालां सपर्वतमहावनाम् ।
प्रयच्छामितवीर्याय पार्थायाद्य वसुन्धराम् ॥ ५८

एतान् हत्वा महाबाहो पुरा विष्णुरिवासुरान् ।
प्रयच्छ मेदिनीं राज्ञे शक्रायेव पुरा हरिः ॥ ५९

अद्य मोदन्तु पाञ्चाला निहतेष्वरिषु त्वया ।

विष्णुना निहतेष्वेव दानवेषु दिवौकसः ॥ ६०

यदि वा द्विपदां श्रेष्ठं द्रोणं मानयतो गुरुम् ।
अश्वत्थाम्नि कृपा तेऽस्ति कृपे च भरतर्षभ ॥ ६१

अत्यन्तसम्मतान् बन्धून् मानयन् मातृबान्धवान् ।
कृतवर्माणमासाद्य प्रेषयैनं यमक्षयम् ॥ ६२

[1]भ्रातरं मातुरासाद्य शल्यं मद्रजनाधिपम् ।
यदि त्वमरविन्दाक्ष न जिघांससि मानयन् ॥ ६३

एतत् ते सुकृतं कर्म नात्र किञ्चन विद्यते ।
वयमप्यनुजानीमो नात्र दोषोऽस्ति कश्चन ॥ ६४

इमं पापमतिं दुष्टम् अत्यन्तं पाण्डवान् प्रति ।
कर्णमद्य युधां श्रेष्ठ जहि पार्थ शितैश्शरैः ॥ ६५

दहनं यत् सपुत्राया निशि मातुस्त्वानघ ।
द्यूतं यच्चैव युष्माकं प्रावर्तत सुयोधनात् ॥ ६६

तत्र सर्वत्र दुष्टात्मा कर्णः पापकृतां वरः ।
प्रोत्साहयद्दुरात्मानं धातराष्ट्रं सुदुर्मतिः ॥ ६७

समितौ नर्दते कर्णस् तमद्य जहि भारत ॥ ६७॥

यच्च युष्मासु पापं वै धातराष्ट्रः प्रयुक्तवान् ।
तस्य सर्वस्य दुर्बुद्धिः कर्णो मूलमिहार्जुन ॥ ६८॥

---

1. अ—नास्तीदमर्धम्

कर्णं हि मन्यंते त्राणं नित्यमेव सुयोधनः ॥ ६९
ततो मामपि संरब्धो निग्रहीतुं पराक्रमात् ।
स्थिता बुद्धिर्नरेन्द्राणां धार्तराष्ट्रस्य चाभि भो ॥ ७०
कर्णः पार्थान् रणे सर्वान् नाशयिष्यति सायकैः ॥ ७०॥
कर्णमाश्रित्य कौन्तेय धार्तराष्ट्रस्य विग्रहः ।
रुचितो भवता सार्धं जानतोऽपि बलं तव ॥ ७१॥
कर्णो जल्पति वै नित्यम् अहं पार्थान् समागतान् ।
वासुदेवं च दाशार्हं विजेष्यामि महारणे ॥ ७२॥
समितौ वल्गते कर्णस् तमद्य जहि भारत ॥* ७३

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि द्व्यशीतितमोऽध्यायः ॥ ८२ ॥
॥ ७३ ॥ कर्णपर्वणि द्व्यशीतितमोऽध्यायः ॥ ८२ ॥
[अस्मिन्नध्याये ७३ श्लोकाः]

॥ द्व्यशीतितमोऽध्यायः ॥

भगवता कर्णकृतापनयानुस्मारणपूर्वकम् अर्जुनं प्रति कर्णवधचोदनम् ॥

श्रीभगवान्—
निर्मनुष्याश्च मातङ्गा विरथाश्च महारथाः ।
[1]प्राद्रवन्ति स्म समरे दिशो भीताऽभिमन्यवे ॥ १

* ख—नास्त्यध्यायसमाप्तिर्दृश्यते 1. अ—नास्तीदमर्धम्

यच्च तद् धार्तराष्ट्राणां षड्भिश्शूरैर्महारथैः ।
पश्यतां समरे पुत्रं सौभद्रमपराजितम् ॥ २

द्रोणद्रौणिकृपान् वीरान् कम्पयानं महेषुभिः ।
विधमन्तमनीकानि प्रमर्दन्तं महारथान् ॥ ३

मनुष्यवाजिमातङ्गान् प्रेषयन्तं यमक्षयम् ।
शरैस्सौभद्रमायान्तं दहन्तमरिवाहिनीम् ॥ ४

विगतासूंश्च तुरगान् पत्तीन् व्यायुधजीवितान् ।
कुर्वाणमृषभस्कन्धं कुरुवृष्णियशस्करम् ॥ ५

[1]तन्मे दहति गात्राणि सखे सत्येन ते शपे ॥ ५॥

यत् तत्रासीत् सुदुष्टात्मा कर्णो विनिहतप्रभः ।
न शक्तो ह्यभिमन्योस्तु कर्णस्स्थातुं रणेऽग्रतः ॥ ६॥

सौभद्रशरनिर्भिन्नो विसंज्ञश्शोणितोक्षितः ।
निश्वसन् क्रोधदीप्ताक्षो विमुखस्सायकार्दितः ॥ ७॥

तस्थौ स विह्वलस्सङ्ख्ये प्रहारजनितच्छविः ॥ ८

अपयानकृतोत्साहो निरुत्साहश्च भारत ।
दुर्योधनं रणे दृष्ट्वा लज्जमानो मुहुर्मुहुः ॥ ९

---

1. अ-क-ख-ङ—यच्च युष्मासु वै पापं धार्तराष्ट्रः प्रयुक्तवान् ।
तस्यायमनृजुः पापः कर्ण एव कृतो मुखम् ॥
[अधिकः पाठः]

नापयासीत् तदा पार्थ सोऽभिमन्योर्महारणे ॥ ९॥

दृष्ट्वा द्रोणं वधोपायम् अभिमन्योस्तु पृष्टवान् ।
श्रुत्वा द्रोणवचः क्रूरं ततश्चिच्छेद कार्मुकम् ॥ १०॥

ततश्छिन्नायुधं तेन दृष्ट्वा पञ्च महारथाः ।
स चैव निकृतिप्रज्ञः प्रावृणोच्छरवृष्टिभिः ॥ ११॥

[1]तस्मिन् विनिहते वीरे सर्वेषां दुःखमाविशत् ।
प्राहसत् स तु दुष्टात्मा कर्णो राजा च कौरवः ॥ १२॥

यच्च कर्णोऽब्रवीत् कृष्णां सभायां परुषं वचः ।
प्रमुखे पाण्डवेयानां कुरूणां चैव पश्यताम् ॥ १३॥

विनष्टाः पाण्डवाः कृष्णे शाश्वतं नरकं गताः ।
पतिमन्यं पृथुश्रोणि वृणीष्व मृदुगामिनि ॥ १४॥

लेखाभ्र धृतराष्ट्रस्य दासीभूता निवेशनम् ।
प्रविशारालपक्ष्माक्षि न सन्ति पतयस्तव ॥ १५॥

न पाण्डवाः प्रभवन्ति तव कृष्णे कथञ्चन ।
दासभार्योऽसि पाञ्चालि स्वयं दासी च शोभने ॥ १६॥

अद्य दुर्योधनो लोकः पृथिव्यां नृपतिस्स्मृतः ।
सर्वे चास्य महीपाला योगक्षेममुपासते ॥ १७॥

---

1. क-ख-घ-ङ—नासीदमर्षम्

पश्येदानीं यथा भद्रे विनष्टाः पाण्डवास्समम् ।
अन्योन्यं समुदीक्षन्ते धार्तराष्ट्रस्य तेजसा ॥ १८॥

व्यक्तं षण्डतिला ह्येते नरके च निमज्जिताः ।
प्रेष्यवच्चापि राजानम् उपस्थास्यन्ति कौरवम् ॥ १९॥

उक्तवान् स च पापात्मा तथा परमदुर्मतिः ।
पापः पापवचः कर्णश् शृण्वतस्ते धनञ्जय ॥ २०॥

अस्य पापस्य तद्वाक्यं सुवर्णविकृताश्शराः ।
शमयन्तु शिलाधौता नाशयन्तोऽस्य जीवितम् ॥ २१॥

अद्य कर्णं रणे प्रस्तं पश्यन्तु कुरवस्त्वया ।
प्रतपन्तमिवादित्यं स्वर्गद्वारगतं यथा ॥ २२॥

अद्य ते समरे वीर्यं पश्यन्तु कुरुयोधिनः ।
सूतपुत्रे हते पार्थ जानन्तु त्वां महारथम् ॥ २३॥

अद्य कङ्का वला गृध्रा वायसा जम्बुकास्तथा ।
विप्रकर्षन्तु गात्राणि सूतपुत्रस्य भारत ॥ २४॥

अद्यातिरथिराक्षिप्तो निहतश्च त्वया रणे ।
कुरूणां शोकमाधत्तां पाण्डवानां मुदं तथा ॥ २५॥

अद्य त्वां प्रतिनन्दन्तु पाञ्चालाः पाण्डवैस्सह ।
यथा वृत्रवधे वृत्ते देवास्सर्वे शतक्रतुम् ॥ २६॥

अद्य कर्णं रणे हत्वा प्राप्य चैवोत्तमं यशः ।
विशोको विज्वरः पार्थ भव बन्धुपुरस्कृतः ॥ २७॥

नरसिंहवपुः कृत्वा यथा शस्तो महासुरः ।
हिरण्यकशिपुर्दैत्यो विष्णुना प्रभविष्णुना ॥ २८॥

तथा त्वमपि राधेयं घोरं कृत्वा महद्वपुः ।
जहि युद्धे महाबाहो त्रायस्व च भयात् स्वकान् ॥ २९॥

तं च हाहाकृतं दीनं विषण्णं त्वच्छरार्दितम् ।
प्रपतन्तं रथात् तूर्णं पश्यन्तु वसुधाधिपाः ॥ ३०॥

तं च स्वशोणिते मग्नं शयानं पतितं भुवि ।
अपविद्धायुधं कर्णम् अद्य पश्यन्तु पाण्डवाः ॥ ३१॥

तच्चैवाद्य महद्वर्म गाण्डीवप्रेषितैश्शरैः ।
रथोपस्थे विशीर्येत ताराजालमिवाम्बरात् ॥ ३२॥

आशु चाद्य शरास्तस्य सम्पतन्तो महाहवे ।
त्वच्छरैस्सन्निकृत्ताग्रा विशीर्यन्तां महीतले ॥ ३३॥

त्वया चाद्य हते तस्य विक्रमे भरतर्षभ ।
विमुखास्सर्वराजानो भवन्तु गतजीविताः ॥ ३४॥

तथा चातिरथौ याते प्रयान्तु कुरवो दिशः ।
मन्वानास्त्वां रथश्रेष्ठं सर्वलोकेषु धन्विनम् ॥ ३५॥

स चैवाद्य भयात् त्यक्त्वा धार्तराष्ट्रो महाचमूम् ।

दुर्योधनो भयोद्विग्नो द्रवतु स्वपुरं प्रति ॥ ३६॥

तथाऽद्य तं हतं श्रुत्वा धृतराष्ट्रो जनेश्वरः ।
मोहेन निपतेद्भूमौ विसंज्ञो वै महीपतिः ॥ ३७॥

अद्य जानन्तु ते पार्थ विक्रमं सर्वधन्विनः ।
यानवोचत् सभामध्ये परुषान् भारत त्वयि ॥ ३८॥

यानि चान्यानि दुष्टात्मा पापानि कृतवांस्त्वयि ।
तान्यद्य भरतश्रेष्ठ नाशयन्तु शरास्तव ॥ ३९॥

शान्तं कुरु परिक्लेशं कृष्णायाश्शत्रुतापन ।
हत्वा शत्रुं रणे श्लाघ्यं गर्जन्तमतिपौरुषम् ॥ ४०॥

अद्य चातिरथिर्विद्धस् तव बाणैस्समन्ततः ।
मन्यतां त्वां नरव्याघ्र प्रवरं सर्वधन्विनान् ॥ ४१॥

गाण्डीवप्रसृतान् घोरान् अद्य गात्रैस्स्पृशञ् शरान् ।
एतु कर्णो रणे पार्थ श्वाविच्छललतो यथा ॥ ४२॥

एते द्रवन्ति पाञ्चाला वध्यमानाश्शितैश्शरैः ।
कर्णेन भरतश्रेष्ठ तान् समुद्धर पाण्डव ॥ ४३॥

हतं कर्णसुतं दृष्ट्वा सूतपुत्रो दुरात्मवान् ।
स्मरतां द्रोणभीष्माभ्यां वचः क्षत्तुश्च पाण्डव ॥ ४४॥

गाण्डीवप्रेषितैर्भल्लैश् शितैश्छिन्नतनुच्छदः ।
न चेत् स्मरति राधेयो वचनं द्रोणभीष्मयोः ॥ ४५॥

ते स्वर्णपुङ्खाश्शत्रुघ्ना नाराचा वैद्युतप्रभाः ।
न चेदातिरथेर्वर्म भित्त्वा पास्यन्ति शोणितम् ॥ ४६॥

उग्रास्त्वद्बाहुनिर्मुक्ता न चेद्वर्मुच्छिदश्शराः ।
अद्य कर्ण महावेगाः प्रहिण्वन्ति यमक्षयम् ॥ ४७॥

हस्तिकक्ष्योऽद्य भल्लेन न चेदुन्मथितस्त्वया ।
प्रकम्पमानः पतति महानातिरथेर्ध्वजः ॥ ४८॥

न चेच्छरशतैश्छिन्नं रथं हेमपरिष्कृतम् ।
हतयूथं परित्यज्य भीतश्शल्यः पलायते ॥ ४९॥

न चेत् कर्णसुतं पार्थ सूतपुत्रस्य पश्यतः ।
प्रतिज्ञापालनार्थाय निहनिष्यसि सायकैः ॥ ५०॥

न चेत् सुयोधनो दृष्ट्वा हतमातिरथिं त्वया ।
निराशो जीवितस्याद्य सानुबन्धो भविष्यति ॥ ५१॥

असौ हि तावकान् पार्थ कर्णो निघ्नति संयुगे ।
शक्रतुल्यबलो वीर्याच् छङ्करप्रतिमोऽथवा ॥ ५२॥

पाञ्चालान् द्रौपदेयांश्च धृष्टद्युम्नशिखण्डिनौ ।
नकुलं सहदेवं च दौर्मुखिं जनमेजयम् ॥ ५३॥

धृष्टद्युम्नतनूजांश्च शतानीकं च भारत ।
सुशर्माणं सात्यकिं च विद्धि कर्णवशं गतान् ॥ ५४॥

अभ्याहतानां कर्णेन पाञ्चालानामसौ रणे ।

श्रूयते निनदो घोरस् त्वद्बन्धूनामनाथवत् ॥ ५५॥
न चैव भीताः पाञ्चालाः कथञ्चित् स्युः पराङ्मुखाः ।
न हि मृत्युं महेष्वासा जानन्ति युधि दुर्जयाः ॥ ५६॥
य एकः पाण्डवीं सेनां शरौघैस्समपीडयत् ।
तमप्यासाद्य समरे भीष्मं नासन् पराङ्मुखाः ॥ ५७॥
ते कथं कर्णमासाद्य विद्रवेयुर्महाबलाः ॥ ५८
यस्त्वेकस्सर्वपाञ्चालान् अहन्यहनि नाशयन् ।
कालवच्चरते वीरः पाञ्चालानां रथव्रजे ॥ ५९
तमप्यासाद्य समरे मित्रार्थे मित्रवत्सल ।
तथा ज्वलन्तमस्त्रैश्च वरं सर्वधनुष्मताम् ॥ ६०
निर्दहन्तं च समरे दुर्धर्षं द्रोणमञ्जसा ।
ते नित्यमुद्यता जेतुं युधि शत्रुमरिन्दमाः ॥ ६१
न चेदातिरथेभ्यीताः पाञ्चालास्युः पराङ्मुखाः ॥ ६१॥
तेषामपि ततश्शूराः पाञ्चालानां तरस्विनाम् ।
प्राणानभ्याददे वीरः पतङ्गानामिवानलः ॥ ६२॥
एते द्रवन्ति पाञ्चाला द्राव्यन्ते योधिभिर्द्रुतम् ।
कर्णेन भरतश्रेष्ठ पश्य पश्य तथा कृतान् ॥ ६३॥
[1]तान् भारत महेष्वासान् अगाधे मज्जतोऽप्लवे ।

1. क-ख-घ—अर्धद्वयं नास्ति

कर्णार्णवे प्लवो भूत्वा पाञ्चालांस्त्रातुमर्हसि ॥ ६४॥
तान् समारोहतश्शूरान् मित्रार्थे त्यक्तजीवितान् ।
निस्तारय महाबाहो कर्णास्त्रात् पावकोपमात् ॥ ६५॥
अस्त्रं हि रामात् कर्णेन भार्गवादृषिसत्तमात् ।
यदवाप्तं तदा घोरं तस्य रूपमुदीर्यते ॥ ६६॥
तापनं सर्वभूतानां घोरमस्त्रं भयानकम् ।
यमाश्रित्य महासेनां दहते स्वेन तेजसा ॥ ६७॥
एते चरन्ति सङ्ग्रामे कर्णचापच्युताश्शराः ।
भ्रमरा इव शत्रूणां तापयाना जनान् प्रभो ॥ ६८॥
एते भ्रमन्ति पाञ्चाला उद्भ्रमन्ति च मारिष ।
कर्णास्त्रं समरे प्राप्य दुर्निवार्यं महात्मभिः ॥ ६९॥
एष भीमो दृढक्रोधी वृतः पार्थं समन्ततः ।
सृञ्जयैर्योधयन् कर्णं पीडयन्निशितैश्शरैः ॥ ७०॥
पाञ्चालान् सृञ्जयांश्चैव पाण्डवांश्चैव भारत ।
उपेक्षितो दहेत् कर्णो रोगो देहमिवागतः ॥ ७१॥
नान्यं त्वत्तो हि पश्यामि योधं यौधिष्ठिरे बले ।
यस्समासाद्य राधेयं स्वस्तिमानाव्रजेद् गृहान् ॥ ७२॥
तमद्य निशितैर्बाणैर् निहत्य भरतर्षभ ।
यथाप्रतिज्ञं पार्थ त्वं तीर्त्वा कीर्तिमवाप्नुहि ॥ ७३॥

त्वं हि शक्तो रणे जेतुं सकर्णानपि कौरवान् ।
नान्यो युधि युधां श्रेष्ठ सत्यमेतद्ब्रवीमि ते ॥ ७४॥

एतत् कृत्वा महत् कर्म हत्वा कर्णं महारथम् ।
कृतार्थस्सफलः पार्थ सुखी भव नरोत्तम ॥ ७५॥

इति श्रीमहाभारते शतसाहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि त्र्यशीतितमोऽध्यायः ॥ ८३ ॥
॥ ७३ ॥ कर्णपर्वणि त्र्यशीतितमोऽध्यायः ॥ ८३ ॥
[अस्मिन्नध्याये ७५॥ श्लोकाः]

॥ चतुरशीतितमोऽध्यायः ॥

अर्जुनेन कृष्णाग्रे कर्णवधानन्तरभाव्यर्थानुवर्णनपूर्वकं तद्वधप्रतिज्ञा ॥

सञ्जयः—

स केशवस्य बीभत्सुश् श्रुत्वा भारत भाषितम् ।
विशोकश्च प्रहृष्टश्च क्षणेन समपद्यत ॥ १

ततो ज्यामनुमृज्याशु व्याक्षिपद्गाण्डिवं धनुः ।
दध्रे कर्णविनाशाय केशवं चाभ्यभाषत ॥ २

अर्जुनः—

त्वया नाथेन गोविन्द ध्रुव एव जयो मम ।
प्रसन्नो यस्य भगवान् भूतभव्यभविष्यकृत् ॥ ३

त्वत्सहायो ह्यहं कृष्ण त्रीन् वै लोकान् समागतान् ।
प्रापयेयं परं लोकं किमु कर्णं महारथम् ॥ ४

पश्यामि द्रवतीं सेनां पाञ्चालानां जनार्दन ।
[1]पश्यामि कर्णं समरे विचरन्तमभीतवत् ॥ ५

भार्गवास्त्रं च पश्यामि प्रतपन्तं समन्ततः ।
सृष्टं कर्णेन वार्ष्णेय शक्रेणेव महाशनिम् ॥ ६

अयं स खलु सङ्ग्रामो यत्र कृष्ण मया कृतम् ।
कथयिष्यन्ति भूतानि यावद्भूमिर्धरिष्यति ॥ ७

अद्य कृष्ण विकर्णा मे कर्णं नेष्यन्ति मृत्यवे ।
गाण्डीवमुक्ताः क्षिण्वन्तो मम हस्तप्रचोदिताः ॥ ८

अद्य राजा धृतराष्ट्रस् स्वबुद्धिमवमंस्यते ।
दुर्योधनमराज्यार्हं यया राज्ये न्यवेशयत् ॥ ९

गुणवन्तं हि यो हित्वा निर्गुणं कुरुते प्रभुम् ।
स शोचति चिरं कृष्ण क्षिप्रमेवागते क्षये ॥ १०

यथा हि पुरुषः कश्चिच् छित्वा चाम्रवणं महत् ।
पलाशसेचने बुद्धिं कृत्वा शोचति मन्दधीः ॥ ११

दृष्ट्वा पुष्पं फले गृध्नुः फलं दृष्ट्वाऽनुशोचति ।
तथेदं धृतराष्ट्रस्य पुष्पलुब्धस्य मानद ॥ १२

1. ख—अर्धचतुर्थं नास्ति

फलं दृष्ट्वा भृशं दुःखं भविष्यति जनार्दन ॥ १२॥

सूतपुत्रे हते त्वद्य निराशो भविता प्रभुः ॥ १३

अद्य राज्याच्च पुत्राच्च श्रियश्चैव निराशवान् ।
सुखाच्च विपुलात् कृष्ण धृतराष्ट्रो वियोक्ष्यते ॥ १४

अद्य दुर्योधनो राज्याज् जीविताच्च निराशवान् ।
भविष्यति रणे कर्णे मृते सत्यं ब्रवीमि ते ॥ १५

अद्य दृष्ट्वा हतं कर्णं शरैर्विशकलीकृतम् ।
स्मरतां तव वाक्यानि शमं प्रति जनेश्वरः ॥ १६

अद्यासौ सौबलः कृष्ण ग्लहाञ्ज्ञानातु वै शरान् ।
दुरोदरं च गाण्डीवं मण्डलं च रथं मम ॥ १७

असौ रणे नरानन्यान् पृथिव्यां चावमन्यते ।
[1]तस्याद्य सूतपुत्रस्य मही पास्यति शोणितम् ॥ १८

आशीविषा इव क्रुद्धाः पिबन्तोऽस्य च शोणितम् ।
गाण्डीवमुक्ता दास्यन्ति कर्णस्य सुगतिं शराः ॥ १९

अद्य तप्स्यति राधेयः पाञ्चालीं यत्तदाऽब्रवीत् ।
सभामध्ये वचः क्रूरं कुत्सयन् पाण्डवान् प्रति ॥ २०

एते षण्डतिलाः कृष्णे निर्वीर्या हृद्गतद्रुमाः ।
[2]पाण्डवेभ्यो भयं तीव्रं दास्यामीति यदब्रवीत् ॥ २१

1. अ—नास्तीदमर्धम् 2. अ—नास्तीदमर्धम्

हन्ताऽहं पाण्डवान् सर्वान् सपुत्रानिति माधव ।
अनृतं तत् करिष्यन्ति मामका निशिताश्शराः ॥ २२

हते वैकर्तने कर्णे सूतपुत्रे दुरात्मनि ।
[1]अद्यागः पाण्डुपुत्राणां समाप्तिमुपयास्यति ॥ २३

यस्य वीर्यं समश्रित्य धार्तराष्ट्रो बृहन्मनाः ।
तमद्य कर्णं हन्तास्मि समरे मधुसूदन ॥ २४

[2]अद्य कर्णे हते कृष्ण धार्तराष्ट्रास्सराजकाः ।
विद्रवन्ति दिशो भीता सिंहं दृष्ट्वा मृगा इव ॥ २५

अद्य दुर्योधनो राजा पृथिवीं नान्ववेक्षते ।
हते कर्णे मया सङ्ख्ये सपुत्रे ससुहृज्जने ॥ २६

अद्य कर्णं हतं दृष्ट्वा धार्तराष्ट्रोऽत्यमर्षणः ।
जानातु मां रणे कृष्ण प्रवरं सर्वधन्विनाम् ॥ २७

[3]ससूतपुत्रस्सामात्यस् ससुहृच्च निराशिषः ।
पित्र्ये राज्ये निराशश्च धार्तराष्ट्रो निराश्रयः ॥ २८

अद्य राजा धर्मपुत्रो हतामित्रो भविष्यति ।
अद्य दुर्योधनो दीप्तां श्रियं राज्यं च हास्यति ॥ २९

---

1. अ—कोश एकस्मिन्नेवेदमर्धं वर्तते
2. अ—अर्धचतुष्टयं नास्ति
3. अ—सपुत्रपौत्रं सामात्यं सभृत्यं च निराशिषम् ।
अद्य कृष्ण करिष्यामि धृतराष्ट्रं जनेश्वरम् ॥ [पाठान्तरम्]

[1]हते वैकर्तने कर्णे भीष्मे द्रोणे च संयुगे ।
कतरत् तद्बलं कृष्ण प्रविष्टं मोक्ष्यते तु यत् ॥ ३०

अद्यप्रभृति राजानं धर्मशीलं युधिष्ठिरम् ।
अनुमोदन्तु सुहृदो ज्ञातपूर्वाश्च ब्राह्मणाः ॥ ३१

अद्य तं निहतं श्रुत्वा कर्णं वैकर्तनं मया ।
करोतु पटहोन्मिश्रं देवतास्थानपूजनम् ॥ ३२

अद्य कृष्ण हते कर्णे कुरुतां चिरसम्भृतम् ।
याजनं वै महाबाहो देवतानां यथाविधि ॥ ३३

अद्य त्वम्बा च कृष्णा च त्वरमाणे परस्परम् ।
सम्भजेतां हृषीकेश सम्पूर्णेऽस्मिन् मनोरथे ॥ ३४

अद्य त्वां पाण्डवो ज्येष्ठस् तथाऽऽर्यश्च वृकोदरः ।
उदीक्षेतां हते कर्णे कृष्ण सौम्येन चक्षुषा ॥ ३५

अभिवाद्य गुरूनद्य कनिष्ठैश्चाभिवादितः ।
सम्भजानो ह्यहं दोर्भ्यां प्राप्स्यामि विपुलं यशः ॥ ३६

अद्य कर्णे हते कृष्ण प्रशंसन्तोऽर्जुनं सुराः ।
त्रिदिवं यान्तु संहृष्टास् सङ्गताश्च तपोधनाः ॥ ३७

अद्य लोकास्त्रयः कृष्ण मम जानन्तु पौरुषम् ।
दृष्ट्वा कर्णं हतं युद्धे द्वैरथे सव्यसाचिना ॥ ३८

---

1. अ—अर्धश्लोकं नास्ति

अद्याहमनृणः कृष्ण भविष्यामि धनुष्मताम् ।
रथस्य च शराणां च धनुषो गाण्डिवस्य च ॥ ३९

मोक्ष्याम्यद्य महद्दुःखं त्रयोदशसमार्जितम् ।
हत्वा कर्णं रणे कृष्ण शम्बरं मघवानिव ॥ ४०

अद्य कर्णे हते युद्धे सोमकानां महारथाः ।
कृतकार्या भविष्यन्ति मित्रकार्येष्सवो युधि ॥ ४१

न जानेऽहं कथं प्रीतिश् शैनेयस्याद्य माधव ।
भविष्यति हते कर्णे मयि चापि जयाधिके ॥ ४२

अहं हत्वा रणे कर्णं पुत्रांश्चास्य बलाधिकान् ।
प्रीतिं दास्यामि भीमस्य सात्यकेर्यमयोस्तथा ॥ ४३

धृष्टद्युम्नस्य वीरस्य तथैव च शिखण्डिनः ।
अद्यानृण्यं गमिष्यामि हत्वा कर्णं महाहवे ॥ ४४

धर्मराजस्य वार्ष्णेय संश्रुत्य च वधं मिथः ।
अद्य पश्यन्तु सङ्ग्रामे धनञ्जयममर्षणम् ॥ ४५

युध्यन्तं कौरवैस्सार्धं घातयन्तं च सूतजम् ॥ ४५॥

भवत्समक्षं वक्ष्यामि पुनरेवात्मसंस्तवम् ।
इत्यप्यमित्रप्रवरम् अद्याहं हन्मि सूतजम् ॥ ४६॥

धनुर्वेदे मत्समः को नु लोके
पराक्रमे वा मम कोऽस्ति तुल्यः ।
को वाऽप्यन्यो मत्समोऽस्ति क्षमायां
ममानृशंस्ये सदृशोऽस्ति कोऽन्यः ॥ ४७॥

अहं धनुष्मान् ससुरासुरांश्च
सर्वाणि भूतानि च सङ्गतानि ।
स्वबाहुवीर्यार्द्रमये पराभवं
मत्पौरुषं विद्धि परं परेभ्यः ॥ ४८॥

शरार्चिषा गाण्डिवेनाहमेकस्
सर्वान् कुरून् बाह्लिकांश्चाभिपन्नः ।
हिमात्यये कक्षगतो यथाऽग्निस्
तथा दहेयं सगणान् प्रसह्य ॥ ४९॥

पाणी पृषत्कोल्लिखितौ ममैतौ
धनुश्च सव्ये विततं सबाणम् ।
पादौ च मे सरथौ सध्वजौ च
न मादृशं युद्धगतं जयन्ति ॥ ५०॥

सञ्जयः—

[1]इत्येवमुक्त्वाऽच्युतमेकवीरः
क्षिप्रं रिपोस्स क्षतजोपमाक्षः ।

---

1. क-ख—अयं श्लोको नास्ति

भीमं रणान्मोचयितुं प्रयातः
कर्णस्य कायाच्च शिरो जिहीर्षुः ॥ ५१॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि चतुरशीतितमोऽध्यायः ॥ ८४ ॥
॥ ७३ ॥ कर्णपर्वणि चतुरशीतितमोऽध्यायः ॥ ८४ ॥
[अस्मिन्नध्याये ५१॥ श्लोकाः]

॥ पञ्चाशीतितमोऽध्यायः ॥

द्वन्द्वयुद्धम् ॥

धृतराष्ट्रः—

[1]महाहवे पाण्डवसृञ्जयानां
तथाऽवशिष्टस्य बलस्य मह्यम् ।
धनञ्जये तात रणं प्रयाते
बभूव तद्युद्धमतीव कीदृशम् ॥ १

सञ्जयः—

तेषामनीकानि महाध्वजानि
रणे समृद्धानि समागतानि ।
भेरीनिनादोन्मुखराण्यगर्जन्
मेघा इव प्रावृषि मारुतास्ताः ॥ २

1. क-ख-घ-ङ— नाखीदमर्धद्वयम्

गजाकुलं चाकुलमश्ववेगैर्
वादित्रनेमीतलशब्दवच्च ।
[1]हिरण्यवर्मा युध[2]विद्युतं च
शरासिनाराचवरास्त्रधारम् ॥ ३

[3]तद्भीमवेगं रुधिरौघवाहि
खड्गाकुलं क्षत्रियवीरपाति ।
अनार्तवं क्रूरमनिष्टवर्षं
बभूव सङ्कर्षकरं प्रजानाम् ॥ ४

[4]एकं रथं सम्परिवार्य मृत्युं
नयन्त्यथोऽनेकरथास्समेताः ॥ ४॥

एकस्तथैनं रथिनं नरांश्च
तथा हयांश्चापि गजाननेकान् ।
रथान् ससूतान् सगणान् सहाश्वान्
सर्वानरीन् मृत्युवशं शरौघैः ॥ ५॥

---

1. ख—इदमर्धं नास्ति
2. क-ख-ङ-ङ—चर्मचित्रं महारथाराचितशब्दवच्च
3. क—तद्भीमवेगं रुधिराम्बुधारं
समाकुलं क्षत्रियजीववाहि । [पाठान्तरम्]
4. क-ख-ङ—अर्धद्वयं नास्ति

निनाय पार्थो बलगर्विताक्षो
यथाऽन्तकस्सर्वहरो महौजाः ॥ ६

कृपश्शिखण्डी च रणे समेतौ
दुर्योधनस्सात्यकिमभ्यगच्छत् ।
श्रुतश्रवा द्रौणिमियाय वीरो
[1]युधामन्युश्चित्रसेनेन सार्धम् ॥ ७

कर्णस्य पुत्रस्तु रथी सुषेणं
समागतं सृञ्जयं चोत्तमौजाः ।
गान्धारराजं सहदेवोऽक्षधूर्तं
महर्षभं सिंह इवाभ्यधावत् ॥ ८

शतानीको नाकुलिः कर्णपुत्रं
युवा युवानं वृषसेनं शरौघैः ।
समर्दयन् कर्णपुत्रश्च धीरः
पाञ्चालेयं शरवर्षैरनेकैः ॥ ९

रथर्षभः कृतवर्माणमार्च्छ-
न्माद्रीपुत्रो नकुलश्चित्रयोधी ।
पाञ्चालानामधिपो याज्ञसेनिस्
सेनापतिः कर्णमार्च्छत् ससेनम् ॥ १०

क-ख-घ-ङ—अयं पादो नास्ति

दुश्शासनो भारत भारतं तु
व्यात्ताननं क्रूरमिवान्तकाभम् ।
[1]भीमं रणे शस्त्रभृतां वरिष्ठं
समासदत् भारत भीमसेनम् ॥ ११

कर्णात्मजं तत्र जघान शूरस्
तनुच्छिदा सोत्तमौजाः प्रसह्य ।
तस्योत्तमाङ्गं निपपात भूमौ
निनादयद्द्यां निनदेन खं च ॥ १२

[2]सुषेणशीर्षं पतितं पृथिव्यां
विलोक्य कर्णोऽथ तदाऽऽर्तरूपः ।
क्रोधाद्ध्यांस्तस्य रथं ध्वजं च
बाणैस्सुधारैर्निशितैर्न्यकृन्तत् ॥ १३

स तूत्तमौजा निशितैः पृषत्कैर्
दिव्येन खड्गेन च भास्वरेण ।
पार्ष्णिग्रहांश्चैव कृपस्य हत्वा
शिखण्डिवाहांस्त्वरितोऽध्यरोहत् ॥ १४

[3]पाञ्चालराजस्य सुतस्तरस्वी
चक्रे शिखण्डी विरथं कृपं वै ।

---

1. क-ख-घ-ङ—अयं पादो नास्ति 2. क-ख-घ—सुतस्य
3. क-ख-घ—नास्त्यर्धमिदम्

कृपं तु दृष्ट्वा विरथं रथस्थो
नैच्छच्छरैस्ताडयितुं शिखण्डी ॥ १५

तं द्रौणिरावार्य कृपं रथस्थस्
समुज्जहे पङ्कगतां यथा गाम् ॥ १५॥

हिरण्यवर्मा विकिरञ् शरौघांस्
[1]तवात्मजानामनिलात्मजोऽथ ।
अधर्षयत् सैन्यमतीव भीमश्
शुचौ स्थितो मध्यगतो यथाऽर्कः ॥ १६॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि पञ्चाशीतितमोऽध्यायः ॥ ८५ ॥
॥ ७३ ॥ कर्णपर्वणि पञ्चाशीतितमोऽध्यायः ॥ ८५ ॥
[अस्मिन्नध्याये १६॥ श्लोकाः]

---

1. क-ख-ङ समाकिरञ्शीन् पवनात्मजोऽथ

॥ षडशीतितमोऽध्यायः ॥

भीमसेनविशोकयोः संवादः ॥

सञ्जयः—

अथ त्विदानीं तुमुले विमर्दे
द्विषद्भिरेको बहुभिर्निरुद्धः ।
महाहवे सारथिमित्युवाच
भीमश्चमूं वारयन् धार्तराष्ट्रीम् ॥ १

भीमसेनः—

त्वं सारथे याहि जवेन वाहिनीम्
नयाम्येतां धार्तराष्ट्रीं यमाय ॥ १॥

सञ्जयः—

स चोदितो भीमसेनेन राजंस्
तवात्मजानां हि बलस्य हेतोः ।
प्रायात् ततस्सारथिरुग्रवेगो
यतो यतो भीमसेनस्त्वगच्छत् ॥ २॥

ततः परे नागरथाश्वपत्तिभिः
प्रत्युद्ययुः कुरवो भीमसेनम् ।
वृकोदरं तूर्णमुदारवेगास्
समन्ततो बाणगणैरविध्यन् ॥ ३॥

ततश्शरानापततो महात्मा
शरैर्विचिच्छेद सुवर्णपुङ्खैः ।
तेषां निपेतुश्शतधा शरौघा
द्विधा त्रिधा भीमशरैर्निकृत्ताः ॥ ४॥

ततो गजस्यन्दनवाजिनृणां
भीमाहतानां पतितामाजिमध्ये ।
घोरो निनादस्समभून्नरेन्द्र
वज्राहतानामिव पर्वतानाम् ॥ ५॥

ते वध्यमानाश्च नरेन्द्रमुख्या
निर्भिद्यमानाश्च हि भीमबाणैः ।
भीमं समन्तात् समरेऽभिजग्मुर्
वृक्षं शकुन्ता इव पुष्पहेतोः ॥ ६॥

ततो भीमस्तव सैन्यप्रवाहे
प्रादुश्चक्रे वेगमसह्यवेगः ।
यथाऽन्तकाले प्रदिधक्षुरीशो
भूतान्तकृत् सर्वभूतक्षयाय ॥ ७॥

वेगं हि तस्याप्रतिमप्रभावम्
न शेकुरावारयितुं त्वदीयाः ।

व्यात्ताननस्याददतो यथैव
कालस्य काले विजिघृक्षतः प्रजाः ॥ ८॥

ततो बलं भारत भारतानां
तद्वध्यमानं समरे महात्मना ।
भीतं दिशोऽकीर्यत भीमनुन्नं
महानिलेनाभ्रगणा यथैव ॥ ९॥

तद्विप्रकीर्णं त्वथ भारतं बलं
पुनश्च भीमं परिवारयद्रणे ।
भीमोऽब्रवीत् सारथिमत्र याहि
हतेष्वेतेषु भवितास्म्यशोकः ॥ १०॥

त्वर त्वर ह्यद्य विशोक शीघ्रम्
एतान् ध्वजाग्रांश्च रथांश्च पश्य ।
सूतात्र जानीहि परान् स्वकान् वा
रथान् ध्वजानापततस्समेतान् ॥ ११॥

संयुध्यतो नाभिजानामि किञ्चि-
न्महत् सैन्यं वारयिष्येऽप्रमत्तः ॥ १२

अरीन् विशोकाभिसमीक्ष्य सर्वतो
महांश्च मन्युः पुनरेति मां भृशम् ।

राजाऽऽतुरो नागमद्वै किरीटी
बहूनि दुःखान्यनुचिन्तयामि ॥ १३

एतद्दुःखं सारथे धर्मराजो
यन्मां हित्वा गतवाञ् शत्रुमध्ये ।
नैनं जीवन् नाभिजानाम्यजीवन्
बीमत्सुं वा तन्ममाद्यातिदुःखम् ॥ १४

सोऽहं बलं ह्येतदुदप्रयोधं
विनाशयिष्ये परमप्रतीतः ।
एतान् निहत्याजिमध्ये समेतान्
प्रीतो भविष्यामि सह त्वयाऽद्य ॥ १५

अवेक्षस्वेषुधी मे विशोक
कियन्तो वा इषवो मेऽवशिष्टाः ।
का वा जातिः किं प्रमाणं च तेषां
ज्ञात्वा व्यक्तं तन्ममाचक्ष्व सूत ॥ १६

कति वा सहस्राणि कति वा शतानि
ह्याचक्ष्व मे सारथे क्षिप्रमेव ॥ १६॥

विशोकः—

सर्वं विदित्वैवमहं वदामि
तवार्थसिद्धिप्रदमद्य वीर ॥ १७

कैकेयकाम्भोजसुराष्ट्रबाह्लिका
म्लेच्छाश्च सुह्माः परतङ्कणाश्च ।
मद्राश्च वङ्गा मगधाः कुणिन्दा
आनर्तकावर्तकाः पार्वतीयाः ॥ १८

सर्वे गृहीतप्रवरायुधास्त्वां
सङ्ख्ये समावेष्ट्य ततो विनेदुः ॥ १८॥

रथे तवास्मिन् निशितास्सुपीतास्
ततो भल्ला द्वादश वै सहस्रशः ।
षण्मार्गणानां दश च क्षुराणां
नाराचानां द्वे सहस्रे च पार्थ ॥ १९॥

वत्सदन्तानां दश कर्णिनां च
अर्धचन्द्राणां द्वादश षट् छतं च ।
विपाठानां प्रवराणां च सप्त
शिलीमुखानां दश च त्रिंशतं च ॥ २०॥

अयोमुखानां क्षुद्रकाणां च त्रिंश-
दस्रायुतं पाण्डव तेऽवशिष्टम् ॥ २१

[1]एतद्धेच्छकटं षङ्गवंयद्
एतद्विद्वन् मुञ्च सहस्रशोऽपि ।

1. अ—नास्तीदमर्धम्

शत्रूञ्जयस्वाशु सहस्व वीर
गदाऽस्ति बाहुद्रविणं च तेऽस्ति ॥ २२

[1]प्रासा खड्गाश्शक्तयस्तोमराश्च
माभैर्भीम प्राक्षयश्चायुधानाम् ॥ २२॥

भीमः—

अद्यैव नूनं कथयन्तु सिद्धां
मम प्रतिज्ञां सर्वलोके विशोक ।
न मोक्ष्यते वा समरं भीमसेन
एकश्शत्रून् समरे वाऽप्यजैषीत् ॥ २३॥

आशंसितानामिदमेकमस्तु
तन्मे देवास्सकलं साधयन्तु ॥ २४

सूताद्य मद्बाहुमुक्तैस्समन्तात्
सम्भिन्दद्भिः पार्थिवानाशुवेगैः ।
छन्नं बाणैराहतं घोररूपं
नष्टादित्यं मृत्युलोकप्रकारम् ॥ २५

[2]अद्यैतद्वै विदितं पार्थिवानां
भविष्यति ह्याकुमारं विशोक ।

---

1. ख-घ-ङ—नास्तीदमर्धम्

2. क-ख-घ-ङ—अद्यैव मत्कर्म विदितं भविष्य-
त्याकुमारं सर्वलोके विशोक । [पाठान्तरम्]

निमग्नो वा समरे भीमसेन
एकः कुरून् वा समरे व्यजैषीत् ॥ २६

सर्वे सङ्घशो कुरवो निष्पतन्तु
मां वा लोकाः कीर्तयन्त्वाकुमारम् ।
सर्वानेकस्तानहं पातयिष्ये
ते वा सर्वे भीमसेनं पातयन्तु ॥ २७

आशास्तारः कर्म वाऽप्युत्तमं मे
तन्मे देवास्सफलं साधयन्तु ।
आयातीह केशवसारथी रथी
यथेन्द्रो यज्ञे सहसैवोपहूतः ॥ २८

पश्यस्व पश्यस्व विशोक मे त्वं
बलं परेषामभिघातभिन्नम् ।
नानास्वरान् पश्य विमुच्य सर्वे
तथा द्रवन्ते बलिनो धार्तराष्ट्राः ॥ २९

प्रेक्षस्वैनां भारतीं दीर्यमाणां
नैते रथा अकुतश्चिद्द्रवन्ति ।
धनञ्जयो नूनमायाति सूत
तस्मात् सेना दीर्यते भारतीयम् ॥ ३०

पश्य ध्वजांश्च द्रवतां विशोक
नागान् हयान् पत्तिसङ्घांश्च सङ्ख्ये ।
[1]रथान् विशीर्णाष्ठ् शरशक्तिताडितान्
व्यश्वान् कृतान् रथिनश्चापि सूत ॥ ३०॥

आपूर्यते कौरवैश्चाप्यभीक्ष्णं
[2]सेना ह्यसौ सुभृशं हन्यमाना ।
धनञ्जयस्याशनितुल्यवेगैर्
प्रस्ता शरैर्मारुततुल्यवेगैः ॥ ३१॥

एते द्रवन्ति स्म रथाश्वनागाः
पदातिसङ्घानवमर्दयन्तः ।
सम्मुह्यमानाः कौरवास्सर्व एव
[3]विष्णोर्भयार्ता इव दैत्यसङ्घाः ॥ ३२॥

हाहाकृताश्चैव रणे विशोक
मुञ्चन्ति नादान् विपुलान् गजेन्द्राः[4] ॥ ३३

---

1. क-ख-घ-ङ—पश्यस्व भग्नांश्च रथान् विशोक [पाठान्तरम्]
2. क-ख—अयं पादो नास्ति
3. क-ख-घ-ङ—द्रवन्ति दावादिव नागसङ्घाः [पाठान्तरम्]
4. क-घ-ङ—सर्वैरतैः पाण्डवास्ते समृद्धैः [अधिकः पाठः]

विशोकः—

[1]न भीम रावं त्वमिहाशृणोषि
विष्फूर्जितं गाण्डिवस्यातिघोरम् ।
क्रुद्धेन पार्थेन विकृष्यता ज्यां
कच्चिन्नागौ तव कर्णे प्रविष्टौ ॥ ३४

[2]सर्वे कामाः पाण्डव ते समृद्धाः
[3]कपिर्ह्यसौ दृश्यते हस्त्यनीके ।

---

1. क-ख—अर्धद्वयं नास्ति
2. क-ख-घ—अयं पादो नास्ति
3. इयं क-ख-कोशानुपूर्वी—

क-ख—असौ कपिर्दृश्यते हस्त्यनीके
नीलाद्भनादुत्पतन्तीव विद्युत् ।
कपिर्ह्येषो वीक्षते वै समन्ताद्
ध्वजाग्रमारुह्य धनञ्जयस्य ॥

दिवाकराभो मणिरेष दिव्यः
किरीटसंस्थो ज्वलते पश्य भीम ।
पश्यैनं वै देवदत्तं सुघोषं
पार्श्वे स्थितं मे पार्थं धनञ्जयस्य ॥

दिव्यं शङ्खं पाञ्चजन्यं च पश्य
पार्श्वे स्थितं विमलाभ्रप्रकाशम् ।
अभीशुहस्तस्य जनार्दनस्य
विगाहमानस्य चमूं परेषाम् ॥

चक्रं च पश्य ज्वलनप्रकाशं
रौद्रं यशोवर्धनं केशवस्य ।

नीलाद्धनादुत्पतन्तीव विद्युत्
[1]पश्याग्रं वै धनुषो गाण्डिवस्य ॥ ३५

कपिर्ह्यसौ वीक्षते सर्वतो वै
ध्वजाग्रमारुह्य धनञ्जयस्य ।
दिवाकराभो मणिरेष दिव्यो
विभ्राजते चैव किरीटसंस्थः ॥ ३६

[2]पार्श्वे भीमं पाण्डुवर्णप्रकाशं
पश्यैनं वै देवदत्तं सुघोषम् [3]।

सदाऽर्चितं यदुभिरुपेत्य वीरैस्
सविद्युतश्चैव घनस्य शब्दम् ॥
एतदनन्तरं 'विष्फार्यं' 'ददानि ते'
इति द्वौ श्लोकौ वर्तेते, ततोऽध्यायसमाप्तिः ॥

1. क-घ-ङ—कोशेषु "पश्याग्रं वै" इति पादो "दिवाकराभ" इत्यतः प्राग्वर्तते ॥
2. क-घ—अयं पादो नास्ति
3. अ—महास्वनं भीम विराजमानं
पश्यस्व सङ्ख्ये द्विषतां निहन्तुः ॥
अभीशुहस्तस्य जनार्दन [अधिकः पाठः]
ङ-ङ—पार्श्वे स्थितं पार्थं धनञ्जयस्य
पार्श्वे स्थितं विमलाभ्रप्रकाशम्
दिव्यं शङ्खं पाञ्चजन्यं च पश्य ।
अभीशुहस्तस्य जनार्दनस्य
विगाहमानस्य चमूं परेषाम् ॥ [अधिकः पाठः]

[1]चक्रं यशोवर्धनमेतदद्य
सदाऽर्चितं यदुभिः [2]पश्य वीर[3] ॥ ३७

[4]कृष्णस्यैतं पाञ्चजन्यं च शङ्खं
विराजमानं द्विजराजवर्णम् ।
वार्ष्णेयकस्योरसि कौस्तुभं च
जाज्वल्यमानं विजयं रथं च ॥ ३८

ध्रुवं रथाग्र्यस्समुपैति पार्थो
वित्रसायन् सैन्यमिदं परेषाम् ।
सिताभ्रवर्णैरनिलाभवेगैर्
हयैर्महार्हैं रथिनां वरिष्ठः ॥ ३९

रथान् हयान् पत्तिगणांश्च सायकैर्
विदारितान् पश्य पतन्त्यमी रथाः ।

---

1. घ-ङ—चक्रं च पश्य ज्वलनप्रकाशं
रौद्रं यशोवर्धनं केशवस्य । [पाठान्तरम्]

2. घ-ङ—रुपेत्य वीरैः

3. ङ—संविद्युतश्चैव घनस्य शब्दम् [अधिकः पाठः]

4. "कृष्णस्यैत" मित्यादि 38—42 एते पञ्च श्लोकाः
ङ—कोशे नोपलभ्यन्ते ॥

तवानुजेनामरतुल्यवर्चसा
महावनानीव सुपर्णवायुना ॥ ४०

शतान् शतान् पश्य रथान् निपातितान्
सवाजिसूतान् समरे किरीटिना ।
महेषुभिस्सप्त शतानि दन्तिनां
पत्तींश्च सादींश्च हताननेकशः ॥ ४१

अयं समायाति तवान्तिकं बली
निघ्नन् कुरूंश्चित्र इव ग्रहोऽर्जुनः ।
समृद्धकामोऽसि हतास्तवाहिता
बलं तवायुश्च चिराच्च वर्धताम् ॥ ४२

विष्फार्यतो धनुषो गाण्डिवस्य
धनञ्जयेनाभिपन्नस्य काले ।
[1]शब्दो घोरश्श्रूयते तस्य नास्मिन्
कश्चिच्छ्रोता हो बधिरोऽसि पार्थ ॥ ४३

भीमः—

ददानि ते ग्रामवरांश्चतुर्दश
प्रियाख्यानात् सारथे सुप्रसन्नः ।

---

1. ख-घ—अयं पादो नास्ति

दासीशतं चाश्वतरीश्च विंशतिं
यो मेऽर्जुनं वेदयसे विशोक ॥ ४४

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि षडशीतितमोऽध्यायः ॥ ८६ ॥
॥ ७३ ॥ कर्णपर्वणि षडशीतितमोऽध्यायः ॥ ८६ ॥
[अस्मिन्नध्याये ४४ श्लोकाः]

॥ सप्ताशीतितमोऽध्यायः ॥

अर्जुनपराक्रमः ॥ १ ॥ भीमपराक्रमः ॥ २ ॥

सञ्जयः—

श्रुत्वा तु रथनिर्घोषं सिंहनादं च संयुगे ।
अर्जुनः प्राह गोविन्दं शीघ्रं चोदय वाजिनः ॥ १

अर्जुनस्य वचश्श्रुत्वा गोविन्दोऽर्जुनमब्रवीत् ॥ १॥

श्रीभगवान्—

एष गच्छामि तु क्षिप्रं यत्र भीमो व्यवस्थितः ॥ २

सञ्जयः—

तं यान्तमश्वा हिमशङ्खशुक्लाः
सुवर्ण[1]मुक्तामणिजालनद्धाः ।

---

1. क-ख-घ-ङ—जालावनतावनद्धाः

जम्भं जिघांसुं प्रगृहीतवज्रम्
[1]इन्द्रं यथा तत्र तथाऽवहंस्ते ॥ ३

[2]ततस्तमायान्तमभिप्रवीक्ष्य
राज्ञा सुशूरेण सुयोधनेन ।
सञ्चोदितास्सिन्धुकलिङ्गवङ्गाः
पुण्ड्राङ्गसौवीरसुराष्ट्रभूपाः ॥ ४

रथाश्वमातङ्गपदातिसङ्घा
बाणस्वनैर्नेमिखुरस्वनैश्च ।
संनादयन्तो वसुधां दिशश्च
क्रुद्धास्सर्वे ह्यर्जुनमभ्युदीयुः ॥ ५

तेषां च पार्थस्य [3]समागमोऽभूद्
[4]देहासुपापक्षपणं सुयुद्धम् ।
त्रैलोक्यहेतोरसुरैर्यथाऽऽसीद्
एकस्य विष्णोर्जयतां वरस्य ॥ ६

तैरस्तमुच्चावचमायुधं तद्
एकः प्रचिच्छेद किरीटमाली ॥ ६॥

क्षुरार्धचन्द्रैर्निशितैश्च भल्लैश्
शिरांसि तेषां बहुधा च बाहून् ।

---

1. ख-घ-ङ—हया
2. अ-ख—नास्त्यर्धद्वयम्
3. क-ख-ङ—च तत्र युद्धे
4. क-ख-घ-ङ—अयं पादो नास्ति

छत्राणि वालव्यजनानि केतून्
अश्वान् रथान् पत्तिगणान् द्विपांश्च ॥ ७॥
ते पेतुरुर्व्यां बहुधा विकृत्ता
वातप्रभग्नानि यथा वनानि ॥ ८

सुवर्णजाला[1]वनता महाद्विपास्
सवैजयन्तीध्वजयोधकल्पिताः ।
[2]सुवर्णपुङ्खैरिषुभिस्समाचिताश्
चकाशिरे प्रज्वलिता इवाचलाः[3] ॥ ९

विदार्य नागाश्वरथान् धनञ्जयश्
शरोत्तमैर्वासववज्रसन्निभैः ।
द्रुतं ययौ कर्णजिघांसया [4]बली
यथा मरुत्वान् बलिनं बलं पुरा[5] ॥ १०

तथा स पुरुषव्याघ्रस् तव सैन्यमरिन्दमः ।
प्रविवेश महाबाहुर् मकरस्सागरं यथा ॥ ११

---

1. क-ख-घ-ङ—वनतै र्महाद्भैः
2. क-ख-घ-ङ—स्वनन्ति नागा ध्वजकल्पिताग्रा [अधिकः पाठः]
3. क-घ-ङ— दावाग्निदीप्तैरिव वंशदण्डैः [अधिकः पाठः]
4. क-ख-घ-ङ—तदा प्रवृद्धकोपो बलगर्वितात्मा [पाठान्तरम्]
5. ख—गाण्डीवधन्वा द्विषतां निहन्ता प्रवृद्धकोपो बलगर्वितात्मा
[अस्यार्धस्यैव—पाठान्तरम्]

तं दृष्ट्वा तावका राजन् रथपत्तिसमन्विताः ।
गजाश्वसादिबहुलाः पाण्डवं समुपाद्रवन् ॥ १२

[1]तत्राभिद्रवतां पार्थम् आरावस्सुमहानभूत् ।
क्षुब्धस्य सागरस्येव यथा स्यात् सलिलस्वनः ॥ १३

ते तु तं पुरुषव्याघ्रं व्याघ्रा इव महारथाः ।
[2]तेषां चतुश्शतं राजन् यतमाना महारथाः ॥ १४

अभ्यद्रवन्त सङ्ग्रामे त्यक्त्वा प्राणकृतं भयम् ॥ १४॥

तेषामापततां तत्र शरवर्षाणि मुञ्चताम् ।
अर्जुनो व्यधमत् सैन्यं महावातो घनानिव ॥ १५॥

तेऽर्जुनं सहिता भूत्वा शरवर्षैः प्रहारिणः ।
अपिधाय महेष्वासा विव्यधुर्निशितैश्शरैः ॥ १६॥

[3]शक्तिभिस्तोमरैः प्रासैः कर्कणैः कूटमुद्गरैः ।
शूलैस्त्रिशूलैः परिघैर् भिण्डीपालैः परश्वधैः ॥ १७॥

करवालैर्हेमदण्डैर् यष्टिभिर्मुसलैर्हलैः ।
प्रहृष्टाश्चक्रिरे पार्थं समन्ताद्रूढमायुधैः ॥ १८॥

शिबिराद्देशमायान्तम् अर्जुनं सहकेशवम् ॥ १९

ततोऽर्जुनस्सहस्राणि नरवारणवाजिनाम् ।

---

1. क-ख-घ-ङ—तत्र नादो महानासीद्रवतामेकमर्जुनम् । [पाठान्तरम्]
2. अ-ख-घ—नास्तीदमर्धम्
3. क-ख-घ-ङ—अर्धपञ्चकं नास्ति

प्रैषयच्छरसङ्घातैर् यमस्य सदनं प्रति ॥ २०

[1]ते वध्यमानास्समरे [2]पार्थचापच्युतैश्शरैः ।
तत्र तत्रै व लीयन्ते भये जाते महारथाः ॥ २१

तेषां चतुश्शतान् वीरान् यतमानान् महारथान् ।
अर्जुनो निशितैर्बाणैर् अनयद्यमसादनम् ॥ २२

ते वध्यमानास्समरे नानालिङ्गैश्शरोत्तमैः ।
अर्जुनं समभित्यज्य [3]दुद्रुवुर्वै दिशो भयात् ॥ २३

तेषां शब्दो महानासीद् द्रवतां वाहिनीमुखे ।
महौघस्येव भद्रं ते गिरिमासाद्य दीर्यतः ॥ २४

तां तु सेनां भृशं त्रस्तां द्रावयित्वाऽर्जुनश्शरैः ।
प्रायादभिमुखः पार्थः कर्णानीकाय भारत ॥ २५

तस्याभिद्रवतः कर्णं रथघोषो महानभूत् ।
गरुडस्येव पततः पन्नगार्थं महाम्बरे ॥ २६

तं तु शब्दं तदा श्रुत्वा भीमसेनो महाबलः ।
बभूव परमप्रीतः [4]पार्थदर्शनलालसः ॥ २७

श्रुत्वैव पार्थमायान्तं भीमसेनः प्रतापवान् ।

---

1. घ—अर्धचतुष्टयं नास्ति 2. ख—इतः अर्धचतुष्टयं नास्ति
3. क-ख-घ—समन्ताद्विप्रदुद्रुवुः
4. क-ख-घ-ङ—तव सेनाप्रधर्षणम्

[1]त्यक्त्वा प्राणभयं राजन् सेनां तव ममर्द च ॥ २८

स वायुवीर्यप्रतिमो वायुवेगसमो जवे ।
वायुवद्व्यचरद्भीमो वायुपुत्रः प्रतापवान् ॥ २९

तेनार्द्यमाना राजेन्द्र सेना तव विशां पते ।
व्यशीर्यत महाराज नौरिवासाद्य पर्वतम् ॥ ३०

[2]तां तु सेनां तदा भीमो दर्शयन् पाणिलाघवम् ।
शरैरवचकर्तोग्रैः प्रेषयिष्यन् यमक्षयम् ॥ ३१

तत्र भारत भीमस्य बलं दृष्ट्वाऽतिमानुषम् ।
व्यत्रस्यन्त रणे योधाः कालस्येव जिघृक्षतः ॥ ३२

तथाऽर्दितान् भीमबलान् भीमसेनेन भारत ।
दृष्ट्वा दुर्योधनो राजन्निदं वचनमब्रवीत् ॥ ३३

सैनिकान् समहेष्वासान् योधांश्च भरतर्षभ ।
समादिशद्रणे सर्वान् घ्नत भीममिति स्म ह ॥ ३४

---

1. ख—अर्धत्रयं नास्ति

2. अ—रथान् रथेनाभ्यहनत्तुरंगांस्तुरगैस्तथा ।
गजान् गजवरैर्वीरान् नरैरेवानयद्वधम् ॥
गजचिह्नं समुत्क्षिप्य गजं भीमोऽभ्यपातयत् ।
महौषधिसमायुक्तं हनूमानिव पर्वतम् ॥
कस्य चिद्दन्तमुत्पाट्य दन्तेनैवाहनद्गजम् ।
यथैरावतमासाद्य कुम्भकर्णः पुरा रणे ॥ [अधिकः पाठः]

अस्मिन् हते हतं सर्वं मन्ये सैन्यमशेषतः ॥ ३४॥

प्रतिगृह्य च तामाज्ञां तव पुत्रस्य पार्थिवाः ।
भीमं प्रच्छादयामासुस् समन्तान्निशितैश्शरैः ॥ ३५॥

[1]गजाश्च बहुला राजन् नराश्च जयगृद्धिनः ।
रथा हयाश्च राजेन्द्र परिवव्रुर्वृकोदरम् ॥ ३६॥

स तैः परिवृतश्शूरैश् शूरो राजन् समन्ततः ।
शुशुभे भरतश्रेष्ठो नक्षत्रैरिव चन्द्रमाः ॥ ३७॥

[2]परिवेषी यथा सोमः परिपूर्णो विराजते ।
स चचार महासङ्घे दर्शनीयो नरोत्तमः ॥ ३८॥

निर्विशेषं महाराज विजयेनैव संयुगे ॥ ३९

तत्र ते पार्थिवास्सर्वे शरवृष्टिमवासृजन् ।
क्रोधरक्तेक्षणाः क्रूरा हन्तुकामा वृकोदरम् ॥ ४०

तां विदार्य महासेनां शरैस्सन्नतपर्वभिः ।
निश्चक्राम रणाद्भीमो मत्स्यो जालादिवाम्भसि ॥ ४१

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि सप्ताशीतितमोऽध्यायः ॥ ८७ ॥
॥ ७३ ॥ कर्णपर्वणि सप्ताशीतितमोऽध्यायः ॥ ८७ ॥
[अस्मिन्नध्याये ४१ श्लोकाः]

---

1. ख—अर्धपञ्चकं नास्ति
2. घ-ङ—इदमर्धं नास्ति क—पादोऽयं नास्ति

॥ अष्टाशीतितमोऽध्यायः ॥

भीमपराक्रमवर्णनम् ॥ १ ॥ भीमेन दुर्योधनचोदितस्य शकुनेः पराजयः ॥ २ ॥

सञ्जयः—

हत्वा दशसहस्राणि गजानामनिवर्तिनाम् ।
नृणां शतसहस्रे द्वे द्वे शते चैव भारत ॥ १

पञ्च चाश्वसहस्राणि रथानां शतमेव च ।
ततः प्रास्यन्दयद्भीमो नदीं शोणितकर्दमाम् ॥ २

शोणितोदां रथावर्तां हस्तिग्राहसमाकुलाम् ।
नरमीनाम्बनक्रां केशशैवलशाद्वलाम् ॥ ३

सञ्छिन्नबाहुभुजगां नानारत्नविभूषिताम् ।
[1]ऊरुग्रहां मज्जपङ्कां शीर्षोपलनिषेविताम् ॥ ४

धनुःकाशशराघाठां गदापरिघफेनिलाम् ।
[2]हंसच्छत्रध्वजोपेताम् उष्णीषवरफेनिलाम् ॥ ५

हारवर्षकरां चैव भूमिरेणूर्मिमालिनीम् ।
योधग्राहवतीं सङ्ख्ये वहन्तीं यमसादनम् ॥ ६

क्षणेन पुरुषव्याघ्रः प्रावर्तयत तां नदीम् ॥ ६॥

1. ख-घ-ङ—नास्तीदमर्धम् 2. ख—इदमर्धं नास्ति

यथा वैतरणीमुग्रां दुस्तरामकृतात्मभिः ।
[1]तथा प्रावर्तयद्भीमो वीरयोधापहारिणीम् ॥ ७॥

यतो यतः पाण्डवेयः प्रातिष्ठद् रथसत्तमः ।
ततस्ततः प्रापतन् वै योधाश्शतसहस्रशः ॥ ८॥

एवं दृष्ट्वा कृतं कर्म भीमसेनेन संयुगे ।
दुर्योधनो महाराज शकुनिं वाक्यमब्रवीत् ॥ ९॥

दुर्योधनः—

जहि मातुल सङ्ग्रामे भीमसेनं महाबलम् ॥ १०

सऋषः—

[2]भागिनेयवचश्श्रुत्वा शकुनिश्शठकृत्तमः ।
[3]ततः प्रायान्महाराज सुबलस्यात्मजो बली ॥ ११
रणाय महते युक्तो भ्रातृभिः परिवारितः ॥ ११॥

स समासाद्य सङ्ग्रामे भीमं भीमपराक्रमम् ।
वारयामास बलवान् वेलेव मकरालयम् ॥ १२॥

नात्यवर्तत भीमोऽपि वार्यमाणश्शितैश्शरैः ॥ १३
भीमस्य शकुनिस्तत्र सव्यपार्श्वे स्तनान्तरे ।
प्रेषयामास नाराचान् रुक्मपुङ्खान् शिलाशितान् ॥ १४

1. क-ख-घ-ङ—अर्धद्वयं नास्ति
2. अ—नास्तीदमर्धम्
3. क-ख-घ-ङ—अर्धचतुष्टयं नास्ति

वर्म भित्त्वा तु ते घोराः पाण्डवस्य महात्मनः ।
न्यमज्जन्त महाराज कङ्कबर्हिणवाससः ॥ १५

सोऽतिविद्धो रणे भीमश् शरं रुक्मविभूषितम् ।
प्रेषयामास सहसा सौबलं प्रति भारत ॥ १६

तमायान्तं शरं घोरं शकुनिश्शत्रुतापनः ।
चिच्छेद सप्तधा राजन् कृतहस्तो महाबलः ॥ १७

तस्मिन् निपतिते भूमौ भीमः क्रुद्धो विशां पते ।
धनुश्चिच्छेद भल्लेन सौबलस्य हसन्निव ॥ १८

तदपास्य धनुश्छिन्नं सौबलेयः प्रतापवान् ।
अन्यदादत्त वेगेन धनुर्भल्लांश्च षोडश ॥ १९

तैस्तस्य तु महाराज भल्लैस्सन्नतपर्वभिः ।
चतुर्भिस्सारथिं विद्ध्वा भीमं पञ्चभिरेव च ॥ २०

धनुरेकेन चिच्छेद ध्वजं द्वाभ्यां विशां पते ॥ २०॥

चतुर्भिश्चतुरो वाहान् विव्याध सुबलात्मजः ॥ २१

[1]ततो हृष्टो महाराज तव पुत्रो महीपतिः ॥ २१॥

दुर्योधनः—

साधु साधु महाबाहो जहि भीमं शितैश्शरैः ।
अयमेव सुदुष्टात्मा सर्वथाऽस्मान् प्रबाधते ॥ २२॥

---

1. क-ख-घ-ङ—अर्धपञ्चकं नास्ति

तत एनं महाबाहो विनिहत्य सुखी भव ॥ २३

सञ्जयः—

ततः क्रुद्धो महाराज भीमसेनः प्रतापवान् ।
शक्तिं चिक्षेप समरे [1]रुक्मदण्डामयस्मयीम् ॥ २४
सा भीमभुजनिर्मुक्ता [2]नागजिह्वेव चञ्चला ।
निपपात रथे तूर्णं सौबस्य महात्मनः ॥ २५
[3]ततस्तामेव सङ्गृह्य शक्तिं कनकभूषणाम् ।
भीमसेनाय चिक्षेप क्रुद्धरूपो विशां पते ॥ २६
सा निर्भिद्य भुजं सव्यं पाण्डवस्य महौजसः ।
निपपात तथा भूमौ यथा विद्युन्नभश्च्युता ॥ २७
अथोत्कृष्टं महाराज धार्तराष्ट्रैस्समन्ततः ।
न तु तं ममृषे भीमस् सिंहनादं तरस्विनाम् ॥ २८
स सङ्गृह्य धनुस्सज्यं त्वरमाणो महारथः ।
मुहूर्तादिव राजेन्द्र च्छादयामास सायकैः ॥ २९
सौबलस्य बलं सङ्ख्ये त्यक्त्वा नादं महाबलः ॥ २९॥
तस्याश्वांश्चतुरो हत्वा सूतं चैव विशां पते ।
ध्वजं चिच्छेद भल्लेन त्वरमाणः पराक्रमी ॥ ३०॥

---

1. क-ख-ङ—भीमां कोपसमन्वितः घ—भीमः क्रोधसमन्वितः
2. क-ख-ङ—भीमवेगा दुरासदा घ—यमजिह्वेव
3. क—अर्धत्रयं नास्ति

हताश्वं रथमुत्सृज्य त्वरमाणो महारथः ।
तस्थौ विष्फारयंश्चापं क्रोधरक्तेक्षणश्श्वसन् ॥ ३१

शरैश्च बहुधा राजन् भीममार्च्छत् परन्तपः ॥ ३१॥

प्रतिहत्य तु वेगेन भीमसेनः प्रतापवान् ।
धनुश्चिच्छेद सङ्क्रुद्धो विव्याध निशितैश्शरैः ॥ ३२॥

[1] स तु विद्धो बलवता शत्रुणा शत्रुपापनः ।
निपपात तदा भूमौ किञ्चित्प्राणो नराधिपः ॥ ३३॥

ततस्तं विह्वलं ज्ञात्वा पुत्रस्तव विशां पते ।
अपोवाह रथेनाजौ भीमसेनशरातुरम् ॥ ३४॥

शकुनिं विह्वलं दृष्ट्वा धार्तराष्ट्राः पराङ्मुखाः ।
प्रदुद्रुवुर्दिशो भीता भीमसेनभयात् प्रभो ॥ ३५॥

सौबले निर्जिते राजन् भीमसेनेन धन्विना ।
[2]भयेन महताऽऽविष्टः पुत्रो दुर्योधनस्तव ॥ ३६॥

अपायाज्जवनैरश्वैस् सापेक्षो मातुलं प्रति ॥ ३७

पराङ्मुखं तु राजानं दृष्ट्वा सैन्यानि भारत ।
उत्सृज्योत्सृज्य गच्छन्ति द्वैरथानि समन्ततः ॥ ३८

तान् दृष्ट्वा विद्रुतान् सर्वान् धार्तराष्ट्रान् पराङ्मुखान् ।

---

1. क—अर्धत्रयं नास्ति
2. क-ख-घ—पुत्रो दुर्योधनस्तूर्णं दृष्ट्वा तं निर्जितं रणे । [पाठान्तरम्]

जवेनाभ्यपतद्भीमस् सर्वानेव महाबलः ॥ ३९

[1]ते भज्यमाना भीमेन धार्तराष्ट्राः पराङ्मुखाः ।
कर्णमासाद्य समरे स्थिता राजन् समन्ततः ॥ ४०

स हि तेषां महावीर्यो द्वीपो ह्यासीन्महारथः ॥ ४०॥

भिन्ननौका यथा राजन् द्वीपमासाद्य निर्वृताः ।
भवन्ति पुरुषव्याघ्र नाविकाः कालपर्यये ॥ ४१॥

तथा कर्णं समासाद्य तावका भरतर्षभ ।
[2]समाश्वस्तास्थिता राजन् सम्प्रहृष्टाः परस्परम् ॥ ४२॥

समाजग्मुश्च युद्धाय मृत्युं कृत्वा निवर्तनम् ॥ ४३

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि अष्टाशीतितमोऽध्यायः ॥ ८८ ॥
॥ ७३ ॥ कर्णपर्वणि अष्टाशीतितमोऽध्यायः ॥ ८८ ॥
[अस्मिन्नध्याये ४३ श्लोकाः]

---

1. अ—अर्धत्रयं नास्ति
2. क-ख-घ-ङ—नास्तीदमर्धम्

॥ एकोननवतितमोऽध्यायः ॥

कर्णपराक्रमवर्णनम् ॥

धृतराष्ट्रः—

एवं भग्नेषु सैन्येषु भीमसेनेन सञ्जय ।
दुर्योधनोऽब्रवीत् किं नु सौबलो वाऽपि साम्प्रतम् ॥ १

कर्णो वा जयतां श्रेष्ठो नृपा वा मामका युधि ।
कृपो वा कृतवर्मा वा द्रौणिर्दुश्शासनोऽपि वा ॥ २

अत्यद्भुतमहं मन्ये पाण्डवेयस्य विक्रमम् ।
[1]यदेकस्समरे सर्वान् योधयामास मामकान् ॥ ३

यथाप्रतिज्ञं योधानां राधेयः कृतवानपि ।
सर्वेषां कुरुयोधानां कर्णो वै शत्रुसूदनः ॥ ४

शर्म वर्म प्रतिष्ठा च जीविताशा च सञ्जय ॥ ४॥

तत् प्रभग्नं बलं दृष्ट्वा कौन्तेयेनामितौजसा ।
धनुर्धराणां प्रवरः कर्णः किमकरोद्युधि ॥ ५॥

पुत्रा वा मम दुर्धर्षा राजानो वा महारथाः ।
एतन्मे सर्वमाचक्ष्व कुशलो ह्यसि सञ्जय ॥ ६॥

1. क-ख-ग-ङ—नास्तीदमर्धम्

सञ्जयः—

अपराह्णे महाराज सूतपुत्रः प्रतापवान् ।
जघान सोमकान् [1]सर्वान् भीमसेनस्य पश्यतः ॥ ७॥
भीमोऽप्यतिबलस्सेनां धार्तराष्ट्रीं व्यपोथयत् ॥ ८
द्राव्यमाणं बलं दृष्ट्वा भीमसेनेन धन्विना ।
यन्तारमब्रवीत् कर्णः पाञ्चालानेव मां वह ॥ ९
मद्रराजस्ततश्शल्यश् श्वेतानश्वान् मनोजवान् ।
प्राहिणोच्चेदिपाञ्चालकरूशेषु महाबलः ॥ १०
प्रविश्य च स तां सेनां शल्यः परबलार्दनः ।
न्ययच्छत्तुरगान् हृष्टो यत्र यत्रैच्छदग्रणीः ॥ ११
तं रथं मेघसङ्काशं वैयाघ्रपरिवारणम् ।
सन्दृश्य पाण्डुपाञ्चालास् त्रस्ता ह्यासन् विशां पते ॥ १२
तस्य शब्दो रथस्याथ प्रादुरासीद् विशां पते ।
पर्जन्यसमनिर्घोषः [2]पर्वतस्येव दीर्यतः ॥ १३
ततश्शरशतैस्तीक्ष्णैर् आकर्णात् करनिस्सृतैः ।
हन्यते पाण्डवं सैन्यं शतशोऽथ सहस्रशः ॥ १४
तं तथा समरे कर्म कुर्वाणमपराजितम् ।
परिवव्रुर्महेष्वासाः पाण्डवानां महारथाः ॥ १५
तं शिखण्डी च भीमश्च धृष्टद्युम्नश्च पार्षतः ।

1. क-ख-घ—सङ्ख्ये 2. क-ख-घ—प्रास्खनद्येन मेदिनी

नकुलस्सहदेवश्च द्रौपदेयाश्च सात्वतः ॥ १६
परिवव्रुर्जिघांसन्तो राधेयं शरवृष्टिभिः ॥ १६॥
सात्यकिस्तु ततः कर्णं विंशत्या निशितैश्शरैः ।
अताडयद् रणे शूरो जत्रुदेशे नरोत्तमः ॥ १७॥
शिखण्डी पञ्चविंशत्या धृष्टद्युम्नश्च सप्तभिः ।
द्रौपदेयाश्चतुष्षष्ट्या सहदेवश्च सप्तभिः ॥ १८॥
नकुलश्च शतेनाजौ कर्णं विव्याध सायकैः ॥ १९
भीमसेनश्च राधेयं नवत्या नतपर्वभिः ।
विव्याध समरे क्रुद्धो जत्रुदेशे महाबलः ॥ २०
अथ प्रहस्यातिरथिर् व्याक्षिपद्धनुरुत्तमम् ।
मुमोच निशितान् बाणान् पीडयन् स महारथान् ॥ २१
तान् प्रत्यविध्यद्राधेयः पञ्चभिः पञ्चभिश्शरैः ॥ २१॥
सात्यकेस्तु धनुश्छित्त्वा ध्वजं च भरतर्षभ ।
अथैनं नवभिर्बाणैर् आजघान स्तनान्तरे ॥ २२॥
[1]भीमसेनं ततः क्रुद्धो विव्याध निशितैश्शरैः ॥ २३
सहदेवस्य भल्लेन ध्वजं चिच्छेद संयुगे ।
सारथिं च त्रिभिर्बाणैर् आजघान स्तनान्तरे ॥ २४
विरथान् द्रौपदेयांश्च चकार भरतर्षभ ।

1. ख—अर्धमेतं नास्ति

अक्ष्णोर्निमेषमात्रेण तदद्भुतमिवाभवत् ॥ २५

विमुखीकृत्य तान् छूरान् शरैस्सन्नतपर्वभिः ।
पाञ्चालानहनच्छूरश् चेदीनां चैव ये रथाः ॥ २६

[1]ते वध्यमानास्समरे चेदिमत्स्या विशां पते ।
कर्णमेकमभिद्रुत्य शरसङ्घैस्समार्पयन् ॥ २७

ताञ्जघान शितैर्बाणैस् सूतपुत्रो महारथः ।
[2]ततस्तान् प्रहसन् वीरो विजिग्ये पाण्डवान् रणे ॥ २८

ते वध्यमानास्समरे चेदिमुख्या विशां पते ।
प्राद्रवन्त रणे भीतास् सिंहात् क्षुद्रमृगा इव ॥ २९

तत्राद्भुततमं कर्म दृष्टवानस्मि भारत ॥ २९॥

यदेकस्समरे शूरान् यतमानान् महारथान् ।
योधयामास समरे सूतपुत्रः प्रतापवान् ॥ ३०॥

पाण्डवेयान् महाराज शरैरावारयद्रणे ॥ ३१

तत्र भारत कर्णस्य लाघवेन महात्मनः ।
तुष्टुवुर्देवतास्सर्वास् सिद्धाश्च सह चारणैः ॥ ३२

अपूजयन् महेष्वासा धार्तराष्ट्रा नरोत्तमम् ।
कर्णं रथवरश्रेष्ठं श्रेष्ठं सर्वधनुष्मताम् ॥ ३३

---

1. अ-घ-ङ—अर्धद्वयं नास्ति ख—अर्धषट्कं नास्ति
2. अ—नास्तीदमर्धम्

ततः कर्णो महाराज ददाह समरे रिपून् ।
कक्षं शुष्कं यथा वह्निर् निदाघे ज्वलितो दहेत् ॥ ३४

ते वध्यमानाः कर्णेन पाण्डवेयास्ततस्ततः ।
प्राद्रवन्त रणे भीताः कर्णं दृष्ट्वा महारथम् ॥ ३५

तत्राक्रन्दो महानासीत् पाञ्चालानां विशां पते ।
वध्यतां सायकैस्तीक्ष्णैर् उग्रैः कर्णधनुश्च्युतैः ॥ ३६

तेन शब्देन वित्रस्ता पाण्डवानां महारथाः ।
कर्णमेकं रणे योधं मेनिरे तत्र भारत ॥ ३७

तत्राद्भुतं महच्चक्रे राधेयश्शत्रुकर्शनः ।
यदेनं पाण्डवास्सर्वे न शेकुरभिवीक्षितुम् ॥ ३८

जलौघः पर्वतश्रेष्ठं यथाऽऽसाद्य प्रभिद्यते ।
तथा तत् पाण्डवं सैन्यं कर्णं प्राप्य व्यदीर्यत ॥ ३९

कर्णोऽपि समरे राजन् विधूमोऽग्निरिव ज्वलन् ।
ददाह पुरुषव्याघ्रः पाण्डवानां महाचमूः ॥ ४०

शिरांसि च महाराज योधानां कुण्डलानि च ।
बाहूनूरूंस्तथा जङ्घाश् चिच्छेद परमेषुभिः ॥ ४१

हस्तिदन्तत्सरून् खड्गान् ध्वजाञ् शक्तीर्हयान् गजान् ।
रथांश्च विविधाकारान् पताका व्यजनानि च ॥ ४२

ईषानक्षान् युगांश्चैव चित्रांश्च रथकूबरान् ।

चिच्छेद बहुधा कर्णो योधव्रतमनुष्ठितः ॥ ४३

तत्र भारत कर्णेन निहतैर्गजवाजिभिः ।
अगम्यरूपा पृथिवी मांसशोणितकर्दमा ॥ ४४

विषमं च समं चैव हतैरश्वैः पदातिभिः ।
रथैश्च कुञ्जरैश्चैव न प्राज्ञायत किञ्चन ॥ ४५

नापि स्वे न परे योधा व्यज्ञायन्त विशां पते ।
घोरे शरान्धकारे तु शस्त्रास्त्रे च विजृम्भिते ॥ ४६

राधेयधनुषा मुक्तैश् शरैः कनकभूषणैः ।
सञ्छादितं महाराज पाण्डवानां महद्बलम् ॥ ४७

ते पाण्डवेयास्समरे कर्णेन स्म पुनः पुनः ।
अभज्यन्त महाराज यतमाना महारथाः ॥ ४८

मृगसङ्घान् यथा क्रुद्धस् सिंहो द्रावयते [1]बली ।
[2]पाण्डवानां रथव्रातान् कर्णो द्रावयते तथा ॥ ४९

कर्णस्तु समरे योधांस् तत्र तत्र महायशाः ।
कालयामास सङ्क्रुद्धो यथा पशुगणान् वृकः ॥ ५०

दृष्ट्वा तु पाण्डवीं सेनां धार्तराष्ट्राः पराङ्मुखीम् ।
अनुजग्मुर्महेष्वासा नदन्तो भैरवान् रवान् ॥ ५१

---

1. क-ख-घ-ङ—तथा
2. क-ख-घ-ङ—नाशीदमभैम्

दुर्योधनोऽपि राजेन्द्र मुदा परमया युतः ।
वादयामास संहृष्टो नानावाद्यान्यनेकशः ॥ ५२

पाञ्चालाश्च महेष्वासा भग्ना भग्नाः पुनः पुनः ।
न्यवर्तन्त रणे शूरा मृत्युं कृत्वा निवर्तनम् ॥ ५३

तान् निवृत्तान् रणे शूरान् राधेयश्शत्रुतापनः ।
अनेकशो महाराज बभञ्ज च पुनः पुनः ॥ ५४

तत्र भारत कर्णेन पाञ्चालाः पञ्चविंशतिः ।
निहतास्सायकैः क्रोधाच् [1]चेदयश्च परश्शताः ॥ ५५

कृत्वा शून्यान् रथोपस्थान् वाजिपृष्ठांश्च भारत ।
निर्मनुष्यान् गजस्कन्धान् पादातांश्चापि विद्रुतान् ॥ ५६

आदित्य इव मध्याह्ने दुर्निरीक्ष्यः परैस्तदा ।
कालान्तक इव क्रुद्धस् सूतपुत्रः प्रकाशते ॥ ५७

एवमेतन्महाराज नरवाजिरथद्विपान् ।
हत्वा तस्थौ महेष्वासः कर्णोऽरिगणसूदनः ॥ ५८

यथा भूतगणान् हत्वा कालस्तिष्ठेन्महाबलः ।
तथाऽसौ सोमकान् हत्वा तस्थावेको महारथः ॥ ५९

तत्राद्भुतमपश्याम पाञ्चालानां पराक्रमम् ।

---

1. क-घ-ङ—छेदयन्तः पराजिताः
ख—भेदयन्तः परश्शताः

वध्यमानाश्च यत् कर्णं न जहू रणमूर्धनि ॥ ६०

दुर्योधनो महाराज कृपो दुश्शासनस्तथा ।
द्रौणिश्च कृतवर्मा च शकुनिश्चापि सौबलः ॥ ६१

न्यहनन् पाण्डवीं सेनां शतशोऽथ सहस्रशः ॥ ६१॥

कर्णपुत्रौ च राजेन्द्र भ्रातरौ सत्यविक्रमौ ।
बलं नाशयतस्त्वाजौ पाञ्चालानां ततस्ततः ॥ ६२॥

तत्र युद्धं महच्चासीद् घोरं विशसनं महत् ॥ ६३

तथैव पाण्डवाश्शूरा धृष्टद्युम्नशिखण्डिनौ ।
द्रौपदेयाश्च सङ्क्रुद्धा न्यहनंस्तावकं बलम् ॥ ६४

एवमेष क्षयो वृत्तः पाण्डवानां ततस्ततः ।
तावकानां च भूयिष्ठं भीमं प्राप्य महाबलम् ॥ ६५

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि एकोननवतितमोऽध्यायः ॥ ८९ ॥
॥ ७३ ॥ कर्णपर्वणि एकोननवतितमोऽध्यायः ॥ ८९ ॥
[अस्मिन्नध्याये ६५ श्लोकाः]

॥ नवतितमोऽध्यायः ॥

पार्थचोदनया कृष्णेन कर्णसमीपं प्रति रथप्रापणम् ॥ १ ॥ शल्येन कर्णप्रोत्साहनम् ॥ २ ॥

सञ्जयः—

हत्वा तु फल्गुनस्सैन्यं कौरवाणां पृथक् पृथक् ।
सूतपुत्रस्य संरम्भं दृष्ट्वा चापि महाहवे ॥ १

शोणितोदां नदीं कृत्वा मांसमज्जास्थिशैवलाम् ।
[1]मनुष्यशीर्षपाषाणां हस्त्यश्वकृतरोधसम् ॥ २

शूरास्थियवसङ्कीर्णां काकगृध्रादिनादिताम् ।
छत्रहंसप्लवोपेतां वीरक्षीरापहारिणीम् ॥ ३

हारपद्माकरवतीम् उष्णीषवरफेनिलाम् ।
धनुश्शरगृहोपेतां नरक्षुद्रकपालिनीम् ॥ ४

वर्मचर्मभ्रमोपेतां रथोडुपसमाकुलाम् ।
जयैषिणां च सुतरां भीरूणां च सुदुस्तराम् ॥ ५

तां नदीं द्रावयित्वा वै वीमत्सुः परवाहिनीम् ।
वासुदेवमिदं वाक्यम् अब्रवीत् पुरुषर्षभः ॥ ६

1. क-ख-घ-ङ—अष्टाधानि न सन्ति

अर्जुनः—

एष केतू रणे कृष्ण सूतपुत्रस्य दृश्यते ॥ ६॥

भीमसेनादयश्चैव योधयन्ति महारथाः ।

[1]एते द्रवन्ति पाञ्चालाः कर्णत्रस्ता जनार्दन ॥ ७॥

एष दुर्योधनो राजा श्वेतच्छत्रेण धार्यते ।

कर्णेन भग्नान् पाञ्चालान् द्रावयन् बहु शोभते ॥ ८॥

[2]कृपश्च कृतवर्मा च भारद्वाजश्च वीर्यवान् ।

एते रक्षन्ति राजानं सूतपुत्रेण रक्षिताः ॥ ९॥

अवध्यमानास्ते चापि योधयिष्यन्ति सोमकान् ॥ १०

एष शल्यो रथोपस्थे रश्मिसङ्ग्राहकोविदः ।

सूतपुत्ररथं कृष्ण वाहयन् बहु शोभते ॥ ११

तत्र मे बुद्धिरुत्पन्ना वाहयात्र रथं मम ।

नाहत्वा समरे कर्णं निवर्तिष्ये कथञ्चन ॥ १२

मा स्म कर्णो रणे पार्थान् सृञ्जयांश्च महारथान् ।

निश्शेषान् समरे हन्यात् पश्यतां नो जनार्दन ॥ १३

सञ्जयः—

ततः प्रायाद्रथेनाशु केशवस्तव वाहिनीम् ।

कर्णं प्रति महाराज द्वैरथे सव्यसाचिनः ॥ १४

---

1. ख—अधैवयं नास्ति
2. अ—पञ्चाधीनि न सन्ति ख—नास्तीदमर्धम्

प्रयातो रथेनाशु कृष्णो राजन् महाहवे ।
श्वासयद्रथेनाशु पाण्डुसैन्यानि सर्वशः ॥ १५

घोषस्ततस्तस्य पाण्डवस्य बभूव ह ।
सवास्त्रनिपातेन पर्वतेष्विव मारिष ॥ १६

इता रथघोषेण पाण्डवस्सत्यविक्रमः ।
भ्ययात्तामभेयात्मा विजयस्तव वाहिनीम् ॥ १७

गायान्तं समीक्ष्यैव श्वेताश्वं कृष्णसारथिम् ।
द्राजोऽब्रवीत् कर्णं दृष्ट्वा केतुं महात्मनः ॥ १८

शल्यः—

यं स रथ आयाति श्वेताश्वः कृष्णसारथिः ।
न्नमित्रान् समरे यं कर्ण परिपृच्छसि ॥ १९

र तिष्ठति कौन्तेयस् संस्पृशन् गाण्डिवं धनुः ।
हनिष्यसि चेदद्य तन्नश्श्रेयो भविष्यति ॥ २०

नुर्ज्या चन्द्रताराङ्का पताकाकिङ्किणीयुता ।
य कर्णार्जुनस्यैषा सौदामिन्यम्बरे यथा ॥ २१

र ध्वजाग्रे पार्थस्य प्रेक्षमाणस्समन्ततः ।
यते वानरो भीमो वीक्षतां भयवर्धनः ॥ २२

च्चक्रं गदा शङ्खश् शार्ङ्गं कृष्णस्य च प्रभो ।

अ—द्वाविंशत्यर्धानि न सन्ति

दृश्यते पाण्डवरथे वाहयानस्य वाजिनः ॥ २३

एतत् कूजति गाण्डीवं विकृष्टं सव्यसाचिना ।
एते हस्तवता मुक्ता घ्नन्त्यमित्रान् शिताश्शराः ॥ २४

[1]विशालायतताम्राक्षैः पूर्णचन्द्रनिभाननैः ।
एषा भूः कीर्यते राज्ञां शिरोभिरपलायिनाम् ॥ २५

एते परिघसङ्काशाः पुण्यगन्धानुलेपनाः ।
उद्धता रणशौण्डानां पात्यन्ते सायुधा भुजाः ॥ २६

निरस्तजिह्वानेत्रान्ता वाजिनस्सह सादिभिः ।
पतिताः पात्यमानाश्च क्षितौ क्षीणा विशेरते ॥ २७

एते पर्वतशृङ्गाणां तुल्या हैमवता गजाः ।
सञ्छिन्नकुम्भाः पार्थेन प्रपतन्त्यद्रयो यथा ॥ २८

गन्धर्वनगराकारा रथा हतरथेश्वराः ।
विमानादिव पुण्यान्ते स्वर्गिणो निपतन्त्यमी ॥ २९

व्याकुलीकृतमत्यर्थं पश्य सैन्यं किरीटिना ।
नानामृगसहस्राणां यूथं केसरिणा यथा ॥ ३०

एष तिष्ठति कौन्तेयस् संस्पृशन् गाण्डिवं धनुः ।
तं चेद्वनिष्यसि त्वद्य तन्नश्श्रेयो भविष्यति ॥ ३१

त्वामभिप्रेप्सुरायाति कर्ण निघ्नन् परान् वरान् ।

1. ख—नवार्धानि न सन्ति

असज्जमानो राधेय तं याहि प्रति भारत ॥ ३२

[1]घृणां त्यक्त्वा प्रमादं च भृगोरस्त्रं च संस्मर ।
दृष्टिं मुष्टिं च सन्धानः कृत्वा रामोपदेशजम् ॥ ३३

धनञ्जयं जयप्रेप्सुः प्रत्युद्गच्छ महारथम् ॥ ३३॥

वाजिविद्यापरिज्ञाने नये बुद्धौ बले हरिः ।
न मां विजेष्यते कर्ण गदायुद्धे विशेषतः ॥ ३४॥

एषा विदीर्यते सेना धार्तराष्ट्री समन्ततः ।
अर्जुनस्य भयात् तूर्णं निघ्नतश्शात्रवान् बहून् ॥ ३५॥

वर्जयन् सर्वसैन्यानि त्वरते हि धनञ्जयः ।
त्वदर्थमिति मन्येऽहं यथाऽस्योदीर्यते वपुः ॥ ३६॥

न ह्यवस्थाप्यते पार्थो युयुत्सुः केनचिद्रथम् ।
त्वद्दते क्रोधदीप्तो हि पीड्यमाने वृकोदरे ॥ ३७॥

विरथं धर्मराजं च दृष्ट्वा सुदृढविक्षतम् ।
शिखण्डिनं सात्यकिं च धृष्टद्युम्नं च पार्षतम् ॥ ३८॥

द्रौपदेयान् युधामन्युम् उत्तमौजसमेव च ।
नकुलं सहदेवं च वशगांस्ते समीक्ष्य तु ॥ ३९॥

सहसैकरथः पार्थस् त्वामभ्येति परन्तपः ॥ ४०
क्रोधरक्तेक्षणः कर्ण जिघांसुस्सर्वपार्थिवान् ।

---

1. क-ख-घ-ङ—पञ्चार्धानि न सन्ति

त्वरितोऽभिपतत्यस्मान् हत्वा सैन्यं पृथग्विधम् ॥ ४१
त्वं कर्ण प्रतियाह्येनं नास्त्यन्यो हि धनुर्धरः ॥ ४१॥
न तं पश्यामि लोकेऽस्मिन् त्वत्तो ह्यन्यं कथञ्चन ।
योऽर्जुनं सागरौघाभं क्रुद्धं वेलेव वारयेत् ॥ ४२॥
न चास्य रक्षां पश्यामि पार्श्वतो न च पृष्ठतः ।
एक एवाभियाति त्वां पश्य साफल्यमात्मनः ॥ ४३॥
त्वं हि शक्तो रणे कृष्णौ योद्धुमेतौ परन्तपौ ।
[1]तवैष भारो राधेय प्रत्युद्याहि धनञ्जयम् ॥ ४४॥
त्वं समो ह्यसि भीष्मेण द्रोणद्रौणिकृपैरपि ।
सव्यसाचिप्रतिरथस् तं निवारय पाण्डवम् ॥ ४५॥
लेलिहानं यथा सर्पं गर्जन्तं वृषभं यथा ।
वनस्थितं यथा व्याघ्रं जहि कर्ण धनञ्जयम् ॥ ४६॥
एते द्रवन्ति समरान्निरपेक्षा नराधिपाः ।
अर्जुनस्य भयात् तूर्णं धार्तराष्ट्रा महारथाः ॥ ४७॥
एषां तु द्रवतां सङ्ख्ये नान्योऽस्ति युधि मानद ।
भयापहो भवेद्वीरस् त्वामृते सूतनन्दन ॥ ४८॥
एते त्वां कुरवस्सर्वे द्वीपमासाद्य संयुगे ।
विष्ठिताः पुरुषव्याघ्र त्वत्तश्शरणकाङ्क्षिणः ॥ ४९॥

1. ख—अर्धचतुष्टयं नास्ति

वैदेहाम्बष्ठकाम्भोजास् तथा नग्नजितस्त्वया ।
गान्धाराश्च यया धृत्या जितास्सङ्ख्ये सुदुर्जयाः ॥ ५०॥

तां धृतिं कुरु राधेय ततः प्रत्येहि पाण्डवम् ।
वासुदेवं च वार्ष्णेयं प्रीयमाणं किरीटिना ॥ ५१॥

[1]प्रत्युद्याहि महाबाहो पौरुषे महति स्थितः ॥ ५२

यथैकेन त्वया पूर्वं कृतो दिग्विजयः पुरा ।
मरुत्सूनोर्यथा सूनुर् घातितश्शक्रदत्तया ॥ ५३

कलिङ्गाधिपतिं जित्वा त्वया नीता तदन्तरे ।
दुर्योधनस्य महिषी जरासन्धं विजित्य च ॥ ५४

तदेतत् सर्वमालम्ब्य जहि पार्थं धनञ्जयम् ॥ ५४॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि नवतितमोऽध्यायः ॥ ९० ॥
॥ ७३ ॥ कर्णपर्वणि नवतितमोऽध्यायः ॥ ९० ॥
[अस्मिन्नध्याये ५४॥ श्लोकाः]

---

1. क-ख-घ-ङ—षडधीनि न सन्ति

॥ एकनवतितमोऽध्यायः ॥

कर्णेन पार्थप्रशंसनपूर्वकं तद्वधप्रतिज्ञा ॥ १ ॥ सङ्कुलयुद्धम् ॥ २ ॥

कर्णः—

प्रकृतिस्थोऽसि मे शल्य इदानीं सम्मतस्तथा ।
प्रतिभासि महाबाहो अभीतश्च धनञ्जयात् ॥ १

पश्य बाह्वोर्बलं मेऽद्य धनुषश्चिशिक्षितस्य च ।
एकोऽद्य निहनिष्यामि पाण्डवानां महाचमूम् ॥ २

कृष्णौ च पुरुषव्याघ्रौ तव सत्यं ब्रवीमि भोः ।
नाहत्वा युधि तौ वीरौ प्रतियास्ये कथञ्चन ॥ ३

निहतो वा गमिष्यामि नैकान्तोऽस्ति रणे जयः ।
[1]कृतार्थोऽद्यागमिष्यामि हतो वा स्वर्गमाप्नुयाम् ॥ ४

शल्यः—

[2]अजेयमेनं प्रवदन्ति सङ्ख्ये
धनञ्जयं कर्ण रथे प्रवीरम् ।
एकाकिनं किमु कृष्णाभिगुप्तं
हन्तुं सहायं क इहोत्सहेत ॥ ५

1. ख—इदमर्धं नास्ति 2. क-ख-घ-ङ—अर्धत्रयं नास्ति

कर्णः—

नैतादृशो जातु रणो बभूव
अस्मिँल्लोके यादृशस्तु श्रुतो नः ।
[1]तमीदृशं प्रतियोत्स्यामि पार्थं
महाहवे पश्य च पौरुषं मे ॥ ६

रणे चरत्येष रथप्रवीरस्
सितैर्हयैः कौरवराजपुत्रः ।
अद्याहं तं निहनिष्यामि सङ्ख्ये
धनञ्जयं पश्यतस्ते समृद्धम् ॥ ७

अस्येदिनौ राजपुत्रस्य पाणी
अवेपमानौ जातकिणौ महान्तौ ।
दृढायुधः कृतिमान् क्षिप्रयोधी
न पाण्डवस्य सदृशोऽस्ति योधः ॥ ८

गृह्णन् विमुञ्चन् स निमेषमात्रात्
पुरन्दरस्येव च तुल्यवीर्यः ।
ते क्रोशमात्रे निपतन्त्यमोघा
न पाण्डवस्य सदृशोऽस्ति कश्चित् ॥ ९

[2]रथान् वरानेति रथप्रवीरश्
शीघ्रैर्हयैः कौरवान् राजपुत्रः ।

---

1. क-ख-घ—अर्धद्वयं नास्ति 2. अ—नास्त्यर्धद्वयम्

स चाद्य मां नेष्यति क्षिप्रमन्तं
कर्णस्यान्तेऽप्यत्र भवेत् समर्थः ॥ १०

अतीवान्यान् धनुषि हि राजपुत्रस्
त्वतीवान्यान् केशवश्चक्रयुद्धे ।
तमीदृशं प्रतियोत्स्यामि पार्थं
महाहवे त्वं मम पश्य पौरुषम् ॥ ११

अतोषयत् खाण्डवे यो हुताशं
कृष्णो हि कृष्णेन युतस्तरस्वी ।
लेभे चक्रं तत्र कृष्णो महात्मा
धनुर्वरं गाण्डिवं सव्यसाची ॥ १२

श्वेताश्वयुक्तं च महौघघोषं
रथं महाबाहुरदीनसत्त्वः ।
महेषुधी चाक्षयौ विद्युदाभौ
शस्त्राणि चान्यानि तु हव्यवाहात् ॥ १३

यस्त्विन्द्रलोके निजघान सङ्गशो
यः कालकेयानपरांश्च दैत्यान् ।
लेभे शङ्खं देवदत्तं च तत्र
को नाम तस्याभ्यधिकः पृथिव्याम् ॥ १४

महादेवं तोषयामास चैव
साक्षात् सुयुद्धेन महानुभावः ।
लेभे ततः पाशुपतं सुघोरं
त्रैलोक्यसंहारकरं महास्त्रम् ॥ १५

पृथक् पृथक् लोकपालास्समेता
ददुर्ह्यस्त्राण्यप्रमेयाणि तस्मै ।
[1]अस्त्रैर्जघानाश्वरथप्रवीरान्
सकालकेयानसुरान् समेतान् ॥ १६

अनन्तवीर्येण च केशवेन
नारायणेनाप्रतिमेन गुप्तः ।
तथा विराटस्य पुरे समेतान्
सर्वानस्मानेकरथेन जित्वा ॥ १७

जहार तद्गोधनमाजिमध्ये
वस्त्राणि चादत्त महारथानाम् ॥ १७॥

तमीदृशं वीर्यगुणोपपन्नं
कृष्णद्वितीयं वरये रणाय ॥ १८

वर्षायुतैर्यस्य गुणा न शक्या
वक्तुं समेतैरपि सर्वलोकैः ।

---

1. अ—नास्तीदमर्धम्

महात्मनश्शङ्खचक्रासिपाणेर्
विष्णोर्जिष्णोर्वसुदेवात्मजस्य ॥ १९

भयं न मे जायते साध्वसं च
दृष्ट्वा कृष्णावेकरथे समेतौ ॥ १९॥

उभौ च शूरौ कृतिनौ कृतास्त्रौ
महारथौ संहननोपपन्नौ ।
एतादृशौ नरवीरौ समेतौ
स्थानाच्च्युतौ देवकुमारवर्चसौ ॥ २०॥

[1]अभ्यादित्याविन्द्रबृहस्पती वा
यमान्तकौ वा शशिपूषणौ वा ।
भगांशमित्रावरुणावश्विनौ वा
मरुद्गणा वा वसवस्सहेन्द्राः ॥ २१॥

व्यस्तास्समस्ताश्च युधा न शक्ता
जेतुं प्रसह्यार्जुनमच्युतं च ॥ २२
एतौ हि तावर्जुनवासुदेवौ
कोऽन्यः प्रतीयान्मद्दतेऽद्य शल्य ॥ २२॥

[2]सर्वेषां वृष्णिवीराणां कृष्णे लक्ष्मीः प्रतिष्ठिता ।
सर्वेषां पाण्डुपुत्राणां जयः पार्थे प्रतिष्ठितः ॥ २३॥

---

1. क-ख-घ-ङ—अभ्यानिला 2. अ—सप्तार्धानि न सन्ति

तावुभौ पुरुषव्याघ्रौ समाने स्यन्दने स्थितौ ।
मामेकमभियोद्धारौ सुजातं बत शल्य मे ॥ २४॥

नैतच्चिरात् क्षिप्रमिमं रथं मे
प्रवर्तयैतावभियामि चैव ।
अस्मिन् मुहूर्ते निहतौ पश्य कृष्णौ
मया हतं वा युधि मामरिभ्याम् ॥ २५॥

[1]मनोरथो यस्तु महान् हि नित्यं
मद्रेश युद्धं प्रति पाण्डवेन ।
नेदं चिरादाशु भविष्यतीह
तोषस्तु मां वर्धयते निकामम् ॥ २६॥

एतावहं वा युधि पातयिष्ये
मां वाऽपि कृष्णौ निहनिष्यतोऽथ ॥ २७

सञ्जयः—

[2]एवं ब्रुवाणस्सहसा महारथस्
त्वभ्यद्रवत् पाण्डवं सूतपुत्रः ॥ २७॥

अभ्येत्य पुत्रेण तवाभिनन्दितास्
समेत्य चोक्ताः कुरुवीरसत्तमाः ।

---

1. ख-घ-ङ—अर्धमेतत् नास्ति
2. अ—इति ब्रुवन् शल्यमभिप्रहन्ता
कर्णो रणे मेघ इवोन्ननाद ॥ [पाठान्तरम्]

[1]कृपश्च भोजश्च महारथावुभौ
स चापि राजा शकुनिस्सहात्मजैः ॥ २८॥

गुरोस्सुतस्त्वत्र तवात्मजास्तथा
पदातिसङ्घा द्विरदा रथास्तथा ॥ २९

दुर्योधनः—

निरुन्धताभिद्रवताच्युतार्जुनौ
श्रमेण संयोजयताशु सर्वशः ।
तथा भवद्भिर्भृशविक्षतावुभौ
सुखेन हन्यान्मम वाहिनीपतिः ॥ ३०

सञ्जयः—

तथेति चोक्त्वा त्वरितास्तथाऽर्जुनं
जिघांसमानास्समरे समभ्ययुः ।
[2]शरैश्च जघ्नुर्युधि तं महारथम्
धनञ्जयं सर्वत एव पार्थिवाः ॥ ३१

बकोशे

1. संरुन्धताभिद्रवताच्युतार्जुनौ
श्रमेण संयोजयताशु सर्वशः ।
तथा भवद्भिर्भृशदुःखितावुभौ
सुखेन हन्याम्मम वाहिनीपतिः ॥
[अयं श्लोको द्विरुक्तो भवति—अधिकः पाठः]

2. क-ख—इदं पादद्वयं नास्ति

नदीनदान् पूर्णजलान् महार्णवो
यथा तथा तान् समरेऽर्जुनोऽग्रसत् ॥ ३१॥

न सन्दधन्नैव समुद्धरञ् शरान्
न चापि मुञ्चन्नरिभिस्स दृश्यते ।
तथाऽर्जुनास्त्रैर्निशितैर्विदारिता
हता निपेतुर्नरवाजिकुञ्जराः ॥ ३२॥

शरार्चिषं गाण्डीवचारुमण्डलं
युगान्तसूर्यप्रतिमानतेजसम् ।
न कौरवाश्शेकुरुदीक्षितुं तदा
यथा रविं व्याधितचक्षुषो जनाः ॥ ३३॥

तमभ्यधावद्विसृजञ् शरान् कृपस्
तथैव भोजस्तव चात्मजस्स्वयम् ।
[1]महारथो द्रोणसुतश्च सायकैर्
अवाकिरंस्तोयधरा इवाचलम् [2]॥ ३४॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि एकनवतितमोऽध्यायः ॥ ९१ ॥
॥ ७३ ॥ कर्णपर्वणि एकनवतितमोऽध्यायः ॥ ९१ ॥
[अस्मिन्नध्याये ३४॥ श्लोकाः]

---

1. क-ख-घ-ङ—नास्तीदमर्धम्
2. क—सञ्जयः—तमभ्यधावद् द्विजपुङ्गवः कृपस्
तथैव भोजस्तव चात्मजस्स्वयम् । [अधिकः पाठः]

॥ द्विनवतितमोऽध्यायः ॥

सङ्कुलयुद्धम् ॥

सञ्जयः—

[1]जिघांसुभिस्तान् कुशलैश्शरोत्तमान्
महात्मभिस्सम्प्राहितान् प्रयत्नतः ।
शरैः प्रचिच्छेद च पाण्डवस्त्वरन्
परान् विनिर्भिद्य च तांस्त्रिभिस्त्रिभिः ॥ १

स गाण्डिवव्यायतपूर्णमण्डलस्
तपन् रिपूनर्जुनभास्करो बभौ ।
शरोग्ररश्मिश्शुचिशुक्रमध्यगो
यथैव सूर्यः परिवेषवांस्तथा ॥ २

अथाग्र्यबाणैर्दशभिर्धनञ्जयं
गुरोस्तनूजस्स तदाऽच्युतं त्रिभिः ।
चतुर्भिरश्वांश्च कपिं ततस्त्रिभिश्
शरैश्च नाराचवरैरवाकिरत् ॥ ३

---

1. ब—तमभ्यधावद्विकिरञ् शरान् कृपस्
तथैव भोजश्च तवात्मजस्त्वयम् ।

[पुनरप्यधिकतयाऽध्यायारम्भे दृश्यते]

तथा ततः प्रस्फुरदस्य कार्मुकं
त्रिभिश्शरैर्यन्तृशिरश्चकर्त ह ।
हयांश्चतुर्भिश्चतुरस्त्रिभिर्ध्वजं
धनञ्जयो द्रौणिरथादपातयत् ॥ ४

स रोषपूर्णो मणिवज्रहाटकैर्
अलङ्कृतं तक्षकभोगवर्चसम् ।
स तद्बधे कार्मुकमन्यदाददे
यथा महाहिप्रवरं महत्तदा ॥ ५

स्वमायुधं चाथ विकीर्य भूतले
धनुश्च कृत्वा सगुणं गुणाधिकः ।
स मानयंस्तावजितौ नरोत्तमौ
शरोत्तमैर्द्रौणिरविध्यदन्तिकात् ॥ ६

कृपश्च भोजश्च तवात्मजस्तथा
[1]शरैरनेकैर्युधि पाण्डवर्षभम् ।
महारथास्संयुगमूर्धनि स्थितास्
तमोनुदं वारिधरा इवाद्रवन् ॥ ७

कृपस्य पार्थस्सशरं शरासनं
हयान् ध्वजं सारथिमेव चाष्टभिः ।

1. क-ख-घ-ङ—अथ पादोऽनन्तरश्च नस्तः

[1]न्यपातयद्बाहुसहस्रविक्रमस्
तथा यथा वज्रधरः पुरा बलेः ॥ ८

स पाण्डवेनाथ निपातितायुधो
ध्वजावमर्दे च कृते महाहवे ।
ततः कृपो बाणसमानमाचिनोद्
यथाऽऽपगेयः प्रथमं किरीटिना ॥ ९

शरैः प्रचिच्छेद तवात्मजस्य
ध्वजं धनुश्च प्रचकर्त नर्दतः ।
जघान चाश्वान् कृतवर्मणश्शुभान्
ध्वजं प्रचिच्छेद तवात्मजस्य ह ॥ १०

सवाजिसूतेष्वसनान् सकेतनाञ्
जघान नागाश्वरथांश्च स त्वरन् ।
ततः प्रकीर्णं सुमहद्बलं तव
प्रतापितं सवितुरिवौजसा भृशम् ॥ ११

तथाऽर्जुनस्याथ रथेन केशवश्
चकार शत्रूनपसव्यमातुरान् ।
ततः प्रयान्तं त्वरितं धनञ्जयं
शतक्रतुं वृत्रनिजघ्नुषं यथा ॥ १२

1. क-ख-ब-ङ—अर्धमेतं नास्ति

तमन्वधावन् पुनरुच्छ्रितध्वजै
रथैस्सुयुक्तैरपरे युयुत्सवः ॥ १२॥

अथाभिसृत्य प्रतिवार्य चाहितान्
धनञ्जयस्यानुचरा महारथाः ।
शिखण्डिशैनेययमाश्रितैश्शरैर्
अवाकिरन्तो व्यनदन् सुभैरवम् ॥ १३॥

ततोऽभिजघ्नुः कुपिताः परस्परं
शरैस्तदाऽञ्जोगतिभिस्सुतेजनैः ।
कुरुप्रवीरास्सह पाण्डसृञ्जयैस्
सुरारयो देवपतिं यथा तथा ॥ १४॥

जयेप्सवस्स्वर्गमनाय चोत्सुकास्
सपत्तिनागाश्वरथास्समन्ततः ।
[1]जगर्जुरुच्चैर्बलवच्च विव्यधुश्
शरैस्सुमुक्तैरितरेतरं हृदि ॥ १५॥

[2]शरान्धकारे तु महात्मभिः कृते
महाहवे योधवरैः परस्परम् ।

---

1. क-ख-घ-ङ—तथैव सर्वे बहवश्च
2. क-ख-घ-ङ—शरान्धकारं च कृतं महात्मभिस्
तदा दिशो न प्रबभुश्शरार्दिताः । [पाठान्तरम्]

[1]चतुर्दिशो वै विदिशश्च पार्थिव
प्रभा च सूर्यस्य तमोवृताऽभवन् ॥ १६॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि द्विनवतितमोऽध्यायः ॥ ९२ ॥
॥ ७३ ॥ कर्णपर्वणि द्विनवतितमोऽध्यायः ॥ ९२ ॥
[अस्मिन्नध्याये १६॥ श्लोकाः]

॥ त्रिनवतितमोऽध्यायः ॥

सङ्कुलयुद्धम् ॥

सञ्जयः—

राजन् कुरूणां प्रवरैर् बलैर्भीममभिद्रुतम् ।
मज्जन्तमिव कौन्तेयम् उज्जिहीर्षुर्धनञ्जयः ॥ १
विमृद्य सूतपुत्रस्य सेनां भारत सायकैः ।
प्राहिणोन्मृत्युलोकाय परवीरान् धनञ्जयः ॥ २
ततोऽस्याम्बरमावृत्य शरजालानि भागशः ।
अदृश्यन्त ततोऽन्ये च निघ्नन्तस्तव वाहिनीम् ॥ ३
स पक्षिसङ्घाचरितम् आकाशं पूरयञ् शरैः ।

1. क-ख-ङ—नास्तीदमर्धम्
* ख—नास्त्यध्यायसमाप्तिः

धनञ्जयो महाबाहुः कुरूणामन्तकोऽभवत् ॥ ४

ततो भल्लैः क्षुरप्रैश्च [1]नाराचैर्विमलैरपि ।
गात्राणि प्रावृणोत् पार्थश् शिरांसि विचकर्त ह ॥ ५

छिन्नगात्रैर्विकवचैर् विशिरस्कैस्समन्ततः ।
पातितैश्च पतद्भिश्च योधैरासीत् समावृता ॥ ६

धनञ्जयशरव्यस्तैस् स्यन्दनाश्वनरद्विपैः ।
[2]सञ्छिन्नैर्विधृतैर्व्यङ्गैर् व्यङ्गाङ्गावयवैस्तदा ॥ ७

गतसत्त्वैस्ससत्त्वैश्च संवृताऽऽसीद्वसुन्धरा ॥ ७॥

[3]सुदुर्गमा सुविषमा घोराऽत्यर्थं सुदुर्दृशा ।
रणभूमिर्बभौ राजन् घोरा वैतरणी यथा ॥ ८॥

ईषाचक्राक्षभग्नैश्च [4]व्यश्वैस्साश्वैश्च युध्यताम् ।
ससूतैर्हतसूतैश्च [5]रथैस्तीर्णाऽभवन्मही ॥ ९॥

सुवर्णवर्मसन्नाहैर् योधैः कनकमालिभिः ।
आस्थिताः कूप्तवर्माणो भद्रा नित्यमदा द्विपाः ॥ १०॥

क्रुद्धाः क्रुद्धैर्महामात्रैः प्रेषितार्जुनमभ्ययुः ॥ ११

---

1. क-ख-घ—क्षुरैरञ्जलिकैरपि
2. क-ख-घ-ङ—नास्तीदमर्धम्
3. ख-घ-ङ—अर्धद्वयं नास्ति
4. ख-घ-ङ—सादिभिश्चैव वाजिभिः क—सादिहीनैश्च वाजिभिः
5. क-घ—रथैस्तीर्णा वसुन्धरा ख—रथैः कीर्णा वसुन्धरा

चतुश्शता रथवरा हताः पेतुः किरीटिना ।
पर्यस्तानीव शृङ्गाणि ससत्त्वानि महागिरेः ॥ १२

धनञ्जयशराभ्यस्तैः कीर्णा गौर्वरवारणैः ।
अभिपेदेऽर्जुनरथो घनं भित्वा यथांशुमान् ॥ १३

हतैर्गजमनुष्यैश्च भग्नैश्च बहुधा रथैः ।
विशस्त्रवस्त्रकवचैर् युद्धशौण्डैर्गतासुभिः ॥ १४

अपविद्धायुधैस्तीर्णो मार्ग आसीत् किरीटिनः ॥ १४॥

विष्फारितं च गाण्डीवम् अत्यासीद्भैरवस्वनम् ।
सुघोषं वज्रनिष्पेषं स्तनयन्निव तोयदः ॥ १५॥

तव व्यदीर्यत चमूर् धनञ्जयशराहता ।
महावातसमाविद्धा महानौरिव सागरे ॥ १६॥

नानारूपाः प्राणहराश् शरा गाण्डीवचोदिताः ।
अलातोल्काशनिप्रख्यास् तव सैन्यं विनिर्दहन् ॥ १७॥

महागिरौ वेणुवनम् अग्निप्रज्वलितं यथा ।
तथा तव महत् सैन्यं प्रास्फुरच्छरपीडितम् ॥ १८॥

तत् पिष्टनष्टविध्वस्तं तव सैन्यं किरीटिना ।
हतविप्रहतं बाणैः प्रायाद्भीतं दिशो दश ॥ १९॥

सश्वापदा मृगगणा दवाग्नित्रासिता इव ।
कुरवः पर्यवर्तन्त निर्दग्धास्सव्यसाचिना ॥ २०॥

उत्सृज्य हि महाबाहुं भीमसेनं तदा रणे ।
बलं कुरूणामुच्छिन्नम् आसीत् सर्वं पराङ्मुखम् ॥ २१॥

ततः कुरुषु भग्नेषु बीभत्सुरपराजितः ।
भीमसेनं समासाद्य मुहूर्तं स व्यतिष्ठत ॥ २२॥

समागम्य च भीमेन जल्पित्वा च धनञ्जयः ।
विशल्यमरुजं चास्मै कथयित्वा युधिष्ठिरम् ॥ २३॥

भीमसेनाभ्यनुज्ञातस् ततः प्रायाद्धनञ्जयः ॥ २४

[1]नादयन् रथघोषेण पृथिवीं द्यां च भारत ॥ २४॥

ततः परिवृतो वीरैर् दशभिश्शत्रुतापनः ।
दुश्शासनादवरजैस् तव पुत्रैर्धनञ्जयः ॥ २५॥

ते तमभ्यर्दयन् बाणैर् उल्काभिरिव कुञ्जरम् ।
आततेष्वसना शूरा नृत्यन्त इव भारत ॥ २६॥

अपसव्यं तु तांश्चक्रे रथेन मधुसूदनः ।
[2]नियुक्तान् हि स तान् मेने यमायाशु किरीटिना ॥ २७॥

तथाऽन्ये प्राणदन् मूढाः पराङ्मुख[3]मिवार्जुनम् ॥ २८

तेषां नानदतां केतून् अश्वांश्चापानि सारथीन् ।
नाराचैरर्धचन्द्रैश्च क्षिप्रं पार्थो न्यकृन्तत ॥ २९

---

1. ख—अर्धैतयं नास्ति
2. क-ख-घ-ङ—नास्तीदमर्धम्
3. घ—रथेऽर्जुने

अथान्यैर्दशभिर्भल्लैस् शिरांस्येषामपातयत् ।
रोषसंरक्तनेत्राणि सन्दष्टोष्ठानि भूतले ॥ ३०
तेषां वक्त्राणि विबभुर् व्योम्नि तारागणा इव ॥ ३०॥

तान् स भल्लैर्महावेगैर् दशभिर्दश कौरवान् ।
रुक्माङ्गदान् रुक्मपुङ्खैर् हत्वा प्रायादमित्रहा*॥ ३१॥

तं प्रयान्तं महावेगैर् अश्वैः कपिवरध्वजम् ।
[1]कर्णोयाभिमुखं वीरम् अरीन् घ्नन्तं धनञ्जयम् ॥ ३२॥
युद्धायाभ्यद्रवन् वीराः कुरूणां नवती रथाः ॥ ३३

[2]कृत्वा संशप्तका घोरान् शपथान् पारलौकिकान् ।
परिवव्रुर्नरव्याघ्रा महात्मानं रणेऽर्जुनम् ॥ ३४

कृष्णश्वेतान् महावेगान् अश्वान् कनकभूषणान् ।
मुक्ताजालपरिच्छन्नान् प्रैषीत् कर्णरथं प्रति ॥ ३५
[3]प्रेक्ष्य कर्णरथं यान्तम् अरिघ्नं तं धनञ्जयम् ।
बाणवर्षैरभिघ्नन्तस् संशप्तकगणा ययुः ॥ ३६

त्वरमाणांस्तु तान् सर्वान् ससूतेष्वसनध्वजान् ।
जघान नवतिं वीरान् नवत्या फल्गुनश्शरैः ॥ ३७

---

* अ—कोशे अत्रैवाध्यायसमाप्तिरिष्यते
1. क-ख-घ-ङ—नास्तीदमर्धम् 2. क-ख-घ-ङ—नास्तीदमर्धम्
3. अ—नास्तीदमर्धम्

तेऽपतन् निहता बाणैर् नानारूपैः किरीटिना ।
विमानेभ्यस्सुकृतिनस् स्वर्गात् पुण्यक्षये यथा ॥ ३८

ततस्सरथनागाश्वाः कुरवः कुरुसत्तम ।
निर्भया भरतश्रेष्ठम् अभ्यवर्तन्त फल्गुनम् ॥ ३९

तदायस्तमनुष्यं च उदीर्णरथवारणम् ।
पुत्राणां ते महत् सैन्यं तदाऽरौत्सीद्धनञ्जयम् ॥ ४०

शक्त्यृष्टितोमरप्रासैर् गदानिस्त्रिंशसायकैः ।
प्राच्छादयन् महेष्वासाः कुरवः कुरुसत्तमम् ॥ ४१

तामन्तरिक्षे विततां शस्त्रवृष्टिं समुद्यताम् ।
व्यधमत् पाण्डवो बाणैस् तमस्सूर्य इवांशुभिः ॥ ४२

ततो म्लेच्छास्थितैर्मत्तैस् त्रयोदशशतैर्गजैः ।
पार्श्वतोऽभ्यहनन् पार्थं तव पुत्रस्य शासनात् ॥ ४३

कर्णिनालीकनाराचैस् तोमरप्रासशक्तिभिः ।
कर्पणैर्भिण्डिपालैश्च रथस्थं पार्थमार्दयन् ॥ ४४

तां शस्त्रवृष्टिमतुलां द्विपस्थैः प्रेषितां प्रभुः ।
चिच्छेद निशितैर्भल्लैर् अर्धचन्द्रैश्च फल्गुनः ॥ ४५

अथ तान् द्विरदान् सर्वान् नानालिङ्गैश्शरोत्तमैः ।
सपताकध्वजारोहान् गिरीन् वज्रैरिवाभिनत् ॥ ४६

ते हेमपुङ्खैरिषुभिर् अर्दिता हेममालिनः ।

हताः पेतुर्महानागास् साग्निज्वाला इवाद्रयः ॥ ४७

[1]ततो गाण्डीवनिर्घोषो महानासीद्दिशां पते ।
स्तनतां कूजतां चैव मनुष्यगजवाजिनाम् ॥ ४८

कुञ्जराश्च हता राजन् दुद्रुवुस्ते समन्ततः ।
अश्वाश्च पर्यधावन्त हतारोहा दिशो दश ॥ ४९

रथा हीना महाराज रथिभिर्वाजिभिस्तथा ।
गन्धर्वनगराकारा दृश्यन्ते स्म सहस्रशः ॥ ५०

अश्वारोहा महाराज धावमानास्सहस्रशः ।
तत्र तत्रैव दृश्यन्ते पतिताः पार्थसायकैः ॥ ५१

तस्मिन् क्षणे पाण्डवस्य बाह्वोर्बलमदृश्यत ।
यत् सादिनो वारणांश्च रथांश्चैकोऽजयद्युधि ॥ ५२

असंयुक्ताश्च ते राजन् परिवृत्ता रणं प्रति ।
हया नागा रथाश्चैव नदन्तोऽर्जुनमभ्ययुः ॥ ५३

तत्र त्र्यङ्गेण महता बलेन भरतर्षभ ।
दृष्ट्वा परिवृतं क्रुद्धो भीमसेनः किरीटिनम् ॥ ५४

हतावशिष्टानुत्सृज्य तावकान् कतिचिद्रथान् ।
जवेनाभ्यपतद्भीमो धनञ्जयरथं प्रति ॥ ५५

---

* क-ख-घ-ङ—अष्टाध्यायसमाप्तिर्दृश्यते
1. क-ख-घ-ङ—सञ्जयः— [अधिकः पाठः]

ततस्तत् प्राद्रवत् सैन्यं हतभूयिष्ठमातुरम् ।
दृष्ट्वाऽर्जुनं रणे भीमम् आगतं भ्रातरं प्रति ॥ ५६

हतावशिष्टांस्तुरगान् अर्जुनेन महाबलः ।
भीमोऽभ्यधावत् सङ्क्रुद्धो गदापाणिर्महाहवे ॥ ५७

गदापाणिं तदा भीमं दृष्ट्वा भारत भारताः ।
मेनिरे तमनुप्राप्तं दण्डहस्तमिवान्तकम् ॥ ५८

कालरात्रिमिवात्युग्रां नरनागाश्वभोजनाम् ।
प्राकाराट्टपुरद्वारदारणीमतिदारुणाम् ॥ ५९

गदां तुरगनाशाय त्वरन् भीमो व्यवासृजत् ॥ ५९॥

सा जघान बहूनश्वान् अश्वारोहांश्च मारिष ॥ ६०

कांस्यायसतनुत्राणान् नरान् नागांश्च पाण्डवः ।
[1]पातयामास गदया सशब्दं तेऽपतन् हताः ॥ ६१

[2]दन्तैर्दशन्तो वसुधां शेरते क्षतजोक्षिताः ।
भग्नमूर्धास्थिचरणाः क्रव्यादगणमोदनाः ॥ ६२

असृङ्मांसवसाभिश्च तृप्तिमाप हि सा गदा ।
अस्थीन्युद्विरती तस्थौ कालरात्रीव दुर्दृशा ॥ ६३

---

1. क-ख-घ-ङ—क्षणेन भीमः सङ्क्रुद्धस्तान्निन्ये वै यमक्षयम् । [पाठान्तरम्]

2. क-ख-घ-ङ—दशार्धानि न सन्ति

सहस्राणि दशाश्वानां हत्वा पत्तींश्च भूरिशः ।
भीमोऽभ्यधावत् सङ्क्रुद्धो गजानीकं महाबलः ॥ ६४

गदापाणिं ततो भीमं दृष्ट्वा भारत तावकाः ।
मेनिरे समनुप्राप्तं कालदण्डोद्यतं यमम् ॥ ६५

स मत्त इव मातङ्गस् सङ्क्रुद्धः पाण्डुनन्दनः ।
प्रविवेश गजानीकं मकरस्सागरं यथा ॥ ६६

ततस्स समरश्लाघी गजानीकानि पातयन् ।
गदया व्यधमत् सङ्ख्ये दण्डपाणिरिवान्तकः ॥ ६७

गजान् सकक्षटान् मत्तान् सारोहान् सपताकिनः ।
न्यहनल्लीलया राजन् शिक्षया च बलेन च ॥ ६८

ते गजा बहुशोभन्त हन्यमाना महारणे ।
विनदन्तस्तदा तूर्णं पक्षवन्त इवाद्रयः ॥ ६९

निपेतुरुर्व्यां समरे भीमसेनेन ताडिताः ।
छिन्नपक्षा यथा काले वज्ररुग्णा इवाद्रयः ॥ ७०

हत्वा तु तद् गजानीकं भीमसेनो महाबलः ।
पुनस्स्वरथमास्थाय पृष्ठतोऽर्जुनमभ्ययात् ॥ ७१

ततः पराङ्मुखीभूतं निरुत्साहं बलं तव ।
व्यलम्बत महाराज प्रायशश्शस्त्रवेधितम् ॥ ७२

विलम्बमानं तत् सैन्यम् अप्रगल्भमवस्थितम् ।
दृष्ट्वा प्रच्छादयामास फल्गुनश्शरवृष्टिभिः ॥ ७३

[1]नराश्वरथमातङ्गा युधि गाण्डीवधन्वना ।
शरव्रातैश्चिता रेजुः कदम्बा इव केसरैः ॥ ७४

ततः कुरूणामभवद् आर्तनादो महान् नृप ।
नराश्वनागासुहरान् दृष्ट्वा बाणान् किरीटिनः ॥ ७५

हाहाकृतं भृशं त्रस्तं लीयमानं परस्परम् ।
अलातचक्रवत् सैन्यं तदा बभ्राम तावकम् ॥ ७६

ततोऽर्जुनशरध्वस्तं कुरूणामभवद्बलम् ।
न तत्रासीदनिर्भिन्नो रथो वाजी नरो गजः ॥ ७७

आदीप्तमिव तत् सैन्यं शरभिन्नतनुच्छदम् ।
आसीत् स्वशोणिताक्लिन्नं रौद्रं द्रष्टुं विशां पते ॥ ७८

तत् सैन्यं भरतश्रेष्ठ वध्यमानं शितैश्शरैः ।
न जहौ समरं प्राप्य फल्गुनं शत्रुतापनम् ॥ ७९

तत्राद्भुतमपश्याम कौरवाणां पराक्रमम् ।
वध्यमानाऽपि यत् पार्थं न जहुर्भरतर्षभ ॥ ८०

तं दृष्ट्वा विक्रमं तस्य कुरवस्सव्यसाचिनः ।
निराशास्समपद्यन्त सर्वे कर्णस्य जीविते ॥ ८१

---

1. क-ख-घ-ङ—अर्धद्वयं नास्ति

अविषह्यं तु पार्थस्य शरसंस्पर्शमाहवे ।
कुरवः पर्यवर्तन्त जिता गाण्डीवधन्वना ॥ ८२

ते हित्वा समरे पार्थं वध्यमानाश्च सायकैः ।
प्रदुद्रुवुर्दिशो भीताश् चुक्रुशुश्चापि सूतजम् ॥ ८३

तान् विद्रावयते पार्थः किरञ् शरशताञ् शितान् ।
हर्षयन् पाण्डवीं सेनां राजंस्तं च वृकोदरम् ॥ ८४

पुत्रास्तव महाराज जग्मुः कर्णरथं प्रति ।
अगाधे मज्जतां तेषां द्वीपः कर्णोऽभवत् तदा ॥ ८५

कुरवोऽपि महाराज निर्विषा इव पन्नगाः ।
कर्णमेवोपलीयन्त भयाद्गाण्डीवधन्वनः ॥ ८६

[1]यथा भूतानि सर्वाणि मृत्योर्भीतानि भारत ।
[2]धर्ममेवोपलीयन्ते धर्मवन्ति हि यानि वै ॥ ८७

तथा कर्णं महेष्वासं पुत्रास्तव नराधिप ।
उपालीयन्त संत्रासात् पाण्डवस्य महात्मनः ॥ ८८

ताञ् शोणितपरिक्लिन्नान् विषमस्थाञ् शरातुरान् ।
मा भैष्टेत्यब्रवीत् कर्णो भीतानाविष्टचेतसः ॥ ८९

प्रभग्नं हि बलं दृष्ट्वा महत् पार्थेन तावकम् ।

---

1. ख—अर्धद्वयं नास्ति

2. क-घ-ङ—उपलीयन्ति सन्त्रासाद्धर्मं लोकपरायणम् । [पाठान्तरम्]

[1]धनुर्विष्फारयन् कर्णस् तस्थौ पार्थजिघांसया ॥ ९०

तान् विद्रुतान् कुरून् दृष्ट्वा कर्णश्शस्त्रभृतां वरः ।
विष्फारयित्वा दुर्धर्षं चापमातिरथिर्महत् ॥ ९१

समभ्यधावत् पाञ्चालान् पश्यतस्सव्यसाचिनः ॥ ९१॥

ततः क्षणेन क्षितिपाः क्षतजप्रतिमेक्षणाः ।
शरौघैश्छादयामासुर् महामेघा इवाचलम् ॥ ९२॥

ततश्शरसहस्राणि कर्णमुक्तानि भारत ।
पाञ्चालानां हरन् प्राणांस् तमांसीव तमोनुदः ॥ ९३॥

युद्धमासीत् ततो घोरं पाञ्चालानां विशां पते ।
वध्यतां सूतपुत्रेण मित्रार्थे [2]जयगृद्धिना ॥ ९४॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि त्रिनवतितमोऽध्यायः ॥ ९३ ॥
॥ ७३ ॥ कर्णपर्वणि त्रिनवतितमोऽध्यायः ॥ ९३ ॥
[अस्मिन्नध्याये ९४॥ श्लोकाः]

---

1. क-ख—इदमर्धद्वयं नास्ति
2. क-ख-घ-ङ—ऽमित्रभीरुणा

॥ चतुर्नवतितमोऽध्यायः ॥

सङ्कुलयुद्धम् ॥ १ ॥ भीमदुश्शासनयोः समागमो विवादश्च ॥ :

सञ्जयः—

ततः कर्णः कुरुषु प्रद्रुतेषु
सेनापतिश्श्वेतहयेन राजन् ।
पाञ्चालपुत्रान् व्यधमत् सूतपुत्रो
महेषुभिर्वात इवाभ्रसङ्घान् ॥

सूतं रथादञ्जलिकैर्निपात्य
जघान चाश्वाञ्जनमेजयस्य ।
शतानीकं सुतसोमं च भल्लैर्
अवाकिरद्धनुषी चाप्यकृन्तत् ॥

धृष्टद्युम्नं [1]निर्बिभेदाथ षड्भिर्
जघान चाश्वान् परवीरहन्ता ।
हत्वा चाश्वान् सात्यकेस्सूतपुत्रः
कैकेयपुत्रं न्यवधीद्विशोकम् ॥

तमभ्यधावन्निहते कुमारे
सेनापतिं कैकयो मित्रवर्मा ।

1. क-ख-घ-ङ—निशितैराजघान षड्भिर्बाहुं दक्षिणं तस्य सञ्जये

शरैर्विधून्वन् भृशमुग्रवेगैः
कर्णात्मजं चाप्यहनत् सुदेवम् ॥ ४

तस्यार्धचन्द्रैस्त्रिभिरुच्चकर्त
प्रसह्य बाहू च शिरश्च कर्णः ।
स स्यन्दनाद् गामपतद् गतासुः
परश्वधैस्साल इवावकृत्तः ॥ ५

हताश्वमञ्जोगतिभिस्सुदेवं
शिनिप्रवीरो निशितैः पृषत्कैः ।
जघान नृत्यन्निव कर्णपुत्रश्
शैनेयबाणाभिहतः पपात ॥ ६

पुत्रे हते क्रोधपरीतचेताः
कर्णश्शिनीनां प्रवरं जिघांसुः ।
हतोऽसि हे सात्यक इत्युदीर्य
व्यवासृजद्बाणममित्रसाहम् ॥ ७

तमस्य चिच्छेद शरं शिखण्डी
त्रिभिस्त्रिभिश्च प्रतुतोद कर्णम् ।
शिखण्डिनः कार्मुकं च ध्वजं च
च्छित्त्वा क्षुराभ्यां न्यहनच्च सूतम् ॥ ८

शिखण्डिनं षड्भिरविध्यदुग्रो
धार्ष्टद्युम्नेस्स शिरश्चोच्चकर्त ।
ततोऽभिनत् सुतसोमं क्षुरेण
सुसंशितेनातिरथिर्महात्मा ॥ ९

[1]जनाक्रन्दे तुमुले वर्तमाने
धार्ष्टद्युम्ने निहते तत्र कृष्णः ।
अपाञ्चाल्यं क्रियते याहि पार्थ
कर्णं जहीत्यब्रवीद्राजसिंह ॥ १०

ततः प्रहस्याशु नरप्रवीरो
रथं रथेनातिरथेर्जगाम ।
भये तेषां त्राणमिच्छन् सुबाहुर्
अभ्याहतानां रथयूथपेन ॥ ११

[2]ततोऽपरे भारत दुष्प्रकम्प्याः
पाञ्चालानां रथसङ्घास्समेताः ।
प्रतिश्रुता ह्यन्तरिक्षे ग्रहाभा
धनुःप्रवीरास्तु रथप्रवीराः ॥ १२

1. क-ख-घ-ङ—अर्धचतुष्टयं नास्ति
2. अ—नास्त्यर्धद्वयम्

[1]विष्फार्य गाण्डीवमथोग्रघोषं
ज्यां वै समाहत्य तले भृशं च ।
बाणान्धकारं सहसा चकार
जघान नागाश्वरथान् नरांश्च ॥ १३

तं भीमसेनोऽनुययौ रथेन
[2]पृष्ठे रक्षन् पाण्डवमेकवीरम् ।
तौ राजपुत्रौ त्वरितौ रथाभ्यां
कर्णं हि यातावरिभिर्विषक्तौ ॥ १४

अत्रान्तरे सुमहत् सूतपुत्रश्
चक्रे युद्धं सोमकान् सम्प्रमृद्नन् ।
रथाश्वमातङ्गनरान् निजघ्ने
प्रच्छादयामास शरैर्दिशश्च ॥ १५

तमुत्तमौजा जनमेजयश्च
क्रुद्धौ युधामन्युशिखण्डिनौ च ।
कर्णं ववर्षुस्सहसा पृषत्कैस्
सन्तर्जयानास्सह पार्षतेन ॥ १६

---

1. क-ख-घ-ङ—रथं रथेनातिरथेऽजगाम
भये तेषां त्राणमिच्छन् सुबाहुः ।
अभ्याहतानां रथयूथपानां
विष्फार्य गाण्डीवमथोग्रघोषम् ॥ [अधिकः पाठः]

2. क-ख-घ-ङ—अयं पादो नास्ति

ते पञ्च पाञ्चालरथप्रवीरा
वैकर्तनं कर्णमभिद्रवन्तः ।
तस्मा[1]द्रथाच्चालयितुं न शेकुर्
धैर्यात् कृतात्मानमिवेन्द्रियाणि ॥ १७

तेषां [2]ध्वजान् वाजिसङ्घान् पताकास्
तूणीर्धनूंषि प्रचकर्त बाणैः ।
तान् पाञ्चालानभ्यहनत् पृषत्कैः
कर्णस्ततस्सिंह इवोन्ननाद ॥ १८

तस्यास्यतस्तानहितान् वै व्रतश्च
ज्याबाणहस्तस्य धनुस्स्वनेन ।
साद्रिद्रुमाऽऽसीत् पृथिवी विशीर्णा
इतीव मत्वा तु जना विषेदुः ॥ १९

स शक्रचापप्रतिमेन धन्वना
भृशाततेनातिरथिश्शरान् बहून् ।
सृजन् बभौ दीप्तमरीचिमण्डलो
यथांशुमाली परिवेषवांस्तथा ॥ २०

शिखण्डिनं द्वादशभिः पराभिनच्
छितैश्शरैष्षड्भिरथोत्तमौजसम् ।

1. क-ख-ङ—द्रणाच्चा 2. क—ध्वजाननुकर्षान् पताकाः

त्रिभिर्युधामन्युमविध्यदाशुगैस्
त्रिभिस्त्रिभिस्सोमकपार्षतान् सदा ॥ २१

पराजिताः पञ्च महारथास्तु ते
महाहवे सूतसुतेन मारिष ।
निरुद्यमास्तस्थुरमित्रनन्दना
यथेन्द्रियाण्यात्मवता जितास्तथा ॥ २२

निमज्जतस्तानथ कर्णसागरे
विपन्ननावो वणिजो यथाऽर्णवे ।
समुद्धरन् नौभिरिवार्णवाद्रथैस्
सुकल्पितैर्द्रौपदिजास्त्वमातुलान् ॥ २३

ततश्शिनीनामृषभश्शितैश्शरैर्
निकृत्य कर्णप्रहितानिषून् बहून् ।
विदार्य कर्णं निशितैरयस्मयैस्
तवात्मजं ज्येष्ठमविध्यदष्टभिः ॥ २४

कृपोऽथ भोजश्च तवात्मजस्तथा
स्वयं च कर्णो निशितैरताडयन् ।
स तैश्चतुर्भिर्युयुधे यदूत्तमो
दिगीश्वरैर्दैत्यपतिर्यथा तथा ॥ २५

समाततेनेष्वसनेन कूजता
महास्त्रनेनाशनि[1]बाणवर्षिणा ।
बभौ सुदुर्धर्षतरस्स सात्यकिश्
शरन्नभोमध्यगतो यथा रविः ॥ २६

पुनस्समास्थाय रथान् सुदंशिताश्
शिनिप्रवीरं जुगुपुः परन्तपाः ।
समेत्य पाञ्चालरथा महाहवे
मरुद्गणाश्शक्रमिवारिनिग्रहे ॥ २७

ततोऽभवद्युद्धमतीव दारुणं
तवाहितानां तव सैनिकैस्सह ।
रथाश्वमातङ्गविनाशनं तथा
यथा सुराणामसुरैः पुराऽभवत् ॥ २८

रथाश्वमातङ्गपदातयोऽपिच
भ्रमन्ति नानाविधशस्त्रवेष्टिताः ।
परस्परेणाभिहताश्च चस्खलुर्
विनेदुरार्ता व्यसवः पतन्ति च ॥ २९

तथागते भीममभीस्तवात्मजस्
ससार राजावरजः किरञ् शरान् ।

---

1. क-ब-ङ—दीधितिः ख—पातिदीधितिः

तमभ्यधावत् त्वरितो वृकोदरो
महारुरुं सिंह इवाभिपेदिवान् ॥ ३०

ततस्तयोर्युद्धमतीव दारुणं
प्रदीप्यतोः प्राणदुरोदरैर्द्वयोः ।
परस्पराभावविवृद्धरोषयोर्
उदग्रयोश्शम्बरशक्रयोरिव ॥ ३१

शरैश्शरीरान्तकरैस्सुतेजनैर्
निजघ्नतुस्तावितरेतरं भृशम् ।
सकृत् प्रभिन्नाविव वाशितान्तरे
महागजौ दोर्भिरतीव घातिनौ ॥ ३२

आलोक्य तौ तत्र परस्परं ततस्
समं च शूरौ च ससारथी तदा ।
भीमोऽब्रवीद्याहि दुश्शासनाय
दुश्शासनो याहि वृकोदराय ॥ ३३

तयो रथौ सारथिभ्यां प्रचोदितौ
समं रणे तौ सहसा समीयतुः ।
नानायुधौ चित्रपताकिनौ ध्वजौ
दिवीव पूर्वं बलशक्रयो रणे ॥ ३४

भीमः—

दिष्ट्याऽसि दुश्शासन मेऽद्य दृष्टः
ऋणं प्रतीच्छे सहवृद्धिमूलम् ।
चिरोद्यतं यन्मया ते सभायां
कृष्णाभिमर्शेन गृहाण मत्तः ॥ ३५

सञ्जयः—

स एवमुक्तस्तु ततो महात्मा
दुश्शासनो वाक्यमुवाच वीरः ।

दुश्शासनः—

सर्वं स्मरे नैव च विस्मरामि
उदीर्यमाणं शृणु भीमसेन ॥ ३६
स्मरामि चात्मप्रभवं चिराय
यज्ञातुषे वेश्मनि राज्यहानि ।
विश्वासहीना मृगयां चरन्तो
वसन्ति सर्वत्र निराकृतास्तु ॥ ३७
महाभये राज्यहनी स्मरन्तस्
तथोपभोगाच्च सुखाच्च हीनाः ।
वनेष्वटन्तो गिरिगह्वराणि
पाञ्चालराजस्य पुरं प्रविष्टाः ॥ ३८
मायां यूयं कामपि सम्प्रविष्टा
यतो वृतः कृष्णया फल्गुनो वः ।

सम्भूय पापैस्तदनार्यवृत्तं
कृतं तदा मातृकृतानुरूपम् ॥ ३९

एको वृतः पञ्चभिरस्ताऽभिपन्ना
ह्यलज्जमानैश्च परस्परस्य ।
स्मरे सभायां सुबलात्मजेन
दासीकृतास्थ सह कृष्णया च ॥ ४०

सञ्जयः—

[1]इत्येवमुक्तस्तु तवात्मजेन
पाण्डोस्सुतः कोपवशं जगाम ।
तवात्मजस्याथ वृकोदरो भृशं
धनुः क्षुराभ्यां ध्वजमेव चाच्छिनत् ॥ ४१

ललाटमप्यस्य बिभेद पत्रिणा
शिरश्च कायात् प्रजहार सारथेः ॥ ४१॥

स राजपुत्रोऽन्यदवाप्य कार्मुकं
वृकोदरं द्वादशभिः शराभिनत् ।
स्वयं नियच्छंस्तुरगानजिह्मगैश्
शरैश्च भीमं पुनरप्यवीवृषत् ॥ ४२॥

---

1. अ-ख-घ-ङ– नास्तीदमर्धद्वयम्

[1]ततश्शरं सूर्यमरीचिसप्रभं
सुवर्णवज्रोत्तमरत्नभूषितम् ।
महेन्द्रवज्राशनिपातनिस्वनम्
मुमोच भीमाङ्गविदारणक्षमम् ॥ ४३॥

स तेन निर्भिन्नतनुर्वृकोदरो
निपातितस्स्रस्ततनुर्गतासुवत् ।
प्रसार्य बाहू रथवर्यमास्थितः
पुनश्च संज्ञामुपलभ्य चानदत् ॥ ४४॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां कर्णपर्वणि चतुर्नवतितमोऽध्यायः ॥ ९४ ॥
॥ ७३ ॥ कर्णपर्वणि चतुर्नवतितमोऽध्यायः ॥ ९४ ॥
[अस्मिन्नध्याये ४४॥ श्लोकाः]

---

1. क-ख-घ-ङ—अर्धचतुष्टयं नास्ति

॥ पञ्चनवतितमोऽध्यायः ॥

भीमेन राज्ञां समक्षं दुश्शासनवक्षसो रक्तपानम् ॥

सञ्जयः—

स राजपुत्रेण समार्च्छदुग्रं
दुश्शासनेन निकृतो निकृत्या ॥ ॥

तत्राकरोद्दुष्करं राजपुत्रो
दुश्शासनः कुरुवीरो महात्मा ।
यद्भीमसेनं प्रतियोधयद्रणे
जम्भो यथा शक्रमुदारवीर्यम् ॥ १॥

धनुश्छित्त्वा भीमसेनस्य सङ्ख्ये
षड्भिश्शरैस्सारथिमभ्यविध्यत् ।
ततोऽविध्यत् त्रिंशता भीमसेनं
वरेषुभिर्वन्यमिव द्विपेन्द्रम् ॥ २॥

स कार्मुकं गृह्य तु भारसाधनं
भीमस्तदा राजपुत्रं ह्यविध्यत् ।
पञ्चाशता बाणगणैस्तनान्तरे
तोत्रैर्यथाऽद्रिप्रतिमं द्विपेन्द्रम् ॥ ३॥

[1]स तत् कृत्वा राजपुत्रस्तरस्वी
विव्याध भूयो नवभिः पृषत्कैः ।
ततः क्रुद्धो भीमसेनस्तरस्वी
शक्तिं चोग्रां प्राहिणोत्ते सुताय ॥ ४॥

तामापतन्तीं सहसाऽतिघोरां
दृष्ट्वा सुतस्ते ज्वलितामिवोल्काम् ।
आकर्णपूर्णैरिषुभिर्महात्मा
चिच्छेद पुत्रो दशभिः पृषत्कैः ॥ ५॥

दृष्ट्वा तु तत् कर्म कृतं सुदुष्करं
प्रापूजयन् सर्वयोधाः प्रहृष्टाः ॥ ६

[2]अथाभिमानी स शरेण भूयो
गाढं हि विव्याध सुतस्त्वदीयः ।
चुक्रोध भीमः पुनराशुगेन
भृशं प्रजज्वाल रुषाऽभिविष्टः ॥ ७

[3]ततो विद्धो विरथं तं महात्मा
दुश्शासनो भीमसेनं चकार ।

---

1. क-ख-घ-ङ—अर्धपञ्चकं नास्ति
2. क-ख-घ-ङ—अर्धद्वयं नास्ति
3. अ—अर्धषट्कं नास्ति

निहत्य सङ्ख्ये चतुरोऽस्य वाहान्
छित्वा रथेषां पुनरेव चाक्षिपत् ॥ ८

ततः क्षितिस्थो ह्यवरुह्य यानाद्
वृकोदरो गदया तस्य वाहान् ।
यमक्षयं प्रेषयित्वा महात्मा
रथं समाकर्षत राजसूनोः ॥ ९

तस्मादवप्लुत्य रथात् ससर्ज
दुश्शासनस्तोमरमुग्रवेगम् ।
स तेन विद्धो ह्युरसि ह्यप्रमेयो
गदां तस्मै विससर्जाप्रमेयाम् ॥ १०

[1]विचिक्षिपे तां यमदण्डसन्निभाम्
भीमो हि भीमां ज्वलितामिवोल्काम् ।
प्रगृह्य वज्राशनितुल्यवेगां
गदां करेणाथ वृकोदरो रुषा ॥ ११

[2]ततः क्रोधाद्भीमसेनः कृतानि
सर्वाणि दुःखान्यनुसंस्मरन् वै ।

---

1. क-ङ—कोशयोरेवार्धद्वयमिदं दृश्यते
2. अ—विद्धोऽस्मि वीराशु भृशं त्वयाऽद्य
सहस्व भूयोऽपि गदाप्रहारम् ।
उक्त्वैवमुच्चैः कुपितोऽथ भीमो
जग्राह तां भीमगदां वधाय ॥ [अधिकः पाठः]

संस्मृत्य संस्मृत्य तथा प्रतिज्ञाम्
उग्रामधो राजपुत्रो न्यषीदत् ॥ १२

[1]अथैनमुग्रस्तनयस्तवोग्रां
शक्तिं वेगात् प्राहिणोन्मृत्युरूपाम् ।
आविध्य भीमोऽपि गदां सुभीमां
चिक्षेप रोषेण परीतमूर्तिः ॥ १३

[2]सञ्चिन्तयन् रोषमतीव वेगात्
त्रयोदशाब्दं पुरुषप्रवीरः ।
[3]गदां करेणाथ वृकोदरो रुषा
निपातयित्वा पृथिवीतले भृशम् ॥ १४

[4]आदाय दुश्शासनमुग्रवेगं
सन्ताडयामास बली वृकोदरः ।
अतीव सन्ताडितभिन्नगात्रो
दुश्शासनो वै निपपात भूमौ ॥ १५

आक्रम्य कण्ठे युधि राजपुत्रं
संरक्तनेत्रो ह्यब्रवीद्भार्तराष्ट्रम् ।

---

1. अ—इतः अष्टाविंशतिरर्धानि अकोश एकस्मिन्नेव वर्तन्ते नान्यत्र
2. ख—अर्धद्वयं नास्ति
3. ङ—समापतन्तीं ज्वलितामिवोल्कां [अधिकः पाठः]
4. ख-ङ—अयं पादो नास्ति

तद्ब्रूहि किं त्वं परिमार्गमाणो
ह्यस्मान् पराभूय इहागतः पुनः ॥ १६

[1]आदीपयंस्तद्भृशदीपितं मे
चिरार्जितं रोषमतिप्रदीप्तम् ।
मधु प्रपास्ये तव कोष्ठभाजनाद्
इत्यब्रवीद्भीमसेनस्तरस्वी ॥ १७

[2]दुश्शासनं कण्ठदेशे प्रमृद्नंस्
ततः क्रूरं भीमसेनश्चकार ।
तं व्यंसयित्वा सहसा ससार
बलादसौ धार्तराष्ट्रस्तरस्वी ॥ १८

भीमोऽभिदुद्राव सुतं त्वदीयं
सपत्नतां दर्शयन् धार्तराष्ट्रे ।
मृगं मुहुस्सिंहशिशुर्यथा वने
तथाऽऽश्वभिद्रुत्य महाबलं बली ॥ १९

निगृह्य चैनं परमेण कर्मणा
उत्क्षिप्य चोत्क्षिप्य च तूर्णमेनम् ।
भूमौ तदा निष्पिपेषाथ वीरम्
असिं विकोशं विमलं चकार ॥ २०

---

1. ख—इदं पादद्वयं नास्ति
2. घ—अर्धद्वयं नास्ति ख—अर्धषट्कं नास्ति

[1]तत्राह कर्णं च सुयोधनं च
कृपं द्रौणिं कृतवर्माणमेव ।
निहन्मि दुश्शासनमद्य पापं
संरक्ष्यतामद्य समस्तयोधाः ॥ २१

स तस्य शक्तिं सहसा विमृद्य
पुत्रं तवाजौ ताडयामास मूर्ध्नि ।
तया हतः पतितो वेपमानो
दुश्शासनो गदया वेगवत्या ॥ २२

विध्वस्तवर्माभरणोरुहस्तको
विवेष्टमानो भृशवेदनार्तः ।
[2]तं पातयित्वाऽथ वृकोदरोऽपि
जगर्ज हर्षेण निनादयन् दिशः ॥ २३

नादेन तेनाखिलसादिपत्तयो
मूर्च्छाकुलाः पतितास्त्वाजिमध्ये ।
भीमोऽपि वेगादवतीर्य यानाद्
दुश्शासनं वेगवानभ्यधावत् ॥ २४

---

1. क-ख-घ—अर्धद्वयं नास्ति

2. अ—हयाश्च सूतश्च हता नरेन्द्र
चूर्णीकृतश्चापि रथः पपात । [अधिकः पाठः]

स समीपस्थितो भीमो विसञ्ज्ञं प्रेक्ष्य ते सुतम् ।
चकार चेदं मनसा चिन्तां च परमां ययौ ॥ २५

अचेतनस्य रुधिरं कथं पास्याम्यहं रिपोः ।
अजानतोऽस्य पापस्य दुर्मतेर्मित्रघातिनः ॥ २६

एवं विचिन्तयन् भीमो ददर्शाथ विचेतनम् ।
वल्गेणावीजयच्चैनं तेन संज्ञामवाप सः ॥ २७

दृष्ट्वा स संज्ञां सम्पन्नं पादेनाक्रम्य वक्षसि ।
प्रहृष्टरूपो भीमस्तु सादिं प्रोवाच तं तदा ॥ २८

भीमसेनः—

ये राजसूयावभृथे पवित्रिता
जाताः कचा याज्ञसेन्या दुरात्मन् ।
ते पाणिना कतरेणापकृष्टास्
तद्ब्रूहि त्वं पृच्छते मे नृशंस ॥ २९

सञ्जयः—

उक्तस्तथाऽसौ तनयस्सरोषं
जगाद भीमं परिवृत्य नेत्रे ॥ २९॥

दुश्शासनः—

सोऽयं करिकराकारः पीनस्तनविमर्दनः ।
गोसहस्रप्रदाता च क्षत्रियान्तकरः करः ॥ ३०॥

अनेन याज्ञसेन्या मे भीम केशा विकर्षिताः ।
पश्यतां कुरुमुख्यानां युष्माकं च सभासदाम् ॥ ३१॥

सञ्जयः—

एवं ब्रुवाणस्य तु भीमसेन
उत्पाटयामास भुजं महात्मा ।
समुत्थितोऽसौ तमतीव रुष्टस्
सन्ताडयामास भुजेन तेन ॥ ३२॥

भीमोऽभिदुद्राव सुतं द्वितीयं
मृगं यथा सिंहशिशुर्वनान्ते ।
तमप्यभिद्रुत्य महाबलं बली
निगृह्य चैनं परमेण मन्युना ॥ ३३॥

उत्क्षिप्य चोद्धाम्य च तूर्णमेनं
भूमौ तथा निष्पिपिषेऽथ वीरः ।
कण्ठे समाक्रम्य च वेपमानं
कृत्वा तु रूपं परमं सुघोरम् ॥ ३४॥

कालान्तकाभ्यां सदृशं तदानीं
विदार्य वक्षस्स महारथस्य ।
दुश्शासनस्य रिपुशासनस्य
उद्धृत्य वक्षः पतितस्य भूमौ ॥ ३५॥

ततोऽपिबच्छोणितमस्य कोष्णम्
आस्वाद्य चास्वाद्य च वीक्षमाणः ॥ ३६

क्रुद्धोऽतिहृष्टो निजगाद वाक्यं
स्तन्यस्य मातुः पयसोऽमृतस्य ।
माध्वीकजस्येव रसस्य तस्य
मधोश्च पानाद्यवकस्य पानात् ॥ ३७

पयोदधिभ्यां मथिताच्च मुख्यात्
तथेक्षुसारस्य मनोहरस्य ।
सर्वेभ्य एवाभ्यधिको रसोऽस्य
मतो ममाद्याहितलोहितस्य ॥ ३८

एवं ब्रुवाणं पुनरुत्थितं तम्
आस्फोट्य वल्गन्तमतीव हृष्टम् ।
ये भीमसेनं ददृशुस्तदानीं
प्रायेण तेऽपि व्यथिता निपेतुः ॥ ३९

ये चापि नासन् पतिता मनुष्यास्
तेषां कराभ्यां पतितं तु शस्त्रम् ।
भयाच्च सञ्चुक्रुशुरस्वरैस्तदा
निमीलिताक्षा मुमुहुश्च तत्र ॥ ४०

ये तत्र भीमं रुधिरं पिबन्तं
दुश्शासनस्य दद्दशुः प्रपन्नाः ।
[1]नायं मनुष्यस्त्विति भाषमाणास्
सर्वेऽपलायन्त भयाभिपन्नाः ॥ ४१

भीमोऽपि हत्वा तत्रैव दुश्शासनममर्षणम् ।
पूरयित्वाऽञ्जलिं भूयो रुधिरास्योग्रनिस्वनः ॥ ४२

स पीत्वा रुधिरं तस्य चरणौ गृह्य भारत ।
शृण्वतां सर्ववीराणां पुनर्वाक्यमथाब्रवीत् ॥ ४३

भीमः—

एष ते रुधिरं तीव्रं पिबामि पुरुषाधम ।
ब्रूहीदानीं सुसंरब्धः पुनर्गौरिति गौरिति ॥* ४४

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि पञ्चनवतितमोऽध्यायः ॥ ९५ ॥
॥ ७३ ॥ कर्णपर्वणि पञ्चनवतितमोऽध्यायः ॥ ९५ ॥
[अस्मिन्नध्याये ४४ श्लोकाः]

---

1. ख—नास्यधर्मिदम्

* अकोशे नास्याध्यायसमाप्तिर्दृश्यते

॥ षण्णवतितमोऽध्यायः ॥

दुश्शासनवधक्रोधादात्मानमभिद्रुतवतां तदनुजानां भीमेन वधः ॥

भीमः—

[1]ये वाऽस्मान् प्रत्यनृत्यन्त पुरा गौरिति गौरिति ।
[2]तान् वयं प्रतिनृत्यामः पुनर्गौरिति गौरिति ॥ १

प्रमाणकोट्यां शयने कालकूटकभोजनम् ।
दंशनं चाहिभिस्तीक्ष्णैर् दाहो जतुगृहे च यः ॥ २

द्यूते च दोषभूयस्त्वम् अरण्ये वसतिश्च या ।
[3]इत्वरस्त्राणि च सङ्ग्रामे अनिलानिलवेश्मसु ॥ ३

[4]महाक्षयश्च सङ्ग्रामेष्वसुखानि च वेश्मनि ।
विराटभवने यश्च क्लेशोऽस्माकं पृथक् पृथक् ॥ ४

शकुनेर्धार्तराष्ट्रस्य राधेयस्य च मंत्रिते ।
अनुभूतानि दुःखानि तेषां हेतुस्त्वमेव हि ॥ ५

---

1. ख—इदमर्धं नास्ति
2. अ-क-ख—इदमर्धं नास्ति
3. अ—द्रौपद्याः केशपक्षस्य ग्रहणं च सुदारुणम्। [पाठान्तरम्]
4. क-ख-ङ—अर्धचतुष्टयं नास्ति

दुःखान्येवाभिजानीमो न सुखानि कदाचन ।
धृतराष्ट्रस्य दौरात्म्यात् सपुत्रस्य सदा वयम् ॥ ६

सञ्जयः—

इत्युच्चैर्वचनं प्रोच्य जयं प्राप्य वृकोदरः ।
पुनरेव महाराज तव सैन्यमभिद्रवत् ॥ ७

रक्तार्द्रगात्रस्तु ततो महात्मा
गदापाणिः काल इवान्तकाले ।
विभीषयानस्तव पुत्रसैन्यम्
इतस्ततो धावति वाहिनीं ते ॥ ८

ततः क्षणाद्भारत शून्यरूपम्
आयोधनं घोरतरं कुरूणाम् ।
यत्राजिमध्ये प्रापिबद्भीमसेनो
दुश्शासनस्य रुधिरं क्रोधदीप्तः ॥ ९

स हत्वा समरे राजन् राजपुत्रो महाबलः ।
पूर्णकामो मदोद्ग्रस् सिंहो रुरुमिवोत्कटः ॥ १०

रुधिरार्द्रो महाराज ह्यशोभत परन्तपः ॥ १०॥

सपुष्पः किंशुक इव रक्ताद्रक्ततरो बभौ ॥ ११

रुधिराक्तो घोरवेषः क्रुद्धो राजन् वचोऽब्रवीत् ॥ ११॥

भीमसेनः—

ब्रूहीदानीं पापमते नृशंस पतितो ह्यसि ॥ १२

दुश्शासने यादृशं संश्रुतं नस्
तदवाप्तं पाण्डवैस्सर्वमेतत् ।
अत्रैवमाप्स्याम्यपरं द्वितीयं
दुर्योधनं यज्ञपशुं विशस्य ॥ १३

शिरो मृदित्वाऽस्य पुनश्च शान्तिं
यास्याम्यहं कौरवाणां समक्षम् ।
या चापतिस्सा सपतिर्हि जाता
यास्तास्सपत्योऽपतयस्तु जाताः ॥ १४

पश्यन्तु चित्रं विविधं हि लोके
ये वै तिलाष्षण्डतिला बभूवुः ।
ते चेत् सुसिद्धा निधनं गताः परे
किं चित्ररूपं बत जीवलोके ॥ १५

सञ्जयः—

एतावदुक्त्वा वचनं प्रहृष्टः
प्राक्रोशदुच्चै रुधिरार्द्रवक्त्रः ।
ननर्त चैवातिबलो महात्मा
वृत्रं निहत्येव सहस्रनेत्रः ॥ १६

दृष्ट्वा तु नृत्यन्तमुदग्ररूपं
कालं यथा त्वन्तकाले प्रजानाम् ।
महद्भयं चातिरथिं विवेश
जये निराशाश्च सुतास्त्वदीयाः ॥ १७

दुश्शासने तु निहते पुत्रास्तव महारथाः ।
महत् क्रोधविषं वीरा धारयन्तोऽपलायिनः ॥ १८

ते तु राजन् महावीर्या भीमं प्राच्छादयञ्छरैः ॥ १८॥

निषङ्गी कवची खड्गी दण्डधारो धनुर्धरः ।
अलम्बुर्जलसन्धश्च वातवेगसुवर्चसौ ॥ १९॥

एते समेत्य सहिता भ्रातृव्यसनकर्शिताः ।
भीमसेनं महाबांहु पीडयामासुरञ्जसा ॥ २०॥

स वध्यमानो विशिखैस् समन्तात् तैर्महारथैः ।
भीमः क्रोधाभिरक्ताक्षः क्रुद्धः काल इवाबभौ ॥ २१॥

ततः परिवृतो राजन् नवभिश्शत्रुतापनैः ।
दुश्शासनादवरजैः पुत्रैस्तव वृकोदरः ॥ २२॥

तांस्तु भल्लैर्महावेगैर् नवभिर्नव भारत ।
रुक्माङ्गदान् रुक्मपुङ्खैः पार्थो निन्ये यमक्षयम् ॥ २३॥

हतेषु तव पुत्रेषु बलं तद्विप्रदुद्रुवे ।

---

* अ—कोशे अस्मैवाध्यायसमाप्तिर्दृश्यते

पश्यतस्सूतपुत्रस्य पाण्डवस्य भयार्दितम् ॥ २४॥

ततः कर्णो महाराज प्रविवेश महद्बलम् ।
दृष्ट्वा भीमस्य विक्रान्तम् अन्तकस्य प्रजास्विव ॥ २५॥

तस्य त्वाकारभावज्ञश् शल्यस्समितिशोभनः ।
उवाच वचनं कर्णं प्राप्तकालं हितं तदा ॥* २६॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि षण्णवतितमोऽध्यायः ॥ ९६ ॥
॥ ७३ ॥ कर्णपर्वणि षण्णवतितमोऽध्यायः ॥ ९६ ॥
[अस्मिन्नध्याये २६॥ श्लोकाः]

॥ सप्तनवतितमोऽध्यायः ॥

दुश्शासनादिनिधनाद्विभ्यतः कर्णस्य शल्येन प्रोत्साहनम् ॥ १ ॥ सङ्कुलयुद्धम् ॥ २ ॥

शल्यः—

मा व्यथां कुरु राधेय नैतत्त्वय्युपपद्यते ॥ ॥
एते द्रवन्ति राजानो भीमसेनभयार्दिताः ।
दुर्योधनश्च सम्मूढो भ्रातृव्यसनदुःखितः ॥ १॥

दुश्शासनस्य रुधिरे पीयमाने महात्मना ।
व्यापन्नचेतास्सहसा शोकोपहतचेतनः ॥ २॥

* अ—कोशे अस्याध्यायसमाप्तिर्न दृश्यते

उपासते त्वामेते हि परिवार्य महारथाः ।
कृपप्रभृतयः कर्ण हतशेषाश्च भारताः ॥ ३॥

पाण्डवा लब्धलक्षाश्च धनञ्जयपुरोगमाः ।
त्वामेवाभिमुखाश्शूरा युद्धाय समुपस्थिताः ॥ ४॥

स त्वं पुरुषशार्दूल पौरुषे महति स्थितः ।
क्षत्रधर्मं पुरस्कृत्य प्रत्युद्याहि धनञ्जयम् ॥ ५॥

भारो हि धार्तराष्ट्रेण त्वयि सर्वस्समाहितः ।
तमुद्वह महाबाहो यथाशक्ति यथाबलम् ॥ ६॥

जये स्याद्विपुला कीर्तिर् ध्रुवस्स्वर्गः पराजये ॥ ७

वृषसेनश्च राधेय सङ्क्रुद्धस्तनयस्तव ।
त्वयि मोहं समापन्ने पाण्डवानभिधावति ॥ ८

सञ्जयः—

एतच्छ्रुत्वा तु वचनं शल्यस्यामिततेजसः ।
हृदि मानुष्यकं भावं [1]चक्रे युद्धाय सुस्थिरम् ॥ ९

ततः क्रुद्धो वृषसेनोऽभ्यधावद्
भीमं समायान्तममित्रसाहम् ।
बाणैः किरन्तं प्रतियाति चोग्रं
व्यात्ताननं कालमिवापतन्तम् ॥ १०

---

1. क-ख—कृत्वा युद्धाय सोऽत्वरत्

* अ—कोशे अष्टैवाध्यायसमाप्तिर्दृश्यते

तमभ्यधावन्नकुलः प्रवीरम्
आरादमित्रं प्रतुदन् पृषत्कैः ।
तं कर्णपुत्रं परमप्रहृष्टो
जिष्णुर्जिघांसुर्मघवेव जम्भहम् ॥ ११

ततो ध्वजं स्फाटिकहेमचित्रं
चिच्छेद धैर्यान्नकुलः क्षुरेण ।
कर्णात्मजस्येष्वसनं च चित्रं
[1]भल्लेन जाम्बूनदपट्टबद्धम् ॥ १२

अथान्यदादाय धनुस्स शीघ्रं
कर्णात्मजः पाण्डवमभ्यविध्यत् ।
दिव्यैरस्त्रैरभ्यवर्षत्तदैनं
कर्णस्य पुत्रो नकुलं कृतास्त्रम् ॥ १३

ततः क्रुद्धो नकुलः कर्णपुत्रं
शरैर्महोल्काभिरिवाभ्यपीडयत् ।
स कर्णपुत्रो नकुलस्य राजन्
सर्वानस्त्रान् वारयदुत्तमास्त्रैः ॥ १४

आसीत् सुघोरं भरतप्रवीर
युद्धं तदा कर्णजपाण्डवाभ्याम् ॥ १४॥

1. क-ख-घ-ङ—क्षुरेण

वनायुजान् सुकुमारान् सुशुभ्रान्
अलङ्कृताञ्जातरूपेण चित्रान् ।
जघान चाश्वान् नकुलस्य वीरो
रणाजिरे सूतपुत्रस्य पुत्रः ॥ १५।

ततो हताश्वादवरुह्य यानाच्
चर्माददे रुचिरं पद्मचित्रम् ।
आकाशसङ्काशमसिं प्रगृह्य
प्रकाशमानः खगवच्चचार ॥ १६।

ततोऽस्य पक्षाननयद्यमाय
द्विसाहस्रान्नकुलः क्षिप्रकारी ।
ते प्रापतन्नसिना वै विशस्ता
यथाऽश्वमेधे पशवश्शमित्रा ॥ १७॥

ततस्ततो विजिता युद्धशौण्डा
नानादेश्यास्सुहृदस्सत्यसन्धाः ।
एकेन शीघ्रं नकुलेन नुन्नास्
सारेष्सुनेवोत्तमचन्दनस्य ॥ १८॥

भूमौ चरन्तं नकुलं रथस्थास्
समन्ततस्सायकैः प्रत्यगृह्णन् ।
स तुद्यमानो नकुलो विहङ्गैश्
चचार सङ्ख्ये द्विषतो विनिघ्नन् ॥ १९॥

तं कर्णपुत्रो विचरन्तमाजौ
नराश्वमातङ्गरथप्रवीरान् ।
निघ्नन्तमष्टादशभिः पृषत्कैर्
विव्याध वीरस्स चुकोप युद्धे ॥ २०॥

[1]स तेन विद्धोऽतिभृशं तरस्वी
महाहवे वृषसेनेन राजन् ।
[2]ततोऽभ्यधावत् समरे जिघांसुः
कर्णात्मजं पाण्डुसुतो नृवीरम् ॥ २१॥

[3]वितत्य पक्षौ सहसा पतन्तं
श्येनं यथैवामिषलुब्धमाजौ ।
अवाकिरद्वृषसेनस्तरस्वी
शितैश्शरैर्नकुलमुदारवीर्यम् ॥ २२॥

स तान् मोघांस्तस्य कुर्वन् शरौघांश्
चचार मार्गान् नकुलश्चित्ररूपान्[4] ।
तस्येषुभिर्व्यधमत् सूतपुत्रो
महारणे चर्म सहस्रतारम् ॥ २३॥

---

1. क-ख-घ-ङ—नास्तीदमर्धम्
2. अ—नास्तीदमर्धम्
3. क-ख-घ-ङ—अर्धत्रयं नास्ति
4. अ—अथास्य तूर्णं चरतो नरेन्द्र
खड्गेन वीरो नकुलस्य तस्य। [अधिकः पाठः]

तस्याथ कांस्यं सुशितं सुपीतम्
असिप्रवीरं गुरुभारसाहम् ।
द्विषच्छरीरासुहरं सुघोरम्
आधून्वतस्सर्पमिवास्तकोशम् ॥ २४॥

क्षिप्रं शरैष्षड्भिरमित्रसाहश्
चकर्त खड्गं निशितैस्सुधारैः ॥ २५

पुनश्च पार्थं निशितैः पृषत्कैस्
स्तनान्तरे क्षिप्रमिवात्यविध्यत् ॥ २५॥

स भीमसेनस्य रथं च गत्वा
ववर्ष वै शरवर्षं सुघोरम् ॥ २६

[1]नकुलमथ विदित्वा भिन्नबाणासनासिं
विरथमरिशरार्तं सूतपुत्रास्त्रमग्नम् ।

---

1. अ—आपुप्लुवे सिंह इवाचलाग्रं
सम्प्रेक्षमाणस्य धनञ्जयस्य ।
ततः क्रुद्धो वृषसेनो महात्मा
ववर्ष ताविषुजालेन वीरः॥
महारथावेकरथौ समेतौ
शरैः प्रभिन्दन्निव पाण्डवेयौ ।
अन्ये च संहत्य कुरुप्रवीरास्
ततो न्यघ्नन् शरवर्षैरुपेत्य ॥
तौ पाण्डवेयौ परितस्समन्तात्
समिध्यमानाविव हव्यवाहौ ॥ [अधिकः पाठः]

पवनचलपताकाह्लादिनो वल्गिताश्वाः
परपुरुषनियुक्तास्त्वै रथैश्शीघ्रमीयुः ॥ २७

द्रुपदसुतवरिष्ठाः पञ्च शैनेयषष्ठा
द्रुपददुहितृपुत्राः पञ्च चामित्रसाहाः ।
द्विरदरथनराश्वान् सूदयन्तस्त्वदीयान्
भगवत इव रुद्रास्सङ्क्षयाय हेतिमन्तः ॥ २८

अथ तव रथमुख्यास्तान् प्रतीयुर्ध्वजिन्यां
हृदिकसुतकृपौ च द्रौणिदुर्योधनौ च ।
शकुनिशुकवृकाश्च क्राथदेवावृधौ च
द्विरदजलदघोषैस्स्यन्दनैः कार्मुकैश्च ॥ २९

तव रथवरवर्यास्तान् दशैकप्रवीरान्
इषुभिरशनिकल्पैस्ताडयन्तो न्यरुन्धन् ।
नवजलधरवर्णैर्हस्तिभिस्तान् स्म वव्रुर्
गिरिशिखरनिकाशैर्भीमवेगैः कुणिन्दाः ॥ ३०

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि सप्तनवतितमोऽध्यायः ॥ ९७ ॥
॥ ७३ ॥ कर्णपर्वणि सप्तनवतितमोऽध्यायः ॥ ९७ ॥
[अस्मिन्नध्याये ३० श्लोकाः]

॥ अष्टनवतितमोऽध्यायः ॥

सङ्कुलयुद्धम् ॥

सञ्जयः—

सुकल्पिता हैमवता मदोत्कटा
रणाभिकामैः कृतिभिस्समास्थिताः ।
सुवर्णजालावतता बभुर्गजास्
तथा यथा वै जलदास्सविद्युतः ॥ १

कुणिन्दपुत्रो दशभिर्महाशरैः
कृपं ससूताश्वमताडयद्भृशम् ।
ततश्शरद्वत्सुतसायकैर्हतस्
सहैव नागेन च भूतलेऽपतत् ॥ २

कुणिन्दपुत्रावरजस्तु तोमरैर्
दिवाकरांशुप्रतिमैरयस्मयैः ।
जघान भोजस्य हयाननेकशः
क्षुरैर्विशस्तः कृतवर्मणो गजः ॥ ३

अथापरे द्रौणिशरार्दिता गजास्
त्रयस्तु सर्वायुधयोधकेतनाः ।
निपेतुरुर्व्यां व्यसवो विचेतनास्
तथा यथा वज्रहता महाचलाः ॥ ४

कुणिन्दराजावरजादनन्तरस्
स्तनान्तरे पत्रिवरैरताडयत् ।
तवात्मजस्याथ तवात्मजस्ततश्
शरैश्शरीरं बिभिदे द्विपञ्चभिः ॥ ५

स नागराजस्सह राजसूनुना
पपात रक्तं बहु सर्वतः क्षरन् ।
शचीशवज्रप्रहतोऽम्बुदागमे
यथा पुरा गैरिकपर्वतस्तथा ॥ ६

कुणिन्दपुत्रप्रहितोऽपरो गजः
क्राथं ससूताश्वरथं व्यपोथयत् ।
ततोऽपतत्तस्य शरार्दितो गजो
महेन्द्रवज्राभिहतो यथा गिरिः ॥ ७

रथी द्विपस्थेन हतोऽपतच्छरैः
क्राथाधिपः पर्वतजेन दुर्जयः ।
सवाजिसूतेष्वसनध्वजस्तथा
यथा महावातहतो महाद्रुमः ॥ ८

वृको गजस्थं गिरिराजवासिनं
भृशं शरैर्द्वादशभिः पराभिनत् ।

ततो वृकं साश्वरथं महागजस्
त्वरंश्चतुर्भिश्चरणैरपोथयत् ॥ ९

स पोथितो नागवरेण वीर्यवान्
पराभिनद्द्वादशभिश्शिलीमुखैः ।
वृकेण बाणाभिहतोऽपतत् क्षितौ
स वारणो बभ्रुसुतेन सार्धम् ॥ १०

[1]कुणिन्दराजस्य सुतोऽपरस्तदा
[2]स चापि शूरस्सहसा समर्पितः ।
पपात बाणैस्सहदेवसूनुना
विषाणपुच्छापरगात्रघातिना ॥ ११

[3]गजेन वाहाञ् शकुनेः कुणिन्दजो
[4]निनाय वैवस्वतमन्दिरं रणे ।
रथं च संक्षुभ्य ननाद नर्दतस्
ततोऽस्य गान्धारपतिश्शिरोऽहरत् ॥ १२

---

1. ख—अयं पादो नास्ति
2. ङ—चकार युद्धमपरेण दन्तिना
क—द्विपेनदेघाप्यूथमभ्यपीडयत् [एकपादोऽधिकः पाठः]
3. अ—तथाऽपरश्शत्रुवरप्रमाथिना
गजेन वाहान् शकुनेः कुणिन्दजः [पाठान्तरम्]
4. क-ख-ङ—नास्त्यर्धं पादः

ततः कुणिन्देषु हतेषु तेष्वथ
प्रहृष्टरूपास्तव ते महारथाः ।
भृशं प्रदध्मुर्लवणाम्बुसम्भवान्
वरांश्च बाणासनपाणयोऽभ्ययुः ॥ १३

अथाभवद्युद्धमतीव दारुणं
पुनः कुरूणां सह पाण्डुसृञ्जयैः ।
शरासिशक्त्यृष्टिगदापरश्वधैर्
नराश्वनागासुहरं भृशाकुलम् ॥ १४

रथाश्वमातङ्गपदातयस्ततः
परस्परं विप्रहताः पतन् क्षितौ ।
यथा सविद्युत्स्तनिता जलप्रदास्
समुत्थितैर्दिग्भ्य इवोग्रमारुतैः ॥ १५

ततश्शतानीकशराहता गजा
हया रथाः पत्तिवराश्च तावकाः ।
सुपर्णवातप्रहता यथोरगास्
तथा हता गामगमन् विचूर्णिताः ॥ १६

ततोऽभ्यविद्ध्यद्बहुभिश्शितैश्शरैस्
स विन्दपुत्रो नकुलात्मजं स्मयन् ।

ततोऽस्य कायाद्विचकर्त नाकुलिश्
शिरः क्षुरेणाम्बुजसन्निभाननम् ॥ १७

ततश्शतानीकमविध्यदायसैस्
त्रिभिश्शरैः कर्णसुतोऽर्जुनं त्रिभिः ।
त्रिभिश्च भीमं नकुलं च सप्तभिर्
जनार्दनं द्वादशभिश्च सायकैः ॥ १८

ततोऽस्य कर्मातिमनुष्यकर्मणस्
समीक्ष्य हृष्टाः कुरवोऽभ्यपूजयन् ।
पराक्रमज्ञाश्च धनञ्जयस्य ये
हुतोऽयमग्नाविति मेनिरे च ते ॥ १९

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि अष्टनवतितमोऽध्यायः ॥ ९८ ॥
॥ ७३ ॥ कर्णपर्वणि अष्टनवतितमोऽध्यायः ॥ ९८ ॥
[अस्मिन्नध्याये १९ श्लोकाः]

॥ एकोनशततमोऽध्यायः ॥

अर्जुनेन कर्णसूनोर्वृषसेनस्य वधः ॥

सञ्जयः—

ततः किरीटी परवीरघाती
हताश्वमालोक्य कुरुप्रवीरम् ।
[1]माद्रीसुतं नकुलं राजमध्ये
समीक्ष्य बाणैर्भृशविक्षतं च ॥ १

तमभ्यधावद्वृषसेनमुग्रो
राधासुतस्य प्रमुखेऽस्य पुत्रम् ॥ १॥

[2]तमापतन्तं तरसोग्ररूपं
कुरूत्तमं बाणसहस्रधारम् ।
अभ्यापतत् कर्णसुतो महात्मा
यथाऽमरेन्द्रं नमुचिः पुरा रणे ॥ २॥

तौ तत्र शूरौ रथकुञ्जरौ रणे
परस्परस्याभिमुखौ महारथौ ।
ससर्जतुश्शरसङ्घाननेकान्
सम्भ्रान्तरूपौ सुभृशं तदानीम् ॥ ३॥

1. क-ख—इदमर्धं नास्ति 2. ख-घ—अर्धमेतत् नास्ति

ततोऽद्भुतेनैकरथेन पार्थं
शरेण विद्ध्वा युधि कर्णपुत्रः ।
ननाद नादान् स महानुभावो
विद्ध्वेव शक्रं नमुचिः पुरा वै ॥ ४॥
[1]पुनस्स पार्थं वृषसेन उग्रैर्
बाणैरविद्ध्यद्भुजमूले तु मध्ये ।
[2]तथैव कृष्णं नवभिस्समर्पयन्
पुनश्च पार्थं दशभिर्जघान ॥ ५॥
[3]पूर्वं तदा वृषसेनप्रयुक्तैर्
अभ्याहतश्श्वेतहयश्शरैस्तैः ।
संरम्भमीषद्गमितो वधाय
कर्णात्मजस्याशु मतिं प्रदध्रे ॥ ६॥
ततस्स रुष्टो रणमूर्ध्नि पार्थः
कृत्वा त्रिशाखां भ्रुकुटिं ललाटे ।
मुमोच राजन् विशिखान् महात्मा
[4]वधे धृतः कर्णसुतस्य सङ्ख्ये ॥ ७॥

---

1. क-ख-घ-ङ—ततोऽर्जुनं वृषसेनो भुजाग्रे
शरैरविध्यद्दशभिश्चितपुङ्खैः [पाठान्तरम्]
2. क-ख-घ-ङ—स वासुदेवं नवभिः पृषत्कैः
पुनश्च पार्थं नवभिः शिलोमुखैः । [पाठान्तरम्]
3. क-ख-घ-ङ—अर्धद्वयं नास्ति तथा वृषसेनेन विद्धो महाहवे
4. क-ख-घ-ङ—वधाय तूर्णं सूतपुत्रस्य सङ्ख्ये

विव्याध चैनं दशभिः पृषत्कैः
किरीटमाली वृषसेनमुग्रैः ।
चिच्छेद चास्येष्वसनं भुजौ च
क्षुरेण वीरश्शिर एव चोग्रः ॥ ८॥

स पार्थबाणाभिहतः पपात
रथाद्विबाहुर्विशिरा धरायाम् ।
सुपुष्पितो वज्रहतोऽतिमात्रो
भग्नो यथा साल इवावकृत्तः ॥ ९॥

तं पार्थबाणाभिहतं पतन्तं
सम्प्रेक्ष्य कर्णस्सुतमाशुकारी ।
रथं रथेनातिरथिर्जगाम
किरीटिनः पुत्रवधाभितप्तः ॥ १०॥

शिरः करौ चैव शरासनं च
एकेषुणा वृषसेनस्य सङ्ख्ये ।
चिच्छेद पार्थो ह्यङ्गराजस्य सैन्यं
कोपाग्निना चतुरङ्गं ददाह ॥ ११॥

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां
कर्णपर्वणि एकोनशततमोऽध्यायः ॥ ९९ ॥
॥ ७३ ॥ कर्णपर्वणि एकोनशततमोऽध्यायः ॥ ९९ ॥
[अस्मिन्नध्याये ११॥ श्लोकाः]

॥ शततमोऽध्यायः ॥

रणाय कर्णार्जुनयोः समागमः ॥ १ ॥ तदवलोकनाय दिवि देवगन्धर्वादीनां समागमः ॥ २ ॥ देवासुरादीनां कर्णार्जुनसमाश्रयणेन द्वैधीभावः ॥ ३ ॥

सञ्जयः—

वृषसेनं हतं दृष्ट्वा कोपामर्षसमन्वितः ।
दुःखशोकोद्भवं वारि नेत्राभ्यां [1]समवासृजत् ॥ १

रथेन कर्णस्तेजस्वी जगामाभिमुखो रिपुम् ।
युद्धायामर्षताम्राक्षस् समाहूय धनञ्जयम् ॥ २

तौ रथौ सूर्यसङ्काशौ वैयाघ्रपरिवारणौ ।
समेतौ ददृशुस्तत्र द्वाविवार्कौ [2]समागतौ ॥ ३

शुशुभाते महात्मानौ द्वावादित्यौ यथा दिवि ।
श्वेताश्वैः पुरुषादित्यावास्थितावरिमर्दनौ ॥ ४

रथौ चतुर्भिर्जलदैर् भगमित्राविवाम्बरे ॥ ४॥

तौ दृष्ट्वा विस्मयं जग्मुस् सर्वभूतानि मारिष ।
त्रैलोक्यविजये यत्ताविन्द्रवैरोचनाविव ॥ ५॥

रथज्यातलनिर्ह्रादैर् बाणशङ्खरवैरपि ।
तौ रथावभ्यवर्तन्त क्षत्रियास्सर्व एव हि ॥ ६॥

---

1. क-ख-घ—सहसाऽसृजत् 2. क-ङ—समाहितौ

ध्वजावालोक्य वीराणां विस्मयस्समपद्यत ।
हस्तिकक्ष्यां च कर्णस्य वानरं च किरीटिनः ॥ ७॥

तौ रथौ सम्प्रसक्तौ च दृष्ट्वा भारत पार्थिवाः ।
सिंहनादरवांश्चक्रुस् साधुवादांश्च पुष्कलान् ॥ ८॥

श्रुत्वा तयोर्द्वैरथं च तत्र योधास्समन्ततः ।
चक्रुर्बाहुरवं चैव तथा बाणरवं महत् ॥ ९॥

आजघ्नुः कुरवस्तत्र वादित्राणि समन्ततः ।
राधेयमभितो दध्मुश् शङ्खाञ् शतसहस्रशः ॥ १०॥

तथैव पाण्डवास्सर्वे हर्षयन्तो धनञ्जयम् ।
तूर्यशङ्खनिनादेन दिशस्सर्वा व्यनादयन् ॥ ११॥

क्ष्वेलितास्फोटितोत्क्रुष्टैस् तुमुलं सर्वतोऽभवत् ।
बाहुघोषैश्च शूराणां कर्णार्जुनसमागमे ॥ १२॥

तौ दृष्ट्वा पुरुषव्याघ्रौ समाने स्यन्दने स्थितौ ।
प्रगृहीतमहाचापौ शरशक्तिध्वजायुतौ ॥ १३॥

वर्मिणौ बद्धनिस्त्रिंशौ श्वेताश्वौ शङ्खशोभितौ ।
तूणीरवरसम्पन्नौ द्रावतीव सुदर्शनौ ॥ १४॥

रक्तचन्दनदिग्धाङ्गौ सुसंरब्धाविवानलौ ।
[1]चापविद्युत्प्रभोपेतौ श्वेतच्छत्रोपशोभितौ ॥ १५॥

---

1. क-ख-च-ङ—पञ्चार्धानि न सन्ति

सिंहस्कन्धौ सिंहभुजौ रक्ताक्षौ हेममालिनौ ।
अन्योन्यस्पर्धिनौ वीरावन्योन्यवधकाङ्क्षिणौ ॥ १६॥

अन्योन्यमभिधावन्तौ गोष्ठे गोवृषभाविव ।
प्रमिन्नाविव मातङ्गौ सुसंरब्धाविवाचलौ ॥ १७॥

आशीविषसमप्रख्यौ [1]यमकालान्तकोपमौ ।
इन्द्रवृत्राविव क्रुद्धौ चन्द्रसूर्यसमप्रभौ ॥ १८॥

महाग्रहाविव क्रूरौ युगान्ताय समुत्थितौ ।
देवगर्भौ देवसमौ देवतुल्यौ च रूपतः ॥ १९॥

[2]बलिनौ समरे दृप्तौ नानाशस्त्रास्त्रधारिणौ ।
तौ दृष्ट्वा पुरुषव्याघ्रौ शार्दूलाविव वेगिनौ ॥ २०॥

बभूव परमो हर्षस् तावकानां विशां पते ॥ २१

संशयस्सर्वभूतानां विजये समपद्यत ।
समेतौ पुरुषव्याघ्रौ प्रेक्ष्य कर्णधनञ्जयौ ॥ २२

उभावस्त्रविदां श्रेष्ठावुभौ तीव्रपराक्रमौ ।
[3]उभौ च बाहुशब्देन नादयन्तौ नभस्स्थलम् ॥ २३

[4]उभौ वरायुधधरावुभौ रणकृतश्रमौ ।

---

1. क-ख—चन्द्रसूर्यसमप्रभौ समेतौ कर्णपाण्डवौ
2. क-ख-घ-ङ—अर्धचतुष्टयं नास्ति
3. क-घ—नास्त्यर्धमिदम्
4. क-ख—इदमर्धं नास्ति

उभौ विश्रुतकर्माणौ पौरुषेण बलेन च ॥ २४

उभौ च सदृशौ युद्धे शम्बरामरराजयोः ।
[1]कार्तवीर्यसमौ चोभावुभौ दाशरथेस्समौ ॥ २५

विष्णुवीर्यसमौ चोभावुभौ भवसमौ युधि ।
उभौ श्वेतहयौ राजन् रथप्रवरमास्थितौ ॥ २६

सारथिप्रवरौ चापि उभौ मद्रजनार्दनौ ॥ २६॥

तौ तु दृष्ट्वा महाराज भ्राजमानौ वृषाविव ।
सिद्धचारणसङ्घानां विस्मयस्समजायत ॥ २७॥

धार्तराष्ट्रास्ततस्तूर्णं सबला भरतर्षभ ।
परिवव्रुर्महात्मानं कर्णमाहवशोभिनम् ॥ २८॥

तथैव पाण्डवा हृष्टा धृष्टद्युम्नपुरोगमाः ।
[2]यमौ च चेकितानश्च प्रहृष्टाश्च प्रभद्रकाः ॥ २९॥

नानादेश्याश्च ये शूराश् शिष्टा युद्धाभिनन्दिनः ।
ते सर्वे सहिता हृष्टाः परिवव्रुर्धनञ्जयम् ॥ ३०॥

रिरक्षिषन्तश्शत्रुघ्नं पत्त्यश्वरथकुञ्जरैः ।
धनञ्जयस्य विजये धृताः कर्णवधेऽपि च ॥ ३१॥

तथैव तावकास्सर्वे यत्तास्सेनाप्रहारिणः ।
दुर्योधनमुखा राजन् कर्णं जुगुपुराहवे ॥ ३२॥

1. ख—अधैतयं नास्ति 2. अ—अधैतयं नास्ति

तावकानां रणे कर्णो ग्लहो ह्यासीद्विशां पते ।
तथैव पाण्डवेयानां ग्लहः पार्थोऽभवत् तदा ॥ ३३॥

तयोस्तु सभ्यास्तत्रासन् प्रेक्षका येऽभवन् युधि ।
तत्रैषां ग्लहमानानां ध्रुवौ जयपराजयौ ॥ ३४॥

ताभ्यां वै द्यूतमारब्धं विजयायेतराय वा ।
अस्माकं पाण्डवेयानां स्थितानां रणमूर्धनि ॥ ३५॥

तौ संस्थितौ महाराज समरे युद्धशालिनौ ।
अन्योन्यं प्रति संरब्धावन्योन्यवधकाङ्क्षिणौ ॥ ३६॥

तावुभौ विजिगीषन्ताविन्द्रवृत्राविव प्रभो ।
भीमरूपधरावास्तां महाधूमाविव ग्रहौ ॥ ३७॥

[1]ततोऽन्तरिक्षे सञ्जज्ञे विवादो भरतर्षभ ।
[2]तौ समेतौ महात्मानौ दृष्ट्वा कर्णधनञ्जयौ ॥ ३८॥

अर्जुनो जयतां कर्णम् इति शक्रोऽब्रवीत् तदा ।
जयतामर्जुनं कर्ण इति सूर्योऽभ्यभाषत ॥ ३९॥

इहार्जुनो मम सुतः कर्णं जयतु संयुगे ।
हत्वा कर्णो जयत्वत्र मम पुत्रो धनञ्जयम् ॥ ४०॥

इति सूर्यस्य चैवासीद् विवादो वासवस्य च ।
पक्षसंस्थितयोस्तत्र तयोर्विबुधसिंहयोः ॥ ४१॥

1. अ—नासीदमर्षम् 2. क-ख-घ-ङ—दशार्धानि न सन्ति

द्वैविध्यमासीद्देवानाम् असुराणां च भारत ।
यतः पार्थस्ततो देवा यतः कर्णस्ततोऽसुराः ॥ ४२॥

रथयूथपयोः पक्षे कुरुपाण्डववीरयोः ।
मिथो भेदश्च भूतानाम् आसीत् कर्णार्जुनान्तरे ॥ ४३॥

व्याश्रयन्त द्विधा भिन्नास् सर्वे लोकाः परन्तप ॥ ४४

देवदानवगन्धर्वाः पिशाचोरगराक्षसाः ।
प्रतिपक्षा ग्लहं चक्रुः कर्णार्जुनसमागमे ॥ ४५

द्यौरासीत् कर्णपक्षेऽत्र सनक्षत्रा विशां पते ।
भूर्विशाला पार्थमाता पुत्रस्य जयकाङ्क्षिणी ॥ ४६

सागरा गिरयश्चैव सरितश्च नरोत्तम ।
महीजा जलजाश्चैव व्याश्रयन्त किरीटिनम् ॥ ४७

असुरा यातुधानाश्च गुह्यकाश्च परन्तप ।
[1]कर्णस्समभवद्यत्र खेचराणि वयांसि च ॥ ४८

रत्नानि निधयस्सर्वे वेदाश्चाख्यानपञ्चमाः ।
सोपवेदोपनिषदो व्याश्रयन्त किरीटिनम् ॥ ४९

वासुकिश्चित्रसेनश्च तक्षकश्चोपतक्षकः ।
महीवियज्जलचराः काद्रवेयाश्च सान्वयाः ॥ ५०

विषवन्तो महावेगा नागाश्चार्जुनतोऽभवन् ॥ ५०॥

1. अ—ते कर्णं समपद्यन्त हृष्टरूपास्समन्ततः । [अधिकः पाठः]

ऐरावतास्सौरभेया वैशालेयाश्च भोगिनः ।
एतेऽभवन्नर्जुनस्य पापास्सर्पाश्च कर्णतः ॥ ५१॥

ईहामृगा व्यालमृगा माङ्गल्या मृगपक्षिणः ।
[1]मङ्गलाः पशवश्चैव सिंहव्याघ्रास्तथैव च ॥ ५२॥

पार्थस्य विजये राजन् सर्व एव समाश्रिताः ॥ ५३

[2]वसवो मरुतस्साध्या रुद्रा विश्वेऽश्विनावपि ।
अग्निरिन्द्रश्च सोमश्च [3]पन्नगाश्च दिशो दश ॥ ५४

कर्णतस्समपद्यन्त श्वसृगालवयांसि च ॥ ५४॥

[4]वसवश्च महेन्द्रेण मरुतश्च सहाग्निना ।
धनञ्जयस्य ते वर्गा आदित्याः कर्णतोऽभवन् ॥ ५५॥

देवताः पितृभिस्सार्धम् ऋषयश्च परन्तप ।
तुम्बुरुप्रमुखास्सर्वे गन्धर्वा भरतर्षभ ॥ ५६॥

यमो वैश्रवणश्चैव वरुणश्च यतोऽर्जुनः ।
देवर्षिब्रह्मर्षिगणास् सर्वे च खचराश्च ये ॥ ५७॥

[5]प्रामेयास्सहमौनेयाश् शुभाश्चाप्सरसां गणाः ।
सहाप्सरोभि [6]श्शुद्धाभिर् देवदूताश्च गुह्यकाः ॥ ५८॥

---

1. अ-ख—नास्तीदमर्धम् 2. ख—अर्धत्रयं नास्ति
3. घ—यमो वैश्रवणस्तथा
4. अ—मृगाश्च पशवश्चैव कर्णमेवाभिसंश्रिताः । [अधिकः पाठः]
5. ख—प्रवेयास्सह भोमेया 6. क-ख-घ—शुभ्राभिर्

किरीटिनं संश्रितास्स्म पुण्यगन्धा मनोरमाः ॥ ५९
अमनोज्ञाश्च ये गन्धास् ते सर्वे कर्णमाश्रिताः ।
विपरीता[1]न्यरिष्टानि भवन्ति विनशिष्यताम् ॥ ६०
ये त्वन्तकाले पुरुषं विपरीतमुपाश्रितम् ।
प्रविशन्ति नरं क्षिप्रं मृत्युकालेऽभ्युपागते ॥ ६१
ते भावास्सहिताः कर्णं प्रविष्टास्सूतनन्दनम् ॥ ६१॥
ओजस्तेजश्च सिद्धिश्च प्रहर्षस्सत्यविक्रमौ ।
अनस्तुष्टिर्जयश्चापि तथाऽऽनन्दो नृपोत्तम ॥ ६२॥
ईदृशानि नरव्याघ्र तस्मिन् सङ्ग्रामसागरे ।
निमित्तानि च शुभ्राणि विविशुर्जिष्णुमाहवे ॥ ६३॥
ऋषयो ब्राह्मणैस्सार्धम् अभजन्त किरीटिनम् ॥ ६४
ततो देवगणैस्सार्धं सिद्धाश्च सह चारणैः ।
द्विधा भूता महाराज व्याश्रयन्त नरोत्तमौ ॥ ६५
विमानानि विचित्राणि गुणवन्ति च सर्वशः ।
समारुह्य समाजग्मुर् द्वैरथं कर्णपार्थयोः ॥ ६६
अन्तरिक्षे महाराज देवगन्धर्वराक्षसाः ।
दिदृक्षवस्समाजग्मुः कर्णार्जुनसमागमम् ॥ ६७
एवं सर्वेषु भूतेषु द्विधा भूतेषु भारत ।

---

1. क-ख-घ—न्यनिष्टानि 2. घ—नास्तीदमर्धम्
ङ. ख—इदमर्धं नास्ति

आशंसमानेषु जयं राधेयस्यार्जुनस्य च ॥ ६८
विमानायतसम्बाधम् आकाशमभवत् तदा ॥ ६८।
ईहामृगैर्व्यालमृगैर् द्विपाश्वरथपत्तिभिः ।
ऊह्यमानाः परे मेघैर् वायुनाऽनिमिषेक्षणाः ॥ ६९॥
दिदृक्षवस्समाजग्मुः कर्णार्जुनसमागमम् ॥ ७०
देवदानवगन्धर्वा नागयक्षपतत्रिणः ।
महर्षयो देवगणाः पितरश्च स्वधाभुजः ॥ ७१
तपोविद्यौषधीसिद्धा नानारूपाम्बरत्विषः ।
अन्तरिक्षे महाराज विवदन्तोऽवतस्थिरे ॥ ७२
ब्रह्मा ब्रह्मर्षिभिस्सार्धं प्रजापतिभिरेव च ।
भवश्चैवास्थिता यानं दिव्यं तं देशमागमन् ॥ ७३
ततः प्रजापतिस्तूर्णम् आजगाम महीपते ।
द्वैरथं युधि तं द्रष्टुं कर्णपाण्डवयोस्तदा ॥ ७४

विजित्य कर्णस्स्विदिमां वसुन्धराम्
अथार्जुनस्स्वित् प्रतिपद्यतेऽखिलाम् ।
इतीश्वरस्यापि बभूव संशयः
प्रजापतेः प्रेक्ष्य तयोर्महद्बलम् ॥ ७५

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि शततमोऽध्यायः ॥ १०० ॥
॥ ७३ ॥ कर्णपर्वणि शततमोऽध्यायः ॥ १०० ॥
[अस्मिन्नध्याये ७५ श्लोकाः]

॥ एकाधिकशततमोऽध्यायः ॥

कर्णार्जुनसमाश्रयात् लोकक्षयभीरुणा प्रजापतिना ब्रह्माणं प्रति उभयोः साम्येन जयप्रार्थना ॥ १ ॥ इन्द्रेण सकारणनिरूपणमर्जुनस्यैव जये प्रार्थिते ब्रह्मेशानाभ्यां तदङ्गीकारे देवैर्हर्षात्पुष्पवर्षणम् ॥ २ ॥

सञ्जयः—

[1]दृष्ट्वा प्रजापतिं देवास् स्वयम्भुवमचोदयन् ॥ ॥

देवाः—

कोऽनयोर्विजयी देव कुरुपाण्डववीरयोः ॥ १

कर्णार्जुनविवादेन सर्वं संशयितं जगत् ।
स्वयम्भो ब्रूहि नस्तत्त्वम् एतयोर्विजये प्रभो ॥ २

सञ्जयः—

प्रजापतिस्तु तं दृष्ट्वा देवभागं समागतम् ।
अब्रवीत्तु ततो राजन् पश्यतो वै स्वयम्भुवः ॥ ३

प्रजापतिः—

उभावतिरथौ शूरावुभौ दृढपराक्रमौ ।
उभौ सदृशकर्माणौ वज्रिचक्रायुधोपमौ ॥ ४

अहो बत महद्युद्धं कर्णार्जुनसमागमे ।
भविष्यति महाघोरं वृत्रवासवयोरिव ॥ ५

1. क-ख-ब-ङ—अर्धचतुष्टयं नास्ति

सञ्जयः—

प्रजापतिरथोक्त्वैवं स्वयम्भुवमचोदयत् ॥ ५॥

प्रजापतिः—

समोऽस्तु विजयः कामम् उभयोर्नरसिंहयोः ॥ ६

कर्णार्जुनविवादेन मा नश्येदखिलं जगत् ।
स्वयम्भो ब्रूहि तद्वाक्यं समोऽस्तु विजयोऽनयोः ॥ ७

सञ्जयः—

एवमुक्तस्तु भगवाञ् जये ताभ्यामनिश्चिते ।
इत्यब्रवीन्महाराज महान् ब्रह्मा प्रजापतिम् ॥ ८

ब्रह्मा—

द्वावप्येतौ हि कृतिनौ द्वावप्यतिबलोत्कटौ ।
भविष्यत्यनयोर्युद्धं त्रैलोक्यस्य भयावहम् ॥ ९

सञ्जयः—

ततः प्रजापतिं तत्र सहस्राक्षोऽभ्यचोदयत् ॥ ९॥

इन्द्रः—

विजयो ध्रुव एवास्तु पाण्डवस्य महात्मनः ॥ १०

मनस्वी बलवाञ् शूरः कृतविद्यस्तपोधनः ।
बिभर्ति च महातेजा धनुर्वेदमशेषतः ॥ ११

अतिक्रमेत माहात्म्याद् दिष्ट[1]मप्यतिवीर्यवान् ॥ ११॥

1. क-घ-ङ—मस्य स वीर्यवान् ख—मद्य विपर्ययात्

अतिक्रमे च लोकानाम् अभावो नियतो भवेत् ।
नावस्थानं च पश्यामि क्रुद्धयोः कृष्णयोः क्वचित् ॥ १२॥

स्रष्टारौ जगतश्चैतौ ततश्च पुरुषर्षभौ ।
नरनारायणावेतौ पुराणावृषिसत्तमौ ॥ १३॥

अनियम्यौ नियन्तारौ जगतः पुरुषर्षभौ ॥ १४

कामं तु सुकृताँल्लोकान् प्राप्नोत्वेष परन्तपः ।
कर्णो वैकर्तनश्शूरो विजयस्तु नरे ध्रुवः ॥ १५

[1]वसूनां वा सलोकत्वं मरुतां वा समश्नुताम् ।
सहैव द्रोणभीष्माभ्यां नाकपृष्ठे महीयताम् ॥ १६

क्लेशितो हि वने पार्थो दीर्घकालं पितामह ।
तस्मादेष जयेद्युद्धे तपसाऽभ्यधिकोऽर्जुनः ॥ १७

पूर्वं भगवता प्रोक्तः कृष्णयोर्विजयो ध्रुवः ।
तत् तथास्तु नमस्तेऽस्तु प्रभो ब्रूहि पितामह ॥ १८

सञ्जयः—

तत् सहस्राक्षवचनं निशम्य भगवान् प्रभुः ।
नोवाच तज्जयं तुल्यं तयोः कर्णकिरीटिनोः ॥ १९

तस्मादाशां गतश्शङ्कस् तूष्णींभूते पितामहे ॥ १९॥

विजयं पाण्डवेयस्य वधं कर्णस्य चाहवे ।

---

1. ख—अर्धपद्यार्धं नास्ति

ब्रह्मेशानौ ततो वाक्यम् ऊचतुर्भुवनेश्वरौ ॥ २०॥

ब्रह्मेशानौ—

[1]विजयो ध्रुव एवास्तु पाण्डवस्य महात्मनः[2] ॥ २१

सञ्जयः—

[3]तथोक्ते देवदेवाभ्यां सहस्राक्षोऽब्रवीद्वचः ।
[4]आमन्त्र्य सर्वभूतानि ब्रह्मेशानानुशासनात् ॥ २२

इन्द्रः—

श्रुतं भवद्भिर्यत् प्रोक्तं भगवद्भ्यां जगद्धितम् ।
तत्तथा व्येतु वो रोगश् शमाप्नुत विमन्यवः ॥ २३

---

1. ख—इदमर्धं नास्ति
2. अ—खाण्डवे येन हुतभुक् तोषितस्सव्यसाचिना ।
स्वर्गं च समनुप्राप्य साहाय्यं शक्र ते कृतम् ॥
कर्णेन दानवः पक्षो ह्यतः कार्यः पराजयः ।
एवं कृते भवेत् कार्यं देवानामिति निश्चितम् ॥ [अधिकः पाठः]
3. क-ङ—मनस्वी जयवाञ्शूर कृतविद्यस्तपोधनः ।
बिभर्ति च महातेजा धनुर्वेदमशेषतः ॥
अतिक्रमेच्च माहात्म्याद्दिष्टमस्य स वीर्यवान् ।
अतिक्रमे च लोकानामभावो नियतो भवेत् ॥
न च विद्म ह्यवस्थानं कृष्णयोः क्रुद्धयोः क्वचित् ।
स्रष्टारौ जगतश्चैव सतश्च पुरुषर्षभौ ॥
नरनारायणावेतौ पुराणावृषिसत्तमौ ।
अनियाम्यौ नियन्तारौ जगतः पुरुषर्षभौ ॥
कामं तु सुकृताँल्लोकान् प्राप्नोत्वेष परन्तपः ।
कर्णो वैकर्तनश्शूरो विजयस्तु नरे ध्रुवः ॥ [अधिकः पाठः]
4. अ—नास्तीदमर्धम्

सञ्जयः—

इति श्रुत्वेन्द्रवचनं सर्वभूतानि मारिष ।
[1]विस्मितान्यभवन् राजन् पूजयाञ्चक्रिरे तदा ॥ २४
नोचुस्तदा जयं तुल्यं तयोः पुरुषसिंहयोः ॥ २४॥
ससृजुश्च सुगन्धीनि नानारूपाणि हर्षिताः ।
पुष्पवर्षाणि विबुधा देवतूर्याणि चानदन् ॥ २५॥
दिदृक्षयाऽऽगतास्सर्वे द्वैरथं नरसिंहयोः ।
विस्मयोत्फुल्लनयना नान्या बुबुधिरे क्रियाः ॥ २६॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि एकाधिकशततमोऽध्यायः ॥ १०१ ॥
॥ ७३ ॥ कर्णपर्वणि एकाधिकशततमोऽध्यायः ॥ १०१ ॥
[अस्मिन्नध्याये २६॥ श्लोकाः]

---

1. क-ख—इदमर्धं नास्ति

॥ द्व्यधिकशततमोऽध्यायः ॥

शल्यकर्णयोः संलापः ॥ १ ॥ कृष्णार्जुनयोः संलापः ॥ २ ॥ अर्जुनेन कृष्णं प्रति स्वसामर्थ्यकथनम् ॥ ३ ॥

सञ्जयः—

रथौ तयोश्श्वेतहयैर् युक्तौ दिव्यौ महास्वनौ ।
समास्थिता लोकवीराश् शङ्खान् दध्मुः पृथक् पृथक् ॥ १
वासुदेवार्जुनौ वीरौ कर्णशल्यौ च भारत ॥ १॥
तद्भीरुसंत्रासकरं युद्धं समभवत् तदा ।
अन्योन्यस्पर्धिनोर्घोरं शक्रशम्बरयोरिव ॥ २॥
तयोर्ध्वजौ हि विमलौ शुशुभाते शुभाकृती ।
[1]राहुकेतू यथाऽऽकाश उदितौ जगतः क्षये ॥ ३॥
पृथग्ज्वलन्तौ सञ्जेतां क्रुद्धौ युद्धे परस्परम् ॥ ४
कर्णस्याशीविषनिभा रत्नसारमयी दृढा ।
पुरन्दरध्वजप्रख्या हस्तिकक्ष्या व्यराजत ॥ ५
कपिश्रेष्ठस्तु पार्थस्य व्यादितास्यो भयावहः ।
भीषयन्निव दंष्ट्राभिर् दुर्निरीक्ष्यो रविर्यथा ॥ ६
क्रुद्धोऽभिलषितं गत्वा ध्वजो गाण्डीवधन्वनः ।

1. क-ख-ब—नासीदमर्षम्

कर्णध्वजमुपातिष्ठत् स्वस्थानाद्वेगवान् कपिः ॥ ७

उत्पत्य च महावेगः कक्ष्यामभ्यहनत् तदा ।
नखैश्च दशनैश्चैव गरुडः पन्नगं यथा ॥ ८

सा किङ्किणीकाभरणा कालपाशोपमाऽपरा ।
अभ्यद्रवत संरब्धा नागकक्ष्याऽपि तं कपिम् ॥ ९

तयोर्घोरतरे युद्धे द्वैरथे द्यूत आहिते ।
प्रकुर्वाते ध्वजौ युद्धं प्रत्यहेषन् हयान् हयाः ॥ १०

अविध्यत् पुण्डरीकाक्षं शल्यो नयनसायकैः ।
तं चापि पुण्डरीकाक्षस् तथैव समुदैक्षत ॥ ११

तत्राजयद्वासुदेवश् शल्यं नयनसायकैः ।
कर्णं चाप्यजयद्दृष्ट्वा कुन्तीपुत्रो धनञ्जयः ॥ १२

अथाब्रवीत् सूतपुत्रश् शल्यमाभाष्य सस्मितम् ॥ १२॥

कर्णः—

यदि पार्थो रणे हन्याद् अद्य मामिह कर्हिचित् ।
किमुत्तरं तदा ते स्यात् सत्यमेतद्ब्रवीहि मे ॥ १३॥

शल्यः—

यदि कर्ण रणे हन्याद् अद्य त्वां श्वेतवाहनः ।
उभावेकरथेनाहं हन्यां माधवपाण्डवौ ॥ १४॥

सञ्जयः—

एवमेव तु गोविन्दम् अर्जुनोऽप्यभ्यभाषत ।

तं प्रहस्याब्रवीत् कृष्णः पार्थं परमिदं वचः ॥ १५॥

श्रीभगवान्—

पतेद्दिवाकरस्थनाच् छीर्येद्भूमिरनेकधा ।
शैत्यमग्निरियाद्धि त्वां कर्णो हन्याद् धनञ्जय ॥ १६॥

यदि त्वेतत् कथञ्चित् स्याल्लोके पर्यसनं भवेत् ।
हन्यां कर्णं तथा शल्यं बाहुभ्यामेव संयुगे ॥ १७॥

सञ्जयः—

इति कृष्णवचश्श्रुत्वा प्रहसन् कपिकेतनः ।
अर्जुनः प्रत्युवाचेदं कृष्णमक्लिष्टकारिणम् ॥ १८॥

अर्जुनः—

ममैव तु न पर्याप्तौ कर्णशल्यौ जनार्दन ॥ १९
सपताकध्वजं कर्णं सशल्यरथवाजिनम् ।
सच्छत्रकवचं चैव सशक्तिशरकार्मुकम् ॥ २०
तं पश्याद्य मया कृष्ण शरैः क्षिप्तं धरातले ॥ २०॥
अद्यैनं सरथं साश्वं सशक्ति[1]कवचायुधम् ।
सञ्चूर्णितमिवामर्दे वृक्षं पश्याद्य दन्तिना ॥ २१॥
अद्य राधेयभार्याणां वैधव्यं समुपस्थितम् ।
ध्रुवं स्वप्नेष्वनिष्टानि ताभिर्दृष्टानि माधव ॥ २२॥
ध्रुवमद्यैव द्रष्टासि विधवाः कर्णशल्ययोः ॥ २३

1. क-ख-घ—वरकार्मुकम्

न हि मे शाम्यते मन्युर् यदनेन पुरा कृतम् ॥ २३॥

कृष्णां सभां गतां दृष्ट्वा मूढेनादीर्घदर्शिना ।
[1]अस्मांस्तथाऽपहसता जल्पता च पुनः पुनः ॥ २४॥

अद्य द्रष्टासि गोविन्द कर्णमुन्मथितं मया ।
वारणेनेव मत्तेन पुष्पितं जगतीरुहम् ॥ २५॥

अद्य ता मधुरा वाचश् श्रोतासि मधुसूदन ।
दिष्ट्या जयसि गोविन्द इति कर्णे निपातिते ॥ २६॥

अद्याभिमन्युजननीम् [2]अनृणस्सांत्वयिष्यसि ।
कुन्तीं पितृष्वसारं च सम्प्रहृष्टो जनार्दन ॥ २७॥

अद्य बाष्पमुखीं कृष्णां समाश्वासय माधव ।
वाग्भिश्चामृतकल्पाभिर् धर्मराजं युधिष्ठिरम् ॥ २८॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि द्व्यधिकशततमोऽध्यायः ॥ १०२ ॥
॥ ७३ ॥ कर्णपर्वणि द्व्यधिकशततमोऽध्यायः ॥ १०२ ॥
[अस्मिन्नध्याये २८॥ श्लोकाः]

---

1. क-ख-घ-ङ—नास्तीदमर्धम्
2. ख-घ-ङ—अनृणां

॥ त्र्यधिकशततमोऽध्यायः ॥

कर्णार्जुनयोर्युद्धारम्भः ॥ १ ॥ द्रौणिना दुर्योधनाय हिताख्यानम् ॥ २ ॥ तेन तदनादृत्य रणाय सेनानियोजनम् ॥ ३ ॥

सञ्जयः—

तद्देवनागासुरसिद्धयक्ष-
गन्धर्वरक्षोप्सरसां च सङ्घैः ।
ब्रह्मर्षिराजर्षिसुपर्णजुष्टं
बभौ वियद्विस्मयनीयरूपम् ॥ १

रारस्यमानं निनदैर्मनोज्ञैर्
वादित्रगीतस्तुतिहासनृत्तैः ।
सर्वेऽन्तरिक्षं ददृशुर्मनुष्याः
खस्थाश्च तान् विस्मयनीयरूपान् ॥

ततः प्रहृष्टाः कुरुपाण्डुमुख्या
वादित्रपत्रायुधसिंहनादैः ।
संनादयन्तो वसुधां दिशश्च
स्वनेन सर्वे द्विषतो निजघ्नुः ॥ २

रथाश्वमातङ्गनरायुतं तदा
शरासिशक्त्यृष्टिनिपातदुस्सहम् ।

अभीरुजुष्टं हतदेहसङ्कुलम्
रणाजिरं लोहितरक्तमाबभौ ॥ ४

तथा प्रवृत्ते सुभृशं परन्तपौ
धनञ्जयश्चातिरथिश्च सायकैः ।
दिशश्च सर्वा निशितैरजिह्मगैः
परस्परं प्रावृणुतां च दंशितौ ॥ ५

ततस्त्वदीयाश्च परे च सायकैः
कृतेऽन्धकारे विविदुर्न किञ्चन ।
भयात्तु तावेव रथौ समाश्रयंस्
तमोनुदं स्वप्रसृता इवांशवः ॥ ६

ततोऽस्त्रमस्त्रेण परस्परं च तौ
विधूय वाताविव पूर्वपश्चिमौ ।
घनान्धकारे विगते तमोनुदौ
यथोदितौ तद्वदतीव रेजतुः ॥ ७

न चाभिसर्तव्यमिति प्रचोदिताः
परे त्वदीयाश्च तथाऽवतस्थिरे ।
महारथौ तौ परिवार्य सर्वतस्
सुरासुरा वासवशम्बराविव ॥ ८

मृदङ्गभेरीपणवानकस्वनैर्
निनादितौ वाहनशङ्खनिस्स्वनैः ।
तौ सिंहनादैर्बभतुर्नरोत्तमौ
[1]शशाङ्कसूर्याविव मेघसम्प्लवे ॥ ९

महाधनुर्मण्डलमध्यगोचरौ
सुवर्चसौ बाणसहस्रदीधिती ।
दिधक्षमाणौ सचराचरं जगद्
युगान्तसूर्याविव दुस्सहौ युधि ॥ १०

उभावजय्यावहितान्तकावुभा-
वुभौ जिघांसू कृतिनौ परस्परम् ।
महाहवे वीरतरौ समीयतुस्
सुरेन्द्रजम्भाविव कर्णपाण्डवौ ॥ ११

ततो महास्त्राणि महाधनुर्धरौ
विमुञ्चमानाविषुभिर्भयानकैः ।
रथान् द्विपांश्चापि तथा हयान् नरान्
परस्परं जघ्नतुरुत्तमेषुभिः ॥ १२

ततो विसस्रुः पुनरर्दिताश्शरैर्
नरोत्तमाभ्यां कुरुपाण्डवाश्रयाः ।

---

1. क-ङ—पतङ्गचन्द्राविव दुस्सहावुभौ

सनागपत्त्यश्वरथा दिशो द्रुतास्
तथा यथा सिंहभयाद्वनौकसः ॥ १३

ततस्तु दुर्योधनभोजसौबलाः
कृपो गुरोश्चापि सुतो महाहवे ।
महारथाः पञ्च धनञ्जयाच्युतौ
शरै [1]रशरीरान्तकरैरताडयन् ॥ १४

धनूंषि तेषामिषुधीन् हयान् द्विपान्
रथांश्च सूतांश्च धनञ्जयश्शरैः ।
समं प्रचिच्छेद पराभिनच्च तान्
शरोत्तमैर्द्वादशभिश्च सूतजम् ॥ १५

अथाभ्यधावंस्त्वरिताश्शतं रथाश्
शतं च नागा जयमाततायिनः ।
शकास्तुरङ्गैर्यवनाश्च सादिनस्
संहैव काम्भोजवरैर्जिघांसवः ॥ १६

वरायुधैः प्राणिशतं शरैस्सह
क्षुरैर्निकृत्तान्यपतञ् शिरांसि च ।
हयाश्च नागाश्च रथाश्च युध्यता
धनञ्जयेनारिगणाः [2]क्षता इति ॥ १७

---

1. क—शरीरातिदरै ग-ङ—शरीरार्ति
2. क-ख-घ-ङ—क्षितावित

ततोऽन्तरिक्षे सुरतूर्यनिस्स्वनास्
ससाधुवादा हृषितैस्समीरिताः ।
निपेतुरप्युत्तमपुष्पवृष्टयस्
सुरूपगन्धाः पवनेरिताश्शुभाः ॥ १८

तदद्भुतं देवमनुष्यसाक्षिकं
समीक्ष्य भूतानि विसिष्मिरे नृप ।
तवात्मजस्सूतसुतश्च तावुभौ
न विस्मयं जग्मतुरेकनिश्चयौ ॥ १९

अथाब्रवीद्द्रोणसुतस्तवात्मजं
करं करेण प्रतिपीड्य सान्त्वयन् ॥ १९॥

अश्वत्थामा—

प्रसीद दुर्योधन शाम्य पाण्डवैर्
अलं विरोधेन धिगस्तु विग्रहम् ॥ २०

हतो गुरुर्ब्रह्मसमो महास्त्रवित्
तथैव भीष्मप्रमुखा [1]महारथाः ।
अहं त्ववध्यो मम चैव मातुलः
प्रशाधि राज्यं सह पाण्डवैश्चिरम् ॥ २१

धनञ्जयस्थास्यति वारितो मया
जनार्दनो नैव विरोधमिच्छति ।

---

1. क-ख—नराधिपाः

युधिष्ठिरो भूतहिते रतस्सदा
वृकोदरस्तद्वशगस्तथा यमौ ॥ २२
त्वया च पार्थेन कृते च संविदे
प्रजास्सुखं प्राप्नुयुरिच्छया तव ।
व्रजन्तु शेषास्स्वपुराणि पार्थिवा
निवृत्तवैराश्च भवन्तु सैनिकाः ॥ २३
न चेद्वचश्श्रोष्यसि मे नराधिप
ध्रुवं हि तप्तासि हतोऽरिभिर्युधि ॥ २३॥
वृद्धं पितरमालोक्य गान्धारीं च यशस्विनीम् ।
कृपालुर्धर्मराजो हि याचितश्शममेष्यति ॥ २४॥
यथोचितं च वै राज्यम् अनुज्ञास्यति ते प्रभुः ।
विपश्चित् सुमतिर्धीरस् सर्वशास्त्रार्थतत्त्ववित् ॥ २५॥
वैरं नेष्यति धर्मात्मा स्वजने नास्त्यतिक्रमः ।
न विग्रहमतिः कृष्णस् स्वजने प्रतिनन्दति ॥ २६॥
भीमसेनार्जुनौ चोभौ माद्रीपुत्रौ च पाण्डवौ ।
वासुदेवमते चैव पाण्डवस्य च धीमतः ॥ २७॥
स्थास्यन्ति पुरुषव्याघ्रास् तयोर्वचनगौरवात् ॥ २८
रक्ष दुर्योधनात्मानम् आत्मा सर्वस्य भाजनम् ।
जीवने यत्नमातिष्ठ जीवन् भद्राणि पश्यति ॥ २९

राज्यं श्रीश्चैव भद्रं ते जीवमाने तु कल्पते ।
मृतस्य खलु कौरव्य नैव राज्यं कुतस्सुखम् ॥ ३०

लोकवृत्तमिदं वृत्तं प्रवृत्तं पश्य भारत ।
शाम्य त्वं पाण्डवैस्सार्धं शेषं कुरु कुलस्य च ॥ ३१

मा भूत् स कालः कौरव्य यदाऽहमहितं वचः ।
ब्रूयां कामं महाबाहो माऽवमंस्था वचो मम ॥ ३२

धर्मिष्ठमिदमत्यर्थं राज्ञश्चैव कुलस्य च ।
एतद्धि परमं श्रेयः कुरुवंशस्य वृद्धये ॥ ३३

प्रजाहितं च गान्धारे कुलस्य च सुखावहम् ॥ ३३॥

पथ्यमायतिसंयुक्तं कर्णोऽप्यर्जुनमाहवे ।
न जेष्यति नरव्याघ्रम् इति मे निश्चिता मतिः ॥ ३४॥

रोचतां ते नरश्रेष्ठ ममैतद्वचनं शुभम् ।
अतोऽन्यथा हि राजेन्द्र विनाशस्सुमहान् भवेत् ॥ ३५॥

इदं च दृष्टं जगता सह त्वया
कृतं यदेकेन किरीटमालिना ।
यथा न कुर्याद्बलहा न चान्तको
न च प्रचेता भगवान् न यक्षराट् ॥ ३६॥

अतोऽपि भूयांश्च गुणैर्धनञ्जयो
न चातिभेत्स्यत्यखिलं वचो मम ।

तवानुयात्रां च सदा करिष्यति
प्रसीद राजेन्द्र शमं त्वमाप्नुहि ॥ ३७॥

ममाभिमानः परमस्सदा त्वयि
ब्रवीम्यतस्त्वां परमाच्च सौहृदात् ।
निवारयिष्यामि च कर्णमाहवा-
न्महान् हि मेऽस्ति प्रणयोऽत्र सूतजे ॥ ३८॥

वदन्ति मैत्रीं सहजां विचक्षणास्
तथैव सान्ना च धनेन चोर्जिताम् ।
प्रतापतश्चोपनतां चतुर्विधां
तदस्ति सर्वं त्वयि पाण्डवेषु च ॥ ३९॥

निसर्गतस्ते तव वीर बान्धवाः
पुनश्च सान्ना हितमाप्नुयुः प्रभो ।
त्वयि प्रसन्ने यदि मित्रतामियुर्
हितं कृतं स्याज्जगतस्त्वयाऽतुलम् ॥ ४०॥

सञ्जयः—
इतीदमुक्तस्सुहृदा वचो हितं
विचिन्त्य निश्श्वस्य च दुर्मना ब्रवीत् ॥ ४१

दुर्योधनः—
यथा भवानाह सखे तथैव त-
न्ममापि विज्ञापयतो वचश्शृणु ।

निहत्य दुश्शासनमुक्तवान् बहु
प्रहस्य शार्दूलवदेष दुर्मतिः ॥ ४२

वृकोदरस्तद्धृदये मम स्थिरं
न तत् परोक्षं भवतः कुतश्शमः ॥ ४२॥

न चापि कर्णं प्रसहेद्रणेऽर्जुनो
महागिरिं मेरुमिवोग्रमारुतः ।
न चाश्वसिष्यन्ति पृथात्मजा मयि
प्रसज्य वैरं बहुशो विषह्य च ॥ ४३॥

न चापि कर्ण गुरुपुत्र संयुगाद्
उपारमेत्यर्हसि वीर भाषितुम् ।
श्रमेण युक्तो महताऽद्य फल्गुनस्
तमेष कर्णः प्रसभं हनिष्यति ॥ ४४॥

वसुन्धरायाः परिवर्तनं भवेद्
व्रजेच्च शोषं मकरालयोऽर्णवः ।
प्लवेयुरप्यद्रिवरा महाम्बुधौ
न चार्जुनो जेष्यति कर्णमाहवे ॥ ४५॥

अपां पृथिव्या नभसो नभस्वतस्
सुतिग्मदीप्तेश्च हिरण्यरेतसः ।

अभाव एषामपि सर्वतो भवे-
न्न चार्जुनो जेष्यति कर्णमाहवे ॥ ४६॥

सञ्जयः—

तमेवमुक्त्वाऽप्यनुनीय चासकृत्
तवात्मजस्त्वाननुनीय सैनिकान् ॥ ४७

दुर्योधनः—

द्रुतं घ्नताभिद्रवताहितानिमान्
अदीनसत्त्वाः किमु जोषमास्यते ॥ ४७॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां कर्णपर्वणि त्र्यधिकशततमोऽध्यायः ॥ १०३ ॥
॥ ७३ ॥ कर्णपर्वणि त्र्यधिकशततमोऽध्यायः ॥ १०३ ॥
[अस्मिन्नध्याये ४७॥ श्लोकाः]

॥ चतुरधिकशततमोऽध्यायः ॥

रणे कर्णस्यार्जुनसाम्यमसहमानेन भीमेन सकोपं पार्थप्रोत्साहनम् ॥

सञ्जयः—

तौ शङ्खभेरीनिनदे समृद्धे
समीयतुश्श्वेतहयौ नराग्र्यौ ।
वैकर्तनस्सूतसुतोऽर्जुनश्च
दुर्मन्त्रिते ते ससुतस्य राजन् ॥ १

आशीविषावग्निमिवापधूमं
वैरं मुखाभ्यामभिनिश्श्वसन्तौ ।
यशस्विनौ जज्वलतुर्मृधे तदा
घृतावसिक्ताविव हव्यवाहौ ॥ २

यथा गजौ हैमवतौ प्रभिन्नौ
प्रगृह्य दन्ताविव वाशितार्थे ।
तथा समाजग्मतुरुग्रवीर्यौ
धनञ्जयश्चातिरथिश्च वीरौ ॥ ३

वलाहकेनेव यथा वलाहको
यदृच्छया वै गिरिणा गिरिर्यथा ।
तथा धनुर्ज्यातलनेमिनिस्स्वनौ
समीयतुस्ताविषुवर्षवर्षिणौ ॥ ४

[1]शरास्त्रशक्त्यृष्टिगदासिसर्पौ
रोषानिलोद्धूतशरोर्मिमालिनौ ।
यथाऽचलौ द्वौ चलतस्तथा तौ
[2]यथाऽर्णवौ तौ ययतुर्युगान्ते ॥ ५

प्रभिन्नशृङ्गद्रुमवीरुदोषधी
प्रवृद्धनानाविधनिर्झरौकसौ ।

---

1. अ—अयं पादो नास्ति
2. क-घ—नरार्णवौ वायवतुस्तथाऽऽजौ [पादोऽयं – अधिकः पाठः]

यथाऽचलौ वा चलितौ महाबलैस्
तथा महास्त्रैरितरेतरं प्रतः ॥ ६

स सन्निपातो रथयोर्महानभूत्
सुरेन्द्रवैरोचनयोरिवानयोः ।
शरैर्वितुन्नाश्वनियन्तृदेहयोस्
सुदुस्सहोऽस्त्रैः परिभिन्नदेहयोः ॥ ७

प्रभूतपद्मोत्पलमत्स्यकच्छपौ
महाह्रदौ पक्षिगणानुनादितौ ।
सुसन्निकृष्टावनिलोद्धतौ यथा
तथा रथौ तौ ध्वजिनौ समीयतुः ॥ ८

उभौ महेन्द्रस्य समानविक्रमा-
वुभौ महेन्द्रप्रतिमौ महारथौ ।
महेन्द्रवज्रप्रतिमैर्महाशरैर्
महेन्द्रवृत्राविव सम्प्रजघ्नतुः ॥ ९

सनागपत्त्यश्वरथे उभे बले
विचित्रवर्माभरणाम्बरायुधे ।
चकम्पतुश्चोन्नदतुश्च विस्मयाद्
धरा वियच्चार्जुनकर्णसङ्गमे ॥ १०

भुजास्फोटाङ्गुलित्रस्तसमुच्छ्रितास्
सिंहनादामुदितैर्दृष्टशुभिः ।
यदाऽर्जुनं मत्त इव द्विपो द्विपं
समभ्ययादातिरथिर्जिघांसया ॥ ११

ततः कुरूणामथ सोमकानां
शब्दो महान् प्रादुरभूत् समन्तात् ।
यदाऽर्जुनं सूतपुत्रोऽपराह्णे
महाहवे शैलमिवाम्बुदोऽछैत् ॥ १२

तदैव चासीद्रथयोस्समागमो
महारणे शोणितमांसकर्दमे ॥ १२॥

उदक्रोशन् सोमकास्तत्र पार्थं
त्वरस्व याह्यर्जुन युध्य कर्णम् ।
छिन्ध्यस्य मूर्धानमलं चिरेण
श्रद्धां च राज्याद्धृतराष्ट्रसूनोः ॥ १३॥

तथाऽस्मदीया बहवोऽत्र योधाः
कर्णं तथा याहि याहीत्यवोचन् ।
जह्यर्जुनं कर्ण ततस्सुदीनाः
पुनर्वनं यान्त्वचिरेण पार्थाः ॥ १४॥

कर्णोऽथ पूर्वं दशभिः पृषत्कैर्
गाण्डीवधन्वानमविध्यदाशु ।
जघान तं चापि ततः किरीटी
शरैस्तदाऽष्टादशभिस्सुमुक्तैः ॥ १५॥

पुनश्च कर्णस्त्वरितोऽथ पार्थं
रथेषुभिस्तं दशभिर्जघान ।
तं चापि पार्थो दशभिश्शिताग्रैः
कक्ष्यान्तरे तीक्ष्णमुखैरविध्यत् ॥ १६॥

कर्णस्ततो भारत साम्पराये
घोरेऽतिवेलं रणसंविमर्दी ।
जघान पार्थं नवभिश्शिताग्रैः
कक्ष्यान्तरे नागमिव प्रभिन्नम् ॥ १७॥

ततोऽपराभ्यां युधि सूतपुत्रो
द्वाभ्यां क्षुराभ्यां हरिमाशुकारी ।
समाजघान त्वरया महात्मा
यथा सुरेन्द्रं नमुचिः प्रसह्य ॥ १८॥

तं पाण्डवः पञ्चभिरायसाग्रैर्
आकर्णपूर्णैर्निजघान कर्णम् ।
ते शोणितं तस्य पपुस्तदानीं
कालस्य दूता इव पार्थबाणाः ॥ १९॥

कर्णोऽपि पार्थं सहवासुदेवं
समाचिनोद्भारत वत्सदन्तैः ।
परस्परं तौ विशिखैः प्रमुक्तैस्
ततक्षतुस्सूतपुत्रोऽर्जुनश्च ॥ २०॥
परस्परच्छिद्रदिदृक्षया च
सुभीममभ्याययतुः प्ररुष्टौ ॥ २१
ततोऽस्त्रमाग्नेयममित्रतापनं
मुमोच कर्णाय सुरेश्वरात्मजः ।
धनञ्जयस्संयुगमूर्धनि त्वर-
न्नथ प्रजज्वाल तदस्त्रमुत्तमम् ॥ २२
समीक्ष्य कर्णो ज्वलनास्त्रमुद्यतं
स वारुणं तत्प्रशमार्थमाहवे ।
समुत्सृजत् सूतसुतः प्रतापवान्
स तेन वह्निं शमयांबभूव ह ॥ २३
बलाहकास्त्रेण दिशस्तरस्वी
चकार सर्वास्तिमिरेण संवृताः ।
अपावहन्मेघगणांस्ततस्तान्
समीरणास्त्रेण समीरितेन सः ॥ २४
ततश्च सोऽस्त्रं दयितं देवराज्ञः
प्रादुश्चक्रे वज्रममित्रतापनः ।

गाण्डीवज्यां विमृशंश्चातिमन्युर्
धनञ्जयश्शत्रुसङ्घप्रमाथी ॥ २५

नाराचनालीकवराहकर्णा
गाण्डीवतः प्रादुरासन् सुतीक्ष्णाः ।
सहस्रशो वज्रसमानवेगास्
ते सर्वतः पर्यधावन्त घोराः ॥ २६

पार्थेषवः कर्णरथं विहङ्गा
अयोमुखाः पक्षिगणा दिनान्ते ।
निशानिकेतार्थमिवाशु वृक्षं
जग्राह तान् सूतपुत्रः पृषत्कैः ॥ २७

क्षिप्तांस्तथा पाण्डववाणसङ्घान्
अमृष्यमाणस्य धनञ्जयस्य ।
रणाजिरे त्वन्तकतुल्यकर्मा
वैकर्तनो रोषपरीतचेताः ॥ २८

[1]दृढार्द्यमानश्च समुद्रघोषः
प्रादुश्चक्रे भार्गवास्त्रं महात्मा ।
महेन्द्रशस्त्राभिमुखान् विमुक्तांश्
छित्त्वा कर्णः पाण्डवस्येषुसङ्घान् ॥ २९

1. अ—कोश एकस्मिन्नेव चतुर्दशार्धानि वर्तन्ते

तस्यास्त्रमस्त्रेण निहत्य सोऽथ
जघान सङ्ख्ये रथनागपत्तीन् ।
अमृष्यमाणश्च महेन्द्रकर्मा
महारणे भार्गवास्त्रप्रतापात् ॥ ३०

पाञ्चालानां प्रवरांश्चापि योधान्
क्रोधाविष्टस्सूतपुत्रस्तरस्वी ।
अभ्यर्दयद्बाणगणैः प्रसह्य
विद्ध्वा हयान् सङ्क्ते सूतपुत्रः ॥ ३१

ते भिन्नदेहा व्यसवो निपेतुः
कर्णेषुभिर्भूमितले स्वनन्तः ।
क्रुद्धेन सिंहेन यथेभयूथा
महागजा भीमबलेन तद्वत् ॥ ३२

पाञ्चालानां प्रवरान् सन्निहत्य
प्रसह्य योधान् शतशो नृवीरः ।
ततस्स राजन् विरराज कर्णो
यथाऽम्बरे भास्कर उग्ररश्मिः ॥ ३३

कर्णस्य मत्वा तु जयं त्वदीया
मुदा युतास्सिंहनादांश्च चक्रुः ।
सर्वे ह्यमन्यन्त भृशाहतौ च
कर्णेन कृष्णाविति कौरवेन्द्र ॥ ३४

तत् तादृशं प्रेक्ष्य च कर्म चाजौ
कर्णस्य वीर्यं च परैरसह्यम् ।
कृष्णं च कर्णेन धनञ्जयं च
तदाऽऽजिमध्ये निहतं तदस्त्रम् ॥ ३५

[1]ज्योतिष्प्रभां यद्वदुपागतस्सन्
दिवाकरो नाशयते क्षणेन ।
पार्थस्य तान् बाणगणान् समग्रान्
व्यनाशयद्युध्यत एव कर्णः ॥ ३६

रोषात् प्रदीप्तस्सुमहाविमर्दे
भीमस्ततोऽक्रुध्यददीनसत्त्वः ।

---

1. अ—ततस्त्वमर्षी क्रोधसन्दीप्तनेत्रो
वातात्मजः पाणिना पाणिमृच्छन् ।
भीमोऽब्रवीदर्जुनं सत्यसन्धम्
अमर्षितो निश्वसन् जातमन्युः ॥
भीमः—
कथं नु पापोऽयमपेतधर्मा
सूतात्मजस्समरे तु प्रसह्य ।
पाञ्चालानां योधमुख्याननेकान्
निजघ्निवांस्तव जिष्णोस्समक्षम् ॥
पूर्वं देवैरजितं कालकेयैस्
साक्षात् स्थाणोर्बाहुसंस्पर्शमेत्य ।
त्वया क्षिप्तानहनद्बाणसङ्घान्
आश्चर्यमेतत् प्रतिभाति मेऽद्य ॥
सञ्जयः— [अधिकः पाठः]

पाणिं स्वपाणौ स विनिष्पिष्य रोषाद्
अमर्षितो वाक्यमुवाच पार्थम् ॥ ३७

भीमः—

त्वां सूतपुत्रो नु कथं किरीटिन्
रथेषुभिर्हन्ति शिताग्रधारैः ।
धृत्या हि भूतानि ययाऽजयस्त्वं
प्रासं ददत् खाण्डवे पावकाय ॥ ३८

धृत्या तया सूतपुत्रं जहि त्वम्
अहं वैनं गदया पोथयिष्ये ।
समेत्य पार्थं सुनृशंसवादी
जीवन् नायं यास्यति कालपक्वः ॥ ३९

सञ्जयः—

अथाब्रवीच्चक्रधरोऽपि पार्थं
दृष्ट्वा रथेषून् प्रतिहन्यमानान् ॥ ३९॥

श्रीभगवान्—

अमूमुषत्पश्यत एव तेऽद्य
ह्यस्त्राणि कर्णोऽस्त्रगणैः किरीटिन् ॥ ४०

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां
कर्णपर्वणि चतुरधिकशततमोऽध्यायः ॥ १०४ ॥
॥ ७३ ॥ कर्णपर्वणि चतुरधिकशततमोऽध्यायः ॥ १०४ ॥
[अस्मिन्नध्याये ४० श्लोकाः]

॥ पञ्चाधिकशततमोऽध्यायः ॥

कर्णे युधि वर्धमाने कृष्णेनार्जुनप्रोत्साहनम् ॥ १ ॥ ततोऽर्जुनेन स्वसामर्थ्यप्रकाशनम् ॥ २ ॥

श्रीभगवान्—

स पार्थ किं मुह्यसि वेत्सि चैतान्
हृष्टान् समेतान् नदतः कुरूंस्त्वम् ।
कर्णं पुरस्कृत्य विदुर्हि सर्वे
तवास्त्रमस्त्रैर्विनिहन्यमानम् ॥ १

यया धृत्या तामसान् जघ्निवांस्त्वं
युगे युगे राजसांश्चातिघोरान् ।
दम्भोद्भवं चासुरमाहवे त्वं
दर्पोत्सिक्तं वीर्यवन्तं किरीटिन् ॥ २

तया धृत्या त्वं जहि कर्णमद्य
पार्थाहवे त्यक्तुमस्त्रं समर्थः ॥ २॥

अनेन वाऽऽशु क्षुरनेमिनाऽद्य
मया निसृष्टेन सुदर्शनेन ।
छिन्ध्यस्य मूर्धानमरेः प्रसह्य
वज्रेण शक्रो नमुचेरिवारेः ॥ ३॥

किरातरूपी भगवान् यया च
त्वया महात्मा परितोषितोऽभूत् ।
स तां पुनर्वीर धृतिं गृहीत्वा
सहानुबन्धं जहि सूतपुत्रम् ॥ ४॥

ततो महीं सागरमेखलां त्वं
सपत्तनग्रामवतीं समृद्धाम् ।
प्रयच्छ राज्ञे निहतारिसङ्घां
यशश्च पार्थातुलमाप्नुहि त्वम् ॥ ५॥

कर्णं पुरस्कृत्य नदन्ति सर्वे
तवास्त्रमुख्यैः प्रतिहत्य वीराः ।
कुरु प्रयत्नं भरतप्रवीर
द्रवन्त्यमी सृञ्जयास्सोमकाश्च ॥ ६॥

दृष्ट्वा च कर्णं समरे प्रहृष्टं
त्वां चापि दृष्ट्वा परिहीयमानम् ॥ ७

सञ्जयः—

स चोदितो भीमजनार्दनाभ्यां
स्मृत्वा तदाऽऽत्मानमवेत्य सर्वम् ।
इहात्मनश्चागमने विदित्वा
प्रयोजनं केशवमित्युवाच ॥ ८

अर्जुनः—

प्रादुष्करोम्येष महास्त्रमुग्रं
शिवाय लोकस्य वधाय सौतेः ।
तन्मेऽनुजानातु भवान् सुराश्च
ब्रह्मा शिवो ब्रह्मविदश्च सर्वे ॥ ९

सञ्जयः—

इति स्मोक्त्वा पाण्डवस्सव्यसाची
नमस्कृत्वा ब्रह्मणे सोऽमितात्मा ।
अनुत्तमं ब्राह्ममसह्यमस्त्रं
प्रादुश्चक्रे मनसा यद्विधेयम् ॥ १०

ततो दिशश्च प्रदिशश्च सर्वास्
समावृणोत् सायकैर्भूरितेजाः ।
गाण्डीवमुक्तैर्भुजगैरिवोग्रैर्
दिवाकरांशुप्रतिमैर्ज्वलद्भिः ॥ ११

सृष्टास्तु बाणा भरतर्षभेण
शतं शतं हेममुखास्सुतीक्ष्णाः ।
प्राच्छादयन् कर्णरथं क्षणेन
युगान्तकालार्ककरप्रकाशाः ॥ १२

[1]ततश्च शूलासिपरश्वधाश्च
चक्राणि नाराचवराणि चैव ।

1. क-ख-ब-ङ—अष्टार्धानि न सन्ति

निश्चक्रमुर्घोरतराश्च योधास्
ततो न्यहन्यन्त समन्ततोऽपि ॥ १३

छिन्नं शरैः कस्य चिदाजिमध्ये
पपात योधस्य शिरोऽन्यकाये ।
भयेन सोऽप्याशु पपात भूमा-
वन्यः प्रनष्टः पतितं विलोक्य ॥ १४

अन्यस्य सासिर्निपपात कृत्तो
योधस्य बाहुः करिहस्ततुल्यः ।
अन्यस्य सव्यस्सह चर्मणा च
क्षुरप्रकृत्तः पतितो धरण्याम् ॥ १५

एवं समस्तानपि योधमुख्यान्
विध्वंसयामास किरीटमाली ।
शरैश्शरीरान्तकरैस्सुघोरैर्
दौर्योधनं सैन्यमशेषमेव ॥ १६

वैकर्तनेनाशु तदाऽऽजिमध्ये
सहस्रशो बाणगणा विसृष्टाः ।
ते चाक्षयाः पाण्डवमभ्युपेयुः
पर्जन्यसृष्टा इव वारिधाराः ॥ १७

ततस्स कृष्णं च किरीटिनं च
वृकोदरं चाप्रतिमप्रभावः ।
त्रिभिस्त्रिभिर्भीमबलो निहत्य
ननाद घोरं महता स्वनेन ॥ १८

ततस्स बाणाभिहतं किरीटी
भीमं तदा प्रेक्ष्य जनार्दनं च ।
अमृष्यमाणः पुनरेव पार्थश्
शरान् दशाष्टौ सममुद्वहर्ह ॥ १९

स केतुमेकेन शरेण विद्ध्वा
शल्यं चतुर्भिस्त्रिभिरेव कर्णम् ।
ततस्सुमुक्तैर्दशभिर्जघान
सभापतिं काञ्चनवर्मनद्धम् ॥ २०

स राजपुत्रो विशिरा विबाहुर्
विवाजिसूतो विधनुर्विकेतुः ।
हतो रथाग्र्यादपतत् प्ररुग्णः
परश्वधैस्साल इवावकृत्तः ॥ २१

पुनश्च कर्णं त्रिभिरष्टभिश्च
द्वाभ्यां चतुर्भिर्दशभिश्च विद्ध्वा ।

चतुश्शतं द्विरदानां निपात्य
रथाञ् जघानाष्ट रणे किरीटी ॥ २२

सहस्रमश्वांश्च पुनश्च सादीन्
अष्टौ सहस्राणि च पत्तिवीरान् ॥ २२॥

दृष्ट्वा तु मुख्यावतिविध्यमानौ
वरेषुभिश्शूरवरावरिघ्नौ ।
कर्णं च पार्थं च नियम्य वाहान्
सर्वे महिष्ठाश्च ततोऽवतस्थुः ॥ २३॥

[1]कर्णं ससूतं सरथाश्वकेतुम्
अदृश्यमम्भोगतिभिः प्रचक्रे ॥ २४

अथाक्रोशन् कुरवो वध्यमाना
धनञ्जयेनातिरथिं समेताः ॥ २४॥

कुरवः—

मुञ्चाभिविध्यार्जुनमाशु कर्ण
बाणैः परान् हन्ति कुरून् समेतान् ॥ २५

सञ्जयः—

सञ्चोदितस्सर्वयत्नेन कर्णो
मुमोच बाणान् सुबहूनभीक्ष्णम् ।

1. अ—कोश एव सप्तदशार्धानि वर्तन्ते नाम्यत्र

ते पाण्डुपाञ्चालगणान् निजघ्नुर्
मर्मच्छिदश्शोणितपङ्कदिग्धाः ॥ २६

तावुत्तमौ सर्वधनुर्धराणां
महाबलौ सर्वसपत्नसाहौ ।
निजघ्नतुश्चाहितसैन्यमुग्रम्
अन्योन्यमप्यस्त्रविदौ महास्त्रैः ॥ २७

अथोपयातस्त्वरितो दिदृक्षुर्
मन्त्रौषधीभिर्विरुजो विशल्यः ।
वृतस्सुहृद्भिर्भिषजां वरिष्ठैर्
युधिष्ठिरस्तत्र सुवर्णवर्मा ॥ २८

अथोपयातं युधि धर्मराजं
दृष्ट्वा मुदा सर्वभूतान्यनन्दन् ।
ग्रहाद्विमुक्तं विमलं समग्रं
चन्द्रं यथैवाभ्युदितं तथैव ॥ २९

स कार्मुकज्यातलसंनिपातस्
सुमुक्तबाणस्तुमुलो बभूव ।

---

1. अ—दृष्ट्वा तु मुख्यावतियुध्यमानौ
दिदृक्षवश्शूरवरावरिष्टौ ॥ [अधिकः पाठः]

व्रतोस्ततोऽन्योन्यमिषुप्रवेगैर्
धनञ्जयस्यातिरथेश्च तत्र ॥ ३०

षष्ट्या विभेदाशु च वासुदेवम्
अनन्तरं फल्गुनमष्टभिश्च ।
पूषात्मजो मर्मसु निर्बिभेद
मरुत्सुतं चाष्टशतं शिताग्रैः ॥ ३१

तैरस्त्रमस्त्रैर्विनिहत्य सर्वं
जघान तेषां रथवाजिसङ्घान् ।
तथा तु सैन्यप्रवरांश्च राज-
न्नभ्यर्दयन्मार्गणैस्सूतपुत्रः ॥ ३२

---

1. अ—ते भिन्नदेहा व्यसवो निपेतुः
कर्णेषुभिर्भूमितले स्तनन्तः ।
पुनश्च पाञ्चालवरास्तथाऽन्ये
तदन्तरे कर्णधनञ्जयाभ्याम् ॥
प्रस्कन्दिनो बलिनश्चाथ मुक्तैः
कर्णेन बाणैर्निहताः प्रसह्य ।
जयं समत्वा विपुलास्त्वदीयास्
तदा विनिघ्नन् सिंहनादांश्च नेदुः ॥
सर्वे ह्यमन्यन्त वशीकृतौ तौ
कर्णेन कृष्णाविति ते विमर्दे । [अधिकः पाठः]

प्रच्छादयामास ततः पृषत्कैस्
सघोषमाच्छिद्य च गाण्डिवज्याम् ॥ ३२॥

अस्मिन् क्षणे फल्गुनं सूतपुत्रस्
समाचिनोत् क्षुद्रकाणां शतेन ।
निर्मुक्तसर्पप्रतिमैस्सुतीक्ष्णैस्
तैलप्रधौतैः खगपत्रवाजैः ॥ ३३॥

षष्ट्या विभेदाशु च वासुदेवं
तदन्तरे प्रत्वरन् सौमकांश्च ॥ ३४

ततो नवज्यां सुदृढां किरीटी
स्वबाहुविक्षेपसहां प्रगृह्य ।
समादधे गाण्डिवे क्षिप्रकारी
निमेषमात्रेण महाधनुष्मान् ॥ ३५

ज्याच्छेदनं ज्याविधानं च तस्य
नैवाबुध्यत् सूतपुत्रो लघुत्वात् ।
पार्थस्य सङ्गच्छे द्विषतां निहन्तुस्
तदद्भुतं तत्र बभूव राजन् ॥ ३६

पार्थोऽपि तां ज्यामवधाय तूर्णं
शरासनज्यामातिरथैर्विमथ्य ।

सुसंरब्धः कर्णशरैः क्षताङ्गो
रणे योधांस्तावकान् प्रत्यगृह्णात् ॥ ३७

[1]ज्यां चानुमृज्याभ्यहनत्तलत्रे
बाणान्धकारं सहसा चकार ।
कर्णं च शल्यं च कुरूंश्च सर्वान्
बाणैरविध्यत् प्रसभं किरीटी ॥ ३८

नैवापतत् पक्षिगणोऽन्तरिक्षे
पार्थेन चास्त्रेण कृतेऽन्धकारे ।
शल्यं तु पार्थो दशभिर्निमेषाद्
भृशं तनुत्रे प्रहसन्नविध्यत् ॥ ३९

ततः कर्णं द्वादशभिः पृषत्कैर्
विद्ध्वा पुनस्सप्तभिरप्यविध्यत् ॥ ३९॥

स पार्थबाणासनवेगनुन्नैर्
दृढाहतः पत्रिभिरुग्रवेगैः ।
विभिन्नगात्रः क्षतजोक्षिताङ्गः
कर्णो बभौ रुद्र इवान्तकाले ॥ ४०॥

ततस्त्रिभिस्तं त्रिदशाधिपोपमं
शरैर्विभेदातिरथिर्धनञ्जयम् ।

---

1. क-ख—इदमर्धद्वयं नास्ति

शरांश्च पञ्च ज्वलितानिवोरगान्
प्रवेशयामास जिघांसुरच्युते ॥ ४१॥
सुवर्णचित्रं पुरुषोत्तमस्य
वर्माथ भित्त्वाऽभ्यपतन् सुपुङ्खाः ।
वेगेन गां ते विविशुश्च राजन्
स्नात्वा च कर्णाभिमुखाः प्रतीयुः ॥ ४२॥
तान् पञ्च भल्लैर्दशभिस्सुमुक्तैस्
त्रिधा त्रिधैकैकमथोच्चकर्त ।
धनञ्जयस्ते न्यपतन् पृथिव्यां
यथाऽहयस्तार्क्ष्यमुखेन कृत्ताः ॥ ४३॥
ततः प्रजज्वाल किरीटमाली
क्रोधेन कक्षं प्रदहन्निवाग्निः ॥ ४४
स कर्णमाकर्णविकृष्टसृष्टैश्
शरैश्शरीरान्तकरैर्ज्वलद्भिः ।
मर्मस्वविध्यत् स चचाल दुःखाद्
धैर्यात्तु तस्थावतिमात्रधैर्यः ॥ ४५
प्रादुश्चकाराथ शरान् महात्मा
देहं विचिन्वन्निव सूतजस्य ।
शरास्तु ते काञ्चनचित्रपुङ्खास्
सम्पेतुरुर्व्यां शतशो महान्तः ॥ ४६

ततश्शरौघैः प्रदिशो दिशश्च
रविप्रभः कर्णरथश्च राजन् ।
अदृश्य आसीत् कुपिते धनञ्जये
तुषारनीहारवृतो गिरिर्यथा ॥ ४७

सचक्ररक्षा अपि पृष्ठगोपाः
कर्णस्य ये चापि पुरस्सराश्च ।
भीता द्रवन्ति स्म निहन्यमाना
महेषुभिः पार्थकरप्रणुन्नैः ॥ ४८

ततोऽर्जुनो वै भरतप्रवीरो
महानुभावस्समरे निहन्ता ।
सुयोधनेनानुमतान् विनिघ्नन्
समुच्छ्रितान् सरथान् सारभूतान् ॥ ४९

गाण्डीवधन्वा द्विगुणं सहस्रं
कुरुप्रवीरानृषभः कुरूणाम् ।
क्षणेन सर्वान् सरथान् ससूतान्
निनाय राजन् क्षयमेकवीरः ॥ ५०

अथो पलायन्त विहाय कर्णं
तवात्मजा ये कुरवश्च शिष्टाः ।
हतानवाकीर्य शरक्षतांश्च
विलप्यमानांस्तनयान् पितॄंश्च ॥ ५१

सर्वे प्रणेशुः कुरवो विभिन्नाः
पार्थेषुभिस्सम्परितप्यमानाः ।
सुयोधनेनाथ पुनर्वरिष्ठाः
प्रचोदिताः कर्णरथानुयाने ॥ ५२

दुर्योधनः—
भोः क्षत्रियाश्शूरतमास्तु सर्वे
क्षात्रे च धर्मे निरतास्थ यूयम् ।
न युक्तरूपं भवतां समीपात्
पलायनं कर्णमिह प्रहाय ॥ ५३

सञ्जयः—
तवात्मजेनापि तथोच्यमानाः
पार्थेषुभिस्सम्परितप्यमानाः ।
नैवावतिष्ठन्त भयाद्विवर्णाः
क्षणेन नष्टाः प्रदिशो दिशश्च ॥ ५४
स सर्वतः प्रेक्ष्य दिशोऽपि शून्या
भयावदीर्णः कुरुभिर्विहीनः ।
न विव्यधे भारत तत्र कर्णः
प्रतीपमेवार्जुनमभ्यधावत् ॥ ५५

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां कर्णपर्वणि पञ्चाधिकशततमोऽध्यायः ॥ १०५ ॥
॥ ७३ ॥ कर्णपर्वणि पञ्चाधिकशततमोऽध्यायः ॥ १०५ ॥
[अस्मिन्नध्याये ५५ श्लोकाः]

॥ षडधिकशततमोऽध्यायः ॥

रणे हीयमानेन कर्णेनार्जुनस्य शिरो लक्षीकृत्य नागास्त्रप्रयोगः ॥ १ ॥ कृष्णेन पार्थरथे पादनिपीडनेन धरण्यां किंचिन्निमज्जिते तदस्त्रेण शिरोवर्जं पार्थकिरीटमात्रापहारः ॥ २ ॥ कर्णस्य रथचक्रे विप्रशापात् धरण्यां निमग्ने तदुद्धिधीर्षया तेन पार्थं प्रति मुहूर्तमयुद्धप्रार्थनम् ॥ ३ ॥

सञ्जयः—

ततोऽपयाताश्शरपातमात्रम्
अवस्थिता वै कुरवो नरेन्द्र ।
विद्युत्प्रकाशं ददृशुस्समन्ताद्
धनञ्जयास्त्रं समुदीर्यमाणम् ॥ १

ततोऽप्रसत् सूतपुत्रोऽर्जुनस्य
वियद्गतं घोरतरश्शरैस्तत् ।
क्रुद्धेन पार्थेन शरं विसृष्टं
वधाय कर्णस्य महाविमर्दे ॥ २

रामादुपात्तेन महामहिम्ना
आथर्वणेनारिविनाशनेन ।
तदर्जुनास्त्रं व्यधमद्दहन्तं
पार्थं च बाणैर्निशितैरविध्यत् ॥ ३

ततो विमर्दस्सुमहान् बभूव
धनञ्जयस्यातिरथेश्च राजन् ।
अन्योन्यमाघातयतोः पृषत्कैर्
विषाणघातैर्द्विपयोरिवाजौ ॥ ४

ततोऽस्त्रसङ्घातसमावृतं तदा
बभूव राजंस्तुमुलं रणाजिरम् ।
यत् कर्णपार्थौ शरवृष्टिसङ्घैर्
निरन्तरं चक्रतुरम्बरं तदा ॥ ५

ततो महद् बाणमयं महाहवे
जालं हि सर्वे ददृशुर्नरेन्द्राः ।
नान्यच्च भूतं ददृशे पतद् वै
बाणान्धकारे तुमुले तु तस्मिन् ॥ ६

ततस्तु तौ वै पुरुषप्रवीरौ
राजन् वरौ सर्वधनुर्धराणाम् ।
[1]त्यक्त्वाऽऽत्मदेहौ समरेऽतिघोरे
प्राप्तश्रमौ शत्रुदुरासदौ हि ॥ ७

दृष्ट्वा तु तौ संयति सम्प्रयुक्तौ
परस्परं छिद्रनिविष्टदृष्टी ।

---

1. अ—अर्धश्लोकं नास्ति

देवर्षिगन्धर्वगणास्सयक्षास्
सन्तुष्टुवुस्तौ पितरश्च हृष्टाः ॥* ८

[1]आदर्शयेतां युधि मार्गान् विचित्रान्
धनुर्वरास्त्रैर्विविधैः कृतास्त्रैः ॥ ८॥

तयोरेवं युध्यतोराजिमध्ये
सूतात्मजोऽभूदधिकः कदाचित् ।
पार्थः कदाचिदधिकः किरीटी
वीर्यास्त्रमायाबलपौरुषेण ॥ ९॥

दृष्ट्वा तयोस्तं युधि सम्प्रहारं
परस्परस्यान्तरमीक्षमाणयोः ।
घोरं तयोरविषह्यं रणेऽन्यैर्
योधास्सर्वे विस्मयमभ्यगच्छन् ॥ १०॥

कर्णोऽथ पार्थं न विशेषयद्यदा
भृशं च पार्थेन शराभितप्तः ।
ततो विमोक्तुं शरवर्यमुग्रं
मनो दधे ह्येकशयस्य तस्य ॥ ११॥

---

* ब—अष्टाध्यायसमाप्तिर्दृश्यते

1. क-ख-ब-ङ—सप्तार्धानि न सन्ति

ततो रिपुघ्नं समधत्त कर्णस्
सुसंशितं सर्पमुखं ज्वलन्तम् ।
रौद्रं शरं संयति सुप्रधौतं
पार्थार्थमित्येव चिराय गुप्तम् ॥ १२॥

सदाऽर्चितं चन्दनचूर्णदिग्धम्
सुवर्णनालीशयनं पुराणम् ।
आकर्णपूर्णं विचकर्ष कर्णो
विमोक्तुकामश्शरमुग्रवेगम् ॥ १३॥

प्रदीप्तमैरावतनागपुत्रं
शिरो जिहीर्षन् भरतर्षभस्य ॥ १४

ततः प्रजज्वाल नभो दिशश्च
उल्काश्च घोरास्सहसा निपेतुः ।
तस्मिंस्तु नागे धनुषि प्रयुक्ते
हाहाकृता देवगणास्सशक्राः ॥ १५

स सूतपुत्रस्तमपाङ्गदेशे
अवाङ्मुखं सन्धयति स्म रोषात् ।
न तं स्म जानाति महानुभावम्
अपाङ्गदेशाभिनिविष्टमाजौ ॥ १६

तमब्रवीन्मद्रराजो महात्मा
वैकर्तनं संहितबाणमाजौ ॥ १६॥

शल्यः—

ग्रीवा यतः कर्ण न संहितोऽयं
समीक्ष्य संधत्स्व शरं परघ्नम् ॥ १७

सञ्जयः—

तमब्रवीत् क्रोधविदीप्तनेत्रो
मद्राधिपं सूतपुत्रो मनस्वी ॥ १७॥

कर्णः—

न सन्धत्ते द्विश्शरं शल्य कर्णो
न मादृशा युद्धशठा भवन्ति ॥ १८

सञ्जयः—

तथोक्तवाक्यो विससर्ज तं शरं
प्रयत्नतो वर्षगणाभिपूजितम् ।
हतोऽसि हे फल्गुन इत्यविक्लवं
ब्रुवंस्तथोच्चैस्तरमूर्जितं वृषा ॥ १९

तमापतन्तं ज्वलितं निरीक्ष्य
वियद्गतं वृष्णिकुलप्रवीरः ।
रथस्य चक्रं सहसा निपीड्य
पद्माकुलं मज्जयति स्म वीरः ॥ २०

ततोऽन्तरिक्षे सुमहान् निनादस्
सम्पूजनार्थं मधुसूदनस्य ॥ २०॥

दिव्याश्च वातास्सहसा बभूवुर्
दिव्यानि पुष्पाणि च कृष्णमार्च्छन् ।
तस्मिंश्च किञ्चिद्धरणीनिमग्ने
रथे प्रयत्नान्मधुसूदनस्य ॥ २१॥

स दुष्टभावो वितथप्रतिज्ञः
किरीटमभ्याहरदर्जुनस्य ॥ २२

ततः किरीटं बहुरत्नचित्रितं
जहार नागोऽर्जुनमूर्धतो बलात् ।
गिरेस्सुजाताङ्कुरपुष्पितद्रुमं
महेन्द्रवज्रं शिखरं यथोत्तमम् ॥ २३

[1]ततः किरीटं तपनीयचित्रं
पार्थोत्तमाङ्गादहरत् तरस्वी ।
तद्धेमजालावनतं सुघोरं
सम्प्रज्वलत्तन्निपपात भूमौ ॥ २४

ततोऽर्जुनस्योत्तमगात्रभूषणं
सुवर्णमुक्तामणिवज्रभूषितम् ।

1. अ—अधैमिदं नास्ति

[1]धराविषत्स्वस्सलिलेषु विश्रुतं
बलान्नसर्पोत्तममन्युभिस्सदा ॥ २५

शरेण मूर्ध्नः प्रजहार सूतजो
दिवाकरेन्दुज्वलनप्रहत्विषम् ॥ २५॥

पुरन्दरार्थं तपसा प्रयत्नतस्
स्वयं कृतं यद्विधिना स्वयम्भुवा ।
महार्हरूपं द्विषतां भयङ्करं
[2]बिभर्तुमत्यर्थसुखं सुगन्धि च ॥ २६॥

निजघ्नते देवरिपून् सुरेश्वरस्
स्वयं ददौ यद्धि मुदाऽर्जुनाय ॥ २७

हरप्रचेतोहरिवित्तगोभृभिः
पिनाकपाशाशनिदण्डधारिभिः ।
सुरोत्तमैरप्यविषह्यमर्दितुं
प्रसह्य नागेन जहार तद्वृषा ॥ २८

तदुत्तमेषून्मथितं विषाग्निना
प्रदीप्तमर्चिष्मदतीव सुन्दरम् ।
पपात पार्थस्य किरीटमुत्तमं
दिवाकरोऽस्तादिव पर्वताज्ज्वलन् ॥ २९

1. अ—नास्त्यर्धद्वयमिदम् 2. ख-घ—अयं पादो नास्ति

महीवियद्वोसलिलानि वायुना
प्रसह्य रुग्णानि विचूर्णितानि वा ।
इतीव शब्दं भुवनेषु तं तथा
जना व्यवस्यन्ति दिशश्च विह्वलाः ॥ ३०

विना किरीटं शुशुभे स पार्थश्
श्यामो युवा शैल इवात्तशृङ्गः ॥ ३०॥

ततस्समुद्वृत्य सितेन वाससा
स्वमूर्धजानव्यथितस्तदाऽर्जुनः ।
बभौ सुसम्पूर्णमरीचिनेन्दूना
शिरोगतेनोदयपर्वतो यथा ॥ ३१॥

स चापि राधेयभुजप्रमुक्तो
हुताशनार्कप्रतिमद्युतिर्महान् ।
महोरगः कृतवैरोऽर्जुनेन
किरीटमाहृत्य समुत्पपात ॥ ३२॥

तं चापि दृष्ट्वा तपनीयचित्रं
किरीटहाऽऽविष्कृतमर्जुनस्य ।
इयेष गन्तुं पुनरेव तूर्णं
दृष्टश्च कर्णेन तदाऽब्रवीत् तम् ॥ ३३॥

नागः—

मुक्तस्त्वयाऽहं न समीक्ष्य कर्ण
शिरो हृतं यन्न मयाऽर्जुनस्य ।
समीक्ष्य मां मुञ्च रणे त्वमाशु
हन्तास्मि शत्रुं तव चात्मनश्च ॥ ३४॥

नागोऽस्मि श्वेतः कृतवैरो महात्मा-
र्जुनेन माता पुरा ह्युत्पतिता नभस्तः ।
मां त्रायती मृत्युभयाभिपन्नम्
अनेन नीता पितृराजवेश्म ॥ ३५॥

कर्णः—

न नाग कर्णोऽद्य रणे परस्य
बलं समास्थाय जयं बुभूषेत् ।
ममैव बाह्वोस्तु बलेन शक्तो
युध्यर्जुनानां शतमेव हन्तुम् ॥ ३६॥

व्रतं यदत्रापि न वेत्सि मे भवान्
न नाम कृष्णस्य समक्षमेव ।
एष ह्यहं त्वा युधि पाण्डवानां
हन्तास्मि युद्धे हि स्वविक्रमेण ॥ ३७॥

एतद्व्रतं जानमानः प्रयातः
किं वै कृता पार्थवधे प्रतिज्ञा ॥ ३८

सञ्जयः—

इत्येवमुक्तो युधि नागराजः
कर्णेन रोषादसहंस्तस्य वाक्यम् ।
स्वयं प्रायात् पार्थवधाय राजन्
कृत्वा स्वरूपं विजिघांसुरुग्रः ॥ ३९

इयेष गन्तुं पुनरेव तूर्णं
कर्णान्तिकं कृतवैरस्स नागः ।
तमुत्पतन्तं द्विपदां वरिष्ठो
दृष्ट्वा वचः पार्थमुवाच कृष्णः ॥ ४०

श्रीभगवान्—

महोरगं पाण्डव पश्य पश्य
प्रयोजितं त्वन्निधनार्थमुग्रम् ॥ ४०॥

सञ्जयः—

स एवमुक्तो मधुसूदनेन
गाण्डीवधन्वा हरिमुग्रधन्वा ।
उवाच को न्वेष ममाद्य नाथ
क्षयाय चागाद्गरुडस्य वक्त्रम् ॥ ४१॥

श्रीभगवान्—

योऽसौ त्वया खाण्डवे चित्रभानुं
सन्तर्पयानेन धनुर्धरेण ।

वियद्गतो जननीगुप्तदेहो
न घातितो निहता चास्य माता ॥ ४२॥

स एष तद्वैरमनुस्मरन् वै
त्वां प्रार्थयत्यात्मवधाय नागः ।
नभश्च्युतां प्रज्वलितामिवोल्कां
पश्यैनमायान्तममित्रसाहम् ॥ ४३॥

सञ्जयः—

ततस्स जिष्णुः परिवृत्य रोषाच्
चिच्छेद षड्भिर्निशितैस्सुधारैः ।
नागं बली तिर्यगिवापतन्तं
सञ्छिन्नगात्रो निपपात भूमौ ॥ ४४॥

तस्मिन् मुहूर्ते दशभिः पृषत्कैश्
शिलाशितैर्बर्हिणकङ्कपत्रैः ।
विव्याध कर्णः पुरुषप्रवीरं
धनञ्जयं तिर्यगवेक्षमाणम् ॥ ४५॥

ततोऽर्जुनो द्वादशभिस्सुतीक्ष्णैर्
वराहकर्णैर्निशितैः प्रविध्य ।
नाराचमाशीविषतुल्यवेगम्
आकर्णपूर्णायतमुत्ससर्ज ॥ ४६॥

स चित्रवर्मेषुवरो विदार्य
प्राणान् निरस्यन्निव साधु मुक्तः ।
कर्णस्य पीत्वा रुधिरं विवेश
वसुन्धरां शोणितदिग्धवाजः ॥ ४७॥

ततो वृषा बाणनिपातरोषितो
महोरगो दण्डविघट्टितो यथा ।
तदाऽऽशुकारी व्यसृजच्छरोत्तमान्
महाविषस्सर्प इवोत्तमं विषम् ॥ ४८॥

जनार्दनं द्वादशभिः पराभिन-
न्नवैर्नवत्या च शरैर्वृषाऽर्जुनम् ।
शरेण घोरेण पुनश्च पाण्डवं
विभिद्य कर्णो व्यनदज्जहास च ॥ ४९॥

ततोऽस्य वक्षश्शरवर्षेण पार्थो
बिभेद मर्माणि ततोऽस्य मर्मवित् ।
परश्शतैः पत्रिभिरिन्द्रविक्रमस्
तथा यथेन्द्रो बलमोजसा रणे ॥ ५०॥

ततश्शरान् वै नवतिं तदाऽर्जुनस्
ससर्ज कर्णोऽन्तकदण्डसन्निभान् ।

स तैर्भृशाविष्टतनुः प्रविव्यथे
तथा यथा वज्रविदारितोऽचलः ॥ ५१॥

मणिप्रवेकोज्ज्वलवज्रहाटकैर्
अलङ्कृतं चास्य वराङ्गभूषणम् ।
प्ररुग्णमुर्व्यां निपपात पत्रिभिर्
धनञ्जयेनोत्तमकुण्डलेऽपि च ॥ ५२॥

महाधनं शिल्पिवरैः प्रयत्नतः
कृतं यदस्योत्तमवर्म भास्वरम् ।
सुदीर्घकालेन तदस्य पाण्डवः
क्षणेन बाणैर्बहुधा व्यशातयत् ॥ ५३॥

तस्येषुभिः खण्डितकुण्डलान्तः
परिक्षतश्चाभ्यधिकं तदानीम् ।
स लोहिताङ्गश्रवणश्चकाशे
सलोहिताङ्गश्रवणो यथा दिवि ॥ ५४॥

स तं विवर्माणमथोत्तमेषुभिश्
शितैश्चतुर्भिः कुपितः पराभिनत् ।
स विव्यथेऽत्यर्थमरातिहा तथा
यथाऽऽतुरः पित्तकफानिल[1]व्रणैः ॥ ५५॥

1. ङ—ज्वरैः

महाधनुर्मण्डलनिस्सृतैश्शितैः
क्रियाप्रयत्नप्रहितैर्बलेन च ।
ततस्स कर्णं बहुभिश्शरोत्तमैर्
बिभेद मर्मस्वपि चार्जुनस्त्वरन् ॥ ५६॥

दृढाहतः पत्त्रिभिरुग्रवेगैः
पार्थेन कर्णो विविधैश्शिताग्रैः ।
बभौ गिरिर्गैरिकधातुरक्तः
क्षरन् प्रपातैरिव रक्तमम्भः ॥ ५७॥

[1]ततोऽर्जुनः कर्णमवक्रगैश्शरैस्
सुवर्णपुङ्खैस्सुदृढैरयस्मयैः ।
यमाग्निदण्डप्रतिमैस्तनान्तरे
पराभिनत् क्रौञ्चमिवाद्रिमग्रिजः ॥ ५८॥

ततश्शरावापमपास्य सूतजस्
त्यक्त्वा धनुश्शक्रशरासनोपमम् ।
ततो रथस्थस्स मुमोह च स्खलन्
प्रशीर्णमुष्टिस्सुभृशाहतस्तदा ॥ ५९॥

न चार्जुनस्तं व्यसने तदैच्छ-
न्निहन्तुमार्यः पुरुषव्रते स्थितः ।

1. क-ख-घ—द्वादशार्धानि न सन्ति

ततस्तमिन्द्रावरजस्सुसम्भ्रमाद्
उवाच किं पाण्डव हे प्रमाद्यसे ॥ ६०॥

नैवाहितानां सततं विपश्चितः
क्षणं प्रतीक्षन्त्यपि दुर्बलीयसाम् ।
विशेषतोऽरीन् व्यसनेषु पण्डितो
निहत्य धर्मं च यशश्च विन्दति ॥ ६१॥

तदेकवीरं तव चाहितं सदा
त्वरस्व कर्णं सहसा विमर्दितुम् ।
पुरा समर्थस्समुपैति सूतजो
जहि त्वमेनं नमुचिं यथा हरिः ॥ ६२॥

ततस्तथैवेत्यभिपूज्य सत्वरं
जनार्दनं कर्णमविध्यदर्जुनः ।
शरोत्तमैस्सर्वकुरूत्तमस्त्वरंस्
तथा यथा शम्बरहा पुरा बलिम् ॥ ६३॥

साश्वं तु कर्णं सरथं किरीटी
समाचिनोद्भारत वत्सदन्तैः ।
प्रच्छादयामास दिशश्च सर्वा
बाणैरिशताग्रैस्तपनीयपुङ्खैः ॥ ६४॥

स वत्सदन्तैः पृथुपीनवक्षास्
समाचितस्त्वातिरथिर्विभाति ।
सुपुष्पिताशोकपलाशशाल्मलिर्
यथाऽचलश्चम्पककाननायुतः ॥ ६५॥

शरैश्शरीरं बहुधा समाचितं
विभाति कर्णस्य विशां पते रणे ।
महीरुहैराचितसानुगह्वरो
यथा नगेन्द्रश्शुभकर्णिकारः ॥ ६६॥

स बाणसङ्घान् धनुषा व्यवासृजन्
विभाति कर्णश्शररश्मिजालवान् ।
स लोहितो रक्तगभस्तिमण्डलो
दिवाकरोऽस्ताभिमुखो यथा तथा ॥ ६७॥

बहूञ् छितानातिरथिप्रमुक्तान्
बाणान् महाहीनिव दीप्यमानान् ।
विध्वंसयामास स वेगमुक्तैश्
शरैस्समावृत्य दिशस्समग्राः ॥ ६८॥

कालोऽप्यदृश्यो नृप विप्रशापा-
न्निदर्शयन् कर्णवधं ब्रुवाणः ।

भूमिस्तु चक्रं ग्रसतीत्यवोचत्
कर्णस्य तस्मिन् वधकालेऽभ्युपेते ॥ ६९॥

न चास्य घोरं प्रतिभाति चास्त्रं
यद्भार्गवो ह्यस्य ददौ महात्मा ।
चक्रं तु वामं ग्रसतेऽस्य भूमिर्
यथाऽस्य काले मृत्युपतिर्व्यतिष्ठत् ॥ ७०॥

ततो रथो भारत घूर्णते स्म
शापात्तदा ब्राह्मणसत्तमस्य ।
प्राप्तं वधं शंसति तन्महास्त्रं
प्रणश्यमानं द्विजमुख्यशापात् ॥ ७१॥

[1]सवेदिकश्चैत्य इवातिमात्रस्
सुपुष्पितो भूमितले निमग्नः ।
छिन्ने शरे सर्पमुखे च घोरे
पार्थेन तस्मिन् विषसाद कर्णः ॥ ७२॥

मग्नं रथं ब्राह्मणशापमूढो
ह्यस्त्रं च तं मोघमिषुं च सर्पम् ।
अमृष्यमाणो व्यसनानि तानि
हस्तौ विधून्वन् विजगर्ह धर्मम् ॥ ७३॥

1. क-ख-घ-ङ—अर्धद्वयं नास्ति

कर्णः—

धर्मप्रधानानभिपाति धर्म
इत्यब्रुवन् धर्मविदस्सदैव ।
नैवाद्य चास्मानभिपाति भक्तान्
मन्ये न नित्यं परिपाति धर्मः ॥ ७४॥

सञ्जयः—

एवं ब्रुवन् प्रस्खलिताश्वसूतो
विचाल्यमानोऽर्जुनबाणघातैः ।
मर्माभिघाताच्छिथिलः क्रियासु
पुनः पुनर्धर्ममगर्हयद्वै ॥ ७५॥

[1]ततश्शरैर्भीमतरैर् अविध्यत् त्रिभिराहवे ।
हस्ते कृष्णं तथा पार्थम् अभ्यविध्यत् स सप्तभिः ॥ ७६॥

ततोऽर्जुनस्सप्तदश तिग्मतेजा महाजवान् ।
इन्द्राशनिसमस्पर्शान् असृजत् पावकोपमान् ॥ ७७॥

निर्भिद्य तं ते वेगेन न्यपतन् पृथिवीतले ।
[2]कम्पितात्मा ततः कर्णश् शक्तिं शिक्षां च दर्शयन् ॥ ७८॥

---

1. क-ख-घ—ततश्शरैर्भीमतरैरविध्यत्
खनान्तरे कृष्णधनञ्जयौ सः ।
[इति अर्धद्वयस्थाने पाठान्तरं दृश्यते]

2. ख—हृदमर्मं नास्ति

बलेनाथ स संस्तभ्य ब्रह्मास्त्रं समुदीरयत् ।
ऐन्द्रं ततोऽर्जुनश्चापि तं दृष्ट्वाद्युपमन्त्रयत् ॥ ७९॥

गाण्डीवं ज्यां शरान् दिव्यान् अभिमन्त्र्य परन्तपः ।
व्यसृजच्छरवर्षाणि घर्मान्ते जलदो यथा ॥ ८०॥

ततस्तेजोमया बाणा रथात् पार्थस्य निस्सृताः ।
प्रादुरासन् महावीर्याः कर्णस्य च रथान्तिकात् ॥ ८१॥

स कर्णोऽप्रसदस्यास्त्रं कुर्वन् मोघं महारथः ।
ततोऽब्रवीद्वृष्णिवीरस् तस्मिन्नस्त्रे निपातिते ॥ ८२॥

श्रीभगवान्—

विसृजास्त्रं परं पार्थ राधेयो ग्रसते शरान् ॥ ८३

सञ्जयः—

ततो ब्रह्मास्त्रमव्यग्रस् सम्मन्त्र्य समयोजयत् ।
छादयित्वा ततो बाणैः कर्णं प्रत्यास्यदर्जुनः ॥ ८४

तस्य कर्णश्शितैर्बाणैर् ज्यां छित्वा समताडयत् ।
ततो ज्यां विनिधायान्याम् अनुमन्त्र्य च पाण्डवः ॥ ८५

शरैरवाकिरत् कर्णं दीप्यमानैरिवाग्निभिः ॥ ८५॥

तस्य ज्याच्छेदनं कर्णो ज्याविधानं च संयुगे ।
नावबुध्यत शीघ्रत्वात् तदद्भुतमिवाभवत् ॥ ८६॥

अस्त्रैरस्त्राणि संवार्य प्रत्यग्रत् सव्यसाचिनम् ।

चक्रे चाभ्यधिकं पार्थात् स्वयं वीर्यं प्रदर्शयन् ॥ ८७॥
ततः कर्णोऽर्जुनं दृष्ट्वा स्वस्यास्त्रेणावपीडितम् ।
युध्यस्वेत्यब्रवीत् पार्थं आतिष्ठ त्वं तथेति वै ॥ ८८॥
ततः कालाग्निसदृशं शरं सर्पविषोपमम् ।
अश्मसारमयं दिव्यम् अनुमन्त्र्य परन्तपः ॥ ८९॥
रौद्रमस्त्रं समाधाय क्षेप्तुकामः किरीटिने ।
ततोऽप्रसन्महीं चक्रं राधेयस्य तदा नृप ॥ ९०॥
प्रस्तचक्रश्च राधेयो रोषादश्रूण्यवर्तयत् ।
अर्जुनं चाब्रवीत् कर्णो मुहूर्तं क्षम पाण्डव ॥ ९१॥
सव्यं चक्रमवग्रस्तं भूमौ दैवादिदं मम ।
पार्थ कापुरुषाचीर्णम् अभिसन्धि विसर्जय ॥ ९२॥
प्रकीर्णकेशे विमुखे विकले ब्रह्मवादिनि ।
शरणागते न्यस्तशस्त्रे याचमाने तथाऽर्जुन ॥ ९३॥
अबाणे भ्रष्टकवचे भ्रष्टचक्रायुधे तथा ।
न मुञ्चन्ति हि शस्त्राणि शूरास्साधुव्रते स्थिताः ॥ ९४॥
त्वं च शूरतमो लोके साधुवृत्तश्च पाण्डव ।
अभिज्ञो युद्धधर्माणां तस्मात् क्षम मुहूर्तकम् ॥ ९५॥
[1]दिव्यास्त्रविदमेयात्मा कार्तवीर्यसमो ह्यसि ।

1. क-ख—इदमर्धं नास्ति

यावच्चक्रमिदं भूमेर् उद्धरामि धनञ्जय ॥ ९६॥

न मां रथस्थो भूमिष्ठं विसंज्ञं हन्तुमर्हसि ।
न वासुदेवात् त्वत्तो वा पाण्डवेय बिभेम्यहम् ॥ ९७॥

त्वं हि क्षत्रियदायादो महाकुलविवर्धनः ।
श्रुत्वा धर्मोपदेशं त्वं मुहूर्तं क्षम पाण्डव ॥ ९८॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि षडधिकशततमोऽध्यायः ॥ १०६ ॥
॥ ७३ ॥ कर्णपर्वणि षडधिकशततमोऽध्यायः ॥ १०६ ॥
[अस्मिन्नध्याये ९८॥ श्लोकाः]

॥ सप्ताधिकशततमोऽध्यायः ॥

पार्थाय धर्मानुवादकं कर्णं प्रति कृष्णेन तत्कृतदुष्कृतानुस्मारणपूर्वकं मर्मोद्घाटनम् ॥ १ ॥ कर्णेन स्वबाणाहतिनिर्विण्णेऽर्जुने तदन्तरे रथादवरुह्य तच्चक्रोद्धरणोद्यमः ॥ २ ॥ तदन्तरे कृष्णचोदनया पार्थेन कर्णशिरश्छेदः ॥ ३ ॥

सञ्जयः—

अथाब्रवीद्वासुदेवो महात्मा
राधेय दिष्ट्या स्मरसीह धर्मम् ।
धर्मे निबद्धास्सततं हि पार्थास्
तेभ्यस्त्वसौ वृद्धिमहो ददाति ॥ १

धर्मादपेताः परिपन्थिनस्ते
तस्माद्वृता वै कुरवो विनाशम् ।
प्रायेण नीचा व्यसनेषु मग्ना
निन्दन्ति दैवं न तु दुष्कृतं स्वम् ॥ २

कृष्णां सभां कर्ण यदेकवस्त्राम्
आनीतवांस्त्वं च सुयोधनश्च ।
दुश्शासनश्शकुनिस्सौबलश्च
धर्मस्तदा ते रुचितो न कस्मात् ॥ ३

यदा सभायां कौन्तेयम् अनक्षज्ञं युधिष्ठिरम् ।
[1]कैतवात् सौबलोऽजैषीद् दयालुं सर्वजन्तुषु ॥ ४

[2]आजमीढकुले जातं क ते धर्मस्तदा गतः ॥ ४॥

[3]वनवासे व्यतीते च कर्ण वर्षे त्रयोदशे ।
न प्रयच्छसि यद्राज्यं क ते धर्मस्तदा गतः ॥ ५॥

यद्भीमसेनं सर्पैश्च विषदिग्धैश्च भोजनैः ।
आरेभे त्वन्मुखो राजा क ते धर्मस्तदा गतः ॥ ६॥

यद्वारणावते पार्थान् सुप्ताञ्जतुगृहे पुरा ।

---

1. अ-क-ख-घ—नास्तीदमर्धम्
2. अ—अजैषीच्छकुनिर्जानन्
क—आनीय जितवन्तो वै [पाठान्तरम्]
3. ख—अर्धचतुष्टयं नास्ति घ—अर्धद्वयं नास्ति

[1]आदीपयसि राधेय क्व ते धर्मस्तदा गतः ॥ ७॥

[2]राज्यलुब्धः पुनः कर्ण समाह्वयसि पाण्डवान् ।
यदा शकुनिमाश्रित्य क्व ते धर्मस्तदा गतः ॥ ८॥

[3]यदनार्यैः पुरा कृष्णां क्लिश्यमानामनागसीम् ।
उपप्रैक्षीश्च राधेय क्व ते धर्मस्तदा गतः ॥ ९॥

[4]यदा रजस्वलां कृष्णां दुश्शासनवशे स्थिताम् ।
सभायां प्राहसः कर्ण क्व ते धर्मस्तदा गतः ॥ १०॥

विनष्टाः पाण्डवाः कृष्णे शाश्वतं नरकं गताः ।
पतिमन्यं वृणीष्वेति वदंस्त्वं गजगामिनीम् ॥ ११॥

उपप्रेक्षसि राधेय क्व ते धर्मस्तदा गतः[5] ॥ १२

यदाऽभिमन्युं बहवो युद्धे जघ्नुर्महारथाः ।
परिवार्य रणे बालं क्व ते धर्मस्तदा गतः ॥ १३

---

1. ख-घ-ङ—हन्तुकामास्तदा यूयं क्व ते धर्मस्तदा
क—दग्धवन्तो यदा यूयं

2. घ—अधैद्यूयंनास्ति

3. ख-घ-ङ—पुरा नीतां यदा भीतां कृष्यमाणामनागसीम् ।
[पाठान्तरम्]

4. ङ—कोशएकस्मिन्नेवेमानि पञ्चार्धानि वर्तन्ते

5. ङ—राज्यलुब्धः पुनः कर्ण समाह्वयसि पाण्डवम् ।
गान्धारराजमाश्रित्य क्व ते धर्मस्तदा गतः ॥ [अधिकः पाठः]

सञ्जयः—

एवमुक्ते तु राधेये वासुदेवेन पाण्डवम् ।
मन्युरभ्याविशद्घोरस् स्मृत्वा तत्तद् धनञ्जयम् ॥ १४

तदा क्रुद्धस्य सर्वेभ्यस् स्रोतोभ्यः पावकार्चिषः ।
प्रादुरासंस्ततो राजंस् तदद्भुतमिवाभवत् ॥ १५

स समीक्ष्य ततः कर्णं प्रसहान्नैर्धनञ्जयः ।
[1]ववर्ष शरवर्षाणि जिघांसुस्सूतजं तदा ॥ १६

कर्णश्चापि तदा राजन् क्रोधरक्तान्तलोचनः ।
[2]अभ्यवर्षत् पुनर्यत्नम् अकरोच्च धनञ्जये ॥ १७

अस्त्रैरस्त्राणि संवार्य प्रजहार च पाण्डवः ॥ १७॥

ततोऽन्यदस्त्रं कौन्तेयो [3]दयितं जातवेदसः ।
मुमोच कर्णमुद्दिश्य तत् प्रजज्वाल तेजसा ॥ १८॥

वारुणेन ततः कर्णश् शमयामास पावकम् ।
जीमूतैश्च दिशस्सर्वाश् चक्रे वीरस्सुदुर्दिनम् ॥ १९॥

पाण्डवेयो ह्यसम्भ्रान्तो वायव्यास्त्रेण तूलवत् ।
अपोवाह ततोऽस्त्राणि राधेयस्य महात्मनः ॥ २०॥

तत्राद्भुतं भारत सूतपुत्रश्
चक्रे चक्रे भूमिमनुप्रविष्टे ।

---

1. अ-घ—अर्धद्वयं नास्ति 2. क-ख-घ-ङ—नास्तीदमर्धम्
3. ख—इतः अर्धचतुष्टयं नास्ति

यद्योधयत् पाण्डवमुग्रवेगं
विव्याध चैनं दशभिः पृषत्कैः[1] ॥ २१॥
तं हस्तिकक्ष्याप्रवरं हि केतुं
सुवर्णमुक्तामणिवज्रजुष्टम् ।
कलाप्रकृष्टोत्तमशिल्पियत्नैः
कृतस्वरूपं तपनीयचित्रम् ॥ २२॥
ऊर्जस्करं ते सततं बलस्य
द्विषत्सेनाबाधनं भीमरूपम् ।
विख्यातमादित्यसुतस्य लोके
त्विषा समं पावकभानुचन्द्रैः ॥ २३॥
ततः क्षुरेणातिरथेर्महात्मा
सुवर्णपुङ्खेन शितेन [2]यत्तः ।
श्रिया ज्वलन्तं ध्वजमुन्ममाथ
महारथस्यातिरथेः किरीटी ॥ २४॥
यशश्च दर्पश्च बलं च मारिष
प्रियाणि सर्वाणि च तेन केतुना ।

---

1. अ—ततोऽतिविद्धो भरतप्रवीरः
कर्णेन राजन् समरेऽर्जुनस्तु ।
बभूव कोपेन भृशं प्रदीप्तो
घृतावसिक्तः सदसीव वह्निः ॥ [अधिकः पाठः]

2. ख-ब—यत्नतः

ध्रुवं कुरूणां हृदयानि चापतन्
बभूव हाहेति च निस्स्वनो महान् ॥ २५॥

दृष्ट्वा ध्वजं तं पतितं पृथिव्यां
कुरुप्रवीरेण निकृत्तमाशु ।
[1]नाशंसिरे सूतपुत्रस्य सर्वे
जयं जना भारत ये त्वदीयाः ॥ २६॥

[2]अथ त्वरन् कर्णवधाय पार्थो
ततो महेन्द्राशनिसन्निकाशम् ।
आदत्त पार्थोऽञ्जलिकं निषङ्गात्
सहस्ररश्मेरिव रश्मिमेकम् ॥ २७॥

मर्मच्छिदं बाणवरं सुपुङ्खं
वैश्वानरार्कप्रतिमं ज्वलन्तम् ।
नराश्वनागासुहरं प्रदीप्तं
वराहमञ्जोगतिमुग्रवेगम् ॥ ८॥

सहस्रनेत्राशनितुल्यनिस्वनं
यमानमं व्यात्तमिवातिदुस्सहम् ।
पिनाकनारायणचक्रसन्निभं
भयङ्करं प्राणभृतां विनाशनम् ॥ २९॥

क—शशंसिरे सूतपुत्रस्य सर्वं वधं तदा
क-ख-घ-ङ—अयं पादो नास्ति

जग्राह पार्थस्स शरं प्रहृष्टो
यो देवसङ्घैरपि दुर्निवारः ।
सम्पूजितो यस्सततं महात्मना
देवासुराणां च जये महेषुः ॥ ३०॥

यं वै प्रकृष्टं प्रसमीक्ष्य युद्धे
चचाल सर्वं सचराचरं जगत् ।
कृत्स्नं जगत् स्वस्त्यृषयो हि चक्रुस्
तमुद्यतं दृश्य महात्मनेषुम् ॥ ३१॥

युक्त्वा महास्त्रेण परेण मन्त्रैर्
विकृष्य गाण्डीवमुवाच [1]सत्वरम् ॥ ३२

अर्जुनः—

अयं महास्त्रप्रतिमश्शरोत्तमश्
शरीरहृच्चासुहरश्च दुर्हृदाम् ।
तपोभितप्तं गुरवश्च तोषिता
मया यदीष्टं सुहुतं यदि श्रुतम् ॥ ३३

अनेन सत्येन निहन्त्वयं शरस्
सुसंहितः कर्णमरिं मयाऽर्चितः ॥ ३३॥

---

1. ख-घ—पार्थः क—सुखरम्

सञ्जयः—

इत्यूचिवांस्तं प्रमुमोच बाणं
धनञ्जयः कर्णवधाय घोरम् ॥ ३४

अर्जुनः—

कृत्या ह्यथर्वाङ्गिरसी प्रचोदिता
यथा तथा त्वं जहि शात्रवं मम ॥ ३४॥

सञ्जयः—

ब्रुवन् किरीटी तमभिप्रहृष्टस्
[1]ससर्ज कर्णाय तदुग्रवेगम् ।
जिघांसुरर्केन्दुसमप्रभावः
कर्णं वशी पाण्डवः क्षिप्रकारी ॥ ३५॥

ततो विमुक्तो बलिना महेषुः
प्रज्वालयामास नभो दिशश्च ॥ ३६

सैन्यान्यनेकानि च विप्रकीर्य
गाण्डीवमुक्तेन ततो महात्मा ।
तेनार्जुनस्तन्महनीयमस्य
शिरोऽहरत् सूतपुत्रस्य राजन् ॥ ३७

---

1. क-ख—व्यवासृजज्जयहेतुं महेषुम्
ङ—ऽसृजद्देवानां जयहेतुं महेषुम्

छिन्नं पपाताञ्जलिकेन पूर्णं
कायोऽस्य पश्चाद्धरणीं जगाम ॥ ३७॥

तदुद्यतादित्यसमानवर्चसं
शिरस्तु मध्यन्दिनभास्करप्रभम् ।
वराङ्गमुर्व्यामपतन्मुखे
दिवाकरोऽस्तादिव रक्तमण्डलः ॥ ३८॥

ततस्तु देही सततं सुखैधितं
सुरूपमत्यर्थसुखं सुगन्धि च ।
परेण कृच्छ्रेण शरीरमत्यजद्
गृहान् महर्द्धीन् निवसन्निवेश्वरः ॥ ३९॥

शरैर्विभिन्नं व्यसु तत् सुवर्म
पपात कर्णस्य शरीरमुज्झितम् ।
स्रवद्व्रणं गैरिकतोयमास्रवत्
गिरेर्यथा वज्रहतं शिरस्तथा ॥ ४०॥

देहात्तु कर्णस्य निपातितस्य
तेजस्सूर्यं खं विदार्याविवेश ।
तदद्भुतं सर्वमनुष्ययोधास्
ते दृष्टवन्तो निहते स्म कर्णे ॥ ४१॥

तं सोमकाः प्रेक्ष्य हतं शयानं
प्रीता निनादं मुमुचुस्ससैन्याः ।
तूर्याणि चाजघ्नुरतीव हृष्टा
वासांसि चाप्यादुधुवुर्भुजांश्च ॥ ४२॥

[1]संवर्धयन्तश्च नरेन्द्र योधाः
पार्थं समाजग्मुरतिप्रहृष्टाः ।
पताकिनीं चाप्यपरे ह्यनर्तय-
न्नन्योन्यमाश्लिष्य च तत्तदूचुः ॥ ४३॥

दृष्ट्वा कर्णं भूमिमनुप्रविष्टम्
[2]हृतं हृदात् सर्पमिवापविद्धम् ।
महानिलेनाद्रिमिवापविद्धं
यज्ञावसानेऽग्निमिव प्रशान्तम् ॥ ४४॥

तदाननं सूतपुत्रस्य राजन्
विभ्राजते पद्ममिवापनालम् ।
रराज कर्णस्य शिरो निकृत्तम्
अस्ते गिरौ भास्करस्येव बिम्बम् ॥ ४५॥

[3]ततश्शङ्खान् यादवा दध्मुरुच्चैर्
दृष्ट्वा कर्णं पातितं फल्गुनेन ।

---

1. क-ख-ङ—नास्तीदमर्धम्
2. ङ—हृतं रथात् सायकेनार्दयित्वा [पाठान्तरम्]
3. क-ख-ग-ङ—अर्धचतुष्टयं नास्ति

तथैव कृष्णश्च धनञ्जयश्च
हृष्टौ यमौ दध्मतुर्वारिजातौ ॥ ४६॥

सन्ताप्य सेनां स तु पाण्डवीं रणे
शरांशुभिर्भास्करतुल्यधीरः ।
किरीटिकालेन हि कर्णभास्करोऽ-
प्यनीयतास्तं दिवसावसाने ॥ ४७॥

शरैराचितसर्वाङ्गश् शोणितौघपरिप्लुतः ।
रराज देहः कर्णस्य स्वरश्मिभिरिवांशुमान् ॥ ४८॥

निष्टप्य सेनामामित्रीं दीप्तैश्शरगभस्तिभिः ।
बलिनाऽर्जुनकालेन नीतोऽस्तं कर्णभास्करः ॥ ४९॥

अस्तं गच्छन् यथाऽऽदित्यः प्रभामादाय गच्छति ।
एवं जीवितमादाय कर्णस्येषुर्जगाम ह ॥ ५०॥

अपराह्णेऽपराह्णस्य सूतपुत्रस्य मारिष ।
छिन्नमञ्जलिकेनाजौ सोत्सेधमपतच्छिरः ॥ ५१॥

उपर्युपरि सेनानां विनिघ्नन्नहितं जनम् ।
शिरः कर्णस्य सोत्सेधम् इषुस्तदहरद्रणे ॥ ५२॥

[छ]च्छिरो भरतश्रेष्ठ शोभयामास मेदिनीम् ।
[उ]च्छ्रयेव पतितं मण्डलं चण्डदीधितेः ॥ ५३॥

तं दृष्ट्वा समरविमर्दलब्धनिद्रं
दष्टोष्ठं रुधिरपरीतकातराक्षम् ।
राधेयं रथवरपृष्ठसन्निषण्णम्
हीनांशुर्दिवसकरो मुहूर्तमासीत् ॥ ५४॥

निश्शब्दतूर्यं हतयोधमुख्यं
प्रशान्तदर्पं धृतराष्ट्रसैन्यम् ।
न शोभते सूर्यसुतेन हीनं
बृन्दं ग्रहाणामिव चन्द्रहीनम् ॥ ५५॥

सहस्रनेत्रप्रतिमानकर्मणस्
सहस्ररश्मिप्रतिमाननं शुभम् ।
सहस्ररश्मिर्दिवसक्षये यथा
तथाऽपतत् कर्णशिरो वसुन्धराम् ॥ ५६॥

[1]व्यूढोरस्कं कमलनयनं तप्तहेमावभासं
कर्णं दृष्ट्वा भुवि निपतितं पार्थबाणाभितप्तम् ।
पांसुप्रस्तं मलिनमसकृत् पुत्रमन्वीक्षमाणो
मन्दं मन्दं व्रजति सविता मन्दिरं मन्दरश्मिः ॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि सप्ताधिकशततमोऽध्यायः ॥ १०७ ॥
॥ ७३ ॥ कर्णपर्वणि सप्ताधिकशततमोऽध्यायः ॥ १०७ ॥
[अस्मिन्नध्याये ५७॥ श्लोकाः]

---

1. अ—नास्त्यर्धद्वयमिदम्

॥ अष्टाधिकशततमोऽध्यायः ॥

शल्येन कर्णमरणाद्याकुलमनसो दुर्योधनस्य समाश्वासनम् ॥ १ ॥ तथा तं प्रति रणाङ्गणवर्णनम् ॥ २ ॥ देवगन्धर्वादीनां स्वस्वस्थानगमनम् ॥ ३ ॥

सञ्जयः—

कर्णं तु शूरं पतितं पृथिव्यां
शराचितं शोणितदिग्धगात्रम् ।
यदृच्छया सूर्यमिवावनिं गतं
दिदृक्षवस्सम्परिवार्य तस्थुः ॥ १

प्रभ्रष्टवित्रस्तविषण्णविस्मितास्
तथाऽपरे शोकसमन्विता भवन् ।
परे त्वदीयाश्च रणे विशां पते
यथायथेष्टं पृतना तथा गता ॥ २

प्रविद्धवर्माभरणायुधाम्बरं
धनञ्जयेन प्रहतं महारथम् ।
निशाम्य कर्णं कुरवः प्रदुद्रुवुर्
[1]हतर्षभं केसरिणेव गोकुलम् ॥ ३

---

1. ख—इदमादि पादषट्कं नास्ति

कृत्वा विमर्दं भृशमर्जुनेन
कर्णं हतं केसरिणेव नागम् ।
दृष्ट्वा शयानं युधि मद्रराजश्
छिन्नध्वजेनापययौ रथेन ॥ ४

कर्णे हते पार्थभयात् प्रदुद्रुवुर्
वैकर्तने धार्तराष्ट्रास्सशल्याः ।
अवेक्षमाणा मुहुरर्जुनस्य
केतुं महान्तं यशसा ज्वलन्तम् ॥ ५

शल्यस्तु कर्णार्जुनयोर्विमर्दे
बलानि दृष्ट्वा मृदितध्वजानि ।
ययौ स तेनैव रथेन तूर्णं
हेलीकृतस्सृञ्जयसोमकैश्च ॥ ६

निपातितस्यन्दनवाजिनागं
बलं च दृष्ट्वा हतसूतपुत्रम् ।
भीमश्च भीमेन तदा स्वरेण
समुन्नदद्रोदसी कम्पयंश्च ॥ ७

आस्फोटयन्नृत्यति वल्गते च
हते कर्णे त्रासयन् धार्तराष्ट्रान् ॥ ७॥

तदा राजन् सृञ्जयास्सोमकाश्च
शङ्खान् दध्मुस्सस्वजुश्चापि सर्वे ।
परस्परं क्षत्रिया हृष्टरूपास्
सूतात्मजे वै निहते तदानीम् ॥ ८॥

दुर्योधनोऽश्रुप्रतिपूर्णनेत्रो
दीनो मुहुर्निश्वसन्नार्तरूपः ॥ ९

मद्राधिपश्चापि विमूढचेतास्
तूर्णं ध्वजेनापहृतेन तेन ।
रथेन दुर्योधनमेत्य तूर्णं
पश्यन् सुदुःखार्तमुवाच राजन् ॥ १०

शल्यः—

विशीर्णनागाश्वरथप्रवीरं
बलं त्वदीयं यमराष्ट्रकल्पम् ।
अन्योन्यमासाद्य हतैश्शयानैर्
नराश्वनागैर्गिरिकूटकल्पैः ॥ ११

नैतादृशं भारत युद्धमासीद्
यथा हि कर्णार्जुनयोर्बभूव ।
प्रस्तौ हि कर्णेन समेत्य कृष्णा-
वन्ये हि सर्वे तव शात्रवा ये ॥ १२

दैवं तु यत्तत् स्ववशे प्रवृत्तं
तत् पाण्डवान् पाति निहन्ति चास्मान् ।
तवार्थसिद्ध्यर्थकरा हि सर्वे
प्रसह्य वीरा निहता द्विषद्भिः ॥ १३

कुबेरवैवस्वतवासवानां
तुल्यप्रभावा वरुणस्य चापि ।
वीर्येण शौर्येण पराक्रमेण
तैस्तैश्च युक्ता विमलैर्गुणौघैः ॥ १४

अवध्यकल्पा निहता नरेन्द्रास्
तवार्थकामा युधि पाण्डवेयैः ।
तन्मा शुचो भारत दिष्टमेतत्
पर्यायसिद्धिर्न तु नित्यसिद्धिः ॥ १५

सञ्जयः—

एतद्वचो मद्रपतेर्निशम्य
स्वं चाविनीतं मनसा विचिन्त्य ।
दुर्योधनोऽश्रुप्रतिपूर्णनेत्रो
दीनादीनो निश्वसदार्तरूपः ॥ १६

तं ध्यानमूकं कृपणं भृशार्तम्
आर्तायनिर्दीनमुवाच राजन् ॥ १६॥

शल्यः—

पश्येदमुग्रं नरवाजिनागैर्
आयोधनं वीर हतैस्सुपूर्णम् ॥ १७

महीधराभैः पतितैश्च नागैर्
महीं प्रपन्नैश्शरभिन्नदेहैः ।
प्रविद्धलद्भिश्च गतासुभिश्च
प्रध्वस्तवर्मायुधसर्वयोधैः ॥ १८

वज्रापविद्धैरिव चाचलौघैर्
विभिन्नपाषाणमृगद्रुमौघैः ।
प्रविद्धघण्टाङ्कुशतोमरध्वजैस्
सहेमजालै रुधिरौघसम्प्लवैः ॥ १९

शरावनुन्नैः पतितैस्तुरङ्गमैस्
स्खनद्भिरार्तैः क्षतजं स्रवद्भिः ।
दीनस्खनद्भिः परिवृत्तनेत्रैर्
मही पतद्भिः कृपणा बभूव ॥ २०

तथाऽपविद्धैर्गजवाजियूथैर्
मन्दासुभिश्चापि गतासुभिश्च ।
रथैश्च नागैस्तुरगैश्च नुन्नैर्
मही महावैतरणीव भाति ॥ २१

गजैर्निकृत्तापरहस्तगात्रैर्
उद्वेपमानैः पतितैः पृथिव्याम् ।
रथर्षभैर्नागवराश्वयोधैः
पदातिभिश्चाभिमुखैः परैर्हतैः ॥ २२

विशीर्णवर्माभरणाम्बरायुधैर्
वृता प्रशान्तैरिव पावकैर्मही ।
शरप्रहाराभिहतैर्महाबलैर्
अवेक्षमाणैः पतितैस्समन्ततः ॥ २३

प्रनष्टसंज्ञैः पुनराश्वसद्भिर्
मही बभौ कुम्भगतैरिवाग्निभिः ।
रक्तैश्च्युतैर्भूरतिदीप्तिमद्भिर्
नक्तं ग्रहैर्द्यौर्विमलैर्विभाति ॥ २४

शरास्तु कर्णार्जुनबाहुमुक्ता
विदार्य नागाश्वमनुष्यदेहान् ।
प्राणान् निरस्याशु महीं प्रतीयुर्
महोरगा वासमिवातिरौद्राः ॥ २५

हतैर्मनुष्यैश्च गजैश्च सङ्गरे
शरावभिन्नै रुधिरप्रदिग्धैः ।

धनञ्जयस्यातिरथेश्च मार्गे
हतैरगम्या वसुधाऽतिदुर्गा ॥ २६

रथैर्महेषून्मथितैस्सुकल्पितैस्
सनागयोधाश्ववरायुधध्वजैः ।
विशीर्णयोक्त्रैर्विनिकीर्णबन्धनैर्
निकृत्तचक्राक्षयुगात्रिवेणुभिः ॥ २७

विमुक्तयन्त्रैश्च तथा व्युपस्करैर्
हतानुषङ्गैर्विनिकृत्तबन्धनैः ।
प्रभग्ननीडैर्मणिहेमभूषितैर्
वृता मही द्यौरिव शारदैर्घनैः ॥ २८

निकृष्यमाणा जवनैस्तुरङ्गमैर्
हतेश्वरा राजरथास्सुकल्पिताः ।
मनुष्यमातङ्गरथाश्वसादिषु
द्रुतं व्रजन्तो बहुधा विचूर्णिताः ॥ २९

सहेमपृष्ठास्सपरश्वथायुधाश्
शिताश्च शूला मुसलास्समुद्गराः ।
चित्राश्च खड्गा विमलाश्च कोशा
गदाश्च जाम्बूनदपट्टनद्धाः ॥ ३०

चापानि जाम्बूनदभूषितानि
शराश्च कार्तस्वरचित्रपुङ्खाः ।
ऋष्टयश्च पीता विमला विकोशाः
प्रासाश्च दण्डाः कनकप्रभासः ॥ ३१

शुभ्राणि वालव्यजनानि शङ्खाश्
छिन्नापविद्धा विरुचस्स्रजश्च ।
[1]कुथाः पताकाम्बरवेष्टनानि
किरीटमाला मकुटाश्च शुभ्राः ॥ ३२

प्रकीर्णका विप्रतिकीर्णकाश्च
प्रधानमुख्यास्तरलाश्च हाराः ।
आपीडकेयूरवराङ्गदानि
ग्रैवेयनिष्कास्सुवर्णसूत्राः ॥ ३३

मण्युत्तमा वज्रसुवर्णयुक्ता
रत्नानि चोच्चावचमङ्गलानि ।
गात्राणि चाभान्ति सुखोचितानि
शिरांसि चेन्दुप्रतिमाननानि ॥ ३४

देहांश्च भोगांश्च परिच्छदांश्च
त्यक्त्वा मनोज्ञान् निहतास्सुखानि ।

1. अ—पञ्चार्धानि न सन्ति

स्वधर्मनिष्ठां महतीमवाप्य
प्राप्ताश्च लोकान् यशसा गतास्ते ॥ ३५

निवर्त्य दुर्योधन यान्तु सैनिका
व्रजस्व राजञ् शिबिराणि मानद ।
दिवाकरोऽप्येष विलम्बते प्रभो
पुनस्त्वमेवात्र नरेन्द्र कारणम् ॥ ३६

सञ्जयः—

एतावदुक्त्वा विरराम शल्यो
दुर्योधनं चैव निवर्तयित्वा ।
युद्धाय राजन् विनिविष्टबुद्धिं
हा कर्ण हा कर्ण इति ब्रुवाणम् ॥ ३७

तं द्रोणपुत्रप्रमुखा नरेन्द्रास्
सर्वे समाश्वास्य ततः प्रजग्मुः ।
निरीक्षमाणा ध्वजमर्जुनस्य
रथं च दिव्यं यशसा ज्वलन्तम् ॥ ३८

नराश्वमातङ्गशरीरजेन
रक्तेन सिक्तां रुधिरेण भूमिम् ।
रक्ताम्बरस्रक्तपनीययोगां
नारीं प्रकाशामिव सर्वरम्याम् ॥ ३९

प्रच्छन्नरूपां रुधिरेण राजन्
रौद्रे मुहूर्तेऽतिविराजमानाम् ।
नैवावतस्थुः कुरवस्समीक्ष्य
प्रव्राजिता नरदेवा यथाऽक्षैः ॥ ४०

वधेन कर्णस्य सुदुःखितास्ते
हा कर्ण हा कर्ण इति ब्रुवाणाः ।
द्रुतं प्रजग्मुश्शिबिराणि राजन्
दिवाकरं रक्तमवेक्षमाणाः ॥ ४१

[1]गाण्डीवमुक्तैस्तु सुवर्णपुङ्खैश्
शिलाशितैश्शोणितदिग्धवाजैः ।
शरैश्चिताङ्गोऽपि रराज कर्णो
हतोऽपि दीप्तांशुरिवांशुजालैः ॥ ४२

कर्णस्य देहं रुधिराम्बुसिक्तं
भक्तानुकम्पी भगवान् विवस्वान् ।
स्पृष्ट्वा कराग्रैः क्षतजानुरूपैस्
स्नातुं तदाऽगादपरं समुद्रम् ॥ ४३

इतीव सञ्चिन्त्य सुरर्षयश्च
सम्प्रस्थितास्ते तु यथानिकेतम् ।

---

1. अ—नास्त्यर्धद्वयम्

सञ्चिन्त्य सर्वा जनता विसस्मुर्
यथासुखं खे च महीतले च ॥ ४४

तदद्भुतं प्राणभृतां भयङ्करं
निशाम्य युद्धं कुरुवीरमुख्ययोः ।
[1-2]समाचितौ कर्णशरैः परन्तपौ
सहैव संरेजतुरच्युतार्जुनौ ॥ ४५

तमो निहत्याभ्युदितौ यथाऽमलौ
शशाङ्कसूर्याविव रश्मिमालिनौ ।
विहाय तान् बाणगणान् महाबलौ
सुहृद्वृतावप्रतिमानविक्रमौ ॥ ४६

सुखं प्रविष्टौ सुखदौ विरेजतुस्
सदस्यचिन्त्याविव विष्णुवासवौ ॥ ४६॥

सदेवगन्धर्वमनुष्यचारणैर्
महर्षिभिर्यक्षमहोरगैरपि ।

---

1. अ—अष्टाधानि न सन्ति
2. अ—धनञ्जयस्यातिरथेश्च विस्मिताः
प्रशंसमानाः प्रययुस्तदाऽर्जुनम् ।
गाण्डीवमुक्तैश्च सुवर्णपुङ्खैः
शिलाशितैश्शोणितदिग्धवाजैः ॥
शरैश्चिताङ्गो विरराज कर्णो
हतोऽपि दोषांशुरिवांशुजालैः । [अधिकः पाठः]

जयाभिवृद्ध्या परयाऽभिपूजितौ
निहत्य कर्णं परमाहवे तदा ॥ ४७॥

यथानुरूपं प्रतिपूज्य तानथ
प्रशस्यमानावतुलैश्च कर्मभिः ॥ ४८

ननन्दतुश्चैव सुहृद्भिरावृतौ
बलं निहत्येव सुरेशकेशवौ ॥ ४८॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि अष्टाधिकशततमोऽध्यायः ॥ १०८ ॥
॥ ७३ ॥ कर्णपर्वणि अष्टाधिकशततमोऽध्यायः ॥ १०८ ॥
[अस्मिन्नध्याये ४८॥ श्लोकाः]

॥ नवाधिकशततमोऽध्यायः ॥

कर्णवधानन्तरं कृष्णार्जुनयोर्युधिष्ठिरसमीपगमनम् ॥

सञ्जयः—

शरसङ्कृत्तवर्माणं रुधिरोक्षितवक्षसम् ।
गतासुमपि राधेयं नैव लक्ष्मीर्विमुञ्चति ॥ १

तप्तजाम्बूनदनिभं बालार्कसदृशद्युतिम् ।
जीवन्तमिव तं शूरं सर्वभूतानि मेनिरे ॥ २

हतस्यापि महाराज सूतपुत्रस्य संयुगे ।
वित्रेसुस्सर्वतो योधास् सिंहस्येवेतरे मृगाः ॥ ३

हतोऽपि पुरुषव्याघ्रो व्याहरन्निव लक्ष्यते ।
नाभवद्विकृतिः काचिन्मृतस्यापि महात्मनः ॥ ४

चारुवेषधरं राजंश् चारुमौलिशिरोधरम् ।
तन्मुखं सूतपुत्रस्य पूर्णचन्द्रसमद्युति ॥ ५

कनकोत्तमसङ्काशो ज्वलन्निव विभावसुः ।
स शान्तः पुरुषव्याघ्रः पार्थसायकवारिणा ॥ ६

यथाऽग्निर्ज्वलितो दीप्तो जलमासाद्य शाम्यति ।
कर्णाग्निस्समरे तद्वत् पार्थमेघेन शामितः ॥ ७

आहृत्य सुयशो दीप्तं सुयुद्धेनात्मनो भुवि ।
सपुत्रस्समरे कर्णः प्रशान्तः पार्थतेजसा ॥ ८

प्रताप्य पाण्डवान् सर्वान् पाञ्चालांश्चास्ततेजसा ।
नानाभरणवान् राजंस् तप्तजाम्बूनदप्रभः ॥ ९

वर्षित्वा शरवर्षाणि प्रताप्य रिपुवाहिनीम् ।
श्रीमानिव सहस्रांशुर् ज्वलन् सर्वान् प्रताप्य च ॥ १०

हतो वैकर्तनः कर्णः पादपोऽङ्कुरवानिव ॥ १०॥

ददानीत्येव यः प्रादान्न नास्तीत्यर्थिनेऽवदत् ।
सन्त्यस्सदा सत्पुरुषस् स हतो द्वैरथे वृषा ॥ ११॥

[1]यस्य ब्राह्मणसात् सर्वं वित्तमासीन्महात्मनः ।
नादेयं ब्राह्मणेष्वासीद् यस्य स्वमपि जीवितम् ॥ १२॥

सदा नृणां प्रियो राजन् दाता चैव मनोरथान् ।
स पार्थास्त्रविनिर्दग्धो गतः परमिकां गतिम् ॥ १३॥

---

1. अ—नास्तीदमधर्म्यम्

यमाश्रित्याकरोद्वैरं सुतस्ते स गतो दिवम् ।
आदाय तव पुत्राणां जयाशां शर्म वर्म च ॥ १४॥

हते कर्णे सरितो न प्रसस्रुर्
जगाम चास्तं कलुषो दिवाकरः ।
श्वेतो ग्रहश्च ज्वलितार्कवर्णो
यमस्य पुत्रोऽभ्युदितस्स तिर्यक् ॥ १५॥

नभश्चचालाथ ननाद चोर्वी
ववुश्च वाताः परुषाश्च घोराः ।
दिशो बभूवुर्ज्वलितास्सधूमा
महार्णवास्सस्वनुश्चुक्षुभुश्च ॥ १६॥

सकाननाश्चाद्रिवराश्चकम्पिरे
प्रविव्यधुर्भूतगणाश्च मारिष ।
बृहस्पतिस्सम्परिवार्य रोहिणीं
बभूव चन्द्रार्कसमो विशां पते ॥ १७॥

हते कर्णे विदिशोपि जज्वलुस्
तमोवृता द्यौर्विचचाल भूमिः ।
पपात चोल्का ज्वलनप्रभा च
निशाचरा हृष्टतरा बभूवुः ॥ १८॥

[1]शशिप्रकाशाननमर्जुनो यदा
जहार कर्णस्य शिरश्शरेण ।
ततोऽन्तरिक्षे सहसैव शब्दो
बभूव हाहेति सुरैर्विमुक्तः ॥ १९॥

सदेवगन्धर्वमनुष्यपूजितं
निहत्य कर्णं रिपुमाहवेऽर्जुनः ।
रराज राजन् परमेण तेजसा
यथा पुरा वृत्रवधे शतक्रतुः ॥ २०॥

[2]ततो रथेनाम्बुदधीरनादिना
शरन्नभोमध्यदिवाकरार्चिषा ।
पताकिना भीमनिनादकेतुना
हिमेन्दुशङ्खस्फटिकावभासिना ॥ २१॥

महेन्द्रवाहप्रतिमेन तावुभौ
महेन्द्रवीर्यप्रतिमानपौरुषौ ।
सुवर्णमुक्तामणिवज्रविद्रुमैर्
अलङ्कृतेनाप्रतिमेन रंहसा ॥ २२॥

---

1. अ—नास्तीदमर्धम्
2. क-ख-घ-ङ—नास्तीदमर्धम्

नरोत्तमौ यादवपाण्डुनन्दनौ
क्रतौ हुताग्नीव दिवाकराविव ।
रणाजिरे वीतभयौ विरेजतुस्
समानयोगाविव विष्णुवासवौ ॥ २३॥

ततो धनुर्ज्यातलनेमिनिस्वनैः
प्रसह्य कृत्वा च रिपून् गतप्रभान् ।
स सादयित्वा च रिपूञ् शरौघैः
कपिध्वजः पक्षिवरध्वजश्च ॥ २४॥

प्रदध्मतुश्शङ्खवरौ सुघोषौ
मनांस्यरीणामुपतापयन्तौ ॥ २५

सुवर्णजालावततौ महास्वनौ
हिमावदातौ परिगृह्य पाणिभिः ।
चुचुम्बतुश्शङ्खवरौ नृणां वरौ
विघोषयन्तौ विजयं जगत्त्रये ॥ २६

पाञ्चजन्यस्य निर्घोषो देवदत्तस्य चोभयोः ।
पृथिवीमन्तरिक्षं च दिशश्च समपूरयत ॥ २७

वित्रस्ताश्चाभवन् सर्वे कुरवो राजसत्तम ।
शूरयोश्शङ्खशब्देन माधवस्यार्जुनस्य च ॥ २८

तौ शङ्खशब्देन निनादयन्तौ
वनानि शैलान् सरितो गुहाश्च ।
वित्रासयन्तौ तव पुत्रसेनां
युधिष्ठिरं नन्दयितुं प्रयातौ ॥ २९

ततः प्रजग्मुः कुरवो जवेन
श्रुत्वैव शङ्खस्वनमीर्यमाणम् ।
विहाय मद्राधिपतिं पतिं च
दुर्योधनं भारत भारतानाम् ॥ ३०

[1]ततो रथेनाम्बुदबृन्दनादिना
शरद्यहर्मध्यदिवाकरत्विषा ।
धनञ्जयस्यातिरथेश्च विस्मिताः
प्रशंसमानाः प्रययुस्तदाऽर्जुनम् ॥ ३१

महाहवे तं बहु शोभमानं
धनञ्जयं योधगणैस्समेताः ।

---

1. अ—अर्धद्वयं नास्ति

तावन्वमोदंश्च जनाः प्रकामं
प्रभाकरावभ्युदितौ यथैव[1] ॥ ३२

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि नवाधिकशततमोऽध्यायः ॥ १०९ ॥
॥ ७३ ॥ कर्णपर्वणि नवाधिकशततमोऽध्यायः ॥ १०९ ॥
[अस्मिन्नध्याये ३२ श्लोकाः]

---

1. अ—समाचितौ कर्णशरैः परन्तपौ
सहैव संरेजतुरर्जुनाच्युतौ ।
तमो निहत्याभ्युदितौ यथाऽमरौ
शशाङ्कसूर्याविव रश्मिमालिनौ ॥
विहाय तान् बाणगणान् महाबलौ
सुहृद्धृतावप्रतिमानविक्रमौ ।
सुसंप्रहृष्टौ सुखदौ विरेजतुर्
जयश्रियं प्राप्य जनार्दनाच्युतौ ॥
सदेवगन्धर्वं मनुष्यचारणैर्
महर्षिभिर्यक्षमहोरगैरपि ।
जयाभिवृद्ध्या परयाऽभिपूजितौ
निहत्य कर्णं परमाहवे तदा ॥
यथानुरूपं प्रतिपूज्य तानथ
प्रशस्यमानावतुलैश्च कर्मभिः ।
ननंदतुश्चैव सुहृद्गणावृतौ
बलं निहत्येव सुरेशकेशवौ ॥ [अधिकः पाठः]

॥ दशाधिकशततमोऽध्यायः ॥

कर्णवधानन्तरमर्जुनेन युधिष्ठिराभिवादनम् ॥ १ ॥ तेन कृष्णार्जुन-प्रशंसनम् ॥ २ ॥ कृष्णयुधिष्ठिरसंवादः ॥ ३ ॥

सञ्जयः—

हते वैकर्तने कर्णे कुरवो भयपीडिताः ।
वीक्षमाणा दिशस्सर्वाः पलायन्त सहस्रशः ॥ १

रावणं निहतं दृष्ट्वा राक्षसा लक्ष्मणाग्रजात् ।
दिशो भीता द्रवन्त्येव तावका भयपीडिताः ॥ २

ततो महारवं चक्रुर् योधा राजन् समन्ततः ।
वार्यमाणा भृशोद्विग्नास् तव पुत्रेण भारत ॥ ३

तेषां तु मतमाज्ञाय पुत्रस्ते भरतर्षभ ।
अपहारं ततश्चक्रे शल्यस्यानुमतेन च ॥ ४

कृतवर्मा रणे तूर्णं वृतो भारत [1]सैनिकैः ।
नारायणावशिष्टैश्च शिबिरायैव दुद्रुवे ॥ ५

अश्वत्थामा ततश्शूरो विनिश्वस्य मुहुर्मुहुः ।
पाण्डवानां जयं दृष्ट्वा शिबिरायैव दुद्रुवे ॥ ६

1. घ—तावकैः

[1]कृपश्शारद्वतो राजन् नागानीकेन भारत ।
महता मेघकल्पेन शिबिरायैव दुद्रुवे ॥ ७

गान्धाराणां सहस्रेण शकुनिः परिवारितः ।
सुशर्मा च ययौ राजन् वीक्षमाणो भयार्दितः ॥ ८

दुर्योधनोऽपि स ययौ हृतसर्वस्व आतुरः ।
ज्ञातिशोकसमापन्नश् चिन्तयित्वा मुहुर्मुहुः ॥ ९

छिन्नध्वजेन शल्यस्तु रथेन रथिनां वरः ।
प्रययौ शिबिरायैव वीक्षमाणो दिशो दश ॥ १०

ततोऽपरे सुबहुशो भारतानां महारथाः ।
व्यद्रवन्त दिशो भीता भयविह्वलचेतसः ॥ ११

अश्रु[2]कण्ठा भयोद्विग्ना वेपमाना भयातुराः ।
कुरवः प्राद्रवन् सर्वे दृष्ट्वा कर्णं निपातितम् ॥ १२

प्रशंसन्तोऽर्जुनं केचित् केचित् कर्णं महारथाः ।
प्राद्रवन्त रणे भीताः कुरवः कुरुसत्तम ॥ १३

तेषां योधसहस्राणां तावकानां महामृधे ।
नासीत् तत्र पुमान् कश्चिद् यस्तु युद्धे मनो दधे ॥ १४

---

1. अ—अर्धचतुष्टयं नास्ति
2. ङ—पूर्णा

कर्णे हते महाराज निराशाः कुरवोऽभवन् ।
जीवितेषु च राज्येषु दारेषु च धनेषु च ॥ १५

तान् समानीय पुत्रस्ते यत्नेन महता विभो ।
निवेशाय मनो दध्रे दुःखशोकसमन्वितः ॥ १६

तस्याज्ञां शिरसा दीनाः प्रतिगृह्य विशां पते ।
विषण्णमनसो भूत्वा न्यविशन्त महारथाः ॥ १७

[1]चिन्तयन्तो वधं घोरं सूतपुत्रस्य संयुगे ।
अर्जुनस्य जयं युद्धे चिन्तयानाः पुनः पुनः ॥ १८

पाण्डवाश्च महेष्वासा न्यविशन्त परन्तपाः ।
प्रहृष्टमनसस्सर्वे जित्वा शत्रुं महारथाः ॥ १९

ततो युधिष्ठिरं तत्र निविष्टं वै मुदाऽन्वितम् ।
समेत्य सर्वे पाञ्चाला वर्धयन्तो यथाविधि ॥ २०

[2]शशंसुर्निहतं कर्णं फल्गुनेन महात्मना ॥ २०॥

अर्जुनस्तु रथात्तूर्णम् अवरुह्य महायशाः ।
धर्मराजस्य चरणौ पीडयामास हृष्टवत् ॥ २१॥

तमुत्थाप्य महाराज धर्मपुत्रः प्रतापवान् ।

---

1. क-ख-ङ—अर्धचतुष्टयं नास्ति
2. क-ख-घ-ङ—नास्तीदमर्धम्

सस्वजे भरतश्रेष्ठम् उपजिघ्रन्नुपस्पृशन् ॥ २२॥

नकुलस्सहदेवश्च पाण्डवश्च वृकोदरः ।
अभिवाद्य महाराजम् अस्वजन्त स्म फल्गुनम् ॥ २३॥

धृष्टद्युम्नश्शिखण्डी च पाण्डवानां च ये रथाः ।
वर्धयन्ते स्म राजानं निहते सूतनन्दने ॥ २४॥

[1]ततः कृष्णो महाराज सात्यकिश्चापि सात्वतः ।
अवर्धयेतां राजानं निहते सूतनन्दने ॥ २५॥

वासुदेवश्च कौन्तेयं प्रणयादिदमब्रवीत् ॥ २६

श्रीभगवान्—

अद्य राजन् हतास्सर्वे धार्तराष्ट्रास्सराजकाः ।
हते वैकर्तने कर्णे रथानां प्रवरे रथे ॥ २७

यदि लोकास्त्रयस्सर्वे योधयेयुस्सवासवाः ।
तथाऽपि दुर्जयस्सूतस् तव कोपात् तु सूदितः ॥ २८

सञ्जयः—

एवमुक्तः प्रत्युवाच धर्मराजो जनार्दनम् ॥ २८॥

युधिष्ठिरः—

तव प्रसादाद्गोविन्द हतः कर्णो महायशाः ।

---

1. अ—नास्तीदमर्धम्

पाण्डवाश्च जयं प्राप्ता नाशिताश्चापि शत्रवः ॥ २९॥

त्वं हि शक्तो भयात् त्रातुं यस्य कस्यचिदाहवे ।
त्वमस्य जगतो गोप्ता पाण्डवानां च सर्वदा ॥ ३०॥

त्वां समासाद्य शक्रोऽपि मोदते दिवि नित्यशः ।
त्वं पाता पाण्डुपुत्राणां यथैव जगतस्तथा ॥ ३१॥

अनाश्चर्यो जयस्तेषां भक्तिर्येषां त्वयि प्रभो ॥ ३२

त्वया नाथेन गोविन्द नाथवन्तो वयं युधि ।
यथेन्द्रेण पुरा देवास् त्वया चापि जनार्दन ॥ ३३

स्वप्स्याम्यद्य सुखं कृष्ण निद्रां लप्स्ये त्वहं क्षपाम् ।
विगतं हि भयं मेऽद्य त्वत्प्रसादान्न संशयः ॥ ३४

सञ्जयः—

एवमुक्तस्तु पार्थेन केशवः प्राह पाण्डवम् ॥ ३४॥

श्रीभगवान्—

निमित्तमात्रं हि वयं तवाप्यस्मिन् मुदागमे ॥ ३५

यस्य ते भ्रातरश्शूरा भीमसेनादयो नृप ।
सम्बन्धिनश्चेन्द्रवीर्याः पार्षतप्रमुखास्तथा ॥ ३६

अर्हते च भवान् वक्तुं प्रियं नित्यं च मद्धितम् ।
प्रियो हि मे त्वमेतेन वचनेन नरोत्तम ॥ ३७

सञ्जयः—

इत्युक्तो धर्मराजस्तु स्वरथं हेमभूषितम् ।
दन्तवर्णैर्हयैर्युक्तं कालवालैर्महीपतिः ॥ ३८

आस्थाय पुरुषव्याघ्रस् स्वबलेनापि संवृतः ।
प्रययौ बहुवृत्तान्तं द्रष्टुमायोधनं प्रति ॥ ३९

सम्भाषमाणौ तौ वीरावुभौ माधवपाण्डवौ ॥ ३९॥

[1]प्रदीपहस्ताश्शतशस् समन्तात् प्रययुर्नराः ॥ ४०

स ददर्श रणे कर्णं शयानं पुरुषर्षभम् ।
गाण्डीवमुक्तैर्विशिखैस् सर्वतस्संनिपीडितम् ॥ ४१

[2]सपुत्रं निहतं दृष्ट्वा कर्णं राजा युधिष्ठिरः ।
प्रशशंस नरव्याघ्रावुभौ माधवपाण्डवौ ॥ ४२

युधिष्ठिरः—

अद्य राजाऽस्मि सर्वस्याः पृथिव्या मधुसूदन ।
दिष्ट्या जयसि गोविन्द दिष्ट्या शत्रुर्निपातितः ॥ ४३

सञ्जयः—

एवं सुबहुशो राजन् प्रशशंस जनार्दनम् ।
अर्जुनं च कुरुश्रेष्ठो धर्मराजो युधिष्ठिरः ॥ ४४

---

1. क-ख—इदमर्धं नास्ति
2. अ—अर्धपद्यकं नास्ति

दृष्ट्वा च निहतं कर्णं सपुत्रं पार्थसायकैः ।
पुनर्जातमिवात्मानं मेने कुरुकुलोद्वहः ॥ ४५
[1]पुनश्च शिबिरं प्राप्तो भ्रातृभिर्हरिणा ततः ॥ ४५॥

कृत्वा तु यच्च कर्तव्यं सुखासीनं युधिष्ठिरम् ।
समेत्य च [2]कुरुश्रेष्ठं कुन्तीपुत्रं युधिष्ठिरम् ॥ ४६॥
वर्धयन्ति स्म राजानो हर्षयुक्ता महारथाः ॥ ४७

एवमेष क्षयो वृत्तस् सुमहान् रोमहर्षणः ।
तव दुर्मन्त्रिते राजन् दिष्ट्या त्वमनुशोचसि ॥ ४८

वैशम्पायनः—

श्रुत्वैतदप्रियं राजा धृतराष्ट्रो महीपतिः ।
पपात भूमौ निश्चेष्टः कौरव्यः परमासनात् ॥ ४९
तथा सत्यव्रता देवी गान्धारी दिव्यदर्शना ॥ ४९॥

ततस्तूर्णं तु विदुरस् तं नृपं सञ्जयस्तथा ।
पर्याश्वासयतां चैतावुभावेव तु भूमिपम् ॥ ५०॥

---

1. क-ख-घ-ङ—अर्धद्वयं नास्ति
2. अ—महाराज राजानस्तमनुव्रताः ।
वर्धयन्ति स्म संहृष्टा हर्षयुक्तं महारथाः ॥
[पाठान्तरम्]

तथैवाश्वासयामास गान्धारी राजसत्तमम् ॥ ५१

स दैवं परमं मेने भवितव्यं च भारत ।
ताभ्यामाश्वासितो राजा तूष्णीमास्ते विशां पते ॥ ५२

एवमाख्याय राज्ञे स सञ्जयो राजसत्तम ।
जगाम शिबिरं भूयो हते कर्णे महात्मनि ॥ ५३

स दृष्ट्वा निहतं शल्यं राजानं च सुयोधनम् ।
योधांश्च सुबहून् राजन् सैनिकांश्च सहस्रशः ॥ ५४

तथैव पाण्डवीं सेनां निहतां प्रेक्ष्य सञ्जयः ।
सौप्तिके द्रौणिना राजन् हतवाजिरथद्विपाम् ॥ ५५

स हि दृष्ट्वा हतान् सर्वान् समस्तान् योधसत्तमान् ।
प्रयातो हास्तिनपुरं शोकार्तो विह्वलन्निव ॥ ५६

हतेषु पुनरेतेषु प्रभूतगजवाजिषु ।
योधैश्चैव महाराज नानादेशसमुद्भवैः ॥ ५७

कुरुक्षेत्रं तु तत् सर्वं शून्यमासीज्जगत्पते ।
निहतैः पाण्डवेयैश्च धार्तराष्ट्रैश्च संयुगे ॥ ५८

यथाविषयजं वृत्तं धृतराष्ट्रस्य सञ्जयः ।
निवेदयति तत् सर्वं यथावृत्तं यथाविधि ॥ ५९

एवं महायुद्धमिदं महात्मनोर्
धनञ्जयस्यातिरथेश्च यः पठेत् ।
स सम्यगिष्टस्य मखस्य यत् फलं
तदाप्नुयाद्यश्शृणुयाच्च नित्यशः ॥ ६०

मखो हि विष्णुर्भगवान् सनातनो
वहन्ति यं चाप्यनिलेन्दुभानवः ।
अतोऽनसूयुश्शृणुयात् पठेच्च यस्
स सर्वलोकांश्च जयेत् सुखी भवेत् ॥ ६१

इति श्रीमहाभारते शतसहस्रिकायां संहितायां वैयासिक्यां
कर्णपर्वणि दशाधिकशततमोऽध्यायः ॥ ११० ॥
॥ ७३ ॥ कर्णपर्वणि दशाधिकशततमोऽध्यायः ॥ ११० ॥

[अस्मिन्नध्याये ६१ श्लोकाः]

॥ ७३ ॥ कर्णपर्व समाप्तम् ॥

॥ समाप्तमिदं कर्णपर्व ॥

॥ अस्मिन् कर्णपर्वणि ५००१॥ श्लोकाः ॥

अतःपरं शल्यपर्व भविष्यति । तस्यायमाद्यश्श्लोकः ॥



जनमेजयः—

एवं निपातिते कर्णे समरे सव्यसाचिना ।
अल्पावशिष्टाः कुरवः किमकुर्वत वै द्विज ॥ १

॥ श्रीरस्तु ॥

महाभारतस्य कर्णपर्वस्थानां विषयाणाम्

अक्षरमातृकाक्रमेण सूचनम्

	अध्यायः-पुटम्
अर्जुनपराक्रमः	१०५-६७४
अर्जुनपराक्रमवर्णनम्	५८-३४५
अर्जुनपराक्रमवर्णनम्	५६-३३२
अर्जुनप्रभावकीर्तनम्	२२-११९
अर्जुनप्रहारमसहमानैः कुरुभिः कर्णं प्रत्यर्जुनहननप्रार्थनम्	१०५-६६८
अर्जुनस्य कर्णवधप्रस्थानकाले शुभनिमित्तप्रादुर्भावः	८१-४८८
अर्जुनस्य कलिङ्गवङ्गाद्यधिपैस्सह युद्धकरणम्	८७-५३४
अर्जुनस्य संशप्तकैस्सह युद्धम्	५१-३०१
अर्जुनवचनमसहमानेन युधिष्ठिरेण स्ववधनियमनपूर्वकं वनप्रस्थानोद्यमः	७९-४७९
अर्जुनवहनपूर्वकं तच्चोदनया श्रीभगवता अश्वत्थामानं प्रति युद्धाय सन्नाहचोदनम्	५७-३३८
अर्जुनाश्वत्थाम्नोर्युद्धम्	५८-३४४
अर्जुनेन कर्णपीडितयुधिष्ठिरसन्दर्शनाय श्रीभगवन्तं प्रतिचोदनम्	७३-४२६
अर्जुनेन कर्णहननप्रतिज्ञानम्	७५-४४४
अर्जुनेन कर्णवधप्रतिज्ञानपूर्वकं भगवदनुज्ञाप्रार्थनम्	८०-४८४
अर्जुनेन कर्णवधकरणे युधिष्ठिरपादयोः शपथविधानम्	८०-४८७
अर्जुनेन कर्णवधानन्तरं भाविसन्दर्भवर्णनम्	८४-५१०
अर्जुनेन कर्णवधप्रतिज्ञानम्	८४-५१२
अर्जुनेन कर्णवधानन्तरं स्वस्य सर्वजनप्रीतिपात्रत्ववर्णनम्	८४-५१४
अर्जुनेन कर्णवधशंसनपूर्वकं युधिष्ठिरपादाभिवन्दनम्	११०-७२९
अर्जुनेन कर्णे स्वसामर्थ्यसन्दर्शनम्	१०५-६६५
अर्जुनेन दण्डदण्डधारयोर्वधः	५९-३४९

	अध्यायः-पुटम्
अर्जुनेन नकुलादीनां प्रशंसनम्	७८-४७०
अर्जुनेन प्रतियोद्धृभावेन तस्य दुर्वारवीर्यकथनम्	५१-३०७
अर्जुनेन भगवन्तं प्रति स्वस्य रथबन्धान्मोचनेनान्य-सदृशत्वकथनम्	५१-३०४
अर्जुनेन भगवन्तं प्रति कर्णसमीपयानचोदनम्	५६-३३०
अर्जुनेन भीमपराक्रमप्रशंसनम्	७८-४६६
अर्जुनेन भीमहतशिष्टसंशप्तकहननम्	६७-४००
अर्जुनेन युधिष्ठिरवधोद्यमकारणनिवेदनम्	७७-४५५
अर्जुनेन युधिष्ठिरगर्हणम्	७८-४६६
अर्जुनेन युधिष्ठिराधिक्षेपेण स्वात्महननोद्यमः	७८-४७४
अर्जुनेन युधिष्ठिरं प्रति पादाभिवन्दनपूर्वकं तत्प्रसादप्रार्थनम्	७८-४७७
अर्जुनेन युद्धे रक्तनद्युत्पादनम्	९०-५५५
अर्जुनेन वृषसेनवधः	९९-६२३
अर्जुनेन शपथपूर्वकं मुक्तेन बाणेन कर्णशिरोहरणम्	१०७-७०१
अर्जुनेन श्रीभगवन्तं प्रति नागविषयकप्रश्नः	१०६-६८५
अर्जुनेन श्रीभगवतः कर्णसमीपप्रापणचोदनम्	९०-५५६
अर्जुनेन श्रीभगवन्तं प्रति कर्णप्रयुक्तभार्गवास्त्रमहिमानुवर्णनम्	७२-४२४
अर्जुनेन श्रीभगवन्तं प्रति कुन्तीयुधिष्ठिरयोस्सान्त्वनचोदनम्	१०२-६४३
अर्जुनेन सकृत्प्रहृत्य नानास्त्रप्रयोगेण शत्रुनिबर्हणम्	५१-३०५
अर्जुनेन सत्यदेवादीनां शिरश्छेदनम्	१८—९९
अर्जुनेन संशप्तकैर्युद्धवर्णनम्	५७-३३५
अर्जुनेन संशप्तकानां युद्धम्	६०-३५५
अर्जुनेन संशप्तकान् प्रति गमनम्	६३-३८०
अर्जुनेन स्वयुद्धकथनम्	७५-४४१
अर्जुनेन स्वपराक्रमकथनपूर्वकं कर्णशल्ययोस्तुच्छत्वकथनम्	१०२-६४२
अर्जुनेन स्वप्रशंसनम्	७८-४७६
अर्जुनेनाश्वत्थाम्नो भुवि पातनम्	७२-४२०
अर्जुनेनाश्वत्थामपराजयः	६३-३७९

	अध्यायः-पुटम्
अर्जुनेनाश्वत्थामपराजयः	५८-३४८
अशरीरिण्याः वाचो निरूपणम्	५७-३३७
अश्वत्थाम्ना पाण्ड्यात्मानपूर्वकं युद्धविधानम्	६१-३६५
अश्वत्थाम्ना पाण्ड्यवधः	६१-३६९
अश्वत्थामप्रतिज्ञावचनम्	४०-२३९
अश्वत्थाम्ना युधिष्ठिरपराजयः	५३-३१७
अश्वत्थाम्ना युधिष्ठिरगर्होक्तेः नोत्तरप्रतिपादनम्	५३-३१९
अश्वत्थाम्ना अर्जुनसमाह्वानम्	५७-३३७
अश्वत्थाम्ना कर्णस्य सैनापत्यकरणचोदनम्	७—४१
अश्वत्थामधृष्टद्युम्नयोर्युद्धम्	६२-३७४
अश्वत्थामधृष्टद्युम्नयोर्युद्धम्	६३-३७६
अश्वत्थाम्न्यर्जुनपराक्रमवर्णनम्	५७-३४२
अश्वत्थाम्नाऽर्जुनपराक्रमस्य परिहासः	५७-३४०
अश्वत्थाम्ना युधिष्ठिरं प्रति रणाय प्रस्थानम्	५३-३१४
अश्वत्थाम्ना दुर्योधनं प्रति पाण्डवैश्शमविधानचोदनम्	१०३-६४८
असुरैः कर्णसंरक्षणम्	१००-६२९
इन्द्रेणार्जुनस्यैव जयप्रार्थना	१०१-६३६
कर्णधृष्टद्युम्नयोर्युद्धवर्णनम्	५५-३२४
कर्णनकुलयोर्युद्धे संवादः	१५—७८
कर्णनागाश्वेनार्जुनकिरीटमालापहरणम्	१०६-६८१
कर्णपराक्रमवर्णनम्	४५-२६९
कर्णपराक्रमवर्णनम्	८९-५४८
कर्णपीडितेन युधिष्ठिरेण स्वशिबिरप्रवेशः	७१-४१७
कर्णप्रशंसनपूर्वकं तन्मरणानन्तरकालिकसम्भवर्णनम्	१०९-७२०
कर्ण ब्राह्मणसंवादः	३६-२१८
कर्णमरणेन शल्यपराभवः	१०८-७०९
कर्णयुद्धवर्णनम्	७२-४२३
कर्णयुद्धम्	१०५-६६९
कर्णयुधिष्ठिरयुद्धम्	४४-२६४

	अध्यायः-पुटम्
कर्णवधानन्तरं कुर्वादिभिस्सैन्यं स्वावासं प्रति गमनम्	११०-७२७
कर्णवधानन्तरं श्रीभगवदर्जुनतेजोवर्णनम्	१०५-७२३
कर्णशिरसः भूपतनसन्दर्भवर्णनम्	१०७-७०६
कर्णशिरसः भूमौ पतनम्	१०७-७०४
कर्णशिरसः भूमौ पतनेनार्जुनं प्रति सोमकादिभिः प्रशंसनादिकरणम्	१०७-७०५
कर्णस्य रणप्रस्थानसमये दुर्निमित्तसम्भवः	३०-१७२
कर्णार्जुनाभ्यामस्त्रयुद्धविधानम्	१०७-६९९
कर्णार्जुनयोर्युद्धम्	१०६-६८६
कर्णार्जुनयोर्युद्धम्	१०६-६७६
कर्णार्जुनयोरन्यतरस्य वीर्याधिक्यकथनम्	१०६-६७८
कर्णार्जुनयोर्वर्णनम्	१०४-६५३
कर्णार्जुनयोर्युद्धम्	१०४-६५७
कर्णार्जुनयोर्युद्धवर्णनम्	१०३-६४४
कर्णार्जुनध्वजवर्णनम्	१०२-६४०
कर्णार्जुनयोः युद्धाय सङ्गमस्य देवगन्धर्वादिभिस्सन्दर्शनम्	१००-६२६
कर्णार्जुनादियुद्धवर्णनम्	९१-५६८
कर्णेन कौरवैस्सह मन्त्रालोचनम्	२२-१२०
कर्णेन द्विरावृत्त्या स्वस्य शरसन्धातृत्वाभावकथनम्	१०६-६८०
कर्णेन धृतराष्ट्रसमीपे ब्राह्मणोक्तवृत्तान्तकथनम्	३७-२२२
कर्णेन नकुलस्य पराभवाधिक्षेपौ	१५—७९
कर्णेन नागं प्रति सरोषं स्वपराक्रमकथनम्	१०६-६८४
कर्णेन परव्यूहं प्रति प्रवेशः	४१-२४३
कर्णेन परशुरामात् कुतश्चिद्ब्राह्मणाच्च शापप्राप्तिः	३५-२०८
कर्णेन ब्राह्मणाच्छापप्राप्तिकथनम्	३६-२१७
कर्णेन बाह्लीकादिदेशविगर्हणम्	३८-२२५
कर्णेन ब्राह्मणोक्त्यनुवादः	३८-२२७
कर्णेन भीमकोपस्य स्वानुकूलत्वकथनम्	४७-२८०
कर्णेन मकरव्यूहनिर्माणम्	८—४९

	अध्यायः-पुटम्
कर्णेन युधिष्ठिरपराजयः	४५-२७०
कर्णेन युधिष्ठिरपराभवोक्तिः	४५-२७२
कर्णेन युधिष्ठिरव्यथनम्	७१-४१४
कर्णेन रथतुरगादीनामप्रतिमानां युद्धोपकरणत्ववर्णनम्	२२-१२५
कर्णेन विजयनाम्नो धनुषः प्राप्तितत्प्रभावयोश्च वर्णनम्	२२-१२४
कर्णेन शल्यदेशविगर्हणम्	३८-२२८
कर्णेन शत्रुविनाशनप्रतिज्ञानम्	३५-२१०
कर्णेन शल्यविगर्हणम्	३७-२२०
कर्णेन शल्यविगर्हणम्	३३-१९०
कर्णेन शिखण्डिपराजयः	६८-४०४
कर्णेन श्रीभगवदर्जुनवधप्रतिज्ञानम्	९१-५६७
कर्णेन सेनाहर्षणपूर्वं युद्धाय निर्याणम्	८—४७
कर्णेन स्वबलप्रशंसनम्	७२-४२२
कर्णेन स्वस्मा अर्जुनप्रदर्शकाय पारितोषिकदानप्रतिज्ञानम्	३१-१८१
कर्णेनार्जुनवधप्रतिज्ञानम्	२२-१२३
कर्णेनार्जुनवधप्रतिज्ञानपूर्वं योगाज्ञापनम्	७—४६
कर्णेनार्जुनवधप्रतिज्ञानम्	९१-५६२
कर्णेनार्जुनप्रशंसनम्	९१-५६३
कर्णेनार्जुनं प्रति मुहूर्तैकालं सहेतूपपादनं स्वस्मिन् बाणमोक्षनिवारणप्रार्थनम्	१०६-६९५
कर्णेनार्जुनशिरोजिहीर्षया नागास्त्रप्रयोगः	१०६-६७९
कर्णेनात्मश्लाघनपूर्वकमर्जुनवधप्रतिज्ञा	३०-१७३
कुरुभिः कर्णमरणदर्शनेन पलायनम्	१०८-७०८
कृतवर्मणा शिखण्डिनः पराजयः	१७—९५
कृपेण धृष्टद्युम्नपराजयः	१७—९२
कृपादियुद्धवर्णनम्	५२-३०९
गजयुद्धम्	६५-३८५
त्रिपुरनिर्माणादिप्रकारकथनम्	२४-१३९
त्रिपुरासुरपीडितैः देवैः परमेश्वरप्रसादनम्	२४-१३८

	अध्यायः-पुटम्
दुर्योधनेन कर्णं प्रति सैनापत्याभिषेचनप्रार्थनम्	७—४२
दुर्योधनेन कर्णं प्रति शत्रुजयप्रार्थनम्	३०—१७०
दुर्योधनेन कर्णप्रभावकथनम्	२८—१६५
दुर्योधनेन कर्णरक्षणाय सहोदराणां प्रेषणम्	४८—२८६
दुर्योधनेन दृष्टान्तकथनपूर्वकं शल्यं प्रति कर्णसारथ्य-करणप्रार्थनं त्रिपुरसंहारकथनं च	२७—१५८
दुर्योधनेन पराभवकथनपूर्वकं कर्णचोदनम्	७२—४२२
दुर्योधनेन युद्धाय कुरून् प्रत्याज्ञापनम्	७—४०
दुर्योधनेन शल्यकर्णयोः सान्त्वनम्	३९—२३३
दुर्योधनेन शल्यादिप्रोत्साहनम्	४०—२३८
दुर्योधनेन शल्यकोपशमनाय शल्यपदनिर्वचनपूर्वकं-तत्प्रभाववर्णनपूर्वकं च सारथ्ये नियोजनम्	२३—१३५
दुर्योधनेन शल्यं प्रति त्रिपुरासुरकथाकथनम्	२४—१३६
दुर्योधनेन शल्यं प्रति सारथ्येन कर्मणा कर्णसहायताचोदनम्	२३—१२८
दुर्योधनेन शकुनिं प्रति भीमवधचोदनम्	८८—५४२
दुर्योधनेनाश्वत्थामवचनानादरणपूर्वकं युद्धाय सेनाप्रचोदनम्	१०३—६५१
दुर्योधनसेनया युद्धोपक्रमः	४०—२४०
दुर्योधनेन स्वसैन्यनिवर्तनम्	१०५—६७५
दुश्शासनपराक्रमवर्णनम्	९५—५९७
देवैः ब्रह्माणं प्रति रुद्रसारथ्यकरणप्रार्थनम्	२६—१५५
देवैः कृता परमेश्वरस्तुतिः	२४—१४४
देवैरर्जुनसंरक्षणम्	१००—६२९
द्वन्द्वयुद्धम्	१०—५८
द्वन्द्वयुद्धम्	८५—५१७
धृतराष्ट्रेण कर्णवधश्रवणेन मूर्च्छोपगमः	१—४
धृतराष्ट्रेण कर्णगुणानुवर्णनपूर्वकं शोचनम्	५—२५
धृतराष्ट्रेण कर्णवधानन्तरीयककथाप्रश्नः	६—३२
धृतराष्ट्रेणार्जुनपराक्रमवीक्षया भयाधिगमः	६२—३७०
धृतराष्ट्रेणोक्तांशस्य पुनः प्रश्नः	१—५

	अध्यायः-पृष्ठम्
धृतराष्ट्रेण दुस्सहदुःखाधिगमः	४—२४
धृतराष्ट्रेण स्वचिन्तानुवर्णनम्	६—२९
धृतराष्ट्रेण स्वपुत्रान् प्रति गर्हणम्	६—३१
धृतराष्ट्रेण स्वदुर्दशाकथनम्	६८—४०१
धृतराष्ट्रेण शत्रुहतानां हतशिष्टानां च नामकथनचोदनम्	२—७
धृष्टद्युम्नदुश्शासनयोर्युद्धम्	६८—४०५
धृष्टद्युम्नेन स्वसारथिं प्रति स्वरक्षणोपायकथनम्	१७—५४
धृष्टद्युम्नेन दुर्योधनपराजयः	५४—३२३
नागेन कर्णं प्रति स्वकृतकार्यनिवेदनपूर्वकं यथागतगमनप्रार्थनम्	१०६—६८४
नागेन कर्णवाक्यमसहमानेन पुनरप्यर्जुनवधाय यानम्	१०६—६८५
परमेश्वरेण देवेभ्यः तेजसोऽर्धांशग्रहणपूर्वकं पशुपति, भवादि-शब्दनिरुक्तिकथनपूर्वकं च त्रिपुरसंहारायाभिषेकोपगमः	२५—१४९
परमेश्वरेण पशुभावकल्पनाकारणकथनम्	२५—१४८
परमेश्वरेण सर्वेष्वपि लोकेषु पशुभावपरिकल्पनचोदनम्	२५—१४८
परशुरामचरितकथनम्	२८—१६१
पाण्ड्यवीर्यवर्णनम्	६१—३६४
पाण्डवैः कौरवसेनायाः विद्रावणम्	७२—४२१
पागादिदिक्पालकथनम्	३८—२३१
पाजापतिना ब्रह्माणं प्रति कर्णार्जुनयोः विजयप्रश्नः	१०१—६३५
पाजापतिना कर्णार्जुनयोः जयसाम्यप्रार्थना	१०१—६३६
पातिविन्ध्यश्रुतकर्मभ्यां चित्रचित्रसेनयोस्संहारः	११—६२
पालाकोपाख्यानकथनम्	७७—४५८
पाह्मणा रुद्रसारथ्यकरणम्	२७—१५७
पाह्मादिभिः देवैः स्वस्वतेजसोऽर्धदानपूर्वकं त्रिपुरसंहारयाचनम्	२५—१४५
पाह्मणा देवान् प्रति परमेश्वरद्वारा त्रिपुरसंहारकथनम्	२४—१४२
पाह्मेशानाभ्यामर्जुनस्यैव जयाशंसनं देवैः पुष्पवर्षणं च	१०१—६३८
पाह्मणादिभिः कर्णं प्रति मङ्गलाशंसनम्	७—४५
भीमकर्णयोर्युद्धम्	४७—२८२
भीमकर्णयोर्युद्धम्	४८—२८८

	अध्यायः-पुटम्
भीमदुर्योधनयोर्युद्धम्	४०-२४१
भीमदुश्शासनयोस्समागमः	९४-५९२
भीमदुश्शासनविवादः	९४-५९४
भीमदुश्शासनयोर्युद्धम्	९४-५९५
भीमपराक्रमः	८७-५३८
भीमपराक्रमवर्णनम्	८८-५४१
भीमपराक्रमदर्शनेन कर्णस्य भयोत्पत्तिः	९६-६११
भीमयुद्धकथनम्	६७-३९८
भीमसेनविशोकयोः संवादः	८६-५२२
भीमस्य दुश्शासनहननेनाचिन्त्यवीर्यत्वकथनम्	९६-६०८
भीमादिभिरर्जुनपरिष्वङ्गः	११०-७३०
भीमाश्वत्थाम्नोर्युद्धम्	१२—६७
भीष्मादीनां वधेऽर्जुनस्यैव कारणत्वकथनम्	८२-४९४
भीमेन कर्णपराजयः	४७-२८३
भीमेन कर्णजिह्वाच्छेदनकारणप्रतिपादनम्	४७-२८४
भीमेन कर्णहननायार्जुनप्रोत्साहनम्	१०४-६६२
भीमेन दुर्योधनानुजानां हननम्	४८-२८७
भीमेन दुर्योधनशिरोमर्दनप्रतिज्ञानम्	९६-६०९
भीमेन दुश्शासनसन्ताडनम्	९५-६००
भीमेन दुश्शासनस्य पिष्टवत्पेषणम्	९५-६०४
भीमेन दुश्शासनरक्तस्य सर्वरसोत्तरत्वेन पानम्	९५-६०५
भीमेन दुश्शासनस्यैव सर्वदुःखहेतुत्वकथनम्	९६-६०७
भीमेन दुश्शासनानुजानां वधः	९६-६१०
भीमेन बहुधा दुश्शासनपीडनम्	९५-६०१
भीमेन विचेतनीकृतस्य दुश्शासनस्य रक्तपाने चिन्ताधिगमः	९५-६०३
भीमेन विसंज्ञस्य दुश्शासनस्य वक्त्रेण संज्ञोत्पादन-पूर्वकमुभयोर्विवादः	९५-६०३
भीमेन विदारितस्य दुश्शासनस्य वक्षसः रक्तपानम्	९५-६०४
भीमेन शकुनिपराजयः	८८-५४५

	अध्यायः-पुटम्
भीमेन सर्ववीरसमक्षं दुश्शासनरक्तपानसमये तं प्रति वक्तव्यवचनोपदेशः	९५-६०६
भीमेन क्षेमधूर्तिवधः	९—५६
भीमेनैकेन कौरवादिभिर्युद्धवर्णनम्	५५-३२८
यथाविधि कर्णस्य सैनापत्याभिषेचनम्	७—४४
युयुत्सूलूकयोर्युद्धम्	१६—८७
युधिष्ठिरदुर्योधनयोर्युद्धम्	२०-१०८
युधिष्ठिरशक्तिहतेन दुर्योधनेन भूमौ पतनम्	२०-१११
युधिष्ठिरचोदितेनार्जुनेनार्धचन्द्रव्यूहनिर्माणम्	८—५०
युधिष्ठिरार्जुनाभ्यां परस्परमाश्लेषपूर्वकं रोदनम्	८०-४८३
युधिष्ठिरेण कर्णवधाभावे स्वप्राणत्यागप्रतिज्ञानम्	८०-४८४
युधिष्ठिरेण कर्णकृतयुद्धप्रकारकथनम्	७४-४३२
युधिष्ठिरेण कर्णस्यामारणज्ञानादर्जुनं प्रति गर्हणम्	७६-४४६
युधिष्ठिरेण भगवद्वाक्यानुल्लङ्घनम्	७९-४८१
युधिष्ठिरेण भीमसंरक्षणाय नकुलसहदेवचोदनम्	७१-४१८
युधिष्ठिरेण युद्धे योद्धृक्रमप्रदर्शनम्	४१-२४९
युधिष्ठिरेण श्रीभगवदर्जुनौ प्रति स्वागतप्रश्नः	७४-४३१
युधिष्ठिरेण स्वीयजयस्य श्रीभगवदनुग्रहमूलत्वकथनम्	११०-७३१
युधिष्ठिरेणार्जुनं प्रति परव्यूहभेदिव्यूहनिर्माणचोदनम्	४१-२४८
युधिष्ठिरेणार्जुनं प्रति सकारणकथनं कर्णवधप्रश्नः	७४-४३४
युधिष्ठिरेणार्जुनं प्रति श्रीभगवति गाण्डीवदानचोदनम्	७६-४५३
युधिष्ठिरेणाश्वत्थामानं प्रति गर्हणम्	५३-३१८
युद्धभूमौ मृतानां शरीरराशिवर्णनम्	१८-१०१
युद्धे सैनिकोक्तिकथनम्	४१-२४३
राजभिः द्वन्द्वीभूय युद्धविधानम्	६८-४०३
विदुरेण धृतराष्ट्रादिसमाश्वासनम्	११०-७३४
विश्वकर्मणा परमेश्वरमुद्दिश्य भूमेः रथत्वापादनपूर्वकं तन्महिमानुवर्णनम्	२६-१५०
वैशम्पायनेन कर्णपर्वणः पठनादिफलकथनम्	११०-७३५

	अध्यायः-पुटम्
शकुनिसुतसोमथोर्युद्धम्	१६—८९
शल्यकर्णसंवादः	३९-२३६
शल्यकर्णयोः कलहः	३९-२३२
शल्यकर्णयोस्सम्भाषणम्	१०२-६४१
शल्यचोदितेन कर्णेन भीमं प्रति युद्धायाभिगमनम्	४७-२८१
शल्येन कर्णं प्रति तिरस्कारवचनपूर्वं दुर्निमित्तकथनम्	३९-२३४
शल्येन कर्णविषये सारथ्यकर्मणो गर्ह्यत्वनिरूपणम्	२३-१३१
शल्येन कर्णसारथ्यमननुमन्यमानेनामर्षात् सभातो निर्गमनम्	२३-१३४
शल्येन कर्णसारथ्यस्वीकरणम्	२९-१६६
शल्येन कर्णविगर्हणम्	३०-१७८
शल्येन कर्णस्य प्रोत्साहनम्	९७-६११
शल्येन कर्णमरणाद्दुःखितस्य दुर्योधनस्य समाश्वासनम्	१०८-७१०
शल्येन कर्णं प्रति पाण्डवप्रशंसनम्	३०-१७१
शल्येन कर्णं प्रति भीमकोपवर्णनम्	४७-२७८
शल्येन कर्णं प्रति युधिष्ठिरहननचोदनम्	७१-४१६
शल्येन कर्णं प्रत्यर्जुनवधचोदनम्	९०-५५७
शल्येन पुनः कर्णविगर्हणम्	३१-१८५
शल्येन पुनः कर्णविगर्हणम्	३२-१८६
शल्येन भीमस्य सहेतुकं कर्णजिघांसानिषेधनम्	४७-२८३
शल्येन युद्धस्थलवर्णनम्	१०८-७१२
शल्येन विसंज्ञस्य कर्णस्यान्यतोऽपनयनम्	४७-२८५
शल्येन श्रुतकीर्तिजयः	१३—७२
शल्येन स्वस्य कर्णादूरीयस्त्ववर्णनम्	२३-१३३
श्रीभगवच्चोदनयाऽर्जुनेन गुरुपुत्रस्याश्वत्थाम्नो वधप्रतिज्ञानम्	५७-३४१
श्रीभगवता कर्णवधस्य युधिष्ठिरकोपमूलत्वकथनम्	११०-७३०
श्रीभगवता कर्णस्य दुर्नीतिस्मारणम्	८३-५०१
श्रीभगवता कर्णयुद्धप्रदर्शनम्	६७-३९४
श्रीभगवता कर्णं प्रति तत्कृतदुष्कृतस्मारणम्	१०७-६९६
श्रीभगवता दुर्योधनादीनां बलवीर्यादिप्रशंसनम्	६६-३९०

अध्यायः-पुटम्

श्रीभगवता दुर्योधनापनयस्य कर्णमूलत्वेन कर्णस्यैव हन्तव्यत्वकथनम् ८२-५००
श्रीभगवता पाण्डवेषु स्वानुग्रहसद्भावकथनम् ११०-७३१
श्रीभगवता भारतसैन्यादिक्षयवर्णनम् ६०-३५८
श्रीभगवता भीष्मादीनां पराक्रमवर्णनम् ८२-४९३
श्रीभगवता युधिष्ठिरसान्त्वनम् ७९-४८०
श्रीभगवता वध्यावध्यप्राणिनिरूपणम् ७७-४५७
श्रीभगवता शत्रुनिग्रहाय भीमावस्थापनम् ७३-४२५
श्रीभगवता संश्रितापत्सखेनार्जुनशिरसि कर्णप्रयुक्तनागास्त्रासंस्पर्शाय रथस्य भूमौ पञ्चाङ्गुलमज्जनम् १०६-६८०
श्रीभगवताऽर्जुनप्रोत्साहनम् ८१-४८९
श्रीभगवताऽर्जुनसाहाय्यककरणाय दारुकनियमनम् ८०-४८५
श्रीभगवताऽर्जुनगर्हणम् ७७-४५६
श्रीभगवताऽर्जुनं प्रत्यश्वत्थामादिचेष्टावर्णनम् ६२-३७०
श्रीभगवताऽर्जुनं प्रत्यश्वत्थान्नो धृष्टद्युम्नरक्षणचोदनम् ६३-३७८
श्रीभगवताऽर्जुनं प्रति युधिष्ठिरग्रहणे कुरूणां प्रयत्नकथनम् ६६-३८९
श्रीभगवताऽर्जुनं प्रति कर्णेन पाण्डवसैनिकविध्वंसनकथनम् ६७-३९२
श्रीभगवताऽर्जुनं प्रति युधिष्ठिरवधोद्यमकारणप्रश्नः ७७-४५४
श्रीभगवताऽर्जुनं प्रति कर्णवधचोदनम् ६०-३५७
श्रीभगवताऽर्जुनं प्रति युधिष्ठिराधिक्षेपस्य वधप्रतिनिधित्वकथनम् ७७-४६४
श्रीभगवताऽर्जुनं प्रति युधिष्ठिरस्य त्वंपदवाच्यत्वेनाधिक्षेपकरणोपदेशः ७७-४६४
श्रीभगवताऽर्जुनं प्रति युधिष्ठिरेऽपराधक्षापणपूर्वकं कर्णवधानुशासनम् ७७-४६५
श्रीभगवताऽर्जुनं प्रति युधिष्ठिरप्रसादननियमनम् ८०-४८२
श्रीभगवताऽर्जुनं प्रति कर्णवधचोदनम् ८३-५०५
श्रीभगवताऽर्जुनं प्रति कर्णहननप्रोत्साहनम् १०५-६६३
श्रीभगवताऽर्जुनं प्रति नागस्य पूर्ववृत्तकथनपूर्वकं तद्धननचोदनयाऽर्जुनेन तद्धननम् १०६-६८५

	अध्यायः-पुटम्
श्रीभगवताऽर्जुनं प्रति स्ववधतुल्यत्वेन स्वात्मप्रशंसननियमनम्	७८-४७५
श्रीभगवदर्जुनयोः कोपवर्णनम्	५६-३३१
श्रीभगवदर्जुनयोर्मूर्धनि पुष्पपतनम्	५७-३३७
श्रीभगवदर्जुनाश्वत्थाम्नां युद्धनिरूपणम्	५७-३३९
श्रीभगवदर्जुनाभ्यां युधिष्ठिरदर्शनाय शिबिरं प्रति गमनम्	७३-४२९
श्रीभगवदर्जुनाभ्यां युधिष्ठिरं प्रत्यभिवादनपूर्वकं परस्परमभिनन्दनम्	७३-४३०
श्रीभगवदर्जुनाभ्यामश्वत्थाम्नो युद्धम्	७२-४१९
श्रीभगवदर्जुनाभ्यां कर्णवधहर्षेण सकुतूहलं युधिष्ठिरसमीपगमनम्	१०९-७२४
श्रीभगवदपेक्षयाऽधिकतया स्तुतमहिम्ना शल्येन सारथ्यकरणाङ्गीकरणम्	२३-१३५
श्रीभगवद्वचनाद्युधिष्ठिरेणार्जुनं प्रति जयाशीर्वचनम्	८०-४८६
श्रीभगवद्युधिष्ठिराभ्यां कर्णवधस्थलदर्शनपूर्वकं युधिष्ठिरेण-श्रीभगवदर्जुनप्रशंसनम्	११०-७३२
श्वेताश्वादीनां युद्धवर्णनम्	१८—९७
षोडशदिवसयुद्धोपसंहारे परस्पराशीर्वचनपूर्वकं कुरुपाण्डवैस्स्वावासगतैस्सुखेन निवसनम्	२१-११८
सङ्कुलयुद्धम्	९—५२
सङ्कुलयुद्धम्	६४-३८१
सङ्कुलयुद्धम्	६५-३८६
सङ्कुलयुद्धम्	९७-६१२
सङ्कुलयुद्धम्	९८-६१८
सङ्कुलयुद्धम्	६२-३७१
सङ्कुलयुद्धम्	४९-२९३
सङ्कुलयुद्धम्	५०-२९३
सङ्कुलयुद्धम्	५२-३०८
सङ्कुलयुद्धम्	५३-३१५
सङ्कुलयुद्धम्	५४-३२०

	अध्यायः-पुटम्
सङ्कुलयुद्धम्	४२-२५०
सङ्कुलयुद्धम्	४३-२५५
सङ्कुलयुद्धम्	४४-२६६
सङ्कुलयुद्धम्	४६-२७३
सङ्कुलयुद्धम्	२१-११२
सङ्कुलयुद्धम्	१९-१०२
सङ्कुलयुद्धम्	६९-४०६
सङ्कुलयुद्धम्	७०-४१०
सङ्कुलयुद्धस्	९२-५७०
सङ्कुलयुद्धम्	९३-५७४
सङ्कुलयुद्धम्	९४-५८६
सञ्जयेन दुःखितानां धृतराष्ट्रादीनां समाश्वासनम्	१—४
सञ्जयेन दुश्शासनादीनां वधस्य कथनम्	१—५
सञ्जयेन द्रोणवधानन्तरमर्जुनकृत्यकथनम्	७—३८
सञ्जयेन धृतराष्ट्रसमाश्वासनम्	६—२८
सञ्जयेन धृतराष्ट्रं प्रति कर्णवधकथनम्	१—१
सञ्जयेन युद्धे हतानां परेषां नामकथनम्	३—१४
सञ्जयेन वृत्तचरितकथनानन्तरं हास्तिनपुरं प्रति गमनम्	११०-७३४
सञ्जयेन शत्रुहतानां नामकथनम्	२—७
सञ्जयेन हतशिष्टानां नामकथनम्	४—१९
सहदेवेन दुश्शासनपराजयः	१४—७५
सात्यकिना विन्दानुविन्दाभ्यां युद्धविधानम्	१०—६०
सेनाद्वये व्यूहवर्णनम्	४१-२४६
स्त्रिया दस्यून् प्रति शापदानम्	३८-२२८
हंसकाकीयोपाख्यानम्	३४-१७७

॥ श्रीः ॥

महाभारतकर्णपर्वस्थानामशुद्धानां शोधनम्

पुटम्	पंक्तिः	अशुद्धम्	शोधनम्
१५	१३	मदामात्रैष्	महामात्रैष्
२७	१६	सान्त्वमानो	सान्त्व्यमानो
३७	१०	किमप्रवीत्	किमब्रवीत्
३८	११	तन्माचक्ष्व	तन्ममाचक्ष्व
४२	१८	पुरुस्कृत्य	पुरस्कृत्य
४३	१०	सैनान्ये	सेनान्ये
४५	११	सानुवन्धान्	सानुबन्धान्
६५	११	ईधा	द्विधा
७३	५	सन्ततपर्वभिः	संनतपर्वभिः
,,	२०	विष्टभ्य	विष्टभ्य
८७	१६	तद्धनुच्छिन्नं	तद्धनुश्छिन्नं
१०२	१८	सदसा	सहसा
१०३	६	चदुर्भिः	चतुर्भिः
१०६	२०	उद्यस्य	उद्यम्य
१०९	७	रज्ञास्स्यन्दन	राज्ञस्स्यन्दन
१३९	७	विसृष्टचर्थं	विसृष्टश्चर्थं
१४१	१८	नाशकोत्	नाशक्नोत्
१४२	२	विबुधैसार्धं	विबुधैस्सार्धं
१४७	४	विभर्तुं	बिभर्तुं

टम्	पङ्क्तिः	अशुद्धम्	शोधनम्
५४	१३	आरूरोह	आरुरोह
६३	१३	भक्तया	भक्त्या
७३	२०	दह्यमाणः	दह्यमानः
०४	१८	चत्वरिंशश्लोकाः	चत्वारिंशच्छ्लोकाः
०९	५	छद्मनाच	छद्मना च
१८	४	योग्यहेतेरहं	योग्यहेतोरहं
२४	२	यासामहे	यास्यामहे
६४	९	बाहूनूरूश्च	बाहूनूरुंश्च
८८	१६	सन्तत	संनत
८९	८	परिष्कृतस्	परिष्कृतम्
०६	३	मरिष	मारिष
४५	१६	सन्निकृतान्	सन्निकृत्तान्
४८	१९	देहादिवाद्भृते	देहादिवोद्भृते
६५	२१	न वांस्तूर्णं	नवांस्तूर्णं
६८	४	मयासीत्यसकृन्मुदा	मयासीदसकृन्मुदा
९८	१६	द्रवन्ति	द्रवन्ति
०९	९	चिच्छदे	चिच्छिदे
११	१७	अभ्यधावद्दृढं	अभ्यधावद्दृढं
५१	१७	महुश्	मुहुश्
५२	२	तवाभिन्युस्	तवाभिमन्युस्

पुटम्	पङ्क्तिः	अशुद्धम्	शोधनम्
४५६	१३	पुरुषाथमः	पुरुषाधमः
४६३	११	दातुमर्हार्हसि	दातुमिहार्हसि
४८७	२१	ऽतु	ऽस्तु
४९२	६	पाण्डवेयैविरुद्धम्	पाण्डवेयैर्विरुद्धम्
४९५	११	खषा परम	खषाःपरम
५००	१६	धातराष्ट्रं	धार्तराष्ट्रं
,,	१८	धातराष्ट्रः	धार्तराष्ट्रः
५०६	११	धन्विनान्	धन्विनाम्
५०७	३	वर्मुछिदः	वर्मच्छिदः
५२५	७	बीमत्सुं	बीभत्सुं
५४०	८	शुशुमे	शुशुभे
५४४	७	सौबस्य	सौबलस्य
५४५	७	शत्रुपापनः	शत्रुतापनः
५५५	१६	बीमत्सुः	बीभत्सुः
५६४	११	गण्डिवं	गाण्डिवं
५९९	८	अवप्लुस्य	अवप्लुत्य
६५९	१३	धनञ्जयस्य	धनञ्जयस्य
७०४	२	अञ्जलिकेन	अञ्जलिकेन
७३४	१५	मुासीत्	मासीत्

Printed by V. Venkateswara Sastrulu of
V. Ramaswamy Sastrulu & Sons at the 'Vavilla'Press, Madras.-1935.